आथर्वणोपनिषदः ।

श्रीनारायणभट्टकृतदीपिकाख्यटीकासहिताः ।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृताः प्रकाशिताः ।

द्वितीय संस्करणम् ।

कलिकातानगर्य्याम् ।

नारायणयन्त्रे

मुद्रिताः ।

ई १८९१ ।

Uttarpara Jaikrishna Public Library
Accn No. ২৬০৭৭ Date ২৬.১১.৮৫

सूचीपत्रम् ।

विषयः			पृष्ठाङ्कः ।
१ शिर उपनिषत्	—	—	१
२ गर्भोपनिषत्	—	—	२७
३ नादविन्दूपनिषत्	—	—	४१
४ ब्रह्मविन्दूपनिषत्	—	—	४६
५ अमृतविन्दूपनिषत्	—	—	५२
६ ध्यानविन्दूपनिषत्	—	—	७१
७ तेजोविन्दूपनिषत्	—	—	८४
८ योगशिखोपनिषत्	—	—	८९
९ योगतत्त्वोपनिषत्	—	—	९३
१० सन्न्यासोपनिषत्	—	—	९९
११ आरुणेयोपनिषत्	—	—	१३३
१२ ब्रह्मविद्योपनिषत्	—	—	१४५
१३ क्षुरिकोपनिषत्	—	—	१५१
१४ चूलिकोपनिषत्	—	—	१६४
१५ अथर्वशिखोपनिषत्		—	१७१
१६ ब्रह्मोपनिषत्	—	—	१८०
१७ प्राणाग्निहोत्रोपनिषत्		—	१९७
१८ नीलरुद्रोपनिषत्	—	—	२०६
१९ कण्ठश्रुत्युपनिषत्	—	—	२१३
२० पिण्डोपनिषत्	—	—	२२५
२१ आत्मोपनिषत्	—	—	२२८

२२ रामपूर्वतापन्युपनिषत्	—	२३२
२३ रामोत्तरतापन्युपनिषत्	—	२७४
३४ हनुमदुक्तरामोपनिषत्	—	२८४
२५ सर्वोपनिषत्सारः —	—	३०१
२६ हंसोपनिषत् —	—	३१०
२७ परमहंसोपनिषत् —	—	३२०
२८ जाबालोपनिषत् —	—	३३७
२९ कैवल्योपनिषत् —	—	३५३

शिर उपनिषत्।

ओं देवा ह वै स्वर्गलोकमायंस्ते रुद्रमपृच्छन् को भवानिति। सोऽब्रवीदहमेकः प्रथममासी-

---

रुद्राध्यायोऽथर्वशिरः सप्तखण्डो ह्यथर्वणः।
शिरो भित्त्वा यतो जातं ततोऽथर्वशिरः स्मृतम्॥

योगमारूढ़स्य महत्पदमारुरुक्षोर्मुनेर्देवादिकृतविघ्नसम्भावनागम्यार्थोपदेशापेचा च स्यात्; अतो विघ्ननिवृत्तये उपदेशाय च रुद्रस्तुतिरारभ्यते। किञ्च योगोऽपि तत्प्रसादं विना न सिध्यति। तथा च स्मृतिः।

"न सिध्यति महायोगो मदीयाराधनं विना।
मत्प्रसाद-विहीनानां मन्निन्दापरचेतसाम्।
पशूनां पाशबद्धानां योगः क्लेशाय जायते।
सन्त्यज्याद्यां शिवेनोक्तां पूजां सन्त्यज्य मामिकाम्"॥ इति।

तत्प्रसादे च निर्विघ्नसिद्धिरुक्ता।

"युञ्जतः सततं देवि! सर्वलोकमयं शिवम्।
मद्ध्यानासक्तचित्तस्य तुष्यन्ते सर्वदेवताः॥
तस्मात् सम्पूज्य युञ्जीत मत्प्रसादेन खेचरी।
अन्यथा क्लिश्यतेऽत्यर्थं न सिद्धिर्जन्मकोटिभिः॥ इति।

अमृतविन्दौ, "रुद्राराधनतत्परस्य" इति। तस्मात् रुद्राराधनस्य योगसिद्धाङ्गत्वेनोक्तत्वात् सिद्धिमिच्छता रुद्रोऽप्यवश्यं सेव्य इति रुद्रस्तुतिरारभ्यते, ओं देवा इति॥ आख्यायिकाविद्यास्तुत्यर्थाः 'देवाः' इन्द्रियाणि इन्द्रादयो वा 'स्वर्ग'

वर्त्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति। सोऽन्तरादन्तरं प्राविशत्, दिशश्चान्तरं प्राविशत्, सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्च उदञ्चोऽहम् अधश्चोर्द्ध्वश्चाहं दिशश्च प्रतिदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं सावित्र्यहं गायत्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहं छन्दोऽहं सत्योऽहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहं गौरहं गौर्य्यहमृगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहं गुह्योऽहमरण्योऽहमक्षरमहं क्षरमहं पुष्करमहं पवित्रमहमुग्रश्च बलिश्च पुरस्ताज्ज्योतिरित्यहमेव, सर्वेभ्यो मामेव

सत्त्ववृत्तिं कैलासं वा ऋषिभिर्दृतं 'रुद्रम्' आत्मानम् उमापतिं वा। 'आसीत्' व्यत्ययेन प्रथमपुरुषः। 'वर्त्तामि' व्यत्ययेन परस्मैपदम्। 'सः' रुद्रो मल्लक्षणः 'अन्तरादन्तरं' गुह्यादगुह्यं प्रविष्टः 'दिशो व्यन्तरं' जातावेकवचनं, दिशां विविधम् अन्तरम् 'प्राविशत्' प्राविशम्, सर्वात्मा सर्वव्यापी च बभूवेत्यर्थः। 'अपुमान्' नपुंसकम्। 'पुष्करं' पद्मं, 'पुष्करं पङ्कजे व्योम्नि पयः-करिकराग्रयोः। औषधी-द्वीप-विहङ्ग-तीर्थ-रोगोरगान्तरे' इति विश्वः। अहमेव 'सर्वं' भावाः व्योममेव, स इति सोऽहमेव सर्वात्मकोऽपि व्योममेव व्योमात्मतां शुद्धात्मतां न जहामीत्यर्थः। व्योमशब्दोऽकारा-

स सर्वैः समा यो मां वेद स देवान् वेद सर्वांश्च वेदान् साङ्गानपि ब्रह्म ब्राह्मणैश्च गां गोभिर्ब्राह्मण्यान् ब्राह्मण्येन हविर्हविषा आयुरायुषा सत्येन सत्यं धर्मेण धर्मं तर्पयामि स्वेन तेजसा। ततो ह वै ते देवा रुद्रमपृच्छन्, ते देवा रुद्रमपश्यन्, ते देवा रुद्रमध्यायन्, ते देवा ऊर्ध्ववाहवो रुद्रं स्तुवन्ति ॥ १ ॥

न्तोऽयम्। तर्हि त्वमुत्कृष्टः, अन्ये अपकृष्टा इति ब्रह्मणि वैषम्यं स्यात्? अत आह, सर्वे समा इति। 'समाः' तुल्याः मत्तो भेदकैर्विशेषैः रहिताः, तेन मत्तोऽन्यन्नास्तीति कथमुत्कर्षापकर्षसम्भव इति भावः। ऐक्यज्ञानफलमाह, यो मामिति। साङ्गानपि वेदेत्यनुषङ्गः; ब्रह्म ब्राह्मणैस्तर्पयामीत्यग्रतनेन सम्बन्धः। 'ब्रह्म' वेदः, स ह्यभ्यासेन तृप्तो भवति, तदुक्तं, "विद्यामभ्यसनेनेव प्रसादयितुमर्हसि" इति। 'गां' स्त्रियं 'गोभिः' पुंभिः, गोशब्देन लिङ्गमेव विवक्षितं न सुरभित्वमनुगतञ्च जातिः। 'ब्राह्मण्येन' ब्रह्मतेजसा, 'हविः' ओदनादि, 'हविषा' संस्कारकेण सर्पिरादिना. पित्राद्यायुः पुत्राद्यायुषा, सत्येन 'सत्यं' सत्यवादी, सत्यवादि-दर्शनेन तृप्तो भवति। एवं धार्मिको धार्मिकस्य, स्वेनेति यत्तृप्तिहेतुस्तन्ममैव तेजः। तदुक्तम्।

"या या प्रकृतिरुदारा यो योऽप्यानन्दसुन्दरो भावः।
यदपि च किञ्चिद्रमणीयं वस्तु शिवस्तत्तदाकारः" ॥इति।
"यद्यद्विभूति मत्सत्त्वम्" इत्यादि च ॥

'रुद्रमपृच्छन्' तात्पर्य्येण पारमार्थिकं रूपं पुनरपृच्छन्

ओं यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च विष्णुस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च स्कन्दस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्चेन्द्रस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्चाग्निस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च वायुस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च सूर्य्यस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च सोमस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् ये चाष्टौ ग्रहास्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् ये चाष्टौ प्रतिग्रहास्तस्मै वै नमो०
यो वै रुद्रः स भगवान् यच्च भूस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च भुवस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च स्वस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च महस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् या च पृथिवी तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्चान्तरिक्षं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् या च द्यौस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् याश्चापस्तस्मै वै नमोनमः

'अपश्यन्' यथाभूतं ज्ञातवन्तः, ततो ध्यातवन्तः, तत उच्चैः स्तुवन्ति स्म ॥ १ ॥

ततो ब्रह्म-विष्णु-स्कन्देन्द्राग्नि-वायु-सूर्य्य-सोमाष्टग्रहाष्ट-

यो वै रुद्रः स भगवान् यच्च तेजस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च कालस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च यमस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यश्च मृत्युस्तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्चामृतं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्चाकाशं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च विश्वं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च स्थूलं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च सूक्ष्मं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च शुक्लं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च कृष्णं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च कृत्स्नं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च सत्यं तस्मै वै नमोनमः
यो वै रुद्रः स भगवान् यच्च सर्वं तस्मै वै नमोनमः ॥२॥

भूस्ते आदिर्मध्यं भुवस्ते स्वस्ते शीर्षं विश्वरूपोऽसि ब्रह्मैकस्त्वं द्विधा त्रिधा वृद्धस्त्वं शान्ति-

---

प्रतिग्रह-भूर्भुवः-स्वः-पृथिव्यन्तरिक्ष-दिवप्--तेज--आकाश--काल-यम-मृत्यमृत--विश्व-स्थूल-सूक्ष्म-शुक्ल--कृष्ण--कृत्स्न--सत्य--सर्व-रूपै-रेक-त्रिंशत्पर्य्यायैः अस्तुवन् अत्र यमपर्य्यायानन्तरमन्तक-पर्य्यायोऽपि पठनीयः,,तेन त्र्यम्बक-मन्त्राक्षर-सङ्ख्यया द्वात्रिंशत् पर्य्याया भवन्ति ॥ २ ॥

स्त्वं पुष्टिस्त्वं हुतमहुतं दत्तमदत्तं सर्वमसर्वं विश्वमविश्वं कृतमकृतं परमपरं परायणञ्च त्वम्। अपामसोमममृता अभूमागन्मे ज्योतिरविदामदेवान्। किं नूनमस्मान् कृणवदरातिः। किमुधूर्त्तिरमृतं मर्त्यस्य सोमसूर्य्यपुरस्तात् सूक्ष्मः पुरुषः। सर्वं जगद्धितं वा एतदक्षरं प्राजापत्यं सौम्यं सूक्ष्मं पुरुषं ग्राह्यमग्राह्येण भावं भावेन

ब्रह्मरूपेणैकस्त्वं ; विराड्रूपेण स्तुतिमाह, भूरिति। 'आदिः' पादौ 'मध्यम्' उदरम्, ब्रह्मरूपेणैकस्त्वं 'द्विधा बुद्धः' सदसद्रूपेण, 'त्रिधा बुद्धः' गुणत्रयभेदेन। 'परायणं' परमयनं स्थानम्। 'अपामसोमम्' इति त्वयि दृष्टे सर्वं सिद्धमित्यर्थः। 'कृणवत्' छिन्दन् 'अरातिः' शत्रुः, अस्मान् प्रति न किञ्चिदित्यर्थः। 'धूर्त्तिः' हिंसाप्यस्माकं किं त्वदभिरचितानां त्वद्रूपमापन्नानां हिंसाकृतदोषाभावात्; यद्गीतासु, "हत्वापि स इमान् लोकान् न हन्ति न निबध्यते" इति ; अथवा शत्रुकृता हिंसा त्वच्छरणानस्मान् न स्पृशतीत्यर्थः। 'अमृतम्' आदेयं, 'मर्त्यं' हेयञ्च त्वदास्या कृतार्थानां नो नास्तीत्यर्थः। सोमश्चासौ सूर्य्यश्च 'सोमसूर्य्यः' तेनोभयात्मक एक इत्यर्थः। सोमसूर्य्य इत्युपलक्षणं पञ्चभूतानि सोमसूर्य्यौ यजमानश्चेत्यष्टमूर्त्तिरीश्वरः 'पुरस्तात्' पूर्वस्यां दिशि उदेतीति शेषः। सूक्ष्मो यः पुरुषः स एव 'सर्वं' स्थूलं सम्पन्नम्।

ननु सर्वभावापत्त्या किमर्थं सृष्टिं तनोतीत्यत आह, जगदिति। जगतां हितं 'जगद्धितं' 'एतदक्षरं' ब्रह्म, जीवभोगापवर्गार्थं कृपया सृष्टिरिति भावः। 'प्राजापत्यं' प्रजापतिरूपेण

सौम्यं सौम्येन सूक्ष्मं सूक्ष्मेण वायव्यं वायव्येन ग्रसति, तस्मै महाग्रासाय वै नमोनमः।

हृदिस्था देवताः सर्वा हृदि प्राणा प्रतिष्ठिताः।
हृदि त्वमसि यो नित्यं तिस्रो मात्राः परस्तु सः॥

तस्योत्तरतः शिरो दक्षिणतः पादौ, य उत्तरतः स ओङ्कारः, य ओङ्कारः स प्रणवः, यः प्रणवः स

ग्रसति, तथा भावादिकं तेनैव रूपेण पालितम् 'सौम्यं' सामोऽन्नं यद्रूपेणाप्यायितं 'सूक्ष्मं पुरुषं' जीवं 'ग्राह्यं' देहभावापन्नम् 'अग्राह्येण' कालरूपेण ग्रसति स्थूलस्य सूक्ष्मेऽन्तर्भावात्. 'वायव्यं' प्राणाख्यं 'वायव्येन' बाह्यवायुरूपेण 'महाग्रासाय' उक्तप्रकारेण सर्वभक्षकाय मृत्युमृत्यवे।

'हृदिस्थाः' अन्तःकरणवर्त्तिन्यः 'देवताः' इन्द्रियाधिष्ठातारः 'प्राणाः' वागादयः त्वम् अन्तर्यामिरूपेण यो हृदि त्वमसि तस्मै नमो नम इत्यन्वयः, अतएव स्वप्ने अन्तःकरणेनैव सर्वेन्द्रियव्यवहार इत्युक्ता ध्यानेन देवा उपरताः। इदानीं श्रुतेराख्यायिकामुपसंहृत्य स्वेन रूपेणाह, तिस्र इति। 'तिस्रो मात्राः' अकारोकार-मकाराः सर्वदेवमयाः 'परस्तु' अर्द्धमात्रात्मकः 'सः' शिवः। तस्येति मात्रात्रयातीतो हृदि त्वमसीत्युक्तम्, तत्र सन्देहः, कस्यां दिशि तस्य शिरः? कस्यां वा पादौ? इत्यत उक्तं, 'तस्य' परस्य हृदिस्थस्य उत्तरतः शिरो वर्त्तते, तेन उत्तरमार्गेण गतानां यातायातेन भवतो रुद्रमुखादुपदेशलाभात्; 'दक्षिणतः पादौ' तेन दक्षिणमार्गगामिनां गतागते भवतः, पादयोर्गमनशीलत्वात्; य उत्तरतः स

सर्वव्यापी य: सर्वव्यापी सोऽनन्त:, योऽनन्तस्तत्तारं, यत्तारं तच्छुक्लं, यच्छुक्लं तत्सूक्ष्मं, यत् सूक्ष्मं तद्वैद्युतं, यद्वैद्युतं तत् परं ब्रह्म, यत् परं ब्रह्म स एक:, य: एक: स रुद्र:, यो रुद्र: स ईशान:, य ईशान: स भगवान् महेश्वर: ॥ ३ ॥

अथ कस्मादुच्यते ओङ्कार:, यस्मादुच्चार्य्यमाण एव प्राणान् ऊर्द्धमुत्क्रामयति तस्मादुच्यते ओङ्कार: । अथ कस्मादुच्यते प्रणव:, यस्मादुच्चार्य्यमाण एव ऋग्यजु:सामाथर्वाङ्गिरसं ब्रह्म ब्राह्मणेभ्य: प्रणामयति नामयति च तस्मादुच्यते

ओङ्कार:, स प्रणव इति तथा प्रसिद्धे: ; 'सर्वव्यापी' सर्वव्यापकोऽपि ब्रह्मवाचकत्वात् सोऽनन्त:, अन्यथा सर्वव्याप्त्यसम्भवात् ; तारम् 'शुक्ल' निर्म्मलं 'सूक्ष्मम्' इन्द्रियाद्यग्राह्यम् । कथं तर्हि तज्ज्ञानम् ? अत उक्तम् 'तद्वैद्युतं' स्वप्रकाशं 'परं ब्रह्म' सर्वबृहत् अन्येषामात्मलाभस्य तदधीनत्वात् ; अत एवैक: अन्यात्मनस्तदपेक्षत्वेन तदनतिरेकात् । 'स:' रुद्र: "एको रुद्र" इति मन्त्रवर्णात्, 'ईशान:' स्वतन्त्र:, अतएव 'भगवान्' षड्विधैश्वर्य्यसम्पन्न: एष 'महेश्वर:' अनवधिकैश्वर्य्य: सर्वेऽप्येते प्रवृत्तिनिमित्तभेदेऽप्येकार्था: समानाधिकरणवत् ॥३॥

पर्य्यायत्व-शङ्का-निवृत्तये त्रयोदशानामपि प्रवृत्ति-निमित्त-भेदं पृच्छन्ति, अथेति । ऊर्द्धोत्क्राम-शब्दयोरोङ्कार इति निपातनम्, उपायस्य उपायान्तराविरोधान्न व्याकरण-विरोध: शङ्क्य:, एवमुत्तरेष्वपि । चतुर्वेदात्मकं ब्रह्म 'ब्राह्मणेभ्य:'

प्रणवः । अथ कस्मादुच्यते सर्व्वव्यापी, यस्मादुच्चार्य्यमाण एव यथा स्नेहेन पललपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्यते सर्व्वव्यापी । अथ कस्मादुच्यतेऽनन्तः यस्मादुच्चार्य्यमाण एव तिर्य्यगूर्द्ध्वमधस्ताच्चास्यान्तो नोपलभ्यते तस्मादुच्यतेऽनन्तः । अथ कस्मादुच्यते तारं, यस्मादुच्चार्य्यमाण एव गर्भ-जन्म-व्याधि-जरा-मरण-संसार-महाभयात् तारयति त्रायते च तस्मादुच्यते तारम् । अथ कस्मादुच्यते शुक्लं, यस्मादुच्चार्य्यमाण एव क्लन्दते क्लामयति च

अध्येतृभ्यः 'प्रणामयति' प्रणतं नम्रं करोति 'नामयति' प्रकरोति तत्तन्नम्रमिव करोति स प्रणवः, 'पललं' तिलपिष्टं तस्य 'पिण्डं' गुड़िका, इव शब्दो वाक्यालङ्कारे ; यथा तिलपिष्टपिण्डं सर्व्वतः 'स्नेहेन' तैलेन व्याप्तम्, एवं पटे तन्तुमिव कार्य्यमात्रे 'ओतञ्च प्रोतञ्च' तानवितानभावमापन्नं 'शान्तरूपं' ब्रह्म 'उच्चार्य्यमाणः' वाचा प्रयुक्तः प्रतीतः एवं सर्व्वत्र, 'अनु' अनुसृत्य 'प्राप्तः' भेदमापन्नः प्रतिमिव देवेन, तथा वाचकभावेन 'व्यतिषक्तः' सम्बद्धः सर्व्वात्मकं ब्रह्म तद्रूपेण व्याप्नोति वाचकतया वा सम्बध्नाति सर्व्वव्यापीत्यर्थः । एवं प्रणवस्य सर्व्वव्यापित्वादिकम् अर्थाभेदविवक्षया द्रष्टव्यम् । उच्चार्य्यमाणेऽस्मिन् 'तस्य' ओङ्कारस्य अन्तो ब्रह्मैक्यान्नोपलभ्यते तेनानन्तः । भाष्य 'क्लन्दते' कन्दते क्रन्दते ध्वनि-

तस्मादुच्यते शुक्लम्। अथ कस्मादुच्यते सूक्ष्मं, यस्मादुच्चार्य्यमाण एव सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति, सर्वाणि चाङ्गान्यभिमृशति, तस्मादुच्यते सूक्ष्मम्। अथ कस्मादुच्यते वैद्युतं, यस्मादुच्चार्य्यमाण एव व्यक्ते महति तमसि द्योतयति तस्मादुच्यते वैद्युतम्। अथ कस्मादुच्यते परम्ब्रह्म, यस्मात् परमपरं परायणञ्च बृहद्बृहत्या बृंहयति तस्मादुच्यते परम्ब्रह्म। अथ कस्मादुच्यते एकः, यः सर्वान् प्राणान् सम्भक्ष्य सम्भक्षणेनाजः

रूपेण व्यज्यते 'क्लामयति च' उदात्ततया उच्चारणे प्रयत्नाधिक्यात् शरीरं क्लमयुक्तं करोति तत् शुक्लम्; पूर्वोत्तरपदयोराद्यन्तलोपः। सूक्ष्मो भूत्वा अङ्कुरावस्थायामेवापि 'शरीराणि' देहावयवान् स्वहेतुप्राणाभेदेन प्रयत्नाभेदेन ब्रह्माभेदेन वा 'अधितिष्ठति' आरोहति 'अभिमृशति' सम्बध्नाति व्याप्नोति च सूक्ष्मम्; तस्मात् अव्यक्ते महति 'तमसि' अविद्यायां 'द्योतयति' तन्निरासेन ब्रह्मप्रकाशं करोति तत् वैद्युतम् 'परमपरं' सगुणं निर्गुणञ्च 'परायणं' परमगति, तस्मात् परमित्यन्वयः।

ब्रह्मशब्दनिमित्तमाह, बृहदिति। यस्मात् 'बृहत्' महत्, तस्मात् ब्रह्मेत्यन्वयः। निमित्तान्तरमाह, बृहत्येति। 'बृहत्या' मायया 'बृंहयति' वर्द्धयति कार्य्यं, तेन 'परं ब्रह्म' ओङ्कारः। यः सर्वान् प्राणान्' प्राणाभिव्यञ्जकान् वेदान्, अर्थपक्षे वागादीन् 'सम्भक्ष्य' संहारकाले आत्मनि उपसंहृत्य

संसृजति विसृजति तीर्थमेके व्रजन्ति तीर्थमेके दक्षिणाः प्रत्यञ्च उदञ्चः प्राञ्चोऽभिव्रजन्त्येके तेषां सर्वेषामिह सङ्गतिः। साकं स एको भूतश्चरति प्रजानां तस्मादुच्यते एकः। अथ कस्मादुच्यते रुद्रः, यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्य रूपमुपलभ्यते तस्मादुच्यते रुद्रः। अथ कस्मादुच्यते ईशानः, यः सर्वान् देवानीशते ईशानीभिर्जननीभिश्च

सम्भक्षणेन कृत्वा 'संसृजति' तैरेकीभवति, स्वयन्तु अजः वाचा विरूपनित्ययेति लिङ्गात्, नित्यं विज्ञानमिति श्रुतेश्च, पुनः सिसृक्षायां विसृजति चेति कार्य्यकारणयोरभेदात् मृदादिवदेकः, अत एव "कृते तु प्रणवो वेदः" इत्याद्युपपन्नम्। कारणत्वेनैक्यम् उक्त्वा फलत्वेनापि ऐक्यं मन्त्रेणाह, तीर्थमिति। 'तीर्थम्' उपायः तद्भजनानुष्ठानम्; दिक्चतुष्कग्रहणं तद्यानात्वोपलक्षणार्थं नानामार्गैः अभ्युपायैः सर्वेषाम् 'इह' ईश्वरे 'सङ्गतिः' फलत्वेन प्राप्तिः। 'साकं' सहैव सः 'एको भूतः' सिद्धः 'चरति' स्वेच्छया प्रवर्त्तते भक्षयति वा प्रजानामशुभकर्म-विपाकम्; तदुक्तं कविभिः,

"बहुधाप्यागमैर्भिन्नाः पन्थानः सिद्धिहेतवः।
त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे" ॥ इति।

वाच्यधर्मेण वाचको व्यवह्रियते। 'ऋषिभिः' ज्ञानिभिः द्रुतं गम्यते इति रुद्रः। 'ईशते' ईष्टे इति ईशानः, ईश्यते एभिरिति ईशिन्यः ताभिः, देवान् स्वेच्छया नियुनक्ति अजातानां विनियोगासम्भवात्, जननीभिश्च शक्तिभिः' जनयन्ति

शक्तिभिः। अभित्त्वा शूर! इन्द्र! नुमः अदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्रतस्थुष इति तस्मादुच्यते ईशानः। अथ कस्मादुच्यते भगवान् महेश्वरः, यस्माद्भक्ताज्ञानेन भजत्यनुगृह्णाति च वाचं संसृजति विसृजति च सर्वान् भावान् परित्यज्यात्मज्ञानेन योगैश्वर्य्येण महति महीयते तस्मादुच्यते भगवान् महेश्वरः, तदेतद्रुद्रचरितम् ॥ ४ ॥

ईशते। ईशानत्वे मन्त्रसङ्गतिमाह, अभीति। हे 'शूर!' इन्द्र! परमेश्वर! 'त्वा' त्वाम् 'अभि' अभितो नुमः' आभिमुख्येन अतिशयेन स्तुमः, 'अदुग्धाः' दुग्धरहिताः पयोऽर्थिनो वत्साः 'धेनवः' दोग्ध्रीः गा इव स्तुवन्ति, द्वितीयार्थे प्रथमा; 'अदुग्धाः' प्रसूताः 'धेनवः' गावो वत्सानिवेति न व्याख्यातम्, स्नेहसाम्येऽप्युपासकस्य मातृता, उपास्यस्य वत्सतेति हीनोपमादोष-प्रसङ्गात्। 'जगतः' जङ्गमस्य 'तस्थुषः' स्थावरस्य ईशानम्, आदरार्थं पुनः प्रयोगः, 'स्व ईशं' दिव्यदृष्टिम्। 'भक्ता' भजनकर्त्ता, तस्यैवार्थो ज्ञानेनेति; यद्वा 'भक्ताः' भक्तान् ज्ञानेन 'भजति' सेवते अनुगृह्णाति चेति भग, शब्दार्थः, 'वाचं' वेदाख्यां संसृजति ब्रह्मादिमुखे विसृजति स्वमुखादिति वान् शब्दार्थः। महेश्वरशब्दार्थमाह, यदिति। 'भावान्' विषयान् 'परित्यज्य' त्याजयित्वा वेदमुपदिश्य तदर्थबोधनद्वारा विषय-वैराग्यमुत्पाद्य अधिकारिणं कृत्वा दत्तेन आत्मज्ञानेन मनःस्थिरतायै च अष्टाङ्गयोग-जन्यैश्वर्य्येण चभक्तान्

एको ह देवः प्रदिशोनुसर्वाः
पूर्वो ह जातः स उ गर्भे अन्तः।
स एव जातः स जनिष्यमाणः
प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः॥

'महति' पूजयति; तेन परानुग्रहेण च 'महीयते' महिमानं याति जगद्विख्यातयशा भवति; तेन भगवान् महेश्वरः, "अक्षरसाम्येन निर्ब्रूयात्" इति न्यायेनेदं निर्वचनम्।

ननु परब्रह्मपर्य्यायादारभ्य उच्चार्य्यमाण एवेति कस्मान्नोक्तम्? अत आह, तदेवद्रुद्रचरितमिति। नाम-नामिनोरैक्य-बोधनायोङ्कारोपक्रमस्य आदित आरभ्य रुद्रस्यैवैतद्वर्णित-मित्यर्थः॥ ४॥

ईशस्य प्रतिज्ञातमैक्यमुपपादयितुं साधनानि च वक्तु-मवयवशः प्रणवस्योपासनायाः पृथक् फलानि प्रतिपाद्य ईशभक्तिप्रधानेन ज्ञानेनैव परमपुरुषार्थ-सिद्धिरिति प्रतिपाद-यितुञ्चोत्तरखण्ड आरभ्यते, एको ह देव इति। एक एव देवः सर्वा दिशः 'प्रजातः' सर्वदिक् रूपो बभूव; दिग्ग्रहणं तत्-स्थवस्तूनामप्युपलक्षणम्।

ननु कथमेकस्यानेकत्वसम्भवः? इत्याशङ्क्य सर्वाश्चर्य्ये भगवति किं किं रूपं न सम्भवति? इत्याशयेन परिहरति, पूर्वो हेति। पूर्वः 'स उ' स एव 'गर्भे' जगतो मध्यावस्थायां, स एव 'अन्तोऽपि' सर्वान्ते वर्त्तमानोऽपि। स एव उत्प-त्त्युपाधिना कालविरोधं परिहरति, स एवेति। ननु कथ-मस्यानुभवः? इत्याशङ्क्याह, प्रत्यङ्ङिति। हे 'जनाः'!

एको रुद्रो न द्वितीयाय तस्मै
य इमाँल्लोकानीशत ईशानीभिः ।
प्रत्यङ्जनास्तिष्ठति सञ्चुकोचा-
न्तकाले संसृज्य विश्वा भुवनानि गोप्ता ॥
यो योनिं योनिमधितिष्ठत्येको
येनेदं सर्वं विचरति सर्वम् ।
तमीशानं वरदं देवमीड्यम्
निचाय्येमां शान्तिमत्यन्तमेति ॥

आबाल-स्त्री-गोपालाः ! सर्वजनीनमनुभवं पश्यन्तीति श्रुते-र्वचः ; किं तत् ? 'सर्वतोमुखः' आदित्यवत् सर्वेषां सम्मुखः, 'प्रत्यङ' अवस्थात्रयानुभूयमानाहम्प्रत्ययवेद्यात्मरूपेण, तिष्ठति यः, स ईशः ।

द्वितीयगन्धमपि निषेधति, एक इति । स द्वितीयमैच्छ-दिति श्रुतेः प्राप्तां सहायापेक्षां निषेधति, न द्वितीयाय तस्थाविति । तत्तु लीलामात्रं, द्वितीय-चेतनाभावादेको द्रष्टेति श्रुतेः ; 'सञ्चुकोच' इति 'अन्तकाले' प्रलयकाले सङ्कोचं कृतवान्, 'संसृज्य' व्याप्य ।

ननु बहवः शरीरिणश्चेतना दृश्यन्ते ; एकत्वन्तु ईश्वरा-पेक्षमेवेत्यत आह, यो योनिं योनिमिति । सर्वे जीवा व्युच्चरन्तीति श्रुतेः, विस्फुलिङ्ग इव ततो भिन्न एव इति भावः । ज्ञानशक्तिवत् क्रियाशक्तिरप्येकस्यैवास्तीत्याह, सर्व-मिति । सर्वं 'सञ्चरति' प्रविशति 'विचरति' नाना गच्छति च, 'येन' शक्तिमता इत्यर्थः । सर्वगुणैः सम्पन्नः स एव सेव्य

क्षमां हित्वा हेतुजालस्य मूलं
बुद्ध्या सञ्चितं स्थापयित्वा तु रुद्रे।
रुद्रमेकत्वमाहुः॥
शाश्वतं वै पुराणमिषमूर्जेण पशवोऽनुनामयन्तं मृत्युपाशान्। तदेतेनात्मन्नेतेनार्धचतुर्थेन

इत्याह, तमिति। 'वरदं' सकामानामप्युपास्यं 'देवं' स्वतो द्रष्टारम् 'ईड्यं' स्तुत्यं वेदानां 'निचाय्य' नितरां सर्वभावेन पूजयित्वा 'इमाम्' ईश्वरावस्थामेव 'अत्यन्तशान्तिं' कैवल्याख्याम् एति।

तत्प्राप्त्यन्तरङ्गोपायानाह, क्षमामिति। 'हेतुजालस्य' हेतुवाद-कल्पना-समूहस्य 'मूलं' कारणभूतां 'क्षमां' भूमिम्, अविवेकदृष्टिलक्षणां 'हित्वा' त्यक्त्वा 'बुद्ध्या' निपुणधिया 'सञ्चितं' स्वीकृतं वस्तु रुद्रे 'स्थापयित्वा' समर्प्य "तत् कुरुष्व मदर्पणम्" इत्युक्तत्वात्, रुद्रमेव 'एकत्वम्' एकभावमेकरसमेति इत्यनुषङ्गः; 'आहुः' इति आहुराचार्य्या इत्यर्थः। कीदृशं रुद्रं? 'शाश्वतं' सर्वकालव्यापिनं, 'पुराणं' पुरापि नवं न कदाचिज्जीर्णम्, 'इषम्' अन्नम्, 'ऊर्जेन' बलेन सह 'पशवः' द्वितीयार्थे प्रथमा, पशून् 'अनुनामयन्तम्' अधीनीकुर्वन्तं भक्तेभ्योऽर्पयन्तमिति यावत्; मृत्युपाशान् नामयन्तं न्यक्कुर्वन्तं तेभ्यो मोचयन्तमिति यावत्, भक्तिमुक्तिप्रदमित्यर्थः।

इदानीं प्रणवस्य मात्राभेदेन ध्यानभेदस्य फलानि वक्तुं प्रथमं प्राधान्यात् चतुर्मात्रस्य तस्य फलमाह, तदेतेनात्मन्निति। 'तत्' तस्मात् पूर्वोक्तप्रकारात् 'एतेन' प्रणवेन 'आत्मन्' आत्मनि 'एतेन' आदृतेन आगतेन आत्मप्रतिपाद-

मात्रेण शान्तिं संसृजति पशुपाशविमोचनम्। या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता वर्णेन यस्तां ध्यायते नित्यं स गच्छेद् ब्रह्मपदम्। या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा वर्णेन यस्तां ध्यायते नित्यं स गच्छेद्वैष्णवं पदम्। या सा तृतीया मात्रा ईशानदेवत्या कपिला वर्णेन यस्तां ध्यायते नित्यं स गच्छेदैशानं पदम्। या सार्ध-चतुर्थी मात्रा सर्वदेवत्याऽव्यक्तीभूता खं विचरति शुद्धा स्फटिकसन्निभा वर्णेन यस्तां ध्यायते नित्यं स गच्छेत्पदमनामयम्। तदेतदुपासीत मुनयो

केन, अर्द्धा चतुर्थी मात्रा यस्य तेन ओङ्कारेण शान्तिं संसृजति ईश्वरः; तथा, पशुपाश-विमोचन-शान्तिद्वारा कर्मपाशहानिं करोति। प्रत्येकमात्राणां फलमाह, या सेति। 'प्रथमा' अकाररूपा अर्द्धचतुर्थी मात्रा, चतुर्थी अर्द्धरूपा मात्रेत्यर्थः, 'सर्वदेवत्या' ब्रह्म-विष्णु-रुद्र-देवत्या 'अव्यक्तीभूता' अवर्णकत्वात् अव्यक्तीभूता वर्णरूपेणानिर्वाच्या 'खं' मूर्द्धानं प्रविचरति। 'शुद्धा' इति विशुद्धसत्त्वात्मक-त्वात् पद्मनामकं सहस्रदलं पद्ममिति प्रसिद्धम्। तदुक्तं, "मूर्ध्नि प्रतिष्ठितं पद्मं सहस्रदलसंयुतम्" इति; षोड़शदलं वा। तदिति। 'तत्' तस्मात् कारणात् 'एतत्' पद्मनामकं पदं चतुर्थमात्राद्वारा उपास्ते। तस्य पद्मान्तरवैलक्षण्यमाह,

वाम्वदन्ति न तस्य ग्रहणमयं पन्था विहित उत्तरेण येन देवा यान्ति येन पितरो येन ऋषयः परमपरं परायणञ्चेति ॥

वालाग्रमात्रं हृदयस्य मध्ये

विश्वं देवं जातरूपं वरेण्यम् ।

मुनयो वाग्वदन्तीति। 'अवाक्' अधोमुखं, यच्छ्रुतिः, "अवाङ्मुखश्चमस ऊर्द्धबुध्नस्तस्मिन् यशो निहितं विश्वरूपम्" इति। याज्ञवल्क्योऽपि।

"षोड़शच्छन्दसंयुक्तं शिरः पश्चादधोमुखात्।

निर्गल्यामृतधाराभिः" इति।

विशेषान्तरमाह, न तस्य ग्रहणमिति। गृह्यते अनेनेति 'ग्रहणं' नालं, तत् यस्य नास्ति, अधोमुखस्य तस्य मूर्द्धोपरि नालत्वादर्शनात्। एतत् भित्त्वा ये यान्ति, तेषां गतिमाह, अयमिति। 'अयं पन्थाः' ओङ्कारोपासन-लक्षणः, 'येन' उत्तरेण पथा देवा 'यान्ति' गच्छन्ति, 'पितरः' ज्ञानरहित-कर्म्मोपासनेन गच्छन्ति। ये न पितर इति पाठे, ये पितरः, ते उत्तरेण पथा न गच्छन्तीत्यर्थः। नेष्टापूर्त्तमात्रकारिणां ज्ञानरहितानामुत्तरेण पथा गतिरस्ति। अथवा 'पितरः' पितृमार्गाधिपाः कव्यवालादयः, तेषां हि ज्ञानित्वादुत्तरमार्ग एव; तत्रापि विशेषः, केचित् परमेव यान्ति; यदुक्तम्। "ब्रह्मणा सह ते सर्वे मुच्यन्ते" इति। केचित् 'अपरं' ब्रह्मलोकादि, येषाममति ज्ञानपरिपाके कल्पान्तरे पुनर्जन्म भवति। केचित् 'परायणं'

तमात्मस्थं ये तु पश्यन्ति धीरा:
तेषां शान्तिर्भवति नेतरेषाम् ॥
यस्मिन् क्रोधं याश्च तृष्णां क्षमाञ्चा-
क्षमां हित्वा हेतुजालस्य मूलम् ।
बुद्ध्या सञ्चितं स्थापयित्वा
तु रुद्रे रुद्रमेकत्वमाहु: ॥

वैकुण्ठ-कैलासादि । तत्र के परमेव यान्ति ? इत्यपेक्षायामाह, बालाग्रमात्रमिति । दुर्लक्ष्यत्वेन सूक्ष्मत्वोक्ति:, हृदयस्य मध्ये गह्वरे 'विश्वं' जाग्रदवस्थाभिमानिनं 'देवं' द्योतनात्मकं 'जातरूपं' सुवर्णवर्णं, जातरूपं जगद् यस्मादिति, 'वरेण्यं' वरणीयम् 'आत्मस्थं' बुद्धिप्रकाशकं 'शान्ति:' मुक्ति:, इतरेषां तदनभिज्ञानात् ।

इतरेषामप्राप्ते हेतुं त्याजयितुमाह, यस्मिन्निति । यस्मिन्निति विषयनिर्देश:, क्रोधविषयं क्रोधञ्च 'हित्वा' विस्मृत्येत्यर्थ:, या च तृष्णाविषया ताञ्च तृष्णां हित्वा, क्षमाग्रहणं सर्वसाधनोपलक्षणं, लब्धे तत्त्वे साधनान्यपि चेत्यर्थ:, "येन त्यजति सन्त्यजौ" इत्युक्ते: । 'हेतुजालस्य' विकल्पराशे: मूलभूतां 'क्षमां' भूमिम् अविवेकदृष्टिञ्च हित्वा 'बुद्ध्या' ब्रह्मार्पणधिया सञ्चितं विवेकदृष्ट्या रुद्रे स्थापयित्वा समर्प्य "यज्जुहोषि यदश्नासि" इत्यादि स्मृते: ।

ननु विष्णौ ब्रह्मणि चेति वक्तव्ये रुद्रे इति किमर्थमुच्यते ? इत्याशङ्काह, रुद्रमिति । रुद्रम् एकत्वमापन्नम् आहुराचार्या इत्यपेक्षितम् । अयं भाव: । भगवच्छब्दवाच्यो

रुद्रो हि शाश्वतेन वै पुराणेनेषमूर्जेण तपसा नियन्ताग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योममिति भस्म सर्वं ह वा इदं भस्म मन एतानि चक्षूंषि यस्माद् व्रतमिदं पाशुपतं यद्भस्म नाङ्गानि संस्पृशेत् तस्माद् ब्रह्म तदेतत् पाशुपतं पशुपाशविमोक्षणाय ॥ ५ ॥

महेश्वर एव शुद्धं ब्रह्म, स एव स्वमहिम्ना चित्तैश्वर्य्येण नामानि रूपाणि चापन्न इति। रुद्रो हीति। 'शाश्वतेन' अनवच्छिन्नेन 'पुराणेन' अपरिणामिना 'ऊर्जेन' ऐश्वर्य्येण तपसा च रुद्ररूपम् 'इषम्' अन्नं भूतजातं नियन्ता, "तृन् न लोकेति" षष्ठीनिषेधः। सर्वभूतजातं नियच्छति ऐश्वर्य्य-तपसोः शाश्वतं रुद्रस्य दशाव्ययत्वात्, तथा हि।

"ज्ञानं विरागितैश्वर्य्यं तपः शौचं क्षमा धृतिः।
स्रष्टृत्वमात्मसम्बन्धो ह्यधिष्ठातृत्वमेव वा।
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे" ॥ इति ॥

भस्मधारणमीश्वरस्य प्रसिद्धम्। तद्यथा, भस्म लीलया धृतं नायासकारि, तथा जगदपीति वक्तुमग्न्यादीनां भस्मोपमामाह, अग्निरित्यादि। विश्वं भस्मविशेषेण धृतमित्यर्थः। 'स्थलं' पृथिवी 'सर्वम्' आकाशादिकमपि 'इदं' जगत् 'चक्षूंषि' इन्द्रियाणि।

ननु किमर्थममङ्गलं भस्म दधाति? अत आह पशुपतेः रुद्रस्येदं व्रतम्; यस्मादिति। यद्यपि पूर्णकामस्य न च

योऽग्नौ रुद्रो योऽप्स्वन्तर्य ओषधीर्वीरुध आविवेश। य इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमोऽस्त्वग्नये। यो रुद्रोऽग्नौ यो रुद्रोऽप्स्वन्तर्यो रुद्र ओषधीर्वीरुध आविवेश। यो रुद्र इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमो-नमः। यो रुद्रोऽप्सु, यो रुद्र ओषधिषु यो रुद्रो वनस्पतिषु। येन रुद्रेण जगदूर्द्धं धारितं पृथिवी

व्रतेनापि, प्रयोजनं तथापि भक्तानुग्रहार्थं, व्रते मया कृते भक्ता अपि तथा कुर्य्युरिति; 'यत्' यस्मात् भस्म नाङ्गानि संस्पृशेदिति. व्रतं पशुपतिना प्रोक्तं पशुपतिना धृतञ्च भस्म, तस्मात् ब्रह्म ज्ञेयमिति स्तुतिः। फलमाह, तदिति। 'पशूनां' जीवानां 'पाशस्य' बन्धस्य, 'विमोचनाय' त्यागाय 'एतत्' व्रतं; भस्मधारणविधिः फलविशेषश्च कालाग्निरुद्रोपनिषदि द्रष्टव्यः॥ ५॥

अग्न्यादीनां रुद्ररूपतया रुद्रस्य चाग्निरूपतया अग्न्याद्यधिकरणतया च नमस्कर्त्तुं मन्त्रत्रयमाम्नातं योऽग्नौ रुद्र इत्यादि प्रकृत्यान्तः पादमव्यय इति प्रकृतिभावः, 'ओषधीः' व्रीह्याद्याः 'वीरुधः' गुल्माः; एकैकग्रहणं प्रदर्शनार्थम्।

"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति" स्मृतेः।

"या या प्रकृतिरुदारा यो योऽप्यानन्दसुन्दरो भावः।
यदपि च किञ्चिद्रमणीयं वस्तु शिवस्तत्तदाकारः"॥

इति च स्मृतेः।

'इमाः' इमानि विश्वानि 'चक्लृपे' कृतवान्; पृथिवी

द्विधा त्रिधा धर्त्ता धारिता नागा येऽन्तरिक्षे
तस्मै रुद्राय वै नमोनमः।

मूर्धानमस्य संशीव्याप्यथर्वा हृदयञ्च यत्।
मस्तिष्कादूर्द्धः प्रेरयत्यवमानोऽधिशीर्षतः॥
तद्वा अथर्वणः शिरो देवकोशः समुब्जितः।
तत् प्राणोऽभिरक्षति शिरोऽन्त मथो मनः॥

द्विधा त्रिधा धर्त्ता धारितेति। ऋता सत्यासत्या धारा मर्त्तौ पृथिवी द्विधा त्रिधा शेषरूपेण दिग्गजरूपेण राजन्यरूपेण च 'धारिता' धृता। शेषनागरूपेण धृता इत्युक्ते पाताल एव नागरूपेण तिष्ठतीति शङ्का स्यादत आह, नागा इति। तदुक्तं नीलरुद्रेण,

"नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्वेभ्यो नमः"॥ इति।

'नागाः' दिग्गजा वा, तेऽप्यन्तरिक्षस्था दन्तैः पृथिवीं बिभ्रति।

इदानीमथर्वशिरसोऽस्य ग्रन्थस्योत्पत्ति-प्रकारमाह, मूर्द्धानमिति। 'अथर्वा' अथर्वर्षि-शरीराधिष्ठाता 'पवमानः' वायुः प्राणः 'अस्य' अथर्वणो मुनेः मूर्द्धानं 'संशीव्य' संशीर्य्य विदार्य्य 'मस्तिष्कात्' मस्तकात् ऊर्द्धः सन् यदस्य 'हृदयं' हृदिस्थं ग्रन्थरूपं तत् 'शीर्षतः' अधिशीर्षे 'प्रेरयत्' प्रेरितवान्। तद्वेति। 'अधिशीर्षतः, शिर ऊर्द्धतः, यस्मात् प्राणेन प्रेरितं, 'तत्' तस्मात् 'वै' निश्चितम् अथर्वणः 'शिरः' एतद् ग्रन्थरूपं 'देवकोशः' देवानामिन्द्रादीनां कोशो निधिः 'समुब्जितः सुगोपितः सुरक्षितः। तद्ग्रन्थरूपमुद्भूतं सत् केन रक्षितम्? अत आह, तत् प्राण इति। 'तत् शिरः'

न च दिवो देवजनेन गुप्ता
न चान्तरिक्षाणि न च भूम इमाः ।
यस्मिन्निदं सर्वमोतप्रोतं
तस्माद्न्यं न परं किञ्च नास्ति ॥
न तस्मात्पूर्वं न परं तदस्ति
न भूतं नोत भव्यं यदासीत् ।

अथर्वशिरः प्राणोऽभिरक्षति प्राणाधीनत्वादध्ययनस्य, प्राणस्य अन्नाधीनस्थितिकत्वादन्नमप्यभिरक्षति। तर्हि सुषुप्ते कस्मान्नाधीत इत्यत आह, मन इति। 'मनसा मनस्यभिमन्वानधीयेयेत्यथाधीत' इति श्रुतेः मनोऽप्यभिरक्षति।

यं देवमेषोपनिषत् स्तौति, तस्योपनिषदुत्पत्तिप्रकार-कथनेन महत्त्वमुक्त्वा प्रकृतं तदेव स्तवनमनुसन्धत्ते न चेति। देवादीनां नवत्वं गुणसङ्करेण द्रष्टव्यम्; तद्यथा, द्यौर्लोकः सात्त्विक-राजस-तामस-भेदेन त्रिधा; त्रिविधोऽपि प्रत्येकं सङ्करेण नवधा; एवमन्तरिक्षं भूमिश्च। यद्वा जम्बूद्वीपस्य नवखण्डत्वात् इतरयोरपि तथा खण्डाः कल्प्याः। 'देवजनेन' देवजनकेन, अथवा, देवाः 'जनाः' सेवका यस्य तेन रुद्रेण 'गुप्ता' गोपिता रक्षिता। भूम इमा इति छान्दसो वर्णलोपः, भूमय इमाः गुप्ता इति। न च केवलं गुप्ताः, किन्तु व्याप्ता अपि इत्याह, यस्मिन्निति। ओतं प्रोतं तन्तुष्विव पट आतत प्रततश्च ऊर्द्ध्वं तन्तुभिरावयनं तिर्य्यक् तन्तुभिः प्रवयणं 'यस्मात्' देवात् न ह्यन्यत् 'परं' भिन्नमस्ति देवसत्त्वायतत्वात् जगत्सत्त्वस्य, 'परम्' उत्कृष्टं वा नास्ती-

सहस्रपादेकमूर्द्धा व्याप्तं

स एवेदमावरीवर्त्ति भूतम् ॥

अक्षरात् सञ्जायते कालः कालाद् व्यापक उच्यते ॥

व्यापको हि भगवान् रुद्रो भोगायमानो यदा शेते रुद्रस्तदा संहार्य्यते प्रजाः। उच्छ्वसिते तमो भवति, तमस आपोऽप्स्वङ्गुल्या मथिते

त्यर्थः। वर्त्तमानव्याप्तिमुक्त्वा भूतभविष्यतोरपि व्याप्तिमाह, न तस्मादिति। यत् भूतं भव्यं वा अस्ति तदपि तस्मात् पूर्वं परञ्च नासीत् न भविष्यति च इत्यपि बोध्यम्।

नन्वेकेन कथमनेकं व्याप्तम्? अत आह, सहस्रेति। सहस्रपात् कार्य्यरूपेण 'एकमूर्द्धा' कारणरूपेण सहस्रपाच्चासावेकमूर्द्धा च सहस्रपादेकमूर्द्धा तेन व्याप्तमिदम्; कारणेन कार्य्यव्याप्तिर्मृदादौ प्रसिद्धा; न केवलं तिलतैल-दधिसर्पिरादिवत् व्याप्तिमात्रम्; किन्तु स एवातिशयेन आप्नोति, 'आवरीवर्त्ति' सर्वांशेन व्याप्नोति; न तु खलु चक्रादिवत् ततोऽन्यत् किञ्चिदस्ति। 'अक्षरात्' कूटस्थात् 'कालः' सङ्कर्षणः इन्द्रधिपः क्षणादिव्यवहारनिमित्तभूतः सञ्जायते, 'कालाद्व्यापक उच्यते' सति काले व्याप्य व्यापक सञ्ज्ञां लभते; 'भोगायमानः' सर्पशरीरमिव सर्वतः सङ्क्षिप्य यदा 'शेते' उपरतक्रियो भवति, तदा 'संहार्य्यते' संहर्त्ता भवतीत्यर्थः।

सम्प्रति सृष्टिमाह, उच्छ्वसिते इति। 'उच्छ्वसिते' कार्य्यजननोत्सुके ईश्वरे सति 'तमः' अज्ञानं प्रवृत्तं भवति,

मथितं शिशिरे शिशिरं मथ्यमानं फेनं भवति, फेनादण्डं भवत्यण्डाद् ब्रह्मा भवति, ब्रह्मणो वायुः, वायोरोङ्कारः, ओङ्कारात् सावित्री, सावित्र्या गायत्री, गायत्र्या लोका भवन्ति। अर्च्चयन्ति तपः सत्यं मधु चरन्ति यद् ध्रुवम्।

तमसः आकाशादिक्रमेण आपः, अप्सु अङ्गुल्या 'मथिते' मथने कृते सति तक्रमिव जायते। ततः 'शिशिरे' विलम्बे सति 'शिशिरं' शीतं भवति; शीतार्थाः शब्दाः विलम्बार्था अपि भवन्ति, यथा, शीतकोऽयं विलम्बकारीति गम्यते। अथ वा, 'शिशिरे' वायौ वाति शिशिरं भवतीत्यर्थः। शीतलं सत् पुनर्मथ्यमानं फेनो भवति, फेनात् कालेन अण्डं भवति, 'ब्रह्मा' प्रजापतिः, 'वायुः' प्राणाख्यः, "मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्" इत्युक्तेः। वायोरोङ्कारः, ओङ्कारात् 'सावित्री' गायत्र्याः पूर्वावस्था व्याहृत्याख्या, "प्रणवादक्षरत्रयाद्व्याहृतित्रयम्" इत्युक्तेः। 'गायत्री' तत्पदादिका, 'गायत्र्याः' वेदत्रयद्वारा त्रयो लोका भवन्ति। अर्च्चयन्ति लोकान् बुधाः, कुतः? यतो लोकः तपः सत्यं यच्च ध्रुवं 'मधु' अमृतं मोक्षाख्यं तत् चरन्ति। शरीरसाध्यत्वात् तप आदीनां, शरीरस्य च सृष्टिप्रधानत्वात् इतरथा विद्यात्, यतः सुषुप्तिवज्जाड्यात्तन्न निवर्त्तते, अत एव ईश्वरस्य जीवानुग्रहाय सृष्टिनिर्माणमिति।

किं तत् परमं तपः? इत्याह, आप इति। तपःसाधनत्वादयं मन्त्रस्तप इत्युक्तः; तस्मात् प्रयत्नेन प्राणायामोऽप्यावर्त्तनीयः, इति भावः। 'तपःसत्ये' लोकाख्ये ध्रुवं

एतद्धि परमं तपः । आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरों नम इति ॥ ६ ॥

य इदमथर्वशिरो ब्राह्मणोऽधीते, अश्रोत्रियः श्रोत्रियो भवति, अनुपनीत उपनीतो भवति, सोऽग्निपूतो भवति, स वायुपूतो भवति, स सूर्य्यपूतो भवति, स सोमपूतो भवति, स सत्यपूतो भवति, स सर्वैर्देवैर्ज्ञातो भवति, स सर्वैर्वेदैरनुध्यातो भवति, स सर्वेषु तीर्थेषु स्नातो

मधु 'चरन्ति' प्रस्तुवन्ति, 'लोकाः', भूरादयः ; तेन तानर्चयन्ति ; एतत् 'हि' यस्मात् परमं 'तपः' तपःफलं गायत्रीशिरः साध्यमिति चार्थः । सम्प्रत्यध्ययनफलमाह, य इदमथर्वशिर इति । 'ब्राह्मणः' इति वचनात् उपनीतस्यापि क्षत्रियादेर्नाधिकार इति गम्यते, मुख्यत्वावबोधनाय वा ब्राह्मणग्रहणम् । अधीते इति, अर्थबोधपर्य्यन्तमध्ययनं पाठमात्रस्य निन्दाश्रुतेः । न चाल्पायासेन कथं बहुयत्नसाध्यं फलं स्यादिति [illegible] अल्पायासेनाप्यमृतादेर्महात्म्य-जनकत्वादिदर्शनात्, वस्तु[illegible] पर्य्यनुयोगायोगात् ॥ ६ ॥

अनधीतवे[illegible]मात्राध्ययनेनैतादृशो भवतीत्याह, अश्रोत्रिय इति । [illegible]' वेदमधीत्य तदर्थानुष्ठाता ; 'अनुपनीतः, द्विती[illegible]नादि-रहितः ; अग्निपूतः 'अग्निना' हुतेन यथा [illegible] [illegible]युना' प्राणायामैर्यथा पूतः, 'सूर्य्येण' उपस्थितेन यथा पूतः, 'सोमेन' सोमयागेन यथा पूतः, 'सत्येन' सत्यभाषितेन यथा पूतः, 'सर्वैः' धर्म्मसाधनैरनुष्ठितैर्यथा पूतः, तथा [illegible]र्थः । 'वेदैः' इति वेदानां देवतारूपेण

भवति, तेन सर्वैः क्रतुभिरिष्टं भवति, गायत्र्याः षष्टिसहस्राणि जप्तानि भवन्ति, इतिहास-पुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति। प्रणवानामयुतं जप्तं भवति। स चक्षुषः पङ्क्तिं पुनाति। आसप्तमात् पुरुषयुगान् पुनातीत्याह भगवानथर्वशिरः, सकृज्जप्त्वैव शुचिः स पूतः कर्मण्यो भवति। द्वितीयं जप्त्वा गणाधिपत्यमवाप्नोति। तृतीयं जप्त्वैवमेवानुप्रविशत्यों सत्यमों सत्यमों सत्यम्। इत्यथर्ववेदे शिर उपनिषत् समाप्ता ॥ १ ॥

चेतनत्वादनुध्यानं सम्भवति। 'पुरुषयुगान्' पितृपक्षीयान् मातृपक्षीयांश्च। सप्तमात् पुरुषादात्मानमभिव्याप्य पुनातीत्याह 'भगवान्' अथर्वा।

सकृदादिपाठस्य फलमाह, अथर्वशिर इति। 'एवमेव अनुप्रविशति' इति विशेषमपश्यन् सामान्यमेव प्रविशति, तच्च सामान्यरूपं ब्रह्मैव, मोक्षं यातीत्यर्थः। यद्वा, 'एः' विष्णुः 'वः' शिवः, तयोः समाहारः 'एवं' हरि-हर स्वरूपं, तदेव अनुप्रविशतीति; "एर्विष्णुर्वो महेश्वर" इति चैकाक्षरनिर्घण्टः। हरोपास्त्या हरिप्राप्तिः, अविरुद्धैक-मूर्त्तित्वात्तयोरिति।

किं तत्सामान्यरूपम् ? यदनुप्रविशतीत्यपेक्षायामाह, सत्यमिति। ओङ्कारवाच्यं सत्यमित्यर्थः, हरिहररूपमप्येत-

गर्भोपनिषत्

ओँ पञ्चात्मकं पञ्चसु वर्त्तमानं
षड़ाश्रयं षड्गुणयोगयुक्तम्।
तं सप्तधातुं त्रिमलं द्वियोनिं
चतुर्विधाहारमयं शरीरम्॥

इभयवाच्यं भवति, एकवाच्यं वा ओङ्कारवाच्यं सत्यमेव, साधनान्तरं विनैव अनुप्रविशतीति। द्विरुक्तिः समाप्त्यर्था।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपदवाक्यानां दीपिकाथर्वमस्तके॥

इत्यथर्वशिर उपनिषद्दीपिका समाप्ता॥१॥

ओँ गर्भसंस्था निरूप्यात्र गर्भोपनिषदित्यपि।
पञ्चखण्डाष्टमान्मुण्डात् पैप्पलादभिधा तथा॥

गर्भवासान्मुच्यत इत्युक्तम्; तत्र को गर्भः? कथञ्च तद्वासः? इत्यपेक्षायां संसारवैराग्यार्थञ्च जन्ममरणादिदुःखं निरूपणीयमिति गर्भोपनिषदारभ्यते। तत्र गर्भस्य मातृपितृशरीरापेक्षत्वात् प्रथमं शरीरस्वरूपमाह, पञ्चात्मकमिति। 'पञ्चात्मकं' पञ्चभूतात्मकं 'पञ्चसु' धारणादिषु आनन्दादिषु च 'वर्त्तमानं' प्रवर्त्तमानं; पञ्चस्वित्यत्र वीप्सा द्रष्टव्या, प्रश्नान्तरे पञ्चकानां चित्वात्; 'षड़ाश्रयं' षण्णां मधुरादिरसानाम् आश्रयतीति आश्रयं भोगायतनमित्यर्थः। षड्गुणयोगयुक्तं गानादिकलाकुशलत्वात्; सप्त 'धातवः' रसादयो यस्मिन् तत्; सप्तधातुकत्वभावो बहुव्रीहौ, अग्रे तु कपिसप्तधातुकमिति निर्देशः शेषाद्विभाषेति। 'त्रिमलं' त्रयो मला नख-

पञ्चात्मकमिति कस्मात्, पृथिव्यापस्तेजो वायुराकाशमित्यस्मिन् पञ्चात्मके शरीरे का पृथिवी, का आपः, किं तेजः, को वायुः, किमाकाशम्। तत्र पञ्चात्मके शरीरे यत्कठिनं सा पृथिवी, यद् द्रवं ता आपः, यदुष्णं तत्तेजः, यत्सञ्चरति स वायुः, यच्छुषिरं तदाकाशम्। तत्र पृथिवी धारणे, आपः पिण्डीकरणे, तेजः प्रकाशने, वायुर्व्यूहने, आकाशमवकाशप्रदाने। पृथक् श्रोत्रे शब्दोपलब्धौ, त्वक् स्पर्शे, चक्षुषी

लोम-केशा यत्र तत्; मूत्रादीनान्तु अशितपीतमलत्वात् न देहमलत्वम्। अथवा, कफादीनां श्लेष्मादिरूपाणां मलत्वम्। द्वियोनिं' 'द्वयोः' मातापित्रोः 'योनिः' उत्पत्तिर्यस्य। चतुर्विधाहारमयं' लेह्यपेयखाद्यचोष्यलक्षणचतुर्विधाहारविकार इत्यर्थः।

गुरुणा प्रतिज्ञाते शिष्यो विशेषज्ञानाय पृच्छति, पञ्चात्मकं कस्मादिति। अत्र पञ्चसु वर्त्तमानं कथम्? इति प्रश्नो द्रष्टव्यः, उत्तरानुरोधात्, इतिशब्दान्तमुत्तरे। पृथिवीप्रभृतीनां किं लिङ्गम्? इति पृच्छति, का पृथिवीति। काठिन्यादिषु पृथिव्यादिलिङ्गमित्युत्तरयति, तत्र यदिति। शरीरे तेषामुपयोगं दर्शयन् पञ्चसु कथं वर्त्तमानमित्यस्योत्तरमाह, तत्रेति। 'व्यूहनं' मिलनम्। ननु माभूदवकाशप्रदानम्? इत्यत आह, पृथुस्त्विति। पृथुः 'एषः' शरीरं यदर्थः। अवकाशं विना पार्थिवं न स्यादिति भावः। द्वितीयपञ्चक-

रूपे, जिह्वा रसने, नासिका घ्राणे, उपस्थ आनन्दने, अपानमुत्सर्गे, बुद्ध्या बुध्यति, मनसा सङ्कल्पयति, वाचा वदति। षड़ाश्रयमिति कस्मात्, मधुराम्ल-लवण-तिक्त-कटु-कषाय-रसान् विन्दतीति, षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-

---

माह, श्रोत्रे इति। श्रोत्रे द्वे शब्दोपलब्धौ वर्त्तेते। तृतीय-पञ्चकमाह, उपस्थ इति।

षड़ाश्रयं कस्मादित्यत्र षड्गुणयोगयुक्तञ्च कस्मादित्यपि द्रष्टव्यम्। आद्यस्योत्तरमाह, मधुरेति। 'विन्दति' लभते जानातीत्यर्थः। द्वितीयस्योत्तरं षड्जेति। एते गायनेषु प्रसिद्धाः ; एतत् सप्तस्वरग्रहणं षड्रागोपलक्षणार्थं षड्गुणेत्युक्तत्वात्। ते च,

'श्रीरागोऽथ वसन्तश्च पञ्चमो भैरवस्तथा।
मेघनादश्च विज्ञेयाः षष्ठो नटनरायणः'॥ इति

तेषां प्रत्येकं सप्त स्वरा भवन्ति, षट् च षट् च रागिण्यो देव्यः स्त्रियो भवन्तीति षट्त्रिंशत् ज्ञेयाः ; ता यथा,

गौड़ी कोलाहली धाली द्रविड़ी मालव-कौशिका।
षष्ठी स्यादेव गन्धारी श्रीरागाच्च विनिर्गता॥
आदोली कौशिकी चैव रामगरी पुटमञ्जरी।
गुञ्जरी चैव देशाख्या वसन्तस्य प्रियास्त्विमाः॥
भैरवी गुर्जरी चैव भाषा वेलीवती तथा।
कर्णाटी रक्तसिंहा च पञ्चमात्ता विनिर्गता॥
त्रिगुणा स्तम्भतीर्था च आभीरी ककुभा तथा।
विराड़ी चैव सामेरी भैरवाच्च विनिर्गता॥

धैवत-निषादाश्चेतीष्टानिष्ट-शब्दसंज्ञाः प्रणिधा-नाद्दशविधा भवन्ति ॥ १ ॥

सप्तधातुकमिति कस्मात्, शुक्लो रक्तः कृष्णो धूम्रः पीतः कपिलः पाण्डुर इति । यथा

वङ्गाला मधुरा चैव कामदा चोकमादिका ।
कम्बुग्रीवा च देवाला मेघरागाद्विनिर्गता ॥
त्रोटकी च———नदा चैव प्रकीर्त्तिता ।
गान्धारी शुद्धमुद्गारी जाता नदनरायणात् ॥ इति ।

तेषां मिथुनानां योगोऽस्मिन् शरीरे भवतीति षड्गुण-योगयुक्तमित्यर्थः ; इति शब्द एतदर्थविवक्षार्थः ।

ननु पृथिव्यादीनां वृत्तयो धारणादयस्त्रयः पञ्चका उक्ताः, ते किं सर्वे पुरुषप्रवृत्तिनिवृत्त्योः उपयुज्यन्ते ? आहोस्वित् कतिपये ? इति संशये निर्णयमाह। इष्टानिष्टानीति। धारणादिषु 'इष्टानिष्टानि' प्रवृत्तिहेतुभूतानि 'दशविधा' दशविधानि भवन्ति। भूतवृत्तानां धारणादीनां पञ्चानाम् इष्टानिष्टत्वाभावेन प्रवृत्तिनिवृत्त्यजनकत्वात् शब्दादीन्येव दश इष्टानिष्टानि भवन्तीति भावः। इष्टानिष्टत्वे द्वारमुक्तम्। शब्देति। 'शब्द-प्रणिधानं' शब्दप्रयोग-जनकत्वं ; सञ्ज्ञाप्रणिधानं प्रत्ययजनकत्वं ; व्यवह्नियमाणाः प्रतीयमानास्तु दशैव शब्दादय इष्टानिष्टत्वेन प्रवृत्तिनिवृत्तिजनका इत्यर्थः ॥ १ ॥

उभयत्र प्रश्नस्याप्युपलक्षणम्। समाधानन्तु तत्र भविष्यति। शुक्ल इत्याद्यव्यवहार्य्यद्रव्याणां प्रकारभेदकथनं; न त्वेत एव सप्तधातवः, तेषामग्रे वक्ष्यमाणत्वात् ; शुक्लपाण्डुरयोः कृष्ण-धूम्रयोः पीत-कपिलयोश्चावान्तरभेदो द्रष्टव्यः ; नीलश्च कृष्णे-

देवदत्तस्य द्रव्यादिविषया जायन्ते। परस्परं सौम्यगुणत्वात् षड्विधो रसः, रसाच्छोणितं, शोणितान्मांसं, मांसान्मेदो, मेदसः स्नायवः, स्नायुभ्योऽस्थीनि, अस्थिभ्यो मज्जा, मज्जातः शुक्रं, शुक्रशोणितसंयोगादावर्त्तते गर्भो हृदि व्यवस्थां नयति, हृदयेऽन्तराग्निः, अग्निस्थाने

ऽन्तर्भाव्यम्; चित्रञ्च सर्ववर्णेषु यथालाभम्। 'देवदत्तस्य' पुंसः 'द्रव्याणि' सप्तप्रकाराणि 'विषयाः' भोग्यानि 'जायन्ते' सम्पद्यन्ते। तेषां 'परस्परम्' अन्योऽन्यं 'सौम्यगुणत्वात्' अनुकूलगुणत्वात्; यथा, ओदनादीनां व्यञ्जनादयोऽनुकूलाः, तेषां परिणामे षड्विधो रसः, वर्णतः शुक्लादिरूपः, स्वादनो मधुरादिरूपो भवति। चित्ररूपस्य च षट्स्वेवान्तर्भावात्।

शोणितादीन् सप्त धातूनाह, रसादिति। 'रसः' धातुमूलं, न स्वयं धातुः; तादर्थ्यात्तु कैश्चित् धातुत्वेनोक्तः; रस-धातुवादिनान्तु भेदः। स्नायोरैक्यं द्रष्टव्यम्। मज्ज इति। मज्जन् शब्दस्य पञ्चम्येकवचने अनो लोपः। स्तोऽनुभिन्नु आवर्त्तते इति। 'शुक्रशोणितसंयोगात्' आशुक्रशोणितसंयोगमारभ्य 'वर्त्तते' अस्तित्वं भजते इत्यर्थः।

धातूनां स्थानमाह,

हृदि व्यवस्थानीति। इत्येतान्युक्तानि धातुरूपाणि 'हृदि व्यवस्था येषां' तानि हृदि व्यवस्थानि; सप्तम्या अलुक्; अतएव धातुषु न्यासो हृदय उक्तः, 'धातुषु प्राणेषु हृत्स्थले' । इति

पित्तं, पित्तस्थाने वायुः, वायुतो हृदयं, प्राजापत्यात् क्रमात् ॥ २ ॥

ऋतुकाले सम्प्रयोगादेकरात्रोषितं कललं

पुनर्हृदये कानि ? इत्यत आह. हृदये इति। हृदये अन्तराग्निर्वर्त्तते, अन्तरश्चामावग्निश्च, 'अग्निः' ओजः ; तदुक्तं प्रपञ्चसारे। "शुक्रं परिणतं हि स्यादोजो नामाष्टमी दशा" इति। अग्निस्थाने पित्तमिति। 'अग्निः' ओजः, स एव 'स्थानम्' आधारः, तत्र पित्तम, अग्नौ तेजोरूपे प्रवर्त्तकं पित्तमित्यर्थः। पित्तस्थो 'वायुः' वातः, वायुं विना प्रवृत्त्यनुपपत्तेः। हृदयान्तरोजःपित्तवाता वर्त्तन्ते इत्यर्थः। एतत् कफस्याप्युपलक्षणं, दोषाणां वातपित्तकफानां समानदेशत्वस्यौचित्यात्।

ततः किम् ? इत्याह, वायुत इति। वायुतो 'हृदयं' लिङ्गं प्राजापत्यात् क्रमात् प्रवर्त्तते ; प्राजापत्यः क्रमो यथा, स आत्मानं द्वेधा अपातयत्, पतिश्च पत्नी च भवतीति ; प्रजापतिर्यथा एकः सन् द्विधाभूतः, तथा पित्तहृदयोपलक्षितं लिङ्गमपि द्विधा भवति ; वाय्वाघातेन दीपादिव प्रदीपः. कुसुमादिव गन्ध इति। न स मूलोत्क्रम आशङ्कनीयः ; तेन शरीरं वातपित्तकफात्मकमुच्यते ; यद्वा, प्राजापत्यः क्रमः' धूमादिमार्गः, "अग्ने संवत्सरो वै प्रजापतिः" इत्यादिना प्रजापतिव्रतोक्तो द्रष्टव्यः। स च आरोहावरोहक्रमः, "तद् य इत्थं विदुः" इत्यादिना छान्दोग्ये उक्तः। गीतायाञ्च,

"धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते" ॥ इति ॥२॥

प्राजापत्यात् क्रमात् पञ्चम्याहुतौ ऋतुकाले प्रयोगादित्य-

भवति, सप्तरात्रोषितं बुद्बुदम्, अर्द्धमासाभ्यन्तरे पिण्डं, मासाभ्यन्तरे कठिनं, मासद्वयेन शिरः, मासत्रयेण पादप्रदेशः, चतुर्थे गुल्फ-जठर-कटि-प्रदेशाः, पञ्चमे पृष्ठवंशः, षष्ठे मुख-नासिकाक्षि-श्रोत्राणि, सप्तमे जीवेन संयुक्तः, अष्टमे सर्वलक्षण-सम्पूर्णः। पितूरेतोऽतिरेकात् पुरुषः, मातूरे-तोऽतिरेकात् स्त्री, उभयोर्बीजतुल्यत्वान्नपुंसकं व्याकुलितमनसोऽन्धाः खञ्जाः कुब्जा वामना

न्वयः। एतेन त्रिमलं कस्मात्? इति प्रश्न उत्तरितः, कफा-दीनां श्लेष्मादिमलरूपत्वात्। ऋतुकाले योषिद्धातुपोषकं पुंवीजं भवति; तेन पुंसः सम्प्रयोगे स्त्रियास्तेजो विशेषो दृश्यते। 'कललम्' ईषद्घनं 'बुद्बुदं' वर्त्तुलम्। यास्केन तु अन्यथोक्तम्; तद्यथा, "एकरात्रोषितं कलिलं भवति, पञ्च-रात्राद्बुद्बुदः, सप्तरात्रात् पेशी, द्विसप्तरात्रादर्वुदः, पञ्चविंशति-रात्रात् स्वस्थितो युक्तो भवति, मासमात्रात् कठिनो भवति, द्विमासाभ्यन्तरे शिरः सम्पद्यते, मासत्रयेण ग्रीवाव्यादेशः, मासचतुष्टयेन त्वग्व्यादेशः, पञ्चमे मासि नखरोमव्यादेशः, षष्ठे मुखनासिकाक्षिश्रोत्रञ्च भवति, सप्तमे चलनसमर्थो भवति, अष्टमे बुद्ध्याध्यवस्यति, नवमे सर्वाङ्गसम्पूर्णो भवति"। 'जीवेन' जीवलिङ्गेन चलनादिना।

पितुरिति। अनेन द्वियोनि कस्मात्? इति परिहृतम्। 'व्याकुलितमनसः' अन्धादिविक्षिप्तचित्तान्निषेकः? 'अन्यो-ऽन्यस्य, स्त्रीपुंसस्य वायुना परिपीड़ितं यत् शुक्रं, तस्य द्वैवि-

भवन्ति। अन्योऽन्यवायु-परिपीड़ित-शुक्रद्वैध्याद् द्विधा तनू स्याद्युग्माः प्रजायन्ते। पञ्चात्मकः समर्थः पञ्चात्मिका चेतसा बुद्धिर्गन्धरसादि-ज्ञानाच्चराचरमोङ्कारं चिन्तयतीति तदेकाचरं ज्ञात्वाष्टौ प्रकृतयः षोड़श विकाराः शरीरे तस्यैव देहिनः। अथ मात्राशित-पीत-नाड़ी-सूत्रगतेन प्राण आप्यायते। अथ नवमे मासि सर्वलक्षणज्ञानसम्पूर्णो भवति, पूर्वजातिं स्मरति, शुभाशुभञ्च कर्म्म विन्दति॥ ३॥

ध्यात् 'तनुः' शुक्रस्वरूपं द्विधा स्यात्; ततो युग्माः प्रजायन्ते। 'पञ्चात्मकः' पञ्चभूतात्मकः पिण्डः 'समर्थः' चिन्तनादौ, 'पञ्चात्मिका' शब्दादिविषया 'चेतसा' अन्तःकरणेन गन्धरसादिविषयं ज्ञानं यस्याः सा गन्धरसादिज्ञाना बुद्धिर्भवति; सा 'चरम्' अनित्यम् 'अचरं' नित्यं मोक्षञ्च चिन्तयति; 'तदेकाचरं' ब्रह्म प्रणवं चिन्तयति, ज्ञात्वा प्रकृतयोऽष्टौ विकाराः षोड़श जायन्ते इति शेषः। तदुक्तम्;

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोड़शकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः"॥ इति।

तत्र मुख्यव्यापाराभावेन शिशुः कथं वर्द्धते? इत्यत आह, अथेति। 'मात्रा' जनन्या 'अशितपीत' इत्यविभक्तिको निर्देशः, अशितपीतेन इत्यर्थः, बालकस्तु रतिसमये पुरुषासनवन्मातुः सम्मुखो वर्द्धते पितृप्रतिशरीरत्वात्; तथा च, या अस्य नाभिसम्बद्धा नाड़ी मातुर्हृदयेन सम्बध्यते, सैव सूत्रं;

पूर्वयोनि-सहस्राणि दृष्ट्वा चैव ततो मया।
आहारा विविधा भुक्ताः पीता नानाविधाः स्तनाः।
जातस्यैव मृतस्यैव जन्म चैव पुनः पुनः॥
यन्मया परिजनस्यार्थे कृतं कर्म्म शुभाशुभम्।
एकाकी तेन दह्येऽहं गतास्ते फलभोगिनः॥
अहो दुःखोदधौ मग्नो न पश्यामि प्रतिक्रियाम्।
यदि योन्याः प्रमुच्येऽहं तत् प्रपद्ये महेश्वरम्॥
अशुभ-क्षयकर्त्तारं फलमुक्ति-प्रदायकम्।
यदि योन्याः प्रमुच्येऽहं तत् प्रपद्ये नारायणम्॥

तद्गतेन अन्नरसेन तस्य प्राण आप्यायते; अतएव जातमात्रस्य शिरसि कर्णद्वयमध्यदेशे मातृहृदयास्थिचिह्नलेखा दृश्यते, सा मातुः सम्मुखत्वं व्यनक्ति। सर्वेति। 'सर्वैर्लक्षणज्ञानैः' मनुष्यत्वादिजातिव्यञ्जकैः अवयवैः, अथ च सर्वेषां लक्षणेन ज्ञानकरणानामिन्द्रियाणां 'ज्ञानेन' दर्शनश्रवणादिना समाकीर्णः 'भवति' सम्पद्यते, 'पूर्वजातीः' प्राक्तनजन्मानि 'विन्दति' लभते जानीते इत्यर्थः॥ ३॥

तस्याभिलाषमाह, आहारा इति। 'विविधाः' श्व-शूकरादिभोग्या अपि; एतेन शरीरं कस्मात्? इति प्रश्नस्य, शीर्य्यतीति व्युत्पत्त्या, उत्तरं दत्तम्। पीताश्चेति नानायोनिषु जातत्वात्। 'जन्म जन्मेति', जन्मनः प्रादुर्भावः एकजन्मानन्तरं द्वितीयं जन्म। 'परिजनस्य' पुत्रकलत्रादेः। एकाकीति, कर्त्तुरेव पापसम्बन्धो नार्जितद्रव्य-भोक्तुरित्य-

अशुभ-क्षयकर्त्तारं फलमुक्ति-प्रदायकम् ।
यदि योन्याः प्रमुच्येऽहं तत् साङ्ख्यं योगमभ्यसे ॥
अशुभ-क्षयकर्त्तारं फलमुक्ति-प्रदायकम् ।
यदि योन्याः प्रमुञ्चामि ध्याये ब्रह्मसनातनम् ॥

अथ योनिद्वारं सम्प्राप्तो यन्त्रेणापीड्यमानो महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृष्टस्तदा न स्मरति जन्ममरणानि, न च कर्म्म शुभाशुभं विन्दति ॥ ४ ॥

शरीरमिति कस्मात्, अग्नयो ह्यत्र श्रियन्ते ज्ञानाग्निर्दर्शनाग्निः कोष्ठाग्निरिति, तत्र कोष्ठाग्निर्नामाशित-पीत-लेह्य-चोष्यं पचति । दर्शनाग्नी रूपाणां दर्शनं करोति । ज्ञानाग्निः

त्वार्थः । इदं लिङ्गम् । 'अभ्यसेत्' अभ्यसेयम् । दुःखेन जन्ममरणानि न स्मरतीत्यग्रतनेन सम्बन्धः । अस्मरणे हेत्वन्तरमाह, जातमात्रेति । 'वायुना' मायारूपेण ; तदुक्तम् ।

"दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ॥ इति ।

'विन्दति' जानाति ॥ ४ ॥

श्रियन्ते इति, श्रयन्ते इति वक्तव्ये इयट् । 'ज्ञानाग्निः' शरीराग्निः भोक्ता शुभाशुभस्य, 'दर्शनाग्निः' प्रमाता, 'कोष्ठाग्निः' ।

शुभाशुभञ्च कर्म्म विन्दति। त्रीणि स्थानानि भवन्ति, मुखे आहवनीय, उदरे गार्हपत्यो, हृदि दक्षिणाग्निः, आत्मा यजमानो मनो ब्रह्मा लोभादयः पशवो धृतिर्दीक्षा सन्तोषश्च बुद्धीन्द्रियाणि यज्ञपात्राणि कर्मेन्द्रियाणि हवींषि शिरः कपालं केशा दर्भाः मुखमन्तर्वेदिः चतुष्कपालं

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापान-समायुक्तः पचाम्यन्नं चतुर्विधम्" ॥ इत्युक्तः।

अन्त्यादिक्रमेण त्रयाणां लक्षणमाह, तत्रेति। अग्निर्मेति। अनेन चतुर्विधाहारमयं कथमिति प्रश्नस्योत्तरमुक्तम् भवति; स च गार्हपत्यो भूत्वा नाभ्यां तिष्ठति। दर्शनाग्निरिति। स चतुरस्र आहवनीयो भूत्वा मुखे तिष्ठति। ज्ञानाग्निरिति, स चार्द्धचन्द्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति। 'विन्दति' लभते भोक्तेत्यर्थः।

अत्राग्नित्रये सति शरीरे यज्ञदृष्ट्योपासनमाह, त्रीणीति। 'आहवनीयः' दर्शनाग्निः, 'गार्हपत्यः' कोष्ठाग्निः, 'दक्षिणाग्निः' ज्ञानाग्निः; अग्नित्रयं स्थानत्रये स्मृत्वा आहवनीयादिबुद्धिः कार्य्या। आत्मा यजमानः अधिपतित्वात्; मनो ब्रह्मा सौम्यत्वात्; लोभादयः पशवः बध्यत्वात्; कर्मेन्द्रियाणि हवींषि ज्ञानाग्नौ होमार्हत्वात्; शिरः कपालं तत्साम्यात्; केशा दर्भाः विक्षिप्तत्वात्; मुखमन्तर्वेदिः मुख्यस्थलत्वात्।

इदानीं शरीरे अवयवविभागमाह, चतुरिति। तदुक्तं याज्ञवल्क्येन;

"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा"। इति।

शिर: षोड़श पार्श्वदन्तपटलानि सप्तोत्तरं मर्म्मशतं साशीतिकं सन्धिशतं सनवकं स्नायुशतं सप्त शिराशतानि पञ्च मज्जाशतानि अस्थीनि च ह वै त्रीणि शतानि षष्टि: सार्द्धचतस्रो रोमाणि कोट्यो हृदयं पलान्यष्टौ द्वादश पला जिह्वा

"अष्टाकपालं शिर" इति तु यास्क:। षोड़शेति। षोड़श-पार्श्वाणि, षोड़शदन्ता: षोड़शाष्टदन्तस्थलानि षोड़शपटलानि पार्श्वस्थलानि; एवं द्वितीयभागे चतु:षष्टिदन्ता: स्थलै: सह; तदुक्तम्।

"स्थलै: सह चतु:षष्टिर्दन्ता वै विंशतिर्नखा:" इति। "पार्श्वका: स्थलकै: सार्द्धं सर्वादिष द्विसप्तति:" इति। सप्तेति। तदुक्तम्; सप्तोत्तरं मर्म्मशतमिति। साशीतिकमिति। तदुक्तं; द्वे च सन्धिशते तथेति। अवान्तरभेदे न्यूनाधिक्यं स्मृतावुक्तम्। सनवकमित्यादि। नवसंख्या: परिमाणमस्येति, नवकं नवकत्वेन सह वर्त्तते सनवकं, सधीरं सानुकूलमिति-वद्भावप्रधानो निर्द्देश: नवस्नायुशतानि इत्यर्थ:। तदुक्तम्; "शिर: शतानि सप्तैव नवस्नायुशतानि च" इति। पञ्च मज्जाशतानीति। 'मज्जा' पेशी; तदुक्तम्; "पञ्च पेशीशतानि च" इति। अस्थीनि चेति। तदुक्तम्; "तथास्थ्नाञ्च सह षष्ट्या शतत्रयम्" इति। अर्द्धचतस्र इति। चतस्र: कोट्य: एका चार्द्धकोटीत्यर्थ:। इदन्तु स्थूलकेशाभिप्रायेण, सूक्ष्माभिप्रायेण तु याज्ञवल्क्योक्तम् बोद्धव्यम्।

यथा, "रोमृणां कोट्यस्तु पञ्चाशच्चतस्रश्च तथापरा:।
सप्तषष्टिस्तथा लक्षा: सार्द्धा: स्वेदायनै: सह।

पित्तप्रस्थं कफस्याढ़कं शुक्रकुड़वं मेदः प्रस्थौ द्वावनियतं मूत्रपुरीषमाहारपरिमाणात्। पैप्पलादं मोक्षशास्त्रं पैप्पलादं मोक्षशास्त्रमिति॥

इति गर्भोपनिषत् समाप्ता॥ २॥

वायवीयैर्विगण्यन्ते विभक्ताः परमाणुभिः" ॥ इति।

'हृदयशब्देन' रसः, जिह्वाशब्देन च जलमुच्यते; तदुक्तम्; "रसस्य नव विज्ञेया जलस्याञ्जलयो दश"। इति।

पित्तप्रस्थमिति। पित्तस्य 'प्रस्थं' सपादमानीद्वयं, मानौ तु तुरुष्काणां सेरः। तदुक्तम्; पञ्च पित्तमिति। अञ्जलय इति वर्त्तते। कफस्याढ़कमिति। चतुःप्रस्थं तथाढ़कम् इति। 'शुक्रकुड़वम्' इति। शुक्रस्य द्वे प्रसृती इत्यर्थः। याज्ञवल्क्येन तु "श्लेष्मौजसोस्तावदेव रेतसस्तावदेव तु" इति कफशुक्रयोः समपरिमाणत्वमुक्तम्। मेदप्रस्थौ द्वाविति। याज्ञवल्क्येन तु द्वौ मेद इत्युक्तम्। अञ्जलिग्रहणं वर्त्तते। अनियतमिति। याज्ञवल्क्येन तु नियम उक्तः, "सप्तैव तु पुरीषस्य चत्वारो मूत्रमेव च" इति। अञ्जलय इति वर्त्तते, तत्तु प्रायोऽभिप्रायेण; निष्कर्षे क्रियमाणे तु नास्ति नियमः; अनियमे हेतुः आहारपरिमाणादिति; तस्मिन्नधिके अधिकं, न्यूने न्यूनमित्यर्थः। पिप्पलादेन प्राप्तं पैप्पलादं; द्विरुक्तिः समाप्त्यर्था।

अत्र प्रसङ्गान्मागधपरिभाषोच्यते पलादिज्ञानार्थम्। तद्यथा;—

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्।
अतः प्रयोग-कार्य्यार्थं मानमत्रोच्यते मया।
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः।

त्रसरेणुस्तु पर्य्याय नाम्ना वंशी निगद्यते।
जालान्तरगतैः सूर्य्यकरैर्वंशी विलोक्यते।
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्।
षड्भिस्तु रत्तिकाभिः स्यान्माषको हेमधानकौ।
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते।
टङ्कः स एव कथितस्तद् द्वयं कोल उच्यते।
क्षुद्रो मोरटकश्चैव द्रङ्क्षणः स निगद्यते।
कोलद्वयञ्च कर्षः स्यात् स प्रोक्तः पाणिमानिका।
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्।
विड़ालपदकञ्चैव तथा षोड़शिका मता।
करमध्यं हंसपदं सुवर्णं कवलग्रहः।
उदुम्बरञ्च पर्य्यायैः कर्ष एव निगद्यते।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा।
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका।
प्रकुञ्चः षोड़शी विल्वं पलमेवात्र कीर्त्तितम्।
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते।
प्रसृतिभ्यामञ्जलिः स्यात् कुड़वोऽर्द्धशरावकः।
अष्टमानञ्च विज्ञेयं कुड़वाभ्याञ्च मानिका।
शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढ़कम्।
भाजनं कंसपात्रन्तु शौनक इति।

इति गर्भोपनिषद्दीपिका समाप्ता॥ २॥

नादविन्दूपनिषत् ।

ओम् अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः ।
मकारस्तस्य पुच्छं वा अर्धमात्रा शिरस्तथा ॥ १ ॥
पादौ रजस्तमस्तस्य शरीरं सत्वमुच्यते ।
धर्मश्च दक्षिणं चक्षुरधर्मश्चोत्तरं स्मृतम् ॥ २ ॥
भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनोः ।
स्वर्लोकः कटिदेशे तु नाभिदेशे महर्जगत् ॥ ३ ॥
जनलोकस्तु हृदये कण्ठदेशे तपस्ततः ।
भ्रुवोर्ललाटमध्ये तु सत्यलोको व्यवस्थितः ॥ ४ ॥
सहस्राक्षमिति चात्र मन्त्र एव प्रदर्शितः ।

ओं प्रणवः पञ्चधाकारोकार-मैर्विन्दुनादयुक् ।
अन्त्यो नादस्ततो वर्ण्यस्त्रिखण्डे नादविन्दुनि ॥

तत्राद्यमात्रात्रयं सार्द्धमात्रहंसाभिधानपक्षिरूपकेण ताव-द्विविनक्ति, ओं अकार इति । 'पक्षः' पतत्रं, येन पक्षीत्युच्यते. 'पुच्छम्' अन्त्यत्वात् । 'वै' प्रसिद्धौ, 'शिरः' उत्तमाङ्गम्, ऊर्द्ध्व-लोकफलत्वात्, रजस्तमः पादौ अधस्त्वसामान्यात् । 'सत्त्वं शरीरं' सर्वाधारत्वात्, धर्माधर्मौ चक्षुषी गतिहेतुत्वात् ।

सप्त लोकान् हंसशरीरे विभज्य दर्शयति, भूर्लोक इत्या-दिना । औत्तराधर्य्यसाम्यात् भूरादीनां पादाद्याश्रयत्वम् । भुवो लोक इति । भुवश्च महाव्याहृतेरिति सकारस्य उत्व-रेफ-योर्विधानात् उत्वपक्षे उत्वे गुणे च रूपम् । 'महर्जगत्' महर्लोकः । भ्रुवोर्ललाटमध्ये च सत्यलोकः, 'तुः' चार्थे ।

एवमेनं समारूढ़ो हंसं योगविचक्षणः ॥ ५ ॥
न बध्यते कर्मचारी पापकोटि-शतैरपि ।
आग्नेयी प्रथमा मात्रा वायव्येषा वशानुगा ॥ ६ ॥
भानुमण्डल-सङ्काशा भवेन्मात्रा तथोत्तरा ।
परमा चार्द्धमात्रा च वारुणीं तां विदुर्बुधाः ॥ ७ ॥

सहस्राह्ण्यमिति चात्र मन्त्र एव प्रदर्शितः । सम्मतिरूपेण स यथा, "सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गं स देवान्त्सर्वानुरस्युपदद्य सम्पश्यन् याति भुवनानि विश्वा" इति । स्वशाखायां पूर्वकाण्डे गतत्वात् सम्पूर्णो नोदाहृतः ; अस्यार्थः, सहस्रमहानि किरणाः यस्य स 'सहस्राह्णः' सूर्य्यः एक ऋषिः, स च मूर्धाधिष्ठानः ; तदुक्तम् प्राणाग्निहोत्रे । "तत्र सूर्य्योऽग्निर्नाम सूर्य्यमण्डलाकृतिः सहस्ररश्मिभिः परिवृत एक ऋषिर्भूत्वा मूर्ध्नि तिष्ठति" इति ; तमर्हतीति सहस्राह्ण्यं 'स्वर्गं' द्युलोकं 'पततः' गच्छतः अस्य 'हरेः' विष्णुरूपस्य 'हंसस्य' ओङ्काररूपस्य 'वियतौ' पूर्वापरावकाशभागौ अकारोकाररूपौ 'पक्षौ' पतत्रे ज्ञातव्यौ, 'स' ओङ्कारः सर्वान् देवान् सात्त्विकान् 'उरसि' हृदये सत्त्वरूपे 'उपदद्य' निधाय विश्वानि भुवनानि साक्षात् पश्यन् याति शाश्वतं ब्रह्मलोकपर्य्यन्तम् ; तदारूढ़ उपासकोऽपि तद्यातीति भावः । समारूढ़स्तच्चिन्तनात् ।

ओङ्कारस्य हंसरूपेणोपासनां फलञ्चोक्त्वा चतसृणां मात्राणां देवता आह, आग्नेयीति । 'एषा' मध्यमा मध्यवृत्तित्वात् उभयोः, 'वशानुगा' वशवर्त्तिनी 'उत्तरा' मकाराख्या, 'भानुमण्डलसङ्काशा' अर्थात् भानुदेवत्या 'अर्द्धमात्रा' चतुर्थी ।

कलात्रयानना वापि तासां मात्रा प्रतिष्ठिता।
एष ओङ्कार आख्यातो धारणाभिर्निबोधत॥ ८॥
घोषिणी प्रथमा मात्रा विद्युन्माला तथापरा।
पतङ्गी च तृतीया स्याच्चतुर्थी वायुवेगिनी॥ ९॥
पञ्चमी नामधेया च षष्ठी चैन्द्री विधीयते।
सप्तमी वैष्णवी नाम शङ्करी च तथाष्टमी॥ १०॥
नवमी महती नाम ध्रुवेति दशमी मता।
एकादशी भवेन्मौनी ब्राह्मीति द्वादशी मता॥ ११॥

इदानीं चतसृणामुदात्तादिभेदेन लक्षणं प्रत्येकं तिस्रस्तिस्रो मात्रा दर्शयितुमाह, कलात्रयानना वेति। वा शब्दश्चार्थे; 'तासां' चतसृणां मात्राणां मध्ये एकैका मात्रा कलात्रयानना च 'प्रतिष्ठिता' निश्चिता, 'कलात्रयेण' मात्रात्रयेण 'आननम्' प्राणनं यस्याः सा, मात्रात्रयशरीरा इत्यर्थः। 'एषः' इत्युपसंहारः।

इदानीं द्वादशानां कलानां मध्ये स्थानतो नामतश्चिन्तारूपां धारणां दर्शयति, धारणाभिरिति। 'घोषः' प्रज्ञा तत्फला घोषिणी, 'विद्युन्माली' यक्षराजः, तल्लोकप्रदा विद्युन्माली, 'पतङ्गी' पक्षिणी, आकाशगतिप्रदत्वात्, 'वायुवेगिनी' शीघ्रगतिप्रदा, 'नामधेया' पितृलोकप्रदत्वात्; पितरो हि नामभिरिज्यन्ते, "यन्नाम्ना पातयेत् पिण्डं तं नयेत् ब्रह्म शाश्वतम्" इत्युक्तेः। 'ऐन्द्री' इन्द्रसायुज्यप्रदत्वात्; 'वैष्णवी' विष्णुलोकप्रदत्वात्; 'शाङ्करी' शिवलोकप्रदत्वात्; 'महती' महर्लोकप्रदत्वात्; 'ध्रुवा' ध्रुवलोकप्रदत्वात्; 'मौनी' मुनीनां

प्रथमायान्तु मात्रायां यदि प्राणैर्वियुज्यते ।
स राजा भारते वर्षे सार्वभौमः प्रजायते ॥ १२ ॥
द्वितीयायां समुत्क्रान्तो भवेद्यक्षो महात्मवान् ।
विद्याधरस्तृतीयायां गन्धर्वस्तु चतुर्थिकाम् ॥ १३ ॥
पञ्चम्यामथ मात्रायां यदि प्राणैर्वियुज्यते ।
उषितः सह देवत्वं सोमलोके महीयते ॥ १४ ॥
षष्ठ्यामिन्द्रस्य सायुज्यं सप्तम्यां वैष्णवं पदम् ।
अष्टम्यां व्रजते रुद्रं पशूनाञ्च पतिन्तथा ॥ १५ ॥
नवम्याञ्च महर्लोकं दशम्याञ्च ध्रुवं व्रजेत् ।
एकादश्यां तपोलोकं द्वादश्यां ब्रह्म शाश्वतम् १६॥२
ततः परतरं शुद्धं व्यापकं निष्कलं शिवम् ।
सदोदितं परं ब्रह्म ज्योतिषामुदयो यतः ॥ १७॥

लोकं तपोलोकं प्रददाति ; तेन 'ब्राह्मी' ब्रह्मलोकं गमयति ; तेन ततः परन्तु फलं नादान्ते न लभ्यते ॥

इदानीं तत्तद्धारणासु स्थितान्तःकरणस्य प्राणवियोगे फलविशेषं नामभिः सूचितमाह, प्रथमायामित्यादिना । चतुर्थिकां प्राप्य समुत्क्रान्त इत्यन्वयः । देवत्वं प्राप्य सह देवैः 'ओषितः' आ उषितः सन् ब्रह्मलोकं 'शाश्वतं' ब्रह्मायुःपरिमितम् ॥२॥

पञ्चमात्रस्य नादान्तस्य विन्दुनामकस्य फलमाह, तत इति । ततः परतरं परं ब्रह्म इत्यन्वयः, ज्ञेयमिति शेषः । पूर्वोक्तं फलं परं, तस्मादिदमुत्कृष्यते इति परतरं, 'निष्कलं' कला द्वादशमात्राः, तद्विषयातिगं निष्कलं ; यद्वा 'कलाः'

अतीन्द्रियं गुणातीतं मनो लीनं यदा भवेत्।
अनौपम्यमभावञ्च योगयुक्तं तदादिशेत्॥ १८॥
तद्भक्तस्तत्समासक्तः शनैर्मुञ्चेत् कलेवरम्।

षोड़श षष्ठप्रश्नोक्ताः, तद्रहितम्; यतो 'ज्योतिषां' मन-आदीनां चक्षुरादीनां सूर्य्यादीनाञ्च उदयः, "तस्य भासा सर्वमिदं विभाति" इति श्रुतिः।

कथमिदं लभ्यते? यदा तदेतद्धारणा भवति, किं नाद-धारणया फलं? मनोलय एव; तदुक्तम्।

"काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते"॥ इति

द्वादशान्तेः तदेवाह मनो लीनमिति।

ननु मनोलये माध्यमिकवच्छून्यमेव तत्त्वं फलं स्यादित्यत आह आदिशेदिति। यदा मनो लीनं भवेत्तदा 'आदिशेत्' उपदिशेत् गुरुः, तदैव हि परमोऽधिकारः, न तु मनागपि विषयाभिलाषे सति मुख्योऽधिकारः। अथवा, 'तदादिशेत्' लब्धमिति कथयेत् मध्यस्थः, मध्ये मनो विशेषणानि। उपमैव औपम्यम्, स्वार्थे ष्यञ्; न औपम्यं यस्य मनसः अनौपम्यम्, न भावयति चिन्तयति इत्यभावम्, जीवपरमात्मनोरैक्यं योगः, तद्युक्तम्; अथवा 'योगः' चित्तवृत्तिनिरोधः, तद्युक्तम्।

अथवा योगयुक्तस्य मनसः किं लक्षणम्? अत आह, मन इति। यदा मनो लीनं भवेत् तथा अनौपम्यमभावं भवेत्, तदा 'योगयुक्तम्' प्राप्तयोगमिति 'आदिशेत्' कथयेदित्यर्थः। तस्मिन् भक्तिर्यस्य स तद्भक्तः। "भक्त्या लभ्यस्त्वन-

सुस्थितो योगचारेण सर्वसङ्ग-विवर्जितः ॥ २९ ॥
ततो विलीनपाशोऽसौ विमलः केवलः प्रभुः ।
तेनैव ब्रह्मभावेन परमानन्दमश्नुते ।
परमानन्दमश्नुते ॥ ३० ॥ इति ॥ ३ ॥

इत्यथर्ववेदे नादविन्दूपनिषत् समाप्ता ॥ ३ ॥

अथ ब्रह्मविन्दूपनिषत् ।

ओं मनो हि द्विविधं प्रोक्तं शुद्धञ्चाशुद्धमेव च ।
अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम् ॥ १ ॥

न्यथा" इत्युक्तत्वात् । तस्मिन् मना यस्य तन्मनाः, 'असक्तः' विषयेषु; छान्दसः सन्धिः; अथवा 'तन्मनाः सक्तः' इति पठनीयम्, 'सक्तः' आसक्तस्तत्रैव । 'योगचारेण' योगमार्गेण, 'सुस्थितः' सुस्थीभूतः, 'पाशाः' कर्माणि, 'केवलः प्रभुः' जीवभावरहितः । द्विरुक्तिः समाप्त्यर्था । अत्र प्रणवस्य नादविन्दो-र्निरूपणादकारादि-त्रये सत्यपि प्राधान्यान्नादविन्दूपनिषत् सञ्ज्ञा ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिका नादविन्दुके ॥ ३ ॥
इति नादविन्दूपनिषद्दीपिका सम्पूर्णा ॥

ओं ब्रह्मावबोधिका ब्रह्मविन्दूपनिषदुच्यते ।
अष्टादशी चतुःखण्डा शौनकग्रन्थविस्तरे ॥ १ ॥
उक्तो योगः, तत्फलं ब्रह्मसाक्षात्कारः ; तद् ब्रह्म कीदृशम् ?

मन एव मनुष्याणां कारणं बन्ध-मोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्॥ २॥
यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते।
तस्मान्निर्विषयं नित्यं मनः कार्य्यं मुमुक्षुणा॥ ३॥
निरस्त-विषयासङ्गं सन्निरुद्धं मनो हृदि।
यदा यात्युन्मनीभावं तदा तत् परमम्पदम्॥ ४॥
तावदेव निरोद्धव्यं यावद्धृदि गतं क्षयम्।
एतज्ज्ञानञ्च मोक्षञ्च अतोऽन्यो ग्रन्थविस्तरः॥५॥१॥
नैव चिन्त्यं न चाचिन्त्यमचिन्त्यं चिन्त्यमेव च।

कीदृशः साक्षात्कारः? कीदृशश्च लयरूपः समाधिः? एतदर्थमुत्तरो ग्रन्थ आरभ्यते, मनो हि द्विविधमित्यादिना। तयोर्लक्षणमाह, शुद्धमिति। कामात् सङ्कल्पयते तत कामसङ्कल्पम्। मनसो 'मुक्तिः' लयः, 'हृदि' हृत्कमले 'उन्मनीभावः' निःसङ्कल्पता ; तदुक्तम्। "यो मनःसुस्थिरीभावः सा चावस्था मनोन्मनी" इति। नैवेति। आद्यपादे विधेयद्वयम्, द्वितीयपादे क्रमेणोद्देश्यद्वयम्।

ननु मनः कथं निर्विषयं स्यात्? तत्त्वस्य चिन्तनीयत्वात्, अतत्त्वस्य च विस्मरणीयताच्च, इत्यत आह, अचिन्त्यमिति। 'अचिन्त्यं' चिन्तयितुमशक्यं यत् तत्त्वं, तन्नैव चिन्त्यम् अविषयत्वात्, 'चिन्त्यमेव' सर्वदा चिन्तयितुं योग्यमेव यत् विषयजातं तदचिन्त्यम् चिन्तयितुमयोग्यं विस्मरणीयं नास्ति, अवस्तुत्वात् न स्मर्त्तव्यं नापि विस्मर्त्तव्यम् किञ्चिदस्तीत्यर्थः।

पक्षपात-विनिर्मुक्तं ब्रह्म सम्पद्यते तदा ॥ ६ ॥
स्वरेण सन्धयेद् योगमस्वरं भावयेत् परम् ।
अस्वरेण हि भावेन भावो नाभाव इष्यते ॥ ७ ॥
तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तद् ब्रह्माहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम् ॥ ८ ॥
निर्विकल्पमनन्तञ्च हेतु-दृष्टान्त-वर्जितम् ।
अप्रमेयमनाद्यञ्च ज्ञात्वा च परमं शिवम् ॥ ९ ॥

'पक्षपातस्तु' तत्त्वचिन्तनम्, अतत्त्वविस्मरणञ्च, तेन 'विनिर्मुक्तं, रहितं यदा भवति, तदा ब्रह्म सम्पद्यते ।

प्रथमाधिकारिणं प्रत्याह, स्वरेणेति । 'स्वरेण' शब्देन गुरूपदेशेन प्रणवेन वा 'योगं' चित्तनिरोधं 'सन्धयेत्' आरभेत, 'अस्वरं' शब्दातीतं 'परं' वस्तु 'भावयेत्' चिन्तयेत् । 'भावेन' भाव्यमानेन चिन्त्यमानेन 'भावः' वस्तु परं ब्रह्म, 'अभावः' शून्यं नेष्यते, किन्तु अस्तीति 'इष्यते' गम्यते ; इष सर्पणे : ब्रह्मसाक्षाद्भवतीत्यर्थः । ये गत्यर्थास्ते ज्ञानार्थाः । अथवा 'स्वरेण' अकारोकारोपलक्षितेन जाग्रत्-स्वप्नाख्येन योगं कुर्य्यात्, अत्रातिशयेन जाग्रत्-स्वप्नेऽपि तदभ्यास-सम्भवात्, 'अस्वरं' मकारोपलक्षितम् आनन्दस्थानम् 'परम्' अग्रेतनम् भावयेत् । 'अस्वरेण' मकाराख्येन भावेन मात्रया 'नाभावः' अभावो न, किन्तु पूर्णो 'भावः' तुरीयम् 'इष्यते' गम्यते इति तदुक्तममृतविन्दौ,

"अस्वरेण मकारेण पदं सूक्ष्मञ्च गच्छति" इति ।

न निरोधो न चोत्पत्तिर्न वन्द्यो न च शासनम्।
न मुमुक्षा न मुक्तिश्च इत्येषा परमार्थता॥१०॥२॥
एक एवात्मा मन्तव्यो जाग्रत्-स्वप्न-सुषुप्तिषु।
स्थानत्रयाद्व्यतीतस्य पुनर्जन्म न विद्यते॥ ११ ॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥ १२ ॥
घटसम्भृतमाकाशं लीयमाने घटे यथा।
घटो लीयेत नाकाशं तद्वज्जीवो घटोपमः॥ १३॥
घटवद्विविधाकारं भिद्यमानं पुनः पुनः।
तद्भग्नं न च जानाति स जानाति च नित्यशः॥ १४॥
शब्द-मायावृतो यावत्तावत्तिष्ठति पुष्करे।
भिन्ने तमसि चैकत्वमेकमेवानुपश्यति॥ १५॥ ३॥

तदेवेति यत् साक्षात् भवति, तदेव ब्रह्म, न तु तदेव नैवमिति शक्यते। 'निरोधः' मरणम्, 'शासनम्' उपदेशः : न मुक्तिश्च इति। 'एषा' इति पदच्छेदः इदमर्थको निपातः, यद्वा, इत्येषा चेद्बुद्धिः, तर्हि 'परमार्थता' सत्यार्थज्ञता सम्पन्नेत्यर्थः। 'व्यतीतस्य' निष्क्रान्तस्य अधिकारिणः, 'नभोपमः' आकाशतुल्यः ; छान्दसः सन्धिः ; नभशब्दोऽकारान्तः। 'भिद्यमानं' देहजालं, 'नित्यशः' नित्यम् आत्मानं स जानाति : द्वितीयान्तात् स्वार्थे शस्प्रत्ययः। शब्देति। शब्दमात्रं या माया न वास्तवी, "वाचा रम्भणम्" इति श्रुतेः ; तया आवृतो यावत्, तावत् 'पुष्करे' हृत्-पुण्डरीके तिष्ठति। 'भिन्ने' ज्ञानेन

शब्दाक्षरं परं ब्रह्म यस्मिन् क्षीणे यदक्षरम् ।
तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः ॥१६॥
द्वे विद्ये वेदितव्ये तु शब्द-ब्रह्मपरञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥१७॥
ग्रन्थमभ्यस्य मेधावी ज्ञान-विज्ञान-तत्त्वतः ।
पलालमिव धान्यार्थी त्यजेद्‌ग्रन्थमशेषतः ॥ १८ ॥
गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ।

निवृत्ते 'तमसि' अज्ञाने एकत्वं भवति, एकमेव च अनुपश्यति ;

"पुष्करं पङ्कजे व्योम्नि पयः-करिकराग्रयोः ।
ओषधीद्वीप-विहग-तीर्थ-रागोरगान्तरे ।
पुष्करं तुर्य्यवक्त्रे च काण्डे खड्गफलेऽपि च" ॥

इति विश्वः ।

शब्दाक्षरमिति । शब्दश्च तदक्षरञ्च 'शब्दाक्षरं' शब्दब्रह्म इत्यर्थः, तथा 'परं' ब्रह्म चैतन्यञ्च, एतद्द्वयं वर्त्तते । 'विद्वान्' पण्डितः, एतयोर्मध्ये यस्मिन् क्षीणे सति यत् 'अक्षरम्' अक्षीणं भवति, तत् अक्षरं यदि 'ध्यायेत्' चिन्तयेत्, तथा यदि 'इच्छेत्' वाञ्छेत् ; तर्हि शान्तिम् आप्नुयात्, नान्यथा, तदेव स्पष्टयति, द्वे इति । 'निष्णातः' कुशलः ; "निनदीभ्यां स्नातेः कौशले" इति षत्वम् । विद्यास्नात इत्यर्थः । 'मेधावी' ग्रन्थाभ्यासेन कृतबुद्धिः 'ज्ञानं' शाब्दं 'विज्ञानं' साक्षात्कारः, उभयोः 'तत्त्वतः' तत्त्वं ज्ञात्वा, 'ल्यबर्थे' पञ्चमी । गवामिति । 'गवां' सौरभेयीणाम् अनेकवर्णानामपि सतीनां यत् क्षीरं, तस्यैक-

क्षीरवत्पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥ १९ ॥
घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम्
सततं मन्थयितव्यं मनसा मन्थानभूतेन ॥ २० ॥
ज्ञाननेत्रं समादाय चरेद्वह्निमतःपरम्।
निष्कलं निर्मलं शान्तं तद्ब्रह्माहमिति स्मृतम् २१
सर्वभूताधिवासञ्च यद्भूतेषु वसत्यधि।
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेव
तदस्म्यहं वासुदेव ॥ २२ ॥ इति ॥ ४ ॥

इत्यथर्ववेदे ब्रह्मविन्दूपनिषत् समाप्ता ॥ ४ ॥

वर्णता भवति, विद्वान् ग्रन्थेषु क्षीरवज्ज्ञानं 'पश्यते' परीक्ष्य गृह्णाति ; यथा 'लिङ्गिनः' वेत्रधारिणः आभीराः गवां क्षीरं गृह्णन्ति, तद्वत्।

सदृष्टान्तं ज्ञेयस्य ग्रहणोपायमाह, घृतमिवेति ज्ञाननेत्रमिति। 'ज्ञानं' शास्त्रीयं, तदेव 'नेत्रं' दृष्टिः, तत् 'समादाय' शास्त्रतो गुरुतश्च गृहीत्वा ततः परं 'वह्निं' वैश्वानरम् अनुभवरूपं 'चरेत्' साधयेत्। साक्षात्कारस्य वह्निता शास्त्रे प्रसिद्धा ; यथा,

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन" इति।

यद्वा 'वह्निं' प्रणवं 'चरेत्' उच्चरेत् ; वक्ष्यति च, अग्निं शब्दमेवानुचिन्तयेत्। ओमित्येकाक्षरं ब्रह्मेति। शब्दस्याग्निता मुखजत्वात् "मुखादग्निरजायत" इति श्रुतेः, प्रकाशकत्वाच्च।

अनुभवस्य विषयमाह निष्कलमिति। अनुभवस्य स्वरू-

अथ अमृतविन्दूपनिषत् ।

ओं शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्मविद्याया उल्कावान्नान्यथोत्सृजेत् ॥ १ ॥

पमभिनीय दर्शयति, तदिति । 'तत्' ज्ञानं ब्रह्माहमित्येवमाकारं स्मृतम् । सर्वेषां भूतानामधिवासोऽस्मिन् सर्वभूताधिवासं यच्च भूतेष्वधिवसति, यस्मादधिकमिति सप्तमी, सर्वानुग्रहकर्तृत्वेन वासुदेव इति प्रसिद्धं तदहमस्मि, स एव वासुदेव इति प्रसिद्धं तदहमस्मि, स एव वासुदेव ईश्वरोऽपि, जीवेश्वरयोर्ब्रह्मण्यैक्यमित्यर्थः । द्विरुक्तिः समाप्त्यर्था ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानां दीपिका ब्रह्मविन्दुके ।

इति ब्रह्मविन्दूपनिषद्दीपिका सम्पूर्णा ॥ ४ ॥

अमृतस्य यथा विन्दुर्मृत्युं हरति देहिनाम् ।
अल्पग्रन्थोऽप्यष्टखण्डोऽमृतविन्दुस्तथा ह्ययम ॥ १ ॥

योगसाधनस्य प्रथमां पीठिकामाह, शास्त्राणीति । मेधावीति । अध्ययनेन तर्काभ्यासेन मेधापि कर्त्तव्या इत्यर्थः यच्छ्रुतिः ।

"पण्डितो मेधावीति, बाल्यञ्च पाण्डित्यञ्च निर्विद्येति च" । स्मृतिरपि ।

"यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" इति ।

ब्रह्मविद्यायाः परमं कारणं जीवितमिति शेषः । 'उल्कावत्' चञ्चलं विद्युदुन्मिषित-तुल्यं जीवितम्, 'अन्यथा' प्रकारान्तरेण कामव्यसनादिना 'नोत्सृजेत्' न क्षिपेत्, शास्त्राण्यधीत्ये-

ओङ्कारं रथमारुह्य विष्णुं कृत्वा तु सारथिम्।
ब्रह्मलोक-पदान्वेषी रुद्राराधन-तत्परः॥ २॥
तावद्रथेन गन्तव्यं यावद्रथ-पथि स्थितः।
स्थित्वा रथपथ-स्थानं रथमुत्सृज्य गच्छति॥ ३॥
मात्रा लिङ्गपदं त्यक्त्वा शब्दव्यञ्जनवर्जिता।
अस्वरेण मकारेण पदं सूक्ष्मञ्च गच्छति॥ ४॥

त्ये तदर्थंसाक्षात्काराय प्रयतेत; प्रयत्नश्च वक्ष्यमाणो योगाभ्यासः। यद्वा, ब्रह्मविद्यायाः 'परमं' कारणम् अध्ययनम् 'अन्यथा' ज्ञानमप्राप्य नोत्सृजेत्, 'उल्कावत्' दीपिकावत्; यथा दीपिका तमसि मार्गं गृहीता गृहमप्राप्य नोत्सृज्यते, तद्वत् शास्त्रं साक्षात्कार-पर्य्यन्तं नोत्सृजेदित्यर्थः। ओङ्कारं रथं गतिहेतुत्वात्, रथः ओंकारः; 'विष्णुम्' उकारदेवतां सारथिं कृत्वा; स ह्युक्तिगतौ प्रेरकः, तेन सारथ्यं सम्भवति। अकार-देवता यो ब्रह्मा, तस्य यः 'लोकः' ब्रह्मसदनं, तस्य 'पदं' मार्गः, तदन्वेषणशीलः, मकारदेवता यो रुद्रः, तदाराधने 'तत्परः' परायणः।

तावदिति। 'रथेन' ओङ्कारेण तावद्गन्तव्यं, यावत् 'रथ पथि' गन्तव्यं गच्छन् तन्मार्गे स्थितः; समासान्तविधेरनित्यत्वादप्रत्ययो न कृतः। स्थित्वेति। यद्वा तदेत्यध्याहारः; यद्वा रथस्य पन्थाः रथपथः; समासान्तोऽकारः; तस्य 'स्थानं' स्थितिः निवृत्तिर्भवति; अत्र तिष्ठतिर्निवृत्तौ वर्त्तते; तदा 'स्थित्वा' कियत्कालं विलम्ब्य रथम् 'उत्सृज्य' त्यक्त्वा 'गच्छति' साध्यसाधनभाव-रहितं स्थानं प्रविशतीत्यर्थः, साकारोपासनापरिवासित-चेतसो यतयो ब्रह्मपदवीमनुप्राप्य प्रव्रजन्तीति

शब्दादिविषयाः पञ्च मनश्चैवातिचञ्चलम् ।
चिन्तयेदात्मनो रश्मीन् प्रत्याहारः स उच्यते॥५॥१
प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥ ६ ॥

श्रुतिः। 'मात्राः' अकारादयः, तासां 'लिङ्गं' जागरितस्थानो वहिःप्रज्ञः सप्ताङ्ग इत्यादि तस्य 'पदं' स्थानं जागरादि त्यक्त्वा 'शब्देन' स्वरेण 'व्यञ्जनेन च' मकारेण 'वर्जितं' रहितम्। 'अस्वरेण' स्वरातिरिक्तेन मकारेण अन्तरङ्ग-साधनेन 'सूक्ष्मं पदं' तुरीयाख्यं गच्छति।

शब्दादीति। शब्दादीनि पञ्च 'विषयाः' तदुपलक्षितानीन्द्रियाणि 'अतिचञ्चलं' सर्वेन्द्रिय-विषयव्यापि मनश्च 'आत्मनः' सूर्य्यस्थानीयस्य, रश्मय इति, 'चिन्तनम्' आत्मैक्यापादनमिति यावत्, स प्रत्याहारः इत्यर्थः; तदुक्तं याज्ञवल्क्येन;

"यद्यत् पश्यति तत्सर्वं पश्येदात्मानमात्मनि।
प्रत्याहारः स च प्रोक्तो योगविद्भिर्महात्मभिः" ॥ इति।

प्रत्याहारः इति। यम-नियमासनानि तु वाह्याङ्गत्वात् न गणितानि। यम-नियमौ तु;

"अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः।
आस्तिक्यं ब्रह्मचर्य्यञ्च मौनं स्थैर्य्यं क्षमाभयम्॥
शौचं जपस्तपो होमः श्रद्धातिथ्यं सुरार्चनम्।
तीर्थाटनं परार्थेहा तुष्टिराचार्य्य-सेवनम्।
एते यमाः सनियमा उभयोर्द्वादश स्मृताः॥"

इति द्रष्टव्यौ। 'तर्कः' मननं 'समाधिः' निदिध्यासनं 'रुचिरं' मनोहरं गुरूपदिष्टं रूपं 'चिन्तयेत्' ध्यायेत्। रुचिर इति।

यथा पर्वतधातूनां दह्यन्ते धमनान्मलाः।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥७॥
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम्।
किल्बिषञ्च क्षयं नीत्वा रुचिरञ्चैव चिन्तयेत् ॥८॥
रुचिरे रेचकञ्चैव वायोराकर्षणन्तथा।
प्राणायामास्त्रयः प्रोक्ता रेचक-पूरक-कुम्भकाः ॥९॥
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायत-प्राणः प्राणायामः स उच्यते ॥१०॥२
उत्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकम्।

'रुचिरे' चिन्त्यमाने सति रेचकं कुर्य्यात्; चकारात् कुम्भकम्; तथा वायोः 'आकर्षणम्' अन्तर्नयनं कुर्य्यात्।

प्राणायामत्रयं कुर्य्यादित्याह, प्राणायामा इति। 'प्राणायामाः' निरोधाः 'त्रयः' त्रिविधाः। प्राणायाम-मन्त्रमाह, सव्याहृतिमिति। व्याहृति-शिरसोरपि सप्रणवत्वं बोद्धव्यम्; तदुक्तम्;

"एता एतां सहैतेन तथैभिर्दशभिः सह।
त्रिर्जपेदायत-प्राणः प्राणायामः स उच्यते॥" इति।

'एताः' सप्त व्याहृतीः, 'एतां' गायत्रीम्, 'एतेन' शिरसा, 'एभिः' प्रणवैः; शक्तौ सत्यां त्रिः पठेत्, अशक्तौ तु सकृत्पठेत्।

प्रत्येकं रेचकादीनां लक्षणमाह, उत्क्षिप्येति। वायुम् 'उत्क्षिप्य' ऊर्द्ध्वं नीत्वा 'आकाशम्' उदरं कृत्वा 'निरात्मकं' प्राणरहितम्;

शून्यभावेन युञ्जीयाद्रेचकस्येति लक्षणम् ॥ ११ ॥
न चोच्छ्वसेन्नानुच्छ्वसेन्नैव गात्राणि चालयेत् ।
एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणम् ॥ १२ ॥
वक्त्रेणोत्पलनालेन वायुं कृत्वा निराश्रयम् ।
एवं वायुर्ग्रहीतव्यः कुम्भकस्येति लक्षणम् ॥ १३ ॥
अन्धवत् पश्य रूपाणि शृणु शब्दमकर्णवत् ।
काष्ठवत्पश्यते देहं प्रशान्तस्येति लक्षणम् ॥१४॥३॥

"आत्मा देह-मनो-ब्रह्म-स्वभाव-धृति-बुद्धिषु । प्रयत्ने वापि" इति, अपि-शब्दात् प्राणे चेति विश्वाभिधानात् । 'आत्मानं प्राणं' शून्यत्वेन योजयेत्, स रेचक इत्यर्थः ।

अनुच्छ्वसेदिति । नञस्तिङा समासः । उच्छ्वासानुच्छ्वासौ न कुर्य्यात्; किन्तु निगरण-लक्षण-मनुच्छ्वासमेव कुर्य्यात्, स एव गृहीत इत्युक्तत्वात् । वक्त्रेणेति । उत्पलस्य नालमिव वायुसञ्चार-हेतुत्वात्, तादृशेन वक्त्रेण वायुं 'निराश्रयं' बहिर्निर्गतं कृत्वा यदवस्थानं स कुम्भकः; प्रकारान्तरेण कुम्भकः एवमिति । यथा बहिः कृतः, तथा वक्त्रेण 'ग्रहीतव्यः' अन्तर्नेयः । नीत्वा रोद्धव्य इति द्विविधं कुम्भकस्य लक्षणम्; तदुक्तम् ।

"पूरणादि-रेचनान्तः प्राणायामस्तु वैदिकः ।
रेचनादि-पूरणान्तः प्राणायामस्तु तान्त्रिकः" ॥ इति ।

प्रत्याहार-प्राणायामयोर्लक्षणे उक्त्वा धारणां लक्षयितुं तदधिकारिणं शान्तं लक्षयति, अन्धवदिति । 'पश्य' हे शिष्य ! इति श्रुतेर्वचः; 'ते' तव स्वीयं देहं काष्ठवत् पश्य निरभि-

मनः सङ्कल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान्।
धारयित्वा तथात्मानं धारणा परिकीर्त्तिता॥१५॥
आगमस्याविरोधेन ऊहनं तर्क उच्यते।
यं लब्ध्वाप्यवमन्येत समाधिः परिकीर्त्तितः॥१६॥
भूमिभागे समे रम्ये सर्वदोष-विवर्जिते।
कृत्वा मनोमयीं रक्षां जप्त्वा चैवाथ मण्डलम्॥१७॥
पद्मकं स्वस्तिकं वापि भद्रासनमथापि वा।
बद्ध्वा योगासनं सम्यगुत्तराभिमुखः स्थितः॥१८॥

मानितया; प्रशान्तस्यापीति। इदमेव लक्षणम्; अन्धस्य यथा रूपाद्विकारो न भवति, तद्वत् यस्य रूपदर्शनेऽप्यविक्रियं मनः, काष्ठवत् देहेऽप्यास्थारहितः, स प्रशान्त इत्यर्थः। मन इति। 'मनः' मानसं 'सङ्कल्पकं' सङ्कल्पकत्वं 'ध्यात्वा' विचिन्त्य 'आत्मनि' बुद्धौ प्राणे वा सङ्क्षिप्य 'आत्मानं' प्राणं बुद्धिं वा 'धारयित्वा' स्थिरीकृत्य यत् तिष्ठति सा धारणा उक्ता।

चतुर्णां लक्षणमुक्त्वा शिष्टयोस्तर्क-समाध्योराह, आगमस्येति। आगम-विरोधेन ऊहने बाह्यता-प्रसङ्गात्; यं 'लब्ध्वा' प्राप्यापि दृष्ट्वापि 'अवमन्येत' अवजानीयात् यदर्थेपि शब्दादिष्टमिति लभ्यते, यं प्राप्य सर्वमन्यत् न रोचते, स समाधिरित्यर्थः "यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः" इति गीतोक्तेः। 'मनोमयीम्' आत्मचिन्तनरूपां चक्रमन्त्रादिना दिग्बन्धादिरूपां वा 'मण्डलं' मण्डलब्राह्मणम् आदित्यदेवत्यं "यदेतन्मण्डलं तपति" इत्यादिरूपम्। पद्मकमिति। पद्मकादीनां लक्षणानि योगयाज्ञवल्क्ये उक्तानि।

"ऊर्वोरुपरि विप्रेन्द्र ! कृत्वा पादतले उभे ।
पद्मासनं भवेदेतत् सर्वेषामपि पूजितम् ॥
जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे ।
ऋजुकायः समासीनः स्वस्तिकं तत् प्रचक्षते" ॥ इति ।

तत्रैव प्रकारान्तरेण स्वस्तिकमुक्तम् ।

"सीवन्यामात्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः ।
सव्ये दक्षिण-गुल्फन्तु दक्षिणे दक्षिणेतरम् ।
एतच्च स्वस्तिकं प्रोक्तं सर्वपाप-प्रणाशनम्" ॥ इति ।
"गुल्फौ तु वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
पार्श्व-पादौ च पाणिभ्यां दृढं बद्ध्वा सुनिश्चलम् ।
भद्रासनं भवेदेतत् सर्वव्याधि-विषापहम्" ॥ इति ।

'योगासनं' सिद्धासनम् ; तदुक्तं हठप्रदीपिकायाम् ।

योनिस्थानकमङ्घ्रिमूल-घटितं कृत्वा दृढं विन्यसेत्
मेढ्रे पादमथैकमेव नियतं कृत्वा समं विग्रहम् ।
स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन् भ्रुवोरन्तरं
चैतन्मोक्ष-कपाट-भेदजनकं सिद्धासनं प्रोच्यते ॥ इति ।

मतान्तरे च ।

"मेढ्रादुपरि विन्यस्य सव्यं गुल्फं तथोपरि ।
गुल्फान्तरञ्च निक्षिप्य सिद्धासनमिदं भवेत् ॥
एतत् सिद्धासनं प्राहुरन्ये वज्रासनं विदुः ।
मुक्तासनं वदन्त्यन्ये प्राहुर्गुप्तासनं परे ॥
यमेष्विव मिताहारोऽप्यहिंसा नियमेष्विव ।
मुख्यं सर्वासनेष्वेकं सिद्धाः सिद्धासनं विदुः ॥
चतुरशीति-पीठेषु सिद्धमेव सदाभ्यसेत् ।
द्वि-सप्तति-सहस्रेषु सुषुम्नामिव नाड़िषु" ॥ इति ।

नासिका-पुटमङ्गुल्या पिधायैकेन मारुतम्।
आकृष्य धारयेदग्निं शब्दमेवाभिचिन्तयेत्॥१९॥४॥
ओमित्येकाक्षरं ब्रह्म ओमित्येकेन रेचयेत्।
दिव्यमन्त्रेण बहुशः कुर्यादात्ममल-च्युतिम् ॥२०॥
पश्चाद्ध्यायेत पूर्वोक्तं क्रमान्मन्त्रं विनिर्दिशेत्।

योगार्थमासनमिति वा। उत्तरेति। योगस्य उत्तरमार्गप्रदत्वात्। नासिकेति। एकं नासिकापुटम् अङ्गुल्या पिधाय 'एकेन' पार्श्वेन 'मारुतं' वायुम् आकृष्य 'धारयेत्' अन्तः स्तम्भयेत्, 'अग्निं' तेजोमयम्, अर्थप्रकाशकञ्च शब्दमेव अभिचिन्तयेत्।

कं शब्दम्? इत्यपेक्षायामाह, ओमित्येकाक्षरमिति। ओमित्येतेनैव मन्त्रेण 'एकेन' पूरणातिरिक्तेन पार्श्वेन रेचयेत् वायुं : तदुक्तम्।

"बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत्।
धारयित्वा यथाशक्ति पुनः सूर्य्येण रेचयेत्" ॥ इति।

'दिव्यमन्त्रेण' प्रणवेन 'आत्ममल-च्युतिं' शरीरमल-नाशं नाड़ीशुद्धिं, प्राणायामैर्नाड़ीमलाः शुष्यन्ति ततस्तासु वायुप्रचारो भवति। 'आत्ममलः' पापं, तस्य 'च्युतिं' नाशम् इति वा ; तदुक्तम्।

"नित्यमेवं प्रकुर्वीत प्राणायामांस्तु षोड़श।
अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः" ॥ इति।

'पश्चात्' प्राणायामैः पापं दग्ध्वा 'ध्यायेत्' चिन्तयेत् 'पूर्वोक्तं' शब्दमेवाभिचिन्तयेदित्युक्तं, 'क्रमशः' अनुक्रमेण अकारोकारमकारार्द्धमात्राः लोक-वेद-देवाग्न्यादि-सहिता घोषिण्यादिमात्राः क्रमसहिताश्च 'ध्यायेत' चिन्तयेत्, 'मन्त्र' मन्त्रं 'निर्दि-

स्थूलातिस्थूल-मात्रायां नातिमूर्धमतिक्रमः ॥२१॥
तिर्य्यगूर्द्धमधो दृष्टिं विनिधार्य्य महामतिः ।
स्थिरस्थायी विनिष्कम्पस्तदा योगं समभ्यसेत् ॥२२॥

शेत्' उच्चरेत्; अत्र मन्त्वेत्यविभक्तिको निर्देशः। स्थूलेति। 'स्थूलमात्रा' अशीति-प्रणवावृत्तिपर्य्यन्तं धारणम्; तदुक्तम्।

"प्रातर्मध्यदिने सायमर्द्धरात्रे च कुम्भकान्।
शनैरशीति-पर्य्यन्तं चतुर्वारं समभ्यसेत्" ॥ इति।

'अतिस्थूलां' ततोऽप्यधिकाधिकं धारणम्; एवं स्थूलायां मात्रायाम् अतिस्थूलायाञ्च मात्रायाम् 'अतिम्' अतिशयम् ऊर्द्ध्वं नयेत्, मात्रास्वतिशयं न कुर्य्यादित्यर्थः। कस्मात् न कुर्य्यात्? प्रत्युत अतिशये शीघ्रं सिद्धिर्भवति? इत्यत आह, अतिक्रम इति। एवं हि वायोरतिक्रमे दोष उक्तः,

"हिक्का श्वासश्च कासश्च शिरः-कर्णादि-वेदना।
भवन्ति विविधा दोषाः पवनस्य व्यतिक्रमात्" ॥ इति।

तिर्य्यगिति। 'तिर्य्यक्' अग्रे धावन्तीम् 'ऊर्द्ध्वम्' आकाश-गामिनीम् 'अधः' वा चरणन्यस्तां 'दृष्टिं' नेत्रकान्तिं 'विनि-धार्य्य' धृत्वा 'महामतिः' स्थूललक्ष्यः, 'स्थिरः' चित्तेन, 'स्थायी' दृढ़ासनः। दृष्टेस्तिर्य्यक् त्वमुक्तम्।

"अन्तर्लक्ष्य-वहिर्दृष्टिर्निमेषोन्मेष-वर्जिता।
एषा हि शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता" ॥ इति।

ऊर्द्ध्वत्वमप्युक्तम्।

"भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी"। इति।

अधस्त्वमप्युक्तम्।

"दृष्ट्या निश्चलतारया वहिरधः पश्यन्" ॥ इति।

तालमात्रा तथा योगो धारणा योजनन्तथा।
द्वादशमात्रो योगस्तु कालतो नियतः स्मृतः॥२३॥

'विनिष्कम्पम्' विशेषेण निष्कम्पम् 'योगम्' उत्तमं योगं तदा अभ्यसेत्। निष्कम्पोऽप्युत्तमो योगः, सकम्पो मध्यमः, सखेदः कनीयान्; तदुक्तम्।

"कनीयसि भवेत् खेदः कम्पो भवति मध्यमे।
उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासनं मुहुः" ॥ इति।

कम्पात् 'निष्क्रान्तः' अपगतः, निष्कम्पः उत्तमः, विशेषेण निष्कम्पः अत्युत्तमः, तं समभ्यसेत्।

तालेति। अयं पदार्थो योगशास्त्रे 'कालतः' कालेन 'नियतः' एकरूपः स्मृतः। कः पदार्थः? एकतालो वायोः कालतो बहिः स्थूलस्य मध्ये प्रवेशः, मध्यस्थस्य च बहिर्निर्गमनं, सा नियतकाला भवति; यावत्काला पूर्वदिने, तावत्काला परदिने, इति मात्रा नियतकाला भवति; अन्यथा कल्पपर्य्यन्तं भूविवरे भवति।

षोड़श पूरणे चेत्, चतुःषष्टिः कुम्भने, द्वात्रिंशत् रेचने इति; 'योगः' समाधिः, सोऽपि नियतकालः; अन्यथा कल्पपर्य्यन्तं भूविवरे समाधिस्थस्य विदेह-कैवल्याभाव-प्रसङ्गः। 'धारणा' मनःसङ्कल्पकमित्यादि-लक्षणा, सापि "धारयेत् पञ्च घटिका भवरोगैर्विमुच्यते" इत्यादौ नियतकालैवोक्ता; 'योजनं' संयोजनं प्राणापानयोः; यथा पूर्वदिने चेत् षोड़श प्राणायामाः, तर्हि परदिने ततो न्यूना अधिका वा न भवन्ति। द्वादशमात्रो योगो नादबिन्द्वाद्युक्तः, सोऽपि कालतो नियतः स्मृतः; परस्पर-तुल्यकाला एव घोषिण्यादयो ध्येया इत्यर्थः। अथ च तालादिः फलेऽपि कालतो नियतः स्मृतः, नियतकाल-

अघोषमव्यञ्जनमस्वरञ्च अकण्ठताल्वोष्ठ मनासिकञ्च
अरेफजातमुभयोष्ठवर्जितं यदक्षरं न क्षरते कदाचित्

मेव फलं ददाति परिच्छिन्नं, न तु कालापरिच्छिन्नं फलं ददातीत्यर्थः।

तर्हि कालापरिच्छिन्नं फलं किम्? इत्यत आह, अघोषमिति। यदक्षरं तदपरिच्छिन्नफलमित्यर्थः, तत् किमकारादिष्वन्यतरत्? न इत्याह, 'अघोषं' वर्गाणां प्रथमाः, द्वितीयाः, श-ष-साश्चाघोषाः; ततोऽन्ये घोषाः; तन्न भवति। तर्हि फलव्यञ्जनं तद्रूपं नेत्याह, अव्यञ्जनमिति। तर्हि अचः स्वरास्तद्रूपं नेत्याह, अस्वरमिति। न स्वरत्वं यस्य तदस्वरम्। तर्हि अ-कु-ह-विसर्जनीयानां कण्ठः, 'इ-चु-य-शानां तालु' उ-पुपध्मानीयानामोष्ठौ, तद्रूपं नेत्याह, अकण्ठताल्वोष्ठम्, अस्वरञ्च, अकण्ठोत्पन्नाविवक्षितत्वादसन्धिः; सन्धौ तु न्यूनाक्षरं छन्दः स्यात्। तर्हि नासिकानुस्वारस्य तद्रूपं नेत्याह, अनासिकञ्चेति। तर्हि ऋ-टु-र-षाणां मूर्द्धा, तदन्तर्भूतं नेत्याह, अरेफेति। 'रेफजातं' रेफवर्गो मूर्द्धन्यः, तन्न भवतीत्यर्थः। तर्हि लृ-तु-ल-सानां दन्ताः, तद्रूपं नेत्याह, उभयोष्ठवर्जितमिति। उभौ 'ओष्ठौ' आवरकौ यस्य उभयोष्ठो दन्तः, तेन तदुच्चार्य्यौ वर्णः, तन्न भवतीत्यर्थः। यद्यप्यव्यञ्जनमस्वरमिति वर्णमात्रं प्रतिषिद्धम्, एतावन्तो हि वर्णाः, यद्व्यञ्जनानि स्वराश्च, तथापि सामान्यतो विशेषतश्च प्रतिषेधार्थमघोषाद्युपादानम्।

तर्हि किं तदक्षरं? यस्य लक्षणं वक्तव्यम्, इत्यत आह, न क्षरते कदाचिदिति। नादान्तस्थं परं शान्तमित्यर्थः

यत्प्रतिपादनादमृतविन्दुरिति ग्रन्थाभिधा। अत्रेत्थं योग-प्रक्रिया। यम-नियमाभ्यां क्षपित-वाह्यदोषः, निर्वाते तीर्था-दिदेशे सिद्धक्षेत्रे वा सिद्ध-स्वस्तिक-पद्म-भद्र-सिंहाद्यन्यतमदा-सनमालम्ब्य नियतभुक्,

धौतिर्वस्तिश्च नेतिश्च त्राटकं नौलिका तथा।
कपालभातिश्चैतानि षट्कर्म्माणि प्रचक्षते ॥

इत्युक्तैः कर्म्मभिः प्राणसंयमैरेव वा शुद्धनाड़ीगणः, प्राणा-यामाभ्यासेन सिद्धकेवल-कुम्भकः, अङ्गुष्ठादि-मूर्द्धान्त-मर्म्म-प्रदेशेषु प्राणमनो-धारणाभिः प्रत्याहृतेन्द्रियगणः, पृथिव्यादि-पञ्चधारणाभिः शुद्धभूत-भौतिक-तत्त्वः, सगुण-निर्गुण-ध्यानैः क्षपिततमोमलः, उन्मनीभाव-लक्षणं समाधिमारुरुक्षुः, षट्चक्र-भेदेन द्वादशान्तं ब्रह्मरन्ध्रमातिष्ठेत्। तत्प्रकारस्तु मूलबन्धो-ड्डियानबन्धजालन्धरबन्धैः महाबन्ध-महावेध-शक्तिचालनैश्चापा-नस्थमपानवायुमूर्द्ध्वमाकुञ्च्य, तेन मूलाधारगतं त्रिकोणस्थ-मग्निं प्रज्वाल्य, तेन कन्दोत्थां कुण्डलीं सर्पाकारां पश्चिम-देह-भागेन पूर्वदेहभागमष्टधावेष्ट्य, मुखेन पुच्छं गृहीत्वा, मुखञ्च सुषुम्णा मुखे प्रवेश्य, सुप्तां प्रताप्य, तानेन प्रबोध्य, रोधनं सुषुम्णा मुखं विरलीकृत्य, प्रसार्य्य, तत्र साग्निशिखं वायुं मनसा प्रवेश्य, वंशदेशस्थ-वंशाकृति-सुषुमणायाः पर्वस्थानी-यानि चक्राणि ओङ्कारं समुच्चरन्, मनसा विष्णुचिन्तन-सना-थेन वाय्वग्नि-सहायेन भिन्दानो, मूर्ध्नि सहस्रदलमाक्रामेत्, इति। तदुक्तं हंसोपनिषदि। "तं विदित्वा न मृत्युमेति; गुदमवष्टभ्य, आधाराद्वायुमुत्थाप्य, स्वाधिष्ठानं त्रिः प्रदक्षिणी-कृत्य, मणिपूरकञ्च गत्वा, अनाहतमतिक्रम्य, विशुद्धौ प्राणान् निरुध्य, आज्ञामनुध्यायन् ब्रह्मरन्ध्रं त्रिमात्रोऽहमित्येवं सर्वदा ध्यायन् इति।

न च प्राणापानयोर्युगपन्निरोधे शूल-हिक्काध्मानादि दोष प्रसङ्ग इति वाच्यम्, गुरूपदिष्टबोधत्रयस्य युगपदनुष्ठितस्य महिम्नः, अमृत-मुखस्य महिम्नः, अमृतमुखस्य जलपूर्णघट-स्येव दोषानवकाशात्। अस्य च योगस्य फलमक्षरावगतिरूपं स्वरव्यञ्जन-वर्जितमित्युपक्रम्य अघोषमित्यादिना उपसंहृतम्।

षट् कर्म्माणि यथा—

"चतुरङ्गुल-विस्तारं सिक्तं वस्त्रं शनैर्ग्रसेत्।
ततः प्रत्याहरेच्चैतदाख्यातं धौतिकर्म्म तत् ॥ १ ॥
नाभिदघ्ने जले पायुन्यस्त-नालोत्कटासनः।
आधाराकुञ्चनं कुर्य्यात् प्रख्यातं वस्तिकर्म्म तत् ॥२॥
सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत्।
मुखान्निर्गमयेच्चैषा नेतिः सिद्धैर्निगद्यते ॥ ३ ॥
ईक्षते निश्चलदृशा सूक्ष्मलक्ष्मं समाहितः।
अश्रु-सम्पात-पर्य्यन्तमाचार्य्यैस्त्राटकं मतम् ॥ ४ ॥
अमन्दावर्त्तवेगेन तुन्दं सव्यापसव्यतः।
नतांसो भ्रामयेदेषा नौली गोलैः प्रशस्यते ॥ ५ ॥
भस्त्रेव लोहकारस्य रेच-पूरौ ससम्भ्रमौ।
कपालभाती विख्याता कफदोष-विशोषिणी" ॥६॥ इति।

बन्धत्रयं क्षुरिकायां व्याख्यातम्। महाबन्धो यथा।

"पार्ष्णिं वामस्य पादस्य योनिस्थाने नियोजयेत्।
वामोरूपरि संस्थाप्य दक्षिणं चरणन्तथा ॥ १ ॥
पूरयित्वा ततो वायुं हृदये चिवुकं दृढम्।
निभृत्य योनिमाकुञ्च मनोमध्ये नियोजयेत् ॥ २ ॥
धारयित्वा यथाशक्ति रेचयेदनिलं शनैः।
सव्याङ्गे च समभ्यस्य दक्षाङ्गे पुनरभ्यसेत् ॥ ३ ॥
मतमत्र तु केषाञ्चित् कण्ठबन्धं विवर्जयेत्।

येनासौ पश्यते मार्गं प्राणस्तेन हि गच्छति।
अतः समभ्यसेन्नित्यं सन्मार्ग-गमनाय वै ॥ २५ ॥

राजदन्तद्वयं तत्र जिह्वयोक्तं भवेदिति ॥ ४ ॥
अयं खलु महाबन्धो महासिद्धि-प्रदायकः।
कालपाश-महाबन्ध-विमोचन-विचक्षणः।
अयञ्च सर्वनाड़ीनामूर्द्ध्वगति-प्रबोधकः" ॥ इति।

महावेधो यथा।

"महाबन्धस्थितो योगी कृत्वा पूरकमात्मधीः।
वायूनां गतिमाकृष्य निभृतं कण्ठमुद्रया ॥ १ ॥
न्यस्तहस्तयुगो भूमौ निभृतं ताड़येच्छनैः।
पुटद्वयं समाक्रम्य वायुः स्फुरति सत्वरम् ॥ २ ॥
सोम-सूर्य्याग्नि-बन्धाय जायते वामृताय वै।
मृतावस्था समुत्पन्ना ततो वायुं विरेचयेत्।
महावेधोऽयमभ्यासान्महासिद्धि-प्रदायकः" ॥३॥ इति।

शक्तिचालनं यथा।

"पुच्छं प्रगृह्य भुजगीं सुप्तामुद्बोधयेद् बुधः।
निद्रां विहाय सा क्रुद्धा ऊर्द्ध्वमुत्तिष्ठते हटात्"॥१॥ इति।

अन्यत्रापि।

सन्तप्तो वह्निना तत्र वायुना चालितो यदा।
प्रसार्य्य फणभृद्भोगं प्रबोधं याति तत्तदा" ॥१॥ इति॥५॥

ननु प्राणस्तत्र तत्र प्रदेशे केनोपायेन नेतव्यः? इत्याह, येनेति। 'असौ' योगी 'येन' मनोलक्षणेन करणेन 'मार्गं' गन्तव्यं 'पश्यते' प्रविश्य गन्तव्यतया निश्चिनोति, प्राणः 'तेन' एव मनसा सह तत्र तत्र याति, मनसा तत्तत्स्थान-

हृद्द्वारं वायुद्वारञ्च ऊर्द्धद्वारमतः परम् ।
मोक्षद्वारविलञ्चैव शुषिरं मण्डलं विदुः ॥ २६ ॥
भयं क्रोधमथालस्यमतिस्वप्नातिजागरम् ।
अत्याहारमनाहारं नित्यं योगी विवर्जयेत् ॥२७॥
अनेन विधिना सम्यङ् नित्यमभ्यस्यतः क्रमात् ।
स्वयमुत्पद्यते ज्ञानं त्रिभिर्मासैर्न संशयः ॥ २८ ॥
चतुर्भिः पश्यते देवान् पञ्चभिस्तुल्यविक्रमः ।

ध्यानमेव तत्र मूलाधारादौ प्राण-प्रवेशे उपाय इत्यर्थः । यतोऽयं प्राण-प्रवेशे उपाय उपदिष्टः, अतो नित्यं 'सन्मार्ग-गमनाय' सुषुम्णा मार्गप्रवेशाय 'समभ्यसेत्' मनोधारणादि कुर्य्यात् ।

ननु येन मनो याति, तेनैव प्राण इत्यवगत उपायः ; तयोर्मार्गः क्वास्ति ? इत्यत आह, हृदिति । 'हृदः' मनसः 'वायोश्च' प्राणस्य 'द्वारं' प्रवेश-मार्गः, सुषुम्णाख्यमूर्द्धद्वारं वर्त्तते, कण्ठादि मूर्द्धान्तं पृष्ठवंश-गामि सुषुम्णा द्वारमस्तीत्यर्थः । तत ऊर्द्ध्वं किमस्ति ? इत्यत आह, अतः परमिति । 'अतः' अस्मात् द्वारात्परं मोक्षद्वारविलं शिरो भित्त्वा निर्गतमस्ति, मोक्षस्य 'द्वारम्' उपायो ब्रह्मलोकः, तस्य कामविवरम् ।

ननु ब्रह्मलोकस्य क्रममोक्षस्थानत्वात् सूर्य्यमण्डले व्यवधायके सति कथं तत्र गतिः ? इत्यत आह, शुषिरं मण्डलमिति । सूर्य्यमण्डलस्य सच्छिद्रता ; "द्वाविमौ पुरुषौ लोके सूर्य्यमण्डल-भेदिनौ" इत्यादि स्मृतेश्चावसीयते ।

इच्छयाप्नोति कैवल्यं षष्ठे मासि न संशयः ॥२९॥६॥
पार्थिवः पञ्चमात्राणि चतुर्मात्राणि वारुणः।
आग्नेयस्तु त्रिमात्राणि द्विमात्रो मारुतस्तथा ॥३०॥
एकमात्रस्तथाकाशो ह्यर्द्धमात्रञ्च चिन्तयेत्।
सिद्धिं कृत्वा तु मनसा चिन्तयेदात्मनात्मनि ॥३१॥

योगे वर्जनीयान्याह भयमिति। 'तुल्यविक्रमः' देवैरिव। कैवल्यञ्च ऐश्वर्य्ययुक्तं क्षुरिकायां प्रदर्शितम् ॥ ६ ॥

पञ्चभूत-धारणासु तदतीत-धारणासु च कीदृशं प्रणव-स्वरूपं ध्येयम्? इति पृच्छन्तं प्रति क्रमेणोत्तरमाह, पार्थिव इत्यादि। 'पार्थिवः' पृथिवीतत्त्व-धारणायामाश्रितश्चेत् प्रणवो भवति, तदा तस्य पञ्चमात्राणि रूपाणि ध्येयानि। 'वारुणः' जलतत्त्व-धारणायामुपास्यत्वेन आश्रितश्चेदित्यर्थः। गन्धाद्येकैकगुण-ह्रासान्मात्राह्रासो द्रष्टव्यः। अर्द्धमात्रन्त्विति। 'तु' अव्याहृत्त्यर्थः; निरपेक्षीभूय अर्द्धमात्रन्तु चिन्तयितव्यमित्यर्थः।

तर्हि पूर्वेषां चिन्तनानां कोऽभिप्रायः? इत्यत आह, सिद्धिमिति। तत्तत्सिद्धिमभिप्रेत्य तत्तल्लोकजयाय तानि तानि पार्थिवादि रूपाणि 'मनसा' साधनेन 'आत्मना' स्वयम् 'आत्मनि' बुद्धौ चिन्तयेदित्यर्थः। शरीरे पदादिमूर्द्धपर्य्यन्तं तत्तद्भूतस्थाने तत्तद्भूतस्थानलोकजयो भवति। भूतस्थानादि यथा।

"भूमिरापस्तथा तेजो वायुराकाश एव च।
एतेषु पञ्चदेवानां धारणा पञ्चधेष्यते ॥
पदादि जानुपर्य्यन्तं पृथिवीस्थानमुच्यते।
आजानु पायुपर्य्यन्तमपां स्थानं प्रकीर्त्यते ॥

विंशत्पर्वाङ्गुलः प्राणो यत्र प्राणः प्रतिष्ठितः ।
एष प्राण इति ख्यातो वाह्यप्राणः सगोचरः ॥३२॥

आपायोर्हृदयान्तश्च वह्निस्थानं तदुच्यते ।
आहृन्मध्याद् भ्रुवोर्मध्यं यावद्वायुकुलं स्मृतम् ॥
आ भ्रूमध्यात्तु मूर्द्धान्तमाकाशमिति चोच्यते" ॥ इति ।

प्राणायाम एकः, आयम्यत्वेन प्राण उक्तः, अग्निहोत्रादावुपास्यत्वेन वेक उक्तः, तयोः का भेदः ? इत्यत आह । विंशदिति । विंशत्सङ्ख्यकानि पर्वाङ्गुलानि मानमस्य विंशत्पर्वाङ्गुलः ; अङ्गुलान्यनेक-प्रकाराणि सन्ति, तदर्थं पर्वेति विशेषणम् ; तिर्य्यक्चतुरङ्गुल मितस्य काष्ठस्य चतुर्थोऽंशः पर्वाङ्गुलं, तदेव मुष्ट्यङ्गुलम्, तदुक्तम् ।

"विनाङ्गुष्ठेन शेषाभिर्मुष्टिमङ्गुलिभिः कृताम् ।
चतुर्धा विभजेदेको भागो मुष्ट्यङ्गुलः स्मृतः" ॥ इति ।

द्वादशाङ्गुलता, पञ्चदशाङ्गुलता चान्यत्रोक्ता ; मातृ मध्यमाङ्गुलि-मध्यपर्वतमितादि-स्थूलाङ्गुलाभिप्रायेण, श्वासस्य स्थूल-सूक्ष्म-तारतम्याभिप्रायेण वेत्यविरोधः । तथा च याज्ञवल्क्यः ।

"शरीरादधिकः प्राणो द्वादशाङ्गुलमानतः ।
चतुर्दशाङ्गुलं केचिद् वदन्ति मुनिसत्तमाः" ॥ इति ।

गोरक्षेण तु षड़धिकान्युक्तानि ॥

"षट्त्रिंशदङ्गुलो हंसः प्रयाणं कुरुते वहिः ।
वाम-दक्षिण-भागेन ततः प्राणोऽभिधीयते" ॥ इति ।

वामे पञ्चदश, दक्षिणे च तथेति मिलित्वा त्रिंशदिति वा न विरोधः, अयमायम्यत्वेनोक्तः प्राणः, एष प्राणो यत्र 'प्रतिष्ठितः', यदाधारत्वेन महिमानं गतः स प्राण इति

अशीति-षट्शतञ्चैव सहस्राणि त्रयोदश।
लक्षश्चैकोऽपि निश्वासः अहोरात्र-प्रमाणतः ॥३३॥
प्राण आद्यो हृदि स्थाने अपानस्तु पुनर्गुदे।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥३४॥

'ध्यातः' उपास्यत्वेन प्रसिद्धः परमात्मा। तटस्थलक्षणमुक्त्वा स्वरूपलक्षणमाह, वाह्येति। यो वाह्यः प्राणः स 'गोचरः' विषयः दृश्य इत्यर्थः। अर्थादन्यस्त्वदृश्य इति स्वरूपभेदः।

ननु वाह्यप्राणस्य जन्मायुषि कियान् व्यापारः? इति पृष्ठे तस्य परिगणनस्य बह्वायास-साध्यत्वादहोरात्र व्यापार परिगणनमाह, अशीतिरिति। एका अशीतिः, षट्शतञ्च, त्रयोदश सहस्राणि च, एको लक्षश्चाहोरात्रेण तावन्निश्वासः। अङ्कतोऽपि ११३६८०। अनेन मानेन आयुर्निश्वास-प्रमाणं गणनीयम्; स्मृतिविरोधश्चिन्त्यः। तत्र हि "एकविंशति-सहस्राणि षट्शतानि दिने दिने" इत्युक्तम्। हंसोपनिषदि च षट्सङ्ख्यया एकविंशति सहस्राणि षट्शतान्यधिकानि भवन्तीति। अत्रोनत्वे नासिक्य प्राणापेक्षया अन्यत्र ग्रस्य गणना; इह तु रन्ध्रान्तराणि मुखादीन्यपेक्ष्याधिकसङ्ख्योक्तिः, नासिक्ये प्राणे वहति रन्ध्रान्तरेष्वपि किञ्चिद्वहनं भवति, तेनोक्तसङ्ख्यासिद्धिरित्यविरोधसिद्धिः। यदि तु षट्सङ्ख्ययाधिकानि षट्शतानीति नान्वयः, किन्तु गुणितानीत्यध्याहृत्य षट्सङ्ख्यया गुणितान्येकविंशति-सहस्राणि षट्शतानि चेति व्याख्या, अधिकानीति च किञ्चिदधिकानीत्यशीतिरेवेति व्याख्या। अत्र च दशसहस्राणि लिङ्गव्यत्ययेन

व्यानः सर्वेषु चाङ्गेषु सदा व्यावृत्य तिष्ठति ।
अथ वर्णास्तु पञ्चानां प्राणादीनामनुक्रमात् ३५॥७
रक्तवर्ण-मणिप्रख्यः प्राणो वायुः प्रकीर्त्तितः ।
अपानस्तस्य मध्ये तु इन्द्रगोपक-सन्निभः ॥ ३६ ॥
समानस्तस्य मध्ये तु गोक्षीर-स्फटिक-प्रभः ।
आपाण्डुर उदानस्तु व्यानोऽप्यर्चिसमप्रभः ॥ ३७॥
यस्यैष मण्डलं भित्त्वा मारुतो याति मूर्द्धनि ।

वयस्त्रीणि, तेन त्रिंशत् सहस्राणि इति व्याख्या आश्रीयते. तदा श्रुत्योर्नसङ्ग्राभेदः । स्यात् ।

धारणोपयोगितया प्राणादीनां स्थानान्याह, प्राण इति । पञ्च प्राणा वर्त्तन्ते ; तेषां मध्ये य आद्यः 'प्राणः' प्रथममनन-कर्त्ता, स हृदि वर्त्तते इत्यर्थः । नन्वेकः सर्वेष्वङ्गेषु कथं वर्त्तते ? अत उक्तं व्यावृत्येति । विशेषेण 'आवृत्य' आवरण-माच्छादनं कृत्वा व्याप्येत्यर्थः । अथ ध्यानोपयोगितया वर्णानाह, अथेति । ब्रूम इति शेषः, पञ्चानामेव मुख्यत्वात् । तत्तु नाग कूर्म-कृकर-देवदत्त-धनञ्जयानां दशानामपि भाव्यम् । याज्ञवल्क्येन तु दशानां स्थानानि कर्माणि चोक्तानि । ७ ।

रक्तेति । रक्तवर्णो यो मणिः 'तत्प्रख्यः' तत्प्रभः । 'तस्य मध्ये' गुदस्य मध्ये, 'इन्द्रगोपः' कीटविशेषः रक्तवर्णो वर्षासु प्रथमं दृश्यते । समानः 'तस्य मध्ये' नाभिदेशस्य मध्ये 'अर्चिः' वह्निशिखा । योगसाधनस्य प्रयोजनमाह, यस्येति । 'मण्डलं' सहस्रदलम् एक ऋषिस्थानं 'यस्य' साधकस्य एष मारुतो मण्डलं भित्त्वा मूर्द्धनि याति मूर्द्धस्फोटेन

यत्र यत्र म्रियेद्वापि न स भूयोऽभिजायते ॥
न स भूयोऽभिजायते ॥ ३८ ॥

इत्यथर्ववेदे अमृतविन्दूपनिषत् समाप्ता ॥ ५ ॥

ध्यानविन्दूपनिषत्।

ओं योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया।
तच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥ १ ॥
विष्णुर्नाम महायोगी महामायी महातपाः।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥ २ ॥
यदि शैलसमं पापं विस्तीर्णं योजनान् बहून्।

स यत्र कुत्रापि मृतो मोक्षं यातीत्यर्थः। द्विरुक्तिर्निश्चयार्था।
इति शब्दः समाप्त्यर्थः।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्ट-पद-वाक्यानां दीपिकामृतविन्दुके ॥ इति
अमृतविन्दूपनिषद्दीपिका समाप्ता ॥ ५ ॥

ओं ध्यानविन्दुर्द्विखण्डेयं विंशज्ज्ञान प्रधानिका।
ध्यानस्य धारणादिभ्यो यदीत्याह विशिष्टताम् ॥ १ ॥

ध्यानस्य धारणादिभ्यो विशेषं वक्तुमिदमारभ्यते। यदीति।
विस्तीर्णमिति स्वकार्योपलब्धया विस्तरो गम्यते; अन्यो

भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥ ३ ॥
वीजाक्षरात्परं विन्दुं नादं विन्दोः परे स्थितम् ।
सुशब्दश्चाक्षरे क्षीणे निःशब्दं परमं पदम् ॥ ४ ॥

'भेदः' भेदकः नाशकः नास्ति । अत्र यदीत्यतः प्राक् श्लोकद्वयं कैश्चित् पठ्यते, तद्यथा,

"योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥ १ ॥
विष्णुर्नाम महायोगी महाकायो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः" ॥ २ ॥ इति ।

ततः "यदि शैलसमं पापम्" इत्यादि । तत्तु योगतत्त्वोपनिषदादिभूतम्, अत्र प्रमादतः पठितम् । वीजेति । 'वीजाक्षरं' स्पष्टाक्षरं मकारादि त्रयं पञ्चाशद्वर्णवीजाद्यमिति पीठाञ्जकर्णिकायां वर्णानां वीजत्वात् तस्मात्परं 'विन्दुः' विन्द्वक्षरं वर्त्तते ; विन्दोः 'परे' भागे 'नादं' नादाक्षरं स्थितम् । तदुक्तं सारदातिलके ।

"सच्चिदानन्दविभवात् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादविन्दु-समुद्भवः" ॥ इति ।

अत्र शब्दार्थ सृष्टिद्वारा प्रणवसृष्टिरुच्यते । सनातनं नित्यं ब्रह्म निर्गुणं सगुणञ्च ; तत्र निर्गुणं यथा ।

नित्यः सर्वगतः सूक्ष्मः सदानन्दो निरामयः ।
विकार-रहितः साक्षी शिवो ज्ञेयः सनातनः ॥

तथा । निष्क्रियं निर्गुणं शान्तमानन्दमजमव्ययम् ।
अजरामरमव्यक्तमक्षेयं सकलं ध्रुवम् ॥
ज्ञानात्मकं परं ब्रह्म स्वयं वेद्यं हृदि स्थितम् ।

सत्यं बुद्धेः परं नित्यं निरीलं निष्कलं स्मृतम्"॥ इति।

सगुणन्तु शक्तिः ; यदुक्तम्—

"तच्छक्तिभूतः सर्वज्ञो भिन्नो ब्रह्मादिमूर्त्तिभिः।

कर्त्ता भोक्ता च संहर्त्ता सकलः स जगन्मयः" ॥ इति।

तत्र सृष्टिक्रमः । आदौ सच्चिदानन्दात्मनः शक्तिः उच्छू-नरूपतयाभिव्यक्ता पार्थक्येन व्यवहार्य्या। तदुक्तम्।

"तस्माद्विनिर्गता नित्या सर्वगा विश्वसम्भवा"। इति।

तथा "शिवेच्छया परा शक्तिः शिवतत्त्वैक सङ्गता।

ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिव" ॥ इति।

तस्याः शक्तेर्नादः, तस्या एवोत्तरावस्थारूपः पुंकालादि-व्यपदेशार्हः। तदुक्तम्।

"नादात्मना प्रबुद्धा सा निरामय-पदोन्मुखी।

यदा शक्तिः स्फुरद्रूपा पुंरूपा सा तदा स्मृता" ॥ इति।

नादाद्विन्दुः, तस्या एव घनीभावः क्रियाप्रधानो विः[illegible]।

तदुक्तम्।

"सा तत्त्वसञ्ज्ञा चिन्मात्र-ज्योतिषः सन्निधेस्तदा।

विचिकीर्षुर्घनीभूता क्वचिदभ्येति विन्दुताम्" ॥ इति।

तथा। "अभिव्यक्ता पराशक्तिरविनाभावलक्षणा।

अखण्डा परचिच्छक्ति-व्याप्ता चिद्रूपिणी विभुः ॥

समस्त-तत्त्वभावेन विवर्त्तेच्छा-समन्विता।

प्रयाति विन्दुभावञ्च क्रिया-प्राधान्य-लक्षणम्" ॥ इति।

स च विन्दुः शिव शक्त्युभयात्मकः, तयोः क्षोभक सम्बन्ध-रूपश्चेति त्रिविधः। शिवात्मतया विन्दुसञ्ज्ञः, शक्त्यात्मतया वीजसंज्ञः, सम्बन्धरूपेण नादसंज्ञः, एतौ नादविन्दुभ्यामन्यौ तत्कार्य्यरूपौ; एभ्यस्त्रिभ्यस्तिस्रः शक्तयो जाताः; विन्दो रौद्री, नादाज्जेष्ठा, वीजाद्वामा। तदुक्तम्।

"विन्दुः शिवात्मकस्तत्र वीजं शक्त्यात्मकं स्मृतम् ।
तयोर्योगे भवेन्नादस्तेभ्यो जाता त्रिशक्तयः" ॥ इति ।

ताभ्यः क्रमेण रुद्र-ब्रह्म-रमाधिपा जाताः ; ते च क्रमेण इच्छाशक्ति-क्रियाशक्ति-ज्ञानशक्ति-स्वरूपाः, वह्नीन्द्वर्कस्वरूपिणो निरोधिकार्द्धेन्दु-विन्दु-रूपाः शक्तेरेवावस्थाविशेषाः ; एषा-मिच्छा-क्रिया-ज्ञानात्मत्वं शक्तौ तदुत्पन्नत्वात् ; आद्य-विन्दोरखण्डो नादमात्रं शब्दब्रह्मात्मा स्वत उत्पन्नमिति ।

"क्रियायाः शक्तिप्रधानायाः शब्दशब्दार्थ-कारणम् ।
प्रकृते विन्दुरूपिण्याः शब्दब्रह्माभवत्परम्" ॥ इति ।

स शब्दब्रह्म, न तु शब्दार्थरूपम्, आन्तरः स्फोटः शब्द-रूपो वा वाह्यस्फोटः शब्दब्रह्म तयोर्जड़त्वात् ब्रह्मशब्दानर्हत्वात्, किन्तु चैतन्यमेव शब्दब्रह्म, तदुक्तम् ।

"अनादि-निधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ॥ इति ।

तद्विन्दुरूप एवास्यैव सर्वशरीरेषु शब्दत्वेनाविर्भावः । तदुक्तम् ।

"सोऽन्तरात्मा तदा देवो नादात्मा यतते स्वयम् ।
यथा संस्थान-भेदेन स भूयो वर्णतां गतः ॥
वायुना प्रेर्य्यमाणोऽसौ पिण्डाद्विशक्तिं प्रयाति हि" ॥ इति ।

शब्दब्रह्मैव परानाम शब्दावस्था, सैव चैतन्यरूपा कुण्डलिनी शक्तिः ; ततः पश्यन्त्यादिरूपेण वेदराशिराविर्भवति । इयं शब्दसृष्टिः । अथार्थसृष्टिः, शम्भोः शक्तिभावमापन्नान्नादरूप-काल-सहायात्-मायाघनविन्दुरूपमापन्नात् सृष्टि-स्थितिध्वंस-निग्रहानुग्रह-कार्य्य-पञ्चक-कर्त्ता, अतएव जगन्निर्माण-वीज-रूपो जगत् साक्षी सदाशिवो जातः ; ततः क्रमेणेश-रुद्र-विष्णु-ब्राह्मण उत्पन्नाः ; सर्वसृष्टिमूल-रूपादव्यक्तात् मुमुक्षुमुख्या-

द्विन्दोर्महान्; ततोऽहंकारः, स त्रिविधः; ततो वैकारिका देवाः तैजसादिन्द्रियाणि, भूतादेस्तन्मात्रद्वारा पञ्चभूतानि; ततो विराड़ित्यर्थसृष्टिः; तत्र शब्दक्रमः शक्तिः, ततोध्वनिः तस्मान्नादः, तस्मान्निरोधिका, ततोऽर्द्धेन्दुः, ततो विन्दुः, तस्मादासीत्परा; ततः पश्यन्ती मध्यमा वाचि वैखरी सर्वजन्मभूरिति; तत्र सत्त्वप्रतिष्ठा चित् शक्तिशब्दवाच्या परमाकाशावस्था, सैव सत्त्वप्रतिष्ठा रजोऽनुविद्धा नादशब्दवाच्याव्यक्तावस्था, सैव तमःप्राचुर्य्यान्निरोधिकाशब्दवाच्या, सैव सत्त्वप्राचुर्य्यादर्द्धेन्दुशब्दवाच्या, तदुभयसम्बन्धाद्बिन्दुशब्दवाच्या, असावेव विन्दुर्मूलाधारेऽभिव्यक्तः, परानाम स्वाधिष्ठाने पश्यन्ती, हृदि मध्यमा, जिह्वायां वैखरीति, तदुक्तम्।

"सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रास्वरूपिणी।
अश्रोत्रविषया तस्मादुद्गच्छन्त्यूर्द्ध्वगामिनी ॥१॥
स्वयं प्रकाशा पश्यन्ती सुषुम्णामाश्रिता भवेत्।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥ २ ॥
ततः सङ्कल्पमात्रा स्यादविभक्तोर्ध्वगामिनी।
सैवोरः-कण्ठ-तालुस्था शिरो-घ्राणोदर-स्थिता ॥ ३ ॥
जिह्वाभूलोष्ठ-निश्वास-रूपवर्ण-परिग्रहा।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी" ॥ इति ॥ ४॥

पराशक्तिरूपत्वात् परात्मकत्वात् पश्यन्ती मध्यमा बुद्धिर्यस्या सा मध्यमा हिरण्यगर्भस्थानीया, विशेषेण खरत्वाद्वैखरी विराट्स्थानीया, निरोधिकाग्नि-शिवरूपा, अर्द्धेन्दुः सोमशक्तिरूपः, तदुभयसंयोगः सूर्य्यरूपो विन्दुः, तत्र शब्दसृष्टौ प्रणवस्याकारोकार-मकाराः क्रमेण रुद्र-ब्रह्म-रमाधिपाः। इच्छाज्ञानशक्तिरात्मनो वह्नीन्द्वर्क-स्वरूपिणी रौद्री ज्येष्ठा वामाशक्तिरूपा गौरी ब्राह्मी वैष्णवीरूपा, विन्दुनादवीजरूपा निरोधि-

अनाहतस्य यच्छब्दं तस्य शब्दस्य यत्परम् ।
तत्परं चिन्तयेद्यस्तु स योगी छिन्नसंशयः ॥ ५ ॥
बालाग्रशत-साहस्रं तस्य भागस्य भागशः ।
तस्य भागस्य भागार्द्धं तज्ज्ञेयञ्च निरञ्जनम् ॥ ६॥

कार्द्धेन्दुबिन्दु सञ्ज्ञाः, शक्तिरेवावस्थाविशेषा द्रष्टव्या। अर्थ-सृष्टौ तु ब्रह्म-विष्णु-रुद्राः सूर्य्येन्दु पावकाः इत्येवं क्रमा इति विशेषः। मकारात्पराणि चौणि शक्तेरवस्थाविशेषाः, सप्तमी शान्ताख्या ; तत्र वर्णदेवता ब्रह्म-विष्णु-रुद्रेश्वर-शिव-सर्वेश्वराः शक्तिशान्तावस्थेत्युक्ताः। पञ्चधात्वपक्षे तु,

"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ।
पञ्चधा पञ्चदेवत्यः प्रणवः परिकीर्त्तितः" ॥

इत्यथर्वशिखोक्ता पञ्चदेवता द्रष्टव्याः। क्वचिदन्यासेन देवताकथनं सर्गभेदादेवेति द्रष्टव्यम् ।

प्रकृतमनुसरामः। सुष्ठु 'शब्दः' नादो यस्मात् तत् 'सुशब्दं' शक्तिरूपं, तदपि परिस्थितमर्थान्नादादेवाकारादि व्यज्यते, तस्मिन्नन्तरे चौणे सति निःशब्दं परमं पदं वर्त्तते शान्ताख्य परं ब्रह्म। उक्तमेव स्पष्टयति ॥

अनाहतस्येति। सर्वत्र स्वरूपापेक्षं नपुंसकत्वं, 'तस्य' शब्दस्य यत् 'परं' कारणं शक्तिः 'तत्परं' तस्यापि परं सच्चि-दानन्दरूपं, यो विन्दते सः 'छिन्नसंशयः' नष्टसन्देहः भिद्यते, हृदयग्रन्थिः छिद्यन्ते सर्वसंशया इत्यादि, श्रुतेश्च। तस्यात्यन्त-सूक्ष्मतामाह। बालाग्रेति। शतसहस्रार्द्धं 'भागशः' भागे सति भागस्य 'भागार्द्धं' भागस्य यो भागस्तस्यार्द्धं तत् 'निर-ञ्जनं' शुद्धं ब्रह्म ज्ञेयं, सर्वपरिमाणानाश्रयत्वेऽपि दुर्लक्षत्व-

पुष्पमध्ये यथा गन्धं पयोमध्ये यथा घृतम्।
तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चनम्॥७॥
एवं सर्वाणि भूतानि मणिसूत्रमिवात्मनि।
स्थिरबुद्धिरसम्मूढ़ो ब्रह्मविद् ब्रह्मणि स्थितः॥८॥
तिलानान्तु यथा तैलं पुष्पे गन्धमिवार्पितम्।
पुरुषस्य शरीरे तु स वाह्याभ्यन्तरे स्थितः॥ ९ ॥
वृक्षन्तु सकलं विद्याच्छाया तस्यैव निष्कला।

प्रतिपादनायातिसूक्ष्मत्वोक्तिः॥ पुष्पेति। पुष्पमध्ये यथा 'गन्धं' स्वरूपं वर्त्तते। एवमिदं गन्धस्थानीयं देहादिषु वर्त्तते इति शेषः।

ननु तर्हि देहादयः क्व वर्त्तन्ते? इत्यत आह। एवमिति 'एवम्' अनेन प्रकारेण यथा सर्वेषु भूतेष्वात्मा वर्त्तते, एवं सर्वाणि भूतानि वर्त्तन्ते। अत्रापि दृष्टान्तमाह, मणिसूत्रमिति। समाहारद्वन्द्वः; यथा सूत्रे मणयो वर्त्तन्ते, तद्वदित्यर्थः। तदुक्तम्।

"सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः" इति॥

तथा।

"मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव"। इति।

ध्यानाभ्यास-प्रदर्शनायोक्तस्यापि पुनरभिधानम्। तिलानान्त्विति। तिलानां मध्ये यथा तैलम् 'अर्पितं' व्याप्य स्थितमिति, तथा ब्रह्मवैवर्त्ते इति शेषः॥

ननु कथं सत्यादसत्योद्भवः? इत्याशङ्कां दृष्टान्तेन वारयति, वृक्षमिति। 'सकलं' पूर्णं यथार्थं 'निष्कला' आकृति-

सकले निष्कले भावे सर्वत्रात्मा व्यवस्थितः॥१०॥
अतसी-पुष्प-सङ्काशं नाभिस्थाने प्रतिष्ठितम् ।
चतुर्भुजं महावीरं पूरकेण विचिन्तयेत् ॥ ११ ॥
कुम्भकेन हृदि स्थाने चिन्तयेत् कमलासनम् ।
ब्रह्माणं रक्तगौराङ्गं चतुर्वक्त्रं पितामहम् ॥ १२ ॥
रेचकेन तु विद्यात्म ललाटस्थं त्रिलोचनम् ।

मात्रं न पारमार्थिकी। ननु छाया यथा वृक्षातिरिक्ता भवत्येवं जगत् ब्रह्मातिरिक्तं चेद्द्वैतापत्तिरित्याशङ्क्याह । सकल इति। यथार्थे चायथार्थे च।

इदानीं गुरुरूपेणाज्ञानतिमिरापहं साकार-स्वरूपं ध्येयमित्याह, अतसीति। पूरकेणोपलक्षितं पूरणकाल इति यावत्, षोड़शभिः प्रणवैः पूरयन्नुकारमूर्त्तिं विष्णुं नाभौ स्मरेदिति ज्ञेयम्॥ पितामहं 'रक्तगौराङ्गं' कपिलवर्णं हृदि स्थाने कुम्भकेन विचिन्तयेदित्यन्वयः। अत्रापि चतुःषष्टिभिः कुम्भयन्नकारात्मकं चिन्तयेदिति ज्ञेयम्॥ रेचकेनोपलक्षितं 'त्रिलोचनं चिन्तयेत्' मकारमूर्त्तिं ध्यायेत्। द्वात्रिंशद्भीरेचयेदिति ज्ञेयम्। तदुक्तं याज्ञवल्क्येन।

"वर्णत्रयात्मका ह्येते रेचक-पूरक-कुम्भकाः।
स एष प्रणवः प्रोक्तः प्राणायामश्च तन्मयः" ॥ इति॥

तत्र पूरक-कुम्भक-रेचका अकारोकार-मकारा ब्रह्म-विष्णु-रुद्रात्मका ध्येयत्वेनोक्ताः। अत्र तु ब्रह्म-विष्णु-रुद्रा इति ब्रह्मणो हृदि ध्यानमुक्तम्, अन्यत्र तु स्वाधिष्ठान उक्तं, न वचनस्य पर्य्यनुयोगोऽस्ति। 'विद्यात्मा' विद्यात्मानं, व्यत्ययेन प्रथमा, अथवा कर्त्तृविशेषणं विद्यावान् साधक इत्यर्थः॥

शुद्धस्फटिक-सङ्काशं निष्कलं पापनाशनम् ॥१३॥
अष्टपत्रमधः पुष्पमूर्द्धनालमधोमुखम्।
कदलीपुष्प-सङ्काशं सर्वदेवमयात्मकम् ॥ १४ ॥
शताब्जं शतपत्राढ्यं विप्रकीर्णाब्ज-कर्णिकम्।

नाभौ हृदि ललाटे च ब्रह्म-विष्णु-रुद्राणां ध्यानमुक्तं : तत्र स्थानत्रयपद्मानां सुषुम्णारूपैकनालत्वादेकमेवाभिप्रत्यावान्तरभेदं दर्शयति, अष्टपत्रमिति। 'अधः' पुष्पमध्ये, अवस्थितं नाभिदेशे वर्त्तमानं पुष्पम्। हृत्पद्ममाह, ऊर्द्धेति। सर्वदेवमयमम्बुजम्। सर्वदेवमयात्मकमिति क्वचित् पाठः॥ मण्डूकाद्यावरणाः तदेवात्मकम्। 'शताब्जं' शतमब्जानि यत्र शताब्जं, शतग्रहणमाधिक्योपलक्षणं; तेन मूलादि मूर्द्धान्त बहुपद्मं सुषुम्णानालं, तत्र केचिद्द्वादशपद्ममाहुः, अपरं षोडषपद्मम्, अपरं बहुतरपद्ममाहुः, तद्यथा।

"ततस्तु ब्रह्मके काले ध्यायेच्चक्रक्रमं सुधीः।
आधारचक्रं प्रथमं कुलदीपमनन्तरम् ॥
यन्त्रचक्रं ततः प्रोक्तं स्वाधिष्ठानात्मकं परम्।
रौद्रं करालचक्रञ्च गह्वरात्मकमेव च ॥
विद्यापदञ्च त्रिमुखं त्रिपदं कालदण्डकम्।
उकारचक्रञ्च ततः कालद्वारं करण्डकम् ॥
दीपकं लोभजनकमानन्दललितात्मकम्।
मणिपूरक मत्रञ्च नाकुलं कालभेदनम् ॥
महोत्साहञ्च परमं पादकं पद्ममुच्यते।
कल्पजालं ततश्चिन्त्यं पोषकं लोलमं ततः ॥
नादावर्त्तं पदं प्रोक्तं त्रिपुटञ्च तदुत्तरम्।

तत्रार्क-चन्द्र-वह्नीनामुपर्य्युपरि चिन्तयेत् ॥१५॥
पद्मस्योत्थापनं कृत्वा बोद्धुं चन्द्राग्नि-सूर्य्ययोः ।

कङ्कालकमतश्चक्रं विख्यातं पुटभेदनम् ॥
महाग्रन्थि विराकाच बन्धे ज्वलन-सन्निभम् ।
अनाहतं यत्र पुटं व्योमचक्रं तथा भवेत् ॥
बोधनं ध्रुवसञ्ज्ञञ्च कलाकन्दलकं ततः ।
क्रौञ्चभेरुण्डविभवं डामरं कुलपीठकम् ॥
कुलकोलाहलं ह्वालावर्त्तं चैव महद्भयम् ।
घोराभैरव-सञ्ज्ञञ्च विशुद्धिः कण्ठमुत्तमम् ॥
पूर्णकं पदमाख्यातमाज्ञाकाकपुटं तथा ।
शृङ्गाटं कामरूपाख्यं पूर्णगिर्य्यात्मकं परम् ॥
महाव्योमात्मकं चक्रं शक्तिरूपमनुस्मरेत्" ॥ इति ।

तदेव मूर्ध्नि शतपत्राख्यमब्जं वर्त्तते इति शेषः; इदं सहस्रपत्रमित्याहुः। इदमम्बुजत्रयं सुषुम्णालच्चणैकनालत्वा-देकत्वेन विवक्षितमिति विशेषण-विशेष्यभावः। कीदृशं ? विप्रकीर्णाब्जकर्णिकं 'विप्रकीर्णानि' विवक्षितानि अब्जानि पूर्वोक्तान्याधारादीनि तथा तत्कर्णिकाश्च यस्य तत्तथा नाना-कमलमित्यर्थः। तत्र प्रत्येकमर्क-चन्द्र-वह्नीनां मूर्त्तिरेकैको-परि ध्यायेत्। तदुक्तं "तस्मिन् सूर्य्येन्दु-पावकम्" इति। 'उत्थापनम्' ऊर्द्ध्वमुखत्वम्। यद्यपि शरीरावयवोऽन्यथाकर्त्तुं न शक्यते विनाशप्रसङ्गात्, तथाप्यधोमुखत्वमधर्मोन्मुखता, ऊर्द्ध्वमुखत्वमास्तिकत्वेनोर्द्ध्वलोकोन्मुखता, विकाशश्च विनि-द्रतानलसतेत्येवं बोद्धव्यम्। अथवा सुषुम्णानाललग्नानि पत्रा-ण्येव वाताहतानि ऊर्द्ध्वमुखानि भवन्ति इति तदुत्थापनं द्रष्टव्यम्।

तस्याहुर्बीजमाहृत्य आत्मा सञ्चरते ध्रुवम् ॥ १६ ॥
त्रिस्थानञ्च त्रिमार्गञ्च त्रिब्रह्म च त्रिरक्षरम्।
त्रिमात्रञ्चार्द्धमात्रञ्च यस्तं वेद स वेदवित् ॥ १७ ॥

किमर्थमुत्थापनम्? अत आह, वोढुं चन्द्राग्नि-सूर्य्ययोरिति। कर्म्मणि षष्ठी, सूर्य्यचन्द्राग्नीन् वोढुमित्यर्थः, चन्द्रस्य मध्ये सूर्य्यपावकयोश्चाद्यन्तयोः क्रमार्थं प्रयोगे कर्त्तव्ये एषां त्रित्वाद्बहुवचनप्रयोगे च कर्त्तव्ये तथानुक्तिरग्नि-सूर्य्ययोरेकत्व-सूचनार्था, अग्निसूर्य्यौ पुरुषरूपं; चन्द्रश्च स्त्रीरूपं प्रकृति-रूपं; तेन प्रकृतिपुरुषौ वोढुमित्यर्थः। प्रकृतेश्चन्द्रस्य मध्ये ध्यानन्तु तस्याः पुरुषेण व्याप्तिं दर्शयितु; प्रकृतिर्हि पुरुषेण व्याप्ता पुरुषायत्ता च वर्त्तते। पुंसः सप्तमी वा, चन्द्रादिषु देवतां वोढुमित्यर्थः।

तस्येति। 'तस्य' पद्मस्य 'वीजं' तदर्जितं कर्म्म ज्ञानञ्च 'आहृत्य' गृहीत्वा 'आत्मा' जीवः 'सञ्चरते' लोकाल्लोकान्तरं गच्छतीत्याहुः। 'ध्रुवं' निश्चितम्; श्रुतयः, "पुण्यो वै पुण्येन कर्म्मणा भवति, पापः पापेनेति, तमेतं विद्याकर्म्मणी सम-न्वारभेते पूर्वप्रज्ञा चेति, साधुकारी साधुर्भवति, पापकारी पापो भवति" इत्याद्याः। अथवा 'सञ्चरते' पत्रात् पत्रान्तरं गच्छति, तस्याष्टधा वृत्तिर्भवति। पूर्वदले पुण्ये मतिः, आग्नेय्यां निद्रालस्यादयो भवन्ति, याम्ये क्रूरे मतिः, नैर्ऋत्ये पापे मनीषा, वारुण्यां क्रीड़ा, वायव्ये गमनादौ बुद्धिः, सौम्ये रतौ प्रीतिः, ईशाने द्रव्यादानं, मध्ये वैराग्यं, केशरे जाग्रद वस्था, कर्णिकायां स्वप्नः, लिङ्गे सुषुप्तम्। पद्मत्यागे तुरीय-मिति हंसोपनिषदि पत्रभेदश्रुतेः। अथवा 'तस्य' पद्मस्य 'वीजं' पञ्चाशद्वर्णरूपम् 'आहृत्य' उच्चार्य्य आत्मा 'सञ्चरते'

तैलधारमिवाच्छिन्नं दीर्घघण्टा-निनादवत्।
अवागजं प्रणवस्याग्रं यस्तं वेद स वेदवित् ॥१८॥
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ १९ ॥

व्यवहरति शब्दव्यवहारस्य मातृकाधीनत्वात् पञ्चाशद्वर्ण-बीजाढ्यामिति कर्णिकाविशेषणोक्तिः। तत्पद्मं 'त्रिस्थानं' नाभिर्हृदयं मूर्द्धा चेति त्रीणि स्थानान्यस्य, 'त्रिमार्गञ्च' स्थान-भेदेनोपासनगतिभेदात्, 'त्रिब्रह्म' नाभौ विष्णुः, हृदि ब्रह्मा, मूर्द्धनि त्रिलोचन इति त्रीणि ब्रह्माण्यस्य, 'त्रिरक्षरं' त्रिवार-मक्षराण्यकारादीन्यस्य, 'त्रिमात्रं' ता एव मात्राः अस्य, अकारादिषु मात्राव्यवहारात्। तदेवाह तदुपर्य्यर्द्धमात्रञ्च, 'यः' पुमान् अकारादिवर्णान्यर्द्धमात्रस्थं पुरुषं वेद, स 'वेद-वित्' वेदोक्तं वेत्ति।

इदानीमर्द्धमात्रारूपाद्विन्दोः परस्य नादस्य स्वरूपं दर्श-यंस्तद्ध्याने फलमाह, तैलेति। तैलस्य धारा तैलधारं, छान्दसं क्लीवत्वं, यथा तैलधारा अच्छिन्ना सती अविच्छेदेनानुभूयते, तथा विशदा दीर्घा चानुभूयते, तद्वत्। ननु तर्हि धारा-वदेवाग्रे सूक्ष्मो न स्यात्? अत उपमान्तरम्। दीर्घेति। 'अवागजं' ब्रह्मणोऽवाक् अधः तदनुभवात्, प्राग्वर्त्तमानम्; अथवा न वाचो जातमवागजं वाचो विराम उपलभ्यत्वात्। तथा 'प्रणवस्य अग्रं' प्रणवादूर्ध्वं प्रतीयमानं 'तं' नादं 'वेद' उपास्ते 'वेदवित्' सर्व्वशास्त्रे अपि प्रणवरूपे जानातीत्यर्थः॥

इदानीं शरस्य युद्ध इव चिप्रकारित्वमुपदिशन् प्रणवाभ्यासे प्रकारमाह। प्रणव इति। अयं मन्त्रो मुण्डकेऽप्यस्ति।

स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्।
ध्यान-निर्मथनाभ्यासादेवं पश्येन्निगूढ़वत्॥ २०॥
यथैवोत्पलनालेन तोयमाकर्षयेत् पुनः।
तथैवोत्कर्षयेद्वायुं योगी योगपदे स्थितः॥ २१॥
अर्धमात्रां रज्जुं कृत्वा कूपभूतन्तु पङ्कजम्।
कर्षयेन्नालमार्गेण भ्रुवोर्मध्ये नयेल्लयम्॥ २२॥
भ्रुवोर्मध्ये ललाटस्तु नासिकायान्तु मूलतः।

'वेद्धव्यं' मनसा ब्रह्म प्रवेश्यम्, किंवत्? शरवत्, यथा शरो विध्यति ; फलं तन्मय इति, ब्रह्ममयो जीवः स्यादित्यर्थः। स्वदेहमिति। आत्मानमरणिमिति ब्रह्मोपनिषदि पाठः। 'स्वदेहः' लिङ्गम्, 'एवम्' अनेन प्रकारेण 'निगूढ़वत्' निलीनवद् गुप्तवस्तुवत् 'पश्येत्' सूक्ष्मदृष्ट्या निरीक्षेत, 'उत्कर्षयेत्' वायुं स्वाधिष्ठानादिचक्रभेदेनोर्द्धभूमिकां प्रापयेत्॥

अभ्यासप्रकारमाह, अर्द्धेति। कृषिकृद्यथा कूपात् रज्ज्वा जलमाकर्षति, एवमर्द्धमात्रया सह मनो दहत्यवनां कुण्डलीं भ्रूमध्यमानयेदित्यर्थः। 'पङ्कजम्' आधारादि 'नालं' सुषुम्णा, तन्मार्गेण 'लयं' तदमृतस्थानम्। तस्य लक्षणमाह, भ्रुवोरिति। भ्रुवोर्मध्ये यो ललाटैकदेशः तदमृतस्थानं, 'नासिकायान्तु' लक्षणीभूतायां 'मूलतः' नासिकामूलादारभ्य अमृतस्थानं बोद्धव्यं, नासिकामूलस्योपरिभागममृतस्थानमित्यर्थः। तदुक्तम्,

"भ्रूमध्ये धाम यत् प्रोक्तं तत् प्रोक्तं सोममण्डलम्" इति।

अमृतस्थानं विजानीयाद्विश्वस्यायतनं महत् ॥
विश्वस्यायतनं महदिति ॥ २३ ॥
इत्यथर्ववेदे ध्यानविन्दूपनिषत् समाप्ता ॥ ६ ॥

तेजोविन्दूपनिषत् ।

ओं तेजोविन्दुः परं ध्यानं विश्वातीतं हृदि स्थितम् ।
आणवं शाम्भवं शाक्तं स्थूलं सूक्ष्मं परञ्च यत् ॥ १ ॥

तस्यामृतस्य किं स्वरूपम् ? अत आह, विश्वस्येति । विश्वस्यायतनमित्युक्ते आकाशादि स्यात्, तदर्थमुक्तं महदिति । ब्रह्मैव निरवधिमहत्त्वाधिकरणममृतं, तच्च भ्रूमध्ये धारणाया ध्यानं तल्लभ्यते ; येनामृतो भवतीत्यर्थः । द्विरुक्तिः समाप्त्यर्था ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिका ध्यानविन्दुके ॥
इति ध्यानविन्दूपनिषदो दीपिका सम्पूर्णा ॥ ६ ॥

ओं तेजोविन्दुः परं ध्यानं विश्वातीतं हृदि स्थितम् ।
द्विखण्डमकारविंशश्च तेजोभावफलं हि तत् ॥ १ ॥

प्रणवस्याकारोकार-मकार-विन्दु-नादानां ध्यानं ध्यानविन्दौ उक्तम् ; शक्तिशान्त्योर्ध्यानं वक्तुं तेजोविन्दूपनिषदारभ्यते । तेजनं तेजः घञ्, तिजेः क्षमायां सन्, अत्र निशाने घञ् ; तस्य 'विन्दुः' कला एवं विधं परं ध्यानं भवति, विश्वातीतं

दुःसाध्यञ्च दुराराध्यं दुष्प्रेक्ष्यञ्च दुराश्रयम्।
दुर्लक्ष्यं दुस्तरं ध्यानं मुनीनाञ्च मनीषिणाम्॥ २ ॥
जिताहारो जितक्रोधो जितसङ्गो जितेन्द्रियः।
निर्द्वन्द्वो निरहङ्कारो निराशीरपरिग्रहः॥ ३ ॥
अगम्यागम्यकर्त्ता च गुरुमानार्थ-मानसः।
मुखानि त्रीणि विन्दति त्रिधामा हंस उच्यते ॥४॥

तदगोचरत्वात्, 'आणवम्' अणोरिदं सूक्ष्मवस्तुविषयं, 'शाम्भवं' शम्भुविषयं, 'स्थूलं' तद्विषयत्वात्, एवं सूक्ष्मं, 'परं' सर्वातीत-फलं दुःसाध्यञ्च। तदुक्तम्,

"चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्"॥ इति।

अत एव तद्ध्यानं 'दुराराध्यं' दुःसेव्यं 'दुष्प्रेक्ष्यं' दुर्दर्शं 'दुराश्रयं' कष्टसाध्यं निर्विषयं 'दुर्लक्ष्यं' दुःखप्राप्यं 'दुस्तरं' दुरन्तं, न केवलमस्माकं, मुनीनामपि, 'मनीषिणां' बुद्धिमताम्।

तर्हि प्राकृतस्यैतद्ध्यानप्राप्तौ किमन्तरङ्गसाधनम्? अत आह, जितेति। हितमिताशी 'जिताहारः', हेयोपादेयानि द्वन्द्वानि तेभ्यो निष्क्रान्तो 'निर्द्वन्द्वः' समलोष्टाश्मकाञ्चन इत्यर्थः। 'निराशीः' वाञ्छारहितः, 'अगम्यगम्यकर्त्ता' यदन्यैरगम्यं स्थलं तदपि प्रयत्नेन गम्यं करोति यः सः, 'गुरुमानार्थमानसः' गुरोर्मानः पूजा स एवार्थः प्रयोजनं यस्य तादृशं मानसं यस्य सः, गुरोर्माने चार्थे च मानसं साधनाय प्रवृत्तं यस्येति वा, सोऽधिकारीत्यर्थः। 'मुखानि' द्वाराणि 'त्रीणि' त्रिसंख्यानि पूर्वोक्तानि वैराग्यमुमुक्षुत्वे गुरुभक्तिश्चेति त्रीणि

परं गुह्यमिदं स्थानमव्यक्तं ब्रह्म निराश्रयम् ।
व्योमरूपं कलासूक्ष्मं विष्णोस्तत् परमम्पदम् ॥ ५॥
त्र्यम्बकं त्रिगुणं स्थानं त्रिधातु रूपवर्जितम् ।
निश्चलं निर्विकल्पञ्च निराधारं निराश्रयम् ॥ ६ ॥
उपाधिरहितं स्थानं वाङ्मनोऽतीतगोचरम् ।
स्वभाव-भावनाग्राह्यं सङ्घातैकपदोज्झितम् ॥७॥ १
आनन्दं नन्दनातीतं दुष्प्रेक्ष्यमजमव्ययम् ।

द्वाराख्येतद्ध्याने 'विन्दन्ति' प्राप्नुवन्ति साधवः; तेन हंसस्त्रि-धामा उच्यते, त्रीणि 'धामानि' प्राप्त्युपाया यस्य, जाग्र-दादीनि वा ।

ध्यानं प्रशस्याधिकारिणञ्चोक्त्वा ध्येयस्वरूपमाह, पर-मिति । 'गुह्यं' गुहामर्हति स्थानेषु 'अव्यक्तं' सर्वजनाप्रसिद्धं ब्रह्म बृहत्त्वात् निराश्रयं सर्वाधारत्वात् कलात्मकं विष्णोः सत्त्वोपाधिः परमं पदं विश्रान्तिभूमिः ।

हरिहरसाधारणं स्वरूपं ध्येयमुक्त्वा हरस्वरूपमाह, 'त्र्यम्बकं' त्रयाणां वेदानामम्बको वक्ता त्र्यम्बकः, त्रयाणां लोकानां गन्ता, अम्बगतौ अवि ह शब्दे इति धातुभ्यां ण्वुल्; 'त्रिगुणं' सत्त्वादि गुणत्रयोपेतं, 'स्थानम्' आश्रयः, 'त्रिधातु' त्रयो लोका धातवो यस्य, अन्यदपि त्रयात्मकं सर्वमस्यैव धातवः, 'वाङ्मनोऽतीतगोचरं' वाङ्मनसयोरतीतो गोचरः स्थानं यस्य तत्तथा । स्वभावेति कृत्रिमसंस्कारत्यागेन स्वाभाविकवस्तु भावनया ग्राह्यं 'सङ्घातैकपदोज्झितं' सङ्घातवाचिना पदेन उज्झितं शब्दातीतत्वात्, 'आनन्दं' स्वयमानन्दरूपं, 'नन्दनम्'

चित्तवृत्ति-विनिर्मुक्तं शाश्वतं ध्रुवमच्युतम् ॥ ८ ॥
तद्ब्रह्माणं तदध्यात्मं तन्निष्ठा तत्परायणम् ।
अचिन्तचितमात्मानं तद्व्योम परमं स्थितम् ॥ ९ ॥
अशून्ये शून्यभावञ्च शून्यातीतमवस्थितम् ।
न ध्यानं न च वा ध्याता न ध्येयो ध्येय एव च ॥१०
सर्वञ्च परमं शून्यं न परं परमात् परम् ।
अचिन्त्यमप्रबुद्धञ्च न च सत्यं न संविदुः ॥ ११ ॥

अन्यकृतानन्दः तदतीतमन्येनास्यानन्दः कर्त्तुं न शक्यते, 'चित्तवृत्ति-विनिर्मुक्तं' विकारातीतत्वात्, तत् 'ब्रह्माणं' लिङ्ग-विभक्तिव्यत्ययः, ब्रह्मेत्यर्थः। 'तदध्यात्मं' तदेवाध्यात्ममात्मेत्यर्थः, 'तन्निष्ठा' तदेव निष्ठा मर्य्यादा, तदुक्तम्, "अतः परतरं नान्यत्" इति। 'तत्परायणं' परमयनं, तदुक्तं, "सा काष्ठा सा परा गतिः" इति। 'अचिन्तं' चिन्तारहितं चितं ज्ञानं यस्य तादृशं, 'आत्मानम्' आत्मरूपं 'परमं व्योम' परमाकाशं 'स्थितं' सर्वकार्य्येषु तत्परम् नत्वासीनम् अलसवत्। 'अशून्ये' पूर्णे यस्मिन् सति 'शून्यभावं' शून्यत्वेन भाव्यमानं जडैः, वस्तुतः शून्यातीतमवस्थितं पूर्णत्वात्। 'नध्यानम्' इति क्रियाकारकभावशून्यम् अथ च 'ध्येय एव' ध्यातव्य एव संसारिणां मुक्तिदत्वात्, तद्ब्रह्म 'सर्वं' सर्वात्मकम् अथ च 'परमं शून्यम्' असङ्गत्वात्, 'अपरं' न परं यस्मात्तत्, निषेधार्थेन नकारेण बहुव्रीहिः; 'परमात्' अपि आकाशादेः परम्, "अतः परतरं नान्यत्" इति स्मृतेः। 'अप्रबुद्धम्' जाग्रद्व्यापाररहितं तत्सत्यं न संविदुरिति न अपि तु सत्यं विदन्त्येव,

मुनीनां तत्त्वयुक्तान्तु न देवा न परं विदुः ।
लोभं मोहं भयं दर्पं कामं क्रोधञ्च किल्बिषम् ॥१२
शीतोष्णं क्षुत्पिपासञ्च सङ्कल्पञ्च विकल्पकम् ।
न ब्रह्म कुलदर्पञ्च न मुक्तिग्रन्थसञ्चयम् ॥ १३ ॥
न भयं सुख-दुःखञ्च तथा मानापमानयोः ।
एतद्भाव-विनिर्मुक्तं तद्‌ग्राह्यं ब्रह्म तत्परम् ।
तद्‌ग्राह्यं ब्रह्म तत्परमिति ॥ १४ ॥ २ ॥

इत्यथर्ववेदे तेजोविन्दूपनिषत् समाप्ता ॥ ७ ॥

'मुनीनाम्' ऋषीणां तत्त्वभावेन 'युक्तम्' आदरणीयं, न देवा इति, देवाः परं न विदुरिति न अपि तु विदुरेव ।

साधनानि पूर्वमुक्तानि, सम्प्रत्यसाधनान्याह, लोभमिति । लोभं श्रिता न विदुरित्यन्वयः । शीतोष्णं श्रिताः कातराः, वयं ब्रह्मकुले जाता इति दर्पं श्रिता न विदुः, मुक्तिग्रन्थानां 'सञ्चयं' समूहं श्रोतारो न विदुः । न भयमिति । पुनर्भय-ग्रहणं लोकलज्जाभयवन्तोऽपि न विदुरित्येवमर्थम् । माना-पमानयोर्वर्त्तमाना न विदुः । एतदिति, एतैर्भावैः 'विनि-र्मुक्तं' रहितं प्रति तद्ब्रह्म ग्राह्यं, एतद्भावसहितं लोभादि-सहितं प्रति तत् ब्रह्म न ग्राह्यमित्यर्थः । 'तत्परं' तच्च ब्रह्म परमुत्कृष्टं यस्य तत्परं ब्रह्मनिष्ठम् । तद्ग्राह्यमिति द्विती-याऽऽवृत्तिरादरार्था । इति शब्दः समाप्तौ ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिका तेजोविन्दुके ॥

इति तेजोविन्दूपनिषदो दीपिका सम्पूर्णा ॥ ७ ॥

योगशिखोपनिषत् ।

ओं योगशिखां प्रवक्ष्यामि सर्वज्ञानेषु चोत्तमाम् ।
यदा तु ध्यायते मन्त्रं गात्रकम्पोऽभिजायते ॥ १ ॥
आसनं पद्मकं बद्ध्वा यच्चान्यदपि रोचते ।
कुर्यान्नासाग्र-दृष्टिञ्च हस्तौ पादौ च संयुतौ ॥२॥
मनः सर्वत्र संयम्य ओङ्कारं तत्र चिन्तयेत् ।
ध्यायेत सततं प्राज्ञो हृत्कृत्वा परमेष्ठिनम् ॥ ३॥
एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चदैवते ।
ईदृशे तु शरीरे वा मतिमानुपलक्षयेत् ॥ ४ ॥

योगमूर्द्धप्रतिष्ठेयमुक्ता. योगशिखा ततः ।
त्रिखण्डा ग्रन्थसन्दोहे द्वात्रिंशतितमी मता ॥ १ ॥
यद्वा वह्निशिखा ध्यानयोगाद्योगशिखा मता ।
साङ्गोपाङ्गो योगयुक्तस्तथा तत् साधनानि च ॥ २ ॥

सम्प्रति देहान्ते योगिनो गमनप्रकारो वक्तव्यः, एतदर्थं योगशिखारभ्यते । योगशिखामिति । 'मन्त्रं' प्रणवं 'गात्रकम्पः' श्रद्धातिशय सूचकः ; यद्वा "कम्पो भवति मध्यमः" इति वचनाद्यदा मध्यमः प्राणविजयो भवति, तदा पद्मासनं बद्ध्वा 'अन्यत्' सिद्धादि. संयतौ कुर्य्यात्, सर्वत्र वर्त्तमानं सदिति शेषः ; 'हृत्' 'हृदि' 'परमेष्ठिनं' कमलासनं "परमेष्ठी पितामह" इति कोशात्, एकमूर्त्तित्वाद्धरिहरवत्, परमेष्ठिध्यानमपि मुक्तिहेतुः, अग्निर्वा परमेष्ठी : 'एकस्तम्भः' सुषुम्णाश्रयो मुण्डाधारदण्डः क्रोड़ाख्यो यस्य तत् तस्मिन्, इड़ा-पिङ्गला-सुषुम्णाख्यास्तिस्रः 'स्थूणाः' यस्मिन् त्रिस्थूणे त्रिगुणात्मके वा,

आदित्यमण्डलं दिव्यं रश्मिज्वाला-समाकुलम् ।
तस्य मध्यगतो वह्निः प्रज्वलेद्दीपवर्त्तिवत् ॥५॥१॥
दीपशिखायां या मात्रा सा मात्रा परमेष्ठिनः ।

पञ्च इन्द्रियाधिष्ठात्र्यो देवता एव 'दैवतानि' प्राणादयो वा यत्र तस्मिन् पञ्चदैवते, शरीरे वेति हृदयापेक्षो विकल्पः ।

हृदि ध्यानप्रकारमाह, आदित्येति । दिव्यमादित्यमण्डलं 'रश्मीनां' किरणानां ज्वालाभिः समाकुलम्; अनेन चन्द्रोप्युक्तो द्रष्टव्यः, "तस्मिन् सूर्य्येन्दुपावकान्" इत्युक्तत्वात् । वह्निमेव ध्येयतया निर्दिशति । तस्येति । 'तस्य' आदित्यस्य मध्ये 'गतः' प्रविष्टो वह्निः दीपवर्त्तिवत् 'प्रज्वलेत्' प्रज्वलति, 'मात्रा' परिमाणं, सा 'परमेष्ठिनो' ब्रह्मणो वह्नेर्वा देहाधिष्ठातुर्मात्रा; इदं वह्नेर्ध्यानं याज्ञवल्क्येनोक्तं, तद्यथा ।

"हृत्सरोरुहमध्येऽस्मिन् प्रकृत्यात्मककर्णिके ।
अष्टैश्वर्य्यदलोपेते विकारमयकेसरे ॥
ज्ञाननाले बृहत्कन्दे प्राणायामप्रबोधिते ।
विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतो मुखम् ॥
वैश्वानरं जगद्योनिं शिखा तद्बीजमीश्वरम् ।
तापयन्तं स्वकन्देहमापादतल-मस्तकम् ॥
निर्वातदीपवत्तस्मिन् दीपितं हव्यवाहनम् ।
दृष्ट्वा तस्य शिखामध्ये परमात्मानमक्षरम् ॥
नील-तोयद-मध्यस्थं विद्युल्लेखेव राजते ।
नीवारशूकवद्रूपं पीताभं सर्वकारणम् ॥
ज्ञात्वा वैश्वानरं देवं सोऽहमात्मेति या मतिः ।
सगुणेषूत्तमैषैतद्ध्यानं योगविदो विदुः ॥
वैश्वानरत्वं सम्प्राप्य मुक्तिं तेनैव गच्छति" ॥ इति ।

भिन्दन्ति योगिनः सूर्य्यं योगाभ्यासेन वै पुनः ॥६॥
द्वितीयं सुषुम्णाद्वारं परिशुद्धं विसर्पति।
कपाल-सम्पुटं भित्वा ततः पश्यति तत्परम् ॥७॥
अथ नाध्याययेज्जन्तुरालस्याच्च प्रमादतः।
यदि त्रिकालमावर्त्तेत् स गच्छेत् परमं पदम् ॥८॥

इदानीमेतद्ध्यानविशुद्धात्मनः सुषुम्णापश्चिममार्गेण षट्चक्रभेदद्वारोर्द्ध्वां गतिमाह भिन्दन्तीति। 'सूर्य्यं' सहस्रदलस्थमधिदैवमामादित्यञ्च भिन्दन्ति 'योगाभ्यासेन' उपायेन।

भेदने उपायमाह, द्वितीयमिति। सुषुम्णायाः 'द्वितीयं' पश्चिमं 'परिशुद्धं' निर्गुणं 'विसर्पति' प्रविशति, मनःप्रवेशोपायोऽमृतविन्दावुक्तः. द्वितीयमिति वचनात् सुषुम्णाया द्वौ मार्गाविति लक्ष्यते ; पूर्वमार्गः पश्चिममार्गश्च ; तत्र पूर्वमार्गः प्रवृत्तिविषयः, पश्चिमो निवृत्तिविषयः ; अत एव परिशुद्धः उक्तञ्च स्वात्मारामेण. "पूरयेन्मारुतं दिव्यं सुषुम्णापश्चिमे मुखे" इति। पश्चिममुखस्य योगमार्गत्वात्, पूर्वमुखं कर्ममार्गः ; कपालसम्पुटं 'भित्त्वा' विदार्य्य अध्यात्मं शिरोऽस्थि अधिदैवतं ब्रह्माण्डाद्धं शकलं 'ततः' तदनन्तरं 'तत्परं' पदं 'पश्यन्ति' साक्षात्कुर्वन्ति ; तदुक्तं खेचर्य्याम्।

"मनसा सह वागीश्या भित्त्वा ब्रह्मार्गलं क्षणात्।
परामृतमहाम्भोधौ विश्रान्तिं तत्र कारयेत्" ॥ इति।

उक्तयोगासमर्थं प्रति सुगमोपायमाह, अथेति। 'अथशब्दः' पक्षान्तरे, 'न ध्यायेत' न ध्यानं कुर्य्यात्, 'जन्तुः' देही 'आलस्यात्' अलसत्वात् प्रमादतो वा यदि न ध्यानं कुर्य्यात् तर्हि यदि 'एतत्' ग्रन्थरूपं 'त्रिकालं' त्रिसन्ध्यम् 'आवर्त्तेत्'

पुण्यमेतत् समासाद्य सङ्क्षेपात् कथितं मया ।
लब्धयोगेन बोद्धव्यं प्रसन्नं परमेष्ठिनम् ॥ ९ ॥
जन्मान्तर-सहस्रेषु यदा नाश्नाति किल्बिषम् ।
तदा पश्यन्ति योगेन संसारच्छेदनं परम् ॥
संसारच्छेदनं परमिति ॥ १० ॥ २ ॥

इत्यथर्ववेदे योगशिखोपनिषत् समाप्ता ॥ ८ ॥

आवर्त्तयेत् पठेत्, स परमं पदं गच्छेत् । कथितं मया इति आचार्यो जातसाक्षात्कारः शिष्यान् प्रति वदति, एतत् 'पुण्यं' पवित्रं योगतत्त्वं मया 'सङ्क्षेपात्' अविस्तरेण कथितं भवद्भिर्बोद्धव्यम्ः कथम्भूतेन मया ? प्रसन्नं 'परिनिष्ठितं' ब्रह्माणं 'समासाद्य' प्राप्य 'लब्धयोगेन' ब्रह्मणः सकाशात् मया योगो लब्धः, इति ऋषेर्वाक्यम् ।

अस्य योगस्य दुष्प्रापतां श्रद्धाजननायाह, जन्मेति । जन्मान्तरसहस्रेषु तपांसि चरतः पुंसो यदा किल्बिषं 'नाश्नाति' न भक्षयति न ग्रसति तदा योगेन परं 'संसारच्छेदनं' ब्रह्म पश्यन्ति, तदुक्तम्,

"बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" ॥ इति ।

द्विरुक्तिः समाप्त्यर्था, इति शब्दश्च ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानां दीपिका योगशैखकी ॥

इति योगशिखोपनिषदो दीपिका सम्पूर्णा ॥ ८ ॥

योगतत्त्वोपनिषत् ।

ओं योगतत्त्वं प्रवक्ष्यामि योगिनां हितकाम्यया ।
यच्छ्रुत्वा च पठित्वा च सर्वपापैः प्रमुच्यते ॥ १ ॥
विष्णुर्नाम महायोगी महाकायो महातपाः ।
तत्त्वमार्गे यथा दीपो दृश्यते पुरुषोत्तमः ॥ २ ॥
यः स्तन्यं पूर्वं पीत्वापि निष्पीड्य च पयोधरान् ।
यस्मिन् जाते भगे पूर्वे तस्मिन्नेव भगे रमेत् ॥३॥

ओं योगिनां मुक्तिकामानां मुक्तिमार्ग-प्रदर्शिका ।
त्रयोविंशा तूपनिषद्योगतत्त्वं निरूप्यते ॥ १ ॥

ग्रन्थस्य तावत् फलमाह, यच्छ्रुत्वेति । मङ्गलार्थं योगसिद्धये च परमदेवतां स्तौति, विष्णुरिति । 'महाकायः' यद्देहे ब्रह्माण्डकोटयो वसन्ति । 'तत्त्वमार्गे' परमार्थदृष्टिमार्गे, यथा दीपः प्रकाशकः, तथा विष्णुर्दृश्यत इत्यन्वयः । 'पुरुषोत्तमः', तदुक्तम्,

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" ॥ इति ।

योगप्रवृत्त्यङ्गं वैराग्यं तावदाह, यः स्तन्यमिति । 'यः' विवेकी स्तनेषु भवं 'स्तन्यं' दुग्धं, शरीरावयवात् यत् ; 'पूर्वः' बाल्यदशायां, पीत्वापि पयोधरान् निष्पीड्य रमेत्, बाला हि धयन्तो मातुः पयोधरौ मर्दयन्ति । पश्चात्, यस्मिन्नात्मना पूर्वं भगे जातः 'तस्मिन्नेव' तज्जातीये एव भगे 'रमेत्' रमेत ; अत्रापि निष्पीड्य च पयोधरानिति सम्बध्यते ; स

या माता सा पुनर्भार्य्या या भार्य्या जननी हि सा।
यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिता ॥४॥
एवं संसारचक्रेण कूपचक्र-घटा इव।
भ्रमन्तो यानि जन्मानि श्रुत्वा लोकान् समश्नुते ॥५॥
त्रयो लोकास्त्रयो वेदास्त्रयः सन्ध्यास्त्रयः सुराः।
त्रयोऽग्नयो गुणास्त्रीणि स्थिताः सर्वे त्रयाक्षरे ॥६॥
त्रयाणामक्षरे प्रान्ते योऽधीतेऽप्यर्द्धमक्षरम्।

कथं परं पश्येदिति शेषः। योषिदासक्त-चित्तानां मातृगामिनां ज्ञानलेशोऽपि दुर्लभ इति भावः।

सांसारिक-धर्म-व्यवहारोऽपि सिकतासेतुप्राय इत्याह, या इति। जन्मान्तरे इति भावः। एवमिति। 'एवम्' उक्तेन प्रकारेण 'संसारस्य' जन्मनः 'चक्रेण' वृत्तिलक्षणेन 'कूपचक्रम्' 'यन्त्रम्' अरघट्टाख्यं, तस्य 'घटाः' घट्य इव, ते यथा उपरिस्था अधोयान्ति, अधस्थाश्चोपरि, तद्वत् भ्रमन्तो जीवाः 'यानि जन्मानि' पूर्वोक्तानि, तानि यान्ति इति शेषः। तानि श्रुत्वा 'लोकान्' पितृलोक-देवलोकादीन् पुण्योदयेन 'समश्नुते' प्राप्नोति इति श्रवणफलम्।

इदानीमेतत् संसारतरणोपायं प्रणवाक्षरोपासनमाह, त्रय इति। अकारादीनां क्रमेण पृथिव्यन्तरिक्षं द्यौश्चेति त्रयो लोकाः, 'वेदाः' ऋग्यजुः-सामानि, 'त्रयः सन्ध्याः' तिस्रः सन्ध्या इत्यर्थः, त्रयः 'सुराः' ब्रह्म-विष्णु-रुद्राः ब्रह्म-रुद्र-विष्णवो वा, त्रयः 'अग्नयः' गार्हपत्य-दक्षिणाग्न्याहवनीयाः, 'गुणास्त्रीणि' गुणास्त्रय इत्यर्थः, सत्त्व-रजस्तमांसि, 'त्रयाक्षरे' त्रया-

तेन सर्वमिदं प्राप्तं लब्धं तत्परमं पदम् ॥७॥
पुष्पमध्ये यथा गन्धं पयोमध्येऽस्ति सर्पिवत्।
तिलमध्ये यथा तैलं पाषाणेष्विव काञ्चनम् ॥८॥
हृदि स्थाने स्थितं पद्मं तच्च पद्ममधोमुखम्।
ऊर्द्धनालमधोविन्दुं तस्य मध्ये स्थितं मनः ॥९॥
अकारे शोचितं पद्ममुकारेणैव भिद्यते।
मकारे लभते नादमर्द्धमात्रा तु निश्चला ॥ १० ॥

त्वकमक्षरम् अकारादि यत्र प्रणवे। त्रयाणामिति। 'त्रयाणाम्' अक्षराणां मध्ये प्रान्ते 'अक्षरे' मकारे अधीते सति यः अर्द्धम् अक्षरम् अधीतेऽपि 'अपिः' अल्पभावे, तेनाधिकारिणां सर्वमिदं प्राप्तव्यं प्राप्तम् इह लोके यच्च परमं 'पदं' मोक्षाख्यं तदपि 'लब्धं' प्राप्तम्।

ननु परमं पदं क्व वर्त्तते? सर्वत्रास्ति चेत्, कथं नोपलभ्यते? सदामकारेण उपलभ्यत एवानुस्यूतं, को दृष्टान्तः? उच्यते, पुष्पे ति। 'सर्पिवत्' छान्दसो वर्ण-लोपः, यथा एते दृष्टान्तास्तद्वदनुस्यूतमस्तीत्यर्थः।

इदानीं हृत्पद्मं ध्यानस्थानमादर्शयति, हृदीति। पद्मं 'स्थितम्' वर्त्तते, तच्च पद्ममधोमुखं वर्त्तते, 'अधोविन्दुम्' अधोमुखा विन्दवो यस्य। तदुक्तम्, "सततं शीकराभिश्च" इति। तस्य मध्ये मनः स्थितं पक्षीव कुलाये। उद्घाटनोपायमाह, अकार इति अकारे उच्चारिते सति 'शोचितं' द्रवीभूतं चलनोचितं जातम्; उकारेण उच्चारितेनैव 'भिद्यते' विकसति; मकारे उच्चारिते सति 'नादं' रवम् अव्यक्तशब्दं लभते अनाहत

शुद्धस्फटिक-सङ्काशं किञ्चित्सूर्य्य-मरीचिवत् ।
लभते योगयुक्तात्मा पुरुषोत्तम-तत्परः ॥११॥
कूर्म्मवत् पाणिपादाभ्यां शिरस्यात्मनि धारयेत् ।
एवं सर्वेषु द्वारेषु वायुः पूरत पूरत ॥१२ ॥
निषिद्धे तु नवद्वारे उच्छ्वसन्निश्वसंस्तथा ।
घटमध्ये यथा दीपं निर्वाणं कुम्भकं विदुः ॥१३॥

ग्रहणोचितं भवति, छान्दसत्वाद्विभक्तिप्रक्रमभङ्गो न दोषः । 'अर्द्धमात्रा तु निश्चला' अर्द्धमात्रायाम् उच्चारितायां निश्चला भवतीत्यर्थः ।

ध्येयस्वरूपमाह, शुद्धेति 'योगयुक्तात्मा' योगेन अष्टाङ्गेन युक्तोऽभियन्त्रितः आत्मा मनो यस्य, 'पुरुषोत्तमः' वासुदेवः तत्र 'तत्परः' तत्परायणः, उज्ज्वलं निर्मलं ध्येयं स्वरूपं लभत-इत्यन्वयः, सगुणध्यानान्निर्गुणरूपं भातीति भावः ।

इदानीं प्रत्याहार-धारणे आह, कूर्म्मवदिति । पाणि-पाद-व्यापाराभ्यां सह सर्वेन्द्रियवृत्तीः । शिरसि सहस्रदले स्थिते 'आत्मनि' मनसि धारयेत् । एवं सेन्द्रिये मनसि शिरसि नीते सर्वेषु द्वारेषु नवसु 'वायुः' वायुं 'पूरत' पूरयत योगिनो यूयं पूरत पूरतेति प्रेरणा । ततो वायुपूर्णे उदरे सति नवद्वार-रोधः कर्त्तव्य इत्याह, नवद्वार इति । नवद्वारे निषिद्धे सत्य-न्तरेवोच्छ्वसन् निश्वसंस्तिष्ठेत, इमं कुम्भकं 'निर्वाणं' मोक्षदं विदुः घटनिक्षिप्तदीपोपमम् । अयं केवलकुम्भकः । तदुक्तं,

"रेचकं पूरकं मुक्त्वा सुखं यद्वायुधारणम् ।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः ॥

पद्मपत्रमिवाच्छिन्नमूर्द्ध्ववायु-विमोचणे।
भ्रुवोर्ल्ललाटमध्यस्थं तज्ज्ञेयञ्च निरञ्जनम्॥ १४॥

केवले कुम्भके सिद्धे रेच-पूरक-वर्जिते।
न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते"॥ इति।

अयमष्टविध-कुम्भकानामन्त्यो मुख्यः।

तदुक्तं,—

"सूर्य्यभेदनमुज्जायी सीत्कारी शीतली तथा।
भस्त्रिका भ्रमरी मूर्च्छा केवलश्चाष्टकुम्भकाः"॥ इति।

गोरक्षोऽपि,

"द्वाराणां नवकं निरुध्य मरुतं पीत्वोदरे धारितम्,
नीत्वाकाशमपान-वह्नि-सहितं शक्त्या समुच्चालितम्।
आत्मध्यानयुतस्त्वनेन विधिना मूर्ध्नि ध्रुवं विन्यसेत्,
यावत्तिष्ठति तावदेव महतां सङ्गेन संस्तूयते"॥ इति।

यद्वा कूर्म्मवदित्युत्तान-कूर्म्मासनेन शिरस्यारोपिताभ्यां पाणिपादाभ्याम् आत्मनि मनसि 'धारयेत्' धारणं कुर्य्यात्। एवं कृत्वा पवनाभ्यासे कृते निर्वाणकुम्भक-सिद्धिरित्यर्थः। उत्तानकूर्म्मासनं यथा,

"पद्मासनं सुसंस्थाप्य जानूर्वोरन्तरे करौ।
निवेश्य भूमौ संस्थाप्य व्योमस्थः कुक्कुटासनम्॥
कुक्कुटासन-बन्धस्थो दोर्भ्यां सम्बध्य कन्धराम्।
शेते कूर्म्मवदुत्तान एतदुत्तानकूर्म्मकम्"॥ इति।

इदानीं ब्रह्मरन्ध्रेण गमनोपायमाह, ऊर्द्ध्वेति। ऊर्द्ध्ववायु-विमोचणे सति पद्मपत्रमिव तनीयो ब्रह्मरन्ध्रार्गलं छिन्नं भवति, तस्मिन् भ्रुवोर्मध्ये कूर्म्मस्थाने 'निरञ्जनं' शुद्धं ब्रह्म ध्येयं ज्ञेयञ्च;

निषिद्धे तु न निर्वाते निर्जने निरुपद्रवे ।
निश्चितश्चात्मभूतानामरिष्टं योगसेवया ।
अरिष्टं योगसेवया इति ॥ १५ ॥

इत्यथर्ववेदे योगतत्त्वोपनिषत् समाप्ता ॥ ८ ॥

वायूर्द्ध्वगमन-प्रकारस्त्वमृतबिन्दावुक्तः ; भ्रूमध्ये देवस्य स्थानमुक्तं गोरक्षेण,

"आकाशं यत्परं स्थानं यत्राज्ञाचक्रमुच्यते ।
तत्रात्मानं शिवं ध्यात्वा योगी मुक्तिमवाप्नुयात्" ॥ इति ॥

योगसाधनस्थानं किम् ? इत्यत आह । निषिद्धेति । निषिद्धे स्थले न कर्त्तव्यम् । क्व तर्हि ? निर्वात-देशे उपविश्य 'आत्मभूतानां' सर्वात्मभावमापन्नानां 'निश्चितं' निर्द्धारितं 'योगसेवयेति' योगाभ्यासेन, न रिष्टमरिष्टं वस्तु ज्ञेयमित्यन्वयः । द्विरुक्तिः समाप्त्यर्था ।

निषिद्धस्थलानि तु,

"सुराज्ये धार्मिके देशे सुभिक्षे निरुपद्रवे ।
एकान्ते मठिकामध्ये स्थातव्यं हठयोगिना" ॥

इत्याद्युक्तेभ्योऽन्यानि ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां योगतत्त्वस्य दीपिका ॥

इति योगतत्त्वोपनिषदो दीपिका सम्पूर्णा ॥ ८ ॥

सन्न्यासोपनिषत् ।

ओं अथाहिताग्निर्म्रियते प्रेतस्य मन्त्रैः संस्कारोपतिष्ठते स्वस्थो वाश्रमपारं गच्छेयमिति। एतान् पितृमेधिकानौषधिसम्भारान् सम्भृत्यारण्ये गत्वा अमावस्यायां प्रातरेवाग्नीऽग्नीनुपसमाधाय पितृभ्यः श्राद्धतर्पणं कृत्वा ब्राह्मेष्टिं निर्वपेत् । स सर्वज्ञः सर्वविद्यस्य ज्ञानमयं

ओं सन्न्यासोपनिषत् पञ्चखण्डा तत्त्वमितानया ।
सन्नियत्योपकार्य्याङ्गं सन्न्यासे ज्ञानमीर्य्यते ॥

योगाभ्यासेन कृतात्मसाक्षात्कारस्य विदुषः सन्न्यास एवोचित इति सेतिकर्त्तव्यताकं सन्न्यासं संविधातुं सन्न्यासोपनिषदारभ्यते। अथाहिताग्निरिति। 'प्रेतस्य' मृतस्य, संस्कार उपतिष्ठते इति वक्तव्ये छान्दसः सन्धिः ; स्वस्थः सन् 'आश्रमपारं' सर्वाश्रमाणामन्त्यं सन्न्यासं गच्छेयमिति। यदीच्छेत् तदापि मन्त्रैः संस्कार उपतिष्ठते इति सम्बन्धः। 'एतान्' वक्ष्यमाणान्, पितृमेधोऽस्ति येषां ते 'पितृमेधिकाः' श्राद्धीयाः, 'अरण्ये' इति वने एतान् 'औषधिसम्भारान्' औषधीनां समूहान् 'सम्भृत्य' समूहीकृत्य अन्त्येष्टये 'अग्नीन्' आहवनीयादीन् 'उपसमाधाय' प्रकटीकृत्य श्राद्ध-तर्पणं, श्राद्धस्याल्पाक्षरत्वात् पूर्वनिपातः, तर्पणञ्च श्राद्धञ्च कृत्वेत्यर्थः, 'ब्राह्मेष्टिं' ब्रह्मा देवता अस्याः सा ब्राह्मी, सा चासाविष्टिश्च तां 'निर्वपेत्' उपक्रमेत्, 'स सर्वज्ञः' इत्यादि कल्पतामित्यन्तं मन्त्रं पठन् निर्वपेदित्यन्वयः। अत ऊर्द्ध्वं, "यद्ब्रह्मेति,

तपस्तस्यैषाहुतिर्दिव्या अमृतत्वाय कल्पतामि-
त्येवमत ऊर्द्ध्वं यद्‌ब्रह्माभ्युदयदिवञ्च लोकमिद-
ममुञ्च सर्वं सर्वमभिजन्युः सर्वश्रियं दधतु
सुमनस्यमाना ब्रह्मजज्ञानमिति ब्रह्मणेऽथ-

"ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः" ॥

इति च द्वाभ्यां मन्त्राभ्यां ब्रह्मणे चरुं हुत्वा अथर्वादिभ्य-श्चतुराहुतीर्हुत्वा यज्ञ यज्ञं गच्छेति मन्त्राभ्याम् 'अग्नाव-रणौ' अग्निमन्थनकाष्ठे 'हुत्वा' क्षिप्त्वा, "यज्ञयज्ञं गच्छ, क्रूणां पतिं गच्छ, स्वां योनिं गच्छ स्वाहा" इत्यधरारणिम्, "एष ते यज्ञो यज्ञपते वाकः सर्ववीरस्तं जुषस्व स्वाहा" इत्युत्तरा-रणिं क्षिप्त्वा, ओं चिदित्याज्याहुतीर्जुहुयादित्यन्वयः।

मन्त्रार्थस्तु, यो ब्रह्मा 'सर्वज्ञः' सर्वस्य ज्ञाता 'सर्ववित्' सर्वं विन्दति लभते प्राप्तकामः 'तपः' तपःफलाय अमृतत्वाय तस्यामृतत्वात् तद्यागो ममाप्यमृतत्वं दिशतु इत्यर्थः।

यद्‌ब्रह्मेत्यस्यार्थस्तु, 'यत्' यत्र यस्मिन् नक्षत्रे 'ब्रह्मा' देवः 'अभ्युदय' अभ्यजयत्, किं ? दिवं लोकम्, 'इदं' दृश्य-मानम् 'अमुञ्च' अदृश्यमानं सर्वमभिजितवानिति पूर्वार्द्धम् अभिजिन्नाम नक्षत्रं ब्राह्मदैवत्यं स्तौति, नक्षत्रद्वारा तद्देव-ताया ब्रह्मणोऽपि स्तुतिः ; उत्तरार्द्धेन प्रार्थना ; 'सर्वमभिजन्युः' सर्वजयकर्त्री अभिजित् 'सुमनस्यमाना' सुमना भवन्ती 'सर्वश्रियं' सर्वां श्रियं 'दधतु' दधातु करोतु।

ब्रह्मजज्ञानमित्यस्यार्थस्तु, 'वेनः' वेञ् तन्तुसन्ताने इत्यौ-णादिको नः, बाहुलकादेव चात्वाभावः ; 'जगन्वान्' कर्त्ता

र्व्वेणी प्रजापतयेऽनुमतयेऽग्नये स्विष्टकृत इति हुत्वा यज्ञयज्ञं गच्छेत्यग्नावरणी हुत्वोच्चित्स्वायमिति चतुर्भिरनुवाकैराज्याहुतीर्जुहुयात् ।

ब्रह्मा 'सुरुचः' सुदीप्तः 'सीमतः' मर्य्यादातः 'पुरस्तात्' पूर्वं 'प्रथमं' मुख्यं 'ब्रह्मजज्ञानं' ब्रह्म वेदः, तस्य जज्ञानं, छान्दसं द्वित्वम्, 'व्यावः' विवृतवान् प्रकटीचकार, मुख्यो वेदार्थः सुमर्य्यादायाः प्रथमं येन प्रज्ञापित इत्यर्थः। आव इति, वृञ् वरणे लुङ् च्लेर्लुङि मन्त्रे घसेति च्लेर्लुक्, छन्दस्यपि दृश्यत इत्यडागमः, गुणः, हल्ङ्याविति तिर्योलोपः, व्यवहिताश्चेति वेर्व्यवहितप्रयोगः, 'व्यावः' व्यवारीत् विवृतवान्, पदस्य पौरुषेयत्वादव इति पदकालेऽटमेव प्रयुञ्जते। किमुपायोऽयम्? अत आह, 'बुध्न्या' मुख्या उपमा 'अस्य' ब्रह्मणः 'विष्ठा' विस्थानं प्राप्ता, विरुद्धस्थितयो नात्र प्रचरन्ति, अनुपमोऽयमित्यर्थः: वेदार्थोऽनेन प्रकाशितः। अन्यच्च किं कृतम्? अत आह, सतश्च असतश्च 'योनिम्' उत्पत्तिं 'विवः' विवृतवान् प्रकाशितवान् सर्वमुत्पादितवानित्यर्थः। वृञो लुङि बहुलं छन्दस्यमाङ्योगेऽपीत्यड़भावः, विपूर्वः।

अनुवाकैराज्याहुतीरिति प्रत्यृचं होमोऽवगन्तव्यः मन्त्रभेदात्। अनुवाकानां व्याख्यानन्तु गौरवात् प्रस्तुतानुपयोगाच्च नोच्यते। 'तैरेव' अनुवाकैः 'उपतिष्ठते' स्तौति मन्त्रप्रकाशितदेवताः; तेषु ऋक्सङ्ख्या यथा, आद्ये एकषष्टिर्ऋचः; द्वितीये षष्टिः; तृतीये सप्तत्रिंशत्; चतुर्थे एकोननवतिः; एवं मिलिता ऋचो द्वे शते सप्तचत्वारिंशच्च ॥ २४७ ॥ तद्यथा,

ओं चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥ १ ॥
न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवति ।
महस्पुत्रासो असुरस्य वीरा दिवो धर्त्तार उर्विया परिख्यन् ॥२॥
उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्वमा विविश्याः ॥३॥
न यत्पुरा चकृमा कद्ध नूनमृतं वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्वप्या च योषा सा नौ नाभिः परमं जामि तन्नौ ॥४॥
गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥५॥
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥६॥
को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥ ७ ॥
यमस्य मा यम्यं काम आगन्त्समाने योनौ सहशेय्याय ।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥ ८ ॥
न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥ ९ ॥
रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विभृयादजामि ॥१०॥
आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ।
उपबर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥११॥
किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात् ।
काममूता बह्वेतद्रपामि तन्वा मे तन्वं सं पिपृग्धि ॥ १२ ॥
न ते नाथं यम्यत्राहमस्मि न ते तनूं तन्वा सं पपृच्याम् ।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१३॥

न वा उ ते तनूं तन्वा सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात्
असंयदेतन्मनसो हृदो मे भ्राता स्वसुः शयने यच्छयीय ॥ १४ ॥
बतो बतासि यम नैव ते मनो हृदयं चाविदाम।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षम् ॥१५
अन्य ऊ षु यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम्।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् १६
त्रीणि छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्।
आपो वाता ओषधयस्तान्येकस्मिन् भुवन आर्पितानि ॥ १७ ॥
वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजति यज्ञियाँ ऋतून्१८
रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु नो मनः।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो विवोचति
सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती।
यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन्२०॥२
अधत्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषिरः श्येनो अध्वरे।
यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत॥२१॥
सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः।
विप्रस्य वाँयच्छशमान उक्थ्यो वाजं ससवाँउपयासि भूरिभिः२२
उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥२३॥
यस्ते अग्ने सुमतिं मर्तो अख्यत्सहसः सूनो अति स प्र शृण्वे।
इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान् भूषति द्यून्॥२४॥
सुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुम्।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥२५॥
यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥२६

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश ॥२७॥
प्रत्यग्निरुषसामग्रमख्यत्प्रत्यहानि प्रथमो जातवेदाः ।
प्रति सूर्य्यस्य पुरुधा च रश्मीन्प्रति द्यावापृथिवी आ ततान २८
द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा ।
देवो यन्मर्त्तान्यजथाय कृण्वन्त्सीदद्धोता प्रत्यङ् स्वमसुं यन्॥२९॥
देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् ।
धूमकेतुः समिधाभाऋजीकोमन्द्रोहोतानित्योवाचायजीयान् ३०
अर्चामि वां वर्द्धायापो घृतस्नूद्यावाभूमी शृणुतं रोदसी मे
अहा यद्देवा असुनीतिमायन्मध्वा नो अत्र पितरा शिशीताम्३१
स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयन्त उर्वी ।
विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥ ३२ ॥
किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवां छ्लोको न यातामपि वाजो अस्ति३३
दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥ ३४ ॥
यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्य्ये ज्योतिरदधुर्मास्य क्तून्परि द्योतनिं चरतो अजस्रा ॥३५॥
यस्मिन्देवा मन्मनि सञ्चरन्त्यपीच्ये न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत्॥३६॥

सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
स्तुष ऊ षु नृतमाय धृष्णवे ॥ ३७ ॥
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा ।
मघैर्मघोनो अति शूर दाशसि ॥ ३८ ॥

स्तेगो न क्षामत्येषि पृथिवीं मही नो वाता इह वान्तु भूमौ ।
मित्रो नो अत्र वरुणो युज्यमानो अग्निर्वने न व्यसृष्ट शोकम्३९

स्तुहि श्रुतं गर्तसदं जनानां राजानं भीममुपहत्नुमुग्रम।
मृडा जरित्रे रुद्र स्तवानो अन्यमस्मत्ते न वपन्तु सेन्यन्॥४०॥४
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्य्यंदात्॥ ४१ ॥
सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः।
आसद्यास्मिन्वर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे॥४२॥
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि॥ ४३ ॥
उदीरतामवर उत्परास उन्मध्यमा पितरः सोम्यासः।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥ ४४ ॥
आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः।
वर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः॥४५॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो ये अपरास ईयुः।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु दिक्षु॥ ४६ ॥
मातली कव्यैर्यमो अङ्गिरोभिर्वृहस्पतिर्ऋक्वभिर्वावृधानः।
यांश्च देवा वावृधुर्ये च देवांस्ते नोऽवन्तु पितरो हवेषु॥ ४७ ॥
स्वादुः किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम्।
उतो न्वस्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु॥ ४८ ॥
परेयिवांसं प्रवतो महीरिति बहुभ्यः पन्थामनुपस्पशानम्।
वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा सपर्यत॥ ४९ ॥
यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ।
यत्रा नः पूर्वे पितरः परेता एना जज्ञानाः पथ्या अनु स्वाः॥५०॥५
वर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्।
त आ गतावसा शन्तमेनाथा नः शं योररपो दधात॥ ५१ ॥
आच्या जानु दक्षिणतो निषद्येदं नो हविरभि गृणन्तु विश्वे।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम॥५२

त्वष्टा दुहित्रे वहतुं कृणोति तेनेदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥५३॥
प्रेहि प्रेहि पथिभिः पूर्व्याणैर्येना ते पूर्वे पितरः परेताः ।
उभा राजानौ स्वधया मदन्तौ यमं पश्यासि वरुणं च देवम् ॥५४
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ ५५ ॥

उशन्तस्त्वेधीमह्युशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥ ५६ ॥
द्युमन्तस्त्वेधीमहि द्युमन्तः समिधीमहि ।
द्युमान् द्युमन्त आ वह पितॄन् हविषे अत्तवे ॥५७॥

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ५८ ॥
अङ्गिरोभिर्यज्ञियैरा गहीह यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन्बर्हिष्या निषद्य ॥ ५९ ॥
इमं यम प्रस्तरमा हि रोहाङ्गिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन्हविषो मादयस्व ६०

इम एत उदारुहन्दिवस्पृष्ठान्यारुहन् ।
प्र भूर्जयो यथा पथा द्यामङ्गिरसो ययुः ॥ ६१ ॥ ६

प्रथमोऽनुवाकः ॥

यमाय सोमः पवते यमाय क्रियते हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरङ्कृतः ॥ १ ॥
यमाय मधुमत्तमं जुहोता प्र च तिष्ठत ।
इदं नम ऋषिभ्यः पूर्वजेभ्य पूर्वेभ्यः पथिकृद्भ्यः ॥२॥
यमाय घृतवत्पयो राज्ञे हविर्जुहोतन ।
स नो जीवेष्वा यमे दीर्घमायुः प्र जीवसे ॥ ३ ॥

मैनमग्ने वि दहो माभि शूशुचो मास्य त्वचं चिक्षिपो मा शरीरम् ।

शृतं यदा करसि जातवेदोऽथेममेनं प्र हिणुतात्पितृभ्यः ॥४॥
यदा शृतं कृणवो जातवेदोऽथेममेनं परि दत्तात्पितृभ्यः ।
यदो गच्छात्यसुनीतिमेतामथ देवानां वशनीर्भवाति ॥ ५ ॥

त्रिकद्रुकेभिः पवते षडुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आर्पिता ॥६॥

सूर्य्यं चक्षुषा गच्छ वातमात्मना दिवं च गच्छ पृथिवीं च धर्मभिः ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥७॥
अजो भागस्तपसस्तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥८॥
यास्ते शोचयो रंहयो जातवेदो याभिरापृणासि दिवमन्तरिक्षम् ।
अजं यन्तमनु ताः समृण्वतामथेतराभिः शिवतमाभिः शिवं कृधि ९
अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधावान् ।
आयुर्वसान उप यातु शेषः सं गच्छतां तन्वासुवर्चाः ॥ १० ॥७॥
अति द्रव श्वानौ सारमेयौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्राँ अपीहि यमेन ये सधमादं मदन्ति ॥११॥
यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिषदी नृचक्षसा ।
ताभ्यां राजन्परि धेह्येनं स्वस्त्यस्मा अनमीवं च धेहि ॥ १२ ॥
उरूणसावसुतृपावुदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्य्याय पुनर्दातामसुमद्येह भद्रम् ॥ १३ ॥

सोम एकेभ्यः पवते घृतमेक उपासते ।
येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ॥ १४ ॥
ये चित्पूर्व ऋतसाता ऋतजाता ऋतावृधः ।
ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥ १५ ॥
तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ।
तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ॥ १६ ॥
ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः ।

ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ॥ १७ ॥

सहस्रणीथाः कवयो ये गोपायन्ति सूर्य्यम् ।

ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥ १८ ॥

स्योनास्मै भव पृथिव्यनृक्षरा निवेशनी। यच्छास्मै शर्म्म सप्रथाः१९

असम्बाधे पृथिव्या उरौ लोके नि धीयस्व ।

स्वधा याश्चकृषे जीवंस्तास्ते सन्तु मधुश्चुतः ॥ २० ॥ ८

ह्वयामि ते मनसा मन इहेमान् गृहाँ उप जुजुषाण एहि ।

सङ्गच्छस्व पितृभिः सं यमेन स्योनास्त्वा वाता उप वान्तु शग्माः२१

उत्त्वा वहन्तु मरुत उदवाहा उदप्रुतः ।

अजेन कृण्वन्तः शीतं वर्षेणोक्षन्तु बालिति ॥ २२ ॥

उदह्वमायुरायुषे क्रत्वे दक्षाय जीवसे ।

स्वान् गच्छतु ते मनोऽधा पितॄँरुप द्रव ॥ २३ ॥

मा ते मनो मासोर्माङ्गानां मा रसस्य ते ।

मा ते हास्त तन्वः किं चनेह ॥ २४ ॥

मा त्वा वृक्षः सं बाधिष्ट मा देवी पृथिवी मही ।

लोकं पितृषु वित्वैधस्व यमराजसु ॥ २५ ॥

यत्ते अङ्गमतिहितं पराचैरपानः प्राणो य उ वा ते परेतः ।

तत्ते सङ्गत्य पितरः सनीडा घासाद्घासं पुनरा वेशयन्तु ॥ २६ ॥

अपेमं जीवा अरुधन् गृहेभ्यस्तं निर्वहत परि ग्रामादितः ।

मृत्युर्यमस्यासीद्दूतः प्रचेता असून् पितृभ्यो गमयां चकार ॥२७॥

ये दस्यवः पितृषु प्रविष्टा ज्ञातिमुखा अहुतादश्चरन्ति ।

परापुरो निपुरो ये भरन्त्यग्निष्टानस्मात्प्रधमाति यज्ञात् ॥२८॥

सं विशन्त्विह पितरः स्वा नः स्योनं कृण्वन्तः प्रतिरन्त आयुः ।

तेभ्यः शकेम हविषा नक्षमाणा ज्योग्जीवन्तः शरदः पुरूचीः॥२९

यां ते धेनुं निपृणामि यमु ते क्षीर ओदनम् ।

तेना जनस्यासो भर्त्ता योऽत्रासदजीवनः ॥ ३० ॥

अश्मन्वती प्र तर या सुशेवार्चाकं वा प्रतरं नवीयः।
यस्त्वा जघान बध्यः सो अस्तु मा सो अन्यद्विदत भागधेयम् ३१
यमः परोऽवरो विवस्वान्ततः परं नाति पश्यामि किञ्चन।
यमे अध्वरो अधि मे निविष्टो भुवो विवस्वानन्वाततान ॥ ३२ ॥
अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामदधुर्विवस्वते।
उताश्विनावभरद्यत्तदासीदजहादुद्वा मिथुना सरण्यूः ॥ ३३ ॥
ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः।
सर्वांस्तानग्न आ वह पितॄन् हविषे अत्तवे ॥ ३४ ॥
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते।
त्वं तान्वेत्थ यदि ते जातवेदः स्वधया यज्ञं स्वधितिं जुषन्ताम्३५
शं तप माति तपो अग्ने मा तन्वं तपः।
वनेषु शुष्मो अस्तु ते पृथिव्यामस्तु यद्धरः ॥ ३६ ॥
ददाम्यस्मा अवसानमेतद्य एष आगन्मम चेदभूदिह।
यमश्चिकित्वान् प्रत्येतदाह ममैष राय उप तिष्ठतामिह ॥ ३७ ॥
इमां मात्रां मिमीमहे यथापरं न मासातै। शते शरत्सु नो पुरा ३८
प्रेमां मात्रां०।०॥ ३९ ॥
अपेमां मात्रां०।०॥ ४० ॥ (१०)
वीमां मात्रां०।०॥ ४१ ॥
निरिमां मात्रां०।०॥ ४२ ॥
उदिमां मात्रां०।०॥ ४३ ॥
समिमां मात्रां मिमीमहे यथापरं न मासातै।
शते शरत्सु नो पुरा ॥ ४४ ॥
अमासि मात्रां स्वरगामायुष्मान् भूयासम्।
यथापरं न मासातै शते शरत्सु नो पुरा ॥ ४५ ॥
प्राणो अपानो व्यान आयुश्चक्षुर्दृशये सूर्याय।
अपरिपरेण पथा यमराज्ञः पितॄन् गच्छ ॥ ४६ ॥

ये अग्रवः शशमानाः परेयुर्हित्वा द्वेषांस्यनपत्यवन्तः ।
ते द्यामुदित्याविदन्त लोकं नाकस्य पृष्ठे अधि दीध्यानाः ॥४७॥
उदन्वती द्यौरवमा पीलुमतीति मध्यमा ।
तृतीया ह प्रद्यौरिति यस्यां पितर आसते ॥ ४८ ॥
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्वन्तरिक्षम् ।
य आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्यो नमसा विधेम ४९
इदमिद्वा उ नापरं दिवि पश्यसि सूर्यम् ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥ ५० ॥
इदमिद्वा उ नापरं जरस्यन्यदितोऽपरम् ।
जाया पतिमिव वाससाभ्येनं भूम ऊर्णुहि ॥ ५१ ॥
अभि त्वोर्णोमि पृथिव्या मातुर्वस्त्रेण भद्रया ।
जीवेषु भद्रं तन्मयि स्वधा पितृषु सा त्वयि ॥ ५२ ॥
अग्नीषोमा पथिकृता स्योनं देवेभ्यो रत्नं दधथुर्वि लोकम् ।
उप प्रेष्यन्तं पूषणं यो वहात्यजयानैः पथिभिस्तत्र गच्छतम् ॥५३
पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्यो अग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥५४
आयुर्विश्वायुः परि पातु त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र त ईयुस्तत्र त्वा देवः सविता दधातु ॥५५॥
इमौ युनज्मि ते वह्नी असुनीताय वोढवे ।
ताभ्यां यमस्य सादनं समितीश्चाव गच्छतात् ॥ ५६ ॥
एतत्त्वा वासः प्रथमं न्वागन्नपैतदूह यदिहाबिभः पुरा ।
इष्टापूर्त्तमनुसङ्क्राम विद्वान्यत्र ते दत्तं बहुधा विबन्धुषु ॥ ५७ ॥
अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व मेदसा पीवसा च ।
नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्परीङ्खयातै ॥ ५८ ॥
दण्डं हस्तादाददानो गतासोः सह श्रोत्रेण वर्चसा बलेन ।
अत्रैव त्वमिह वयं सुवीरा विश्वा मृधो अभिमातीर्जयेम ॥५९

धनुर्हस्तादाददानो मृतस्य सह क्षत्रेण वर्चसा बलेन।
समागृभाय वसु भूरि पुष्टमर्वाङ् त्वमेह्युप जीवलोकम् ६०॥१२

द्वितीयोऽनुवाकः।

इयं नारी पतिलोकं वृणाना नि पद्यत उप त्वा मर्त्य प्रेतम्।
धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि॥ १॥
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि।
हस्तग्राभस्य दधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ॥ २॥
अपश्यं युवतिं नीयमानां जीवां मृतेभ्यः परिणीयमानाम्।
अन्धेन यत्तमसा प्रावृतासीत्प्राक्तो अपाचीमनयं तदेनाम्॥ ३॥
प्रजानत्यघ्न्ये जीवलोकं देवानां पन्थामनुसञ्चरन्ती।
अयं ते गोपतिस्तं जुषस्व स्वर्गं लोकमधि रोहयैनम्॥ ४॥
उप द्यामुप वेतसमवत्तरो नदीनाम्।
अग्ने पित्तमपामसि॥ ५॥

यं त्वमग्ने समदहस्तमु निर्वापया पुनः।
क्याम्बूरत्र रोहतु शाण्डदूर्वा व्यल्कशा॥ ६॥

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व।
संवेशने तन्वा चारुरेधि प्रियो देवानां परमे सधस्थे॥ ७॥
उत्तिष्ठ प्रेहि प्र द्रवौकः कृणुष्व सलिले सधस्थे।
तत्र त्वं पितृभिः संविदानः सं सोमेन मदस्व सं स्वधाभिः॥८॥
प्र च्यवस्व तन्वं सं भरस्व मा ते गात्रा वि हायि मो शरीरम्।
मनो निविष्टमनुसंविशस्व यत्र भूमेर्जुषसे तत्र गच्छ॥९॥
वर्चसा मां पितरः सोम्यासो अञ्जन्तु देवा मधुना घृतेन।
चक्षुषे मा प्रतरं तारयन्तो जरसे मा जरदष्टिं वर्धन्तु॥१०॥१३
वर्चसा मां समनक्त्वग्निर्मेधां मे विष्णुर्न्यनक्त्वासन्।
रयिं मे विश्वे नि यच्छन्तु देवाः स्योना मापः पवनैः पुनन्तु॥११

मित्रावरुणा परि मामधातामादित्या मा स्वरवो वर्द्धयन्तु ।
वर्चो म इन्द्रो न्यनक्तु हस्तयोर्जरदष्टिं मा सविता कृणोतु ॥१२
यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम् ।
वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा सपर्य्यत ॥१३॥
परा यात पितर आ च यातायं वो यज्ञो मधुना समक्तः ।
दत्तो अस्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं दधात ॥१४॥
कण्वः कक्षीवान् पुरुमीढो अगस्त्यः श्यावाश्वः सोभर्यर्चनानाः ।
विश्वामित्रोऽयं जमदग्निरत्रिरवन्तु नः कश्यपो वामदेवः ॥१५॥
विश्वामित्र जमदग्ने वशिष्ठ भरद्वाज गोतम वामदेव ।
शर्दिर्नो अत्रिरग्रभीन्नमोभिः सुसंशासः पितरो मृडता नः ॥१६
कस्ये मृजाना अति यन्ति रिप्रमायुर्दधानाः प्रतरं नवीयः ।
आप्यायमानाः प्रजया धनेनाध स्याम सुरभयो गृहेषु ॥ १७ ॥
अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृह्णते ॥१८
यद्वो मुद्रं पितरः सोम्यं च तेनो सचध्वं स्वयशसो हि भूतम् ।
ते अर्वाणः कवय आ शृणोत सुविदत्रा विदथे हूयमानाः ॥१९॥
ये अत्रयो अङ्गिरसो नवग्वा इष्टावन्तो रातिषाचो दधानाः ।
दक्षिणावन्तः सुकृतो य उ स्थासद्यास्मिन् बर्हिषि मादयध्वम्॥२०॥१४
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशशानाः ।
शुचीदयन्दीध्यत उक्थशासः क्षामा भिन्दन्तो अरुणीरपव्रन् ॥२१
सुकर्म्माणः सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं वावृधन्त इन्द्रमुर्वीं गव्यां परिषदं नो अक्रन् ॥२२
आ यूथेव क्षुमति पश्वो अख्यद्देवानां जनिमान्त्युग्र ।
मर्त्तानाश्चिदुर्वशीरकृप्रन्वृधे चिदर्य्य उपरस्यायोः ॥ २३ ॥
अकर्म्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥ २४ ॥

इन्द्रो मा मरुत्वान् प्राच्या दिशः पातु बाहुच्युता पृथिवी द्या-
मिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ॥२५
धाता मा निरृत्या दक्षिणाया दिशः पातु बाहु०।०॥२६॥
अदितिर्म्मादित्यैः प्रतीच्या दिशः पातु बाहु०।०॥ २७॥
सोमो मा विश्वैर्देवैरुदीच्या दिशः पातु बाहु०।०॥२८॥
धर्त्ता ह त्वा धरुणो धारयाता ऊर्ध्वं भानुं सविता द्यामिवोपरि।
लोककृतः०।०॥ २९॥
प्राच्यां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहु०।०॥३०॥१५
दक्षिणायां त्वा दिशि पुरा०।०॥३१॥
प्रतीच्यां त्वा दिशि पुरा०।०॥ ३२॥
उदीच्यां त्वा दिशि पुरा०।०॥ ३३॥
ध्रुवायां त्वा दिशि पुरा०।०॥३४॥
ऊर्ध्वायां त्वा दिशि पुरा संवृतः स्वधायामा दधामि बाहुच्युता
पृथिवी द्यामिवोपरि।
लोककृतः पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ॥३५
धर्त्तासि धरुणोऽसि वंसगोऽसि॥ ३६॥
उदपूरसि मधुपूरसि वातपूरसि॥ ३७॥
इतश्च मामुतश्चावतां यमे इव यतमाने यदैतम्।
प्र वां भरन्मानुषा देवयन्त आ सीदतं स्वमु लोकं विदाने॥३८॥
स्वासस्थे भवतमिन्दवे नो युजे वां ब्रह्म पूर्व्यं नमोभिः।
वि श्लोक एति पथ्येव सूरिः शृण्वन्तु विश्वे अमृताम एतत्॥३९॥
त्रीणि पदानि रूपो अन्वरोहच्चतुष्पदीमन्वैतद्व्रतेन।
अक्षरेण प्रति मिमीते अर्कमृतस्य नाभावभि सं पुनाति।४०।१६
देवेभ्यः कमवृणीत मृत्युं प्रजायै किममृतं नावृणीत।
बृहस्पतिर्यज्ञमतनुत ऋषिः प्रियां यमस्तन्वमा रिरेच॥४१॥

त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥४२
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥ ४३ ॥
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधात ॥४४
उपहूता नः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ४५ ॥
ये नः पितुः पितरो ये पितामहा अनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ ४६ ॥
ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
अग्ने याहि सहस्रं देववन्दैः सत्यैः कविभिर्ऋषिभिर्घर्मसद्भिः ४७
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं तुरेण ।
आग्ने याहि सुविदत्रेभिरर्वाङ् परैः पूर्वैर्ऋषिभिर्घर्मसद्भिः ॥४८
उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदाः पृथिवी दक्षिणावत एषा त्वा पातु प्रपथे पुरस्तात् ॥४९
उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपसर्पणा ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥ ५० ॥ १७ ॥
उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतः स्योना विश्वाहास्मै शरणाः सन्त्वत्र ॥ ५१ ॥
उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्ति ते तत्र यमः सादना ते मिनोतु ५२
इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
अयं यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम् ॥५३॥
अथर्वा पूर्णं चमसं यमिन्द्रायाबिभर्वाजिनीवते ।
तस्मिन् कृणोति सुकृतस्य भक्षं तस्मिन्निन्दुः पवते विश्वदानीम् ५४

यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः।
अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥५५
पयस्वतीरोषधयः पयस्वन्मामकं पयः।
अपां पयसो यत्पयस्तेन मा सह शुम्भन्तु ॥ ५६ ॥
इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं स्पृशन्ताम्।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥५७
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्त्तेन परमे व्योमन्।
हित्वावद्यं पुनरस्तमेहि सं गच्छतां तन्वा सुवर्चाः ॥ ५८ ॥
ये नः पितुः पितरो ये पितामहा य आविविशुरुर्वन्तरिक्षम्।
तेभ्यः स्वराडसुनीतिर्नो अद्य यथावशं तन्वः कल्पयाति ॥५९॥
शं ते नीहारो भवतु शं ते प्रष्वाव शीयताम्।
शीतिके शीतिकावति ह्लादिके ह्लादिकावति।
मण्डूक्यप्सु शं भुव इमं स्वग्निं शमय ॥ ६० ॥१८॥
विवस्वान्नो अभयं कृणोतु यः सुत्रामा जीरदानुः सुदानुः।
इहेमे वीरा बहवो भवन्तु गोमदश्ववन्मय्यस्तु पुष्टम् ॥ ६१ ॥
विवस्वान्नो अमृतत्वे दधातु परैतु मृत्युरमृतं न ऐतु।
इमान्रक्षतु पुरुषाना जरिम्णो मो ष्वेषामसवो यमं गुः ॥६२॥
यो दध्रे अन्तरिक्षेण मह्ना पितॄणां कविः प्रमतिर्मतीनाम्।
तमर्चत विश्वमित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात् ॥६३
आ रोहत दिवमुत्तमामृषयो मा बिभीतन।
सोमपाः सोमपायिन इदं वः क्रियते हविरगन्म ज्योतिरुत्तमम् ६४
प्र केतुना बृहता भात्यग्निरा रोदसी वृषभो रोरवीति।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्द्ध ॥ ६५ ॥
नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ६६ ॥
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा।

शिवा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥६७

अपूपापिहितान् कुम्भान्यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुत: ॥ ६८ ॥

यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः ।
तास्ते सन्तु विभ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥ ६९ ॥

पुनर्देहि वनस्पते य एष निहितस्त्वयि ।
यथा यमस्य सादन आसाते विदथा वदन् ॥ ७० ॥

आ रभस्व जातवेदस्तेजस्वद्धरो अस्तु ते ।
शरीरमस्य सं दहाथैनं धेहि सुकृतामु लोके ॥ ७१ ॥

ये ते पूर्वे परागता अपरे पितरश्च ये ।
तेभ्यो घृतस्य कुल्यैतु शतधारा व्युन्दती ॥ ७२ ॥

एतदा रोह वय उन्मृजानः स्वा इह बृहदु दीदयन्ते ।
अभि प्रेहि मध्यतो माप हास्थाः पितॄणां लोकं प्रथमो यो अत्र
॥ ७३ ॥ (१८)

तृतीयोऽनुवाकः ।

आ रोहत जनित्रीं जातवेदसः पितृयाणैः सं व आ रोहयामि ।
अवाड्ढव्येषितो हव्यवाह ईजानं युक्ताः सुकृतां धत्त लोके ॥१॥

देवा यज्ञमृतवः कल्पयन्ति हविः पुरोडाशं स्रुचो यज्ञायुधानि ।
तेभिर्याहि पथिभिर्देवयानैर्यैरीजानाः स्वर्गं यन्ति लोकम् ॥ २ ॥

ऋतस्य पन्थामनु पश्य साध्वङ्गिरसः सुकृतो येन यन्ति ।
तेभिर्याहि पथिभिः स्वर्गं यत्रादित्या मधु भक्षयन्ति तृतीये नाके
अधि वि श्रयस्व ॥ ३ ॥

त्रयः सुपर्णा उपरस्य मायू नाकस्य पृष्ठे अधि विष्टपि श्रिताः ।
स्वर्गा लोका अमृतेन विष्ठा इषमूर्जं यजमानाय दुह्राम् ॥ ४ ॥

जुहूर्दाधार द्यामुपभृदन्तरिक्षं ध्रुवा दाधार पृथिवीं प्रतिष्ठाम् ।
प्रतिमां लोका घृतपृष्ठाः स्वर्गाः कामङ्कामं यजमानाय दुह्राम् ५

ध्रुव आ रोह पृथिवीं विश्वभोजसमन्तरिक्षमुपभृदा क्रमस्व।
जुहु द्यां गच्छ यजमानेन साकं स्रुवेण वत्सेन दिशः प्रपीनाः सर्वा
धुक्ष्वाहृणीयमानाः॥ ६॥
तीर्थैस्तरन्ति प्रवतो महीरिति यज्ञकृतः सुकृतो येन यन्ति।
अत्रादधुर्यजमानाय लोकं दिशो भूतानि यदकल्पयन्त॥ ७॥
अङ्गिरसामयनं पूर्वो अग्निरादित्यानामयनं गार्हपत्यो दक्षिणा-
यनं दक्षिणाग्निः।
महिमानमग्नेर्विहितस्य ब्रह्मणा समङ्गः सर्व उप याहि शग्मः॥८॥
पूर्वो अग्निष्ट्वा तपतु शं पुरस्ताच्छं पश्चात्तपतु गार्हपत्यः।
दक्षिणाग्निष्टे तपतु शर्म वर्मोत्तरतो मध्यतो अन्तरिक्षाद् दिशो
दिशो अग्ने परि पाहि घोरात्॥ ९॥
यूयमग्ने शन्तमाभिस्तनूभिरीजानमभि लोकं स्वर्गम्।
अश्वा भूत्वा पृष्टिवाहो वहाथ यत्र देवैः सधमादं मदन्ति १०॥२०
शमग्ने पश्चात्तप शं पुरस्ताच्छमुत्तराच्छमधरात्तपैनम्।
एकस्त्रेधा विहितो जातवेदः सम्यगेनं धेहि सुकृताम् लोके ११॥
शमग्नयः समिद्धा आ रभन्तां प्राजापत्यं मेध्यं जातवेदसः।
शृतं कृण्वन्त इह माव चिक्षिपन्॥ १२॥
यज्ञ एति विततः कल्पमान ईजानमभि लोकं स्वर्गम्।
तमग्नयः सर्वहुतं जुषन्तां प्राजापत्यं मेध्यं जातवेदसः।
शृतं कृण्वन्त इव माव चिक्षिपन्॥ १३॥
ईजानश्चित्तमारुक्षदग्निं नाकस्य पृष्ठाद्दिवमुत्पतिष्यन्।
तस्मै प्र भाति नभसो ज्योतिषीमान्स्वर्गः पन्थाः सुकृते देव-
यानः॥ १४॥
अग्निर्होताध्वर्युष्टे बृहस्पतिरिन्द्रो ब्रह्मा दक्षिणतस्ते अस्तु।
हुतोऽयं संस्थितो यज्ञ एति यत्र पूर्वमयनं हुतानाम्॥ १५॥
अपूपवान् क्षीरवांश्चरुरेह सीदतु।

लोककृत: पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ १६॥
अपूपवान् दधिवांश्चरुरेह० । ० ॥ १७ ॥
अपूपवान् द्रप्सवांश्चरुरेह० । ० ॥ १८ ॥
अपूपवान् घृतवांश्चरुरेह० । ० ॥ १९ ॥
अपूपवान् मांसवांश्चरुरेह० । ० ॥ २० ॥ २१ ॥
अपूपवानन्नवांश्चरुरेह० । ० ॥ २१ ॥
अपूपवान्मधुमांश्चरुरेह० । ० ॥ २२ ॥
अपूपवान् रसवांश्चरुरेह० । ० ॥ २३ ॥
अपूपवानपवांश्चरुरेह सीदतु ।
लोककृत: पथिकृतो यजामहे ये देवानां हुतभागा इह स्थ २४॥

अपूपापिहितान् कुम्भान्यांस्ते देवा अधारयन् ।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुत: ॥ २५ ॥
यास्ते धाना अनुकिरामि तिलमिश्रा: स्वधावती ।
तास्ते सन्तूद्भ्वी: प्रभ्वीस्तास्ते यमो राजानु मन्यताम् ॥२६॥
अक्षितिं भूयसीम् ॥ २७ ॥

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्व: ।
समानं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्रा: ॥२८॥
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम् ।
ये पृणन्ति प्र च यच्छन्ति सर्वदा ते दुह्रते दक्षिणां सप्तमातरम्
कोशं दुहन्ति कलशं चतुर्बिलमिडां धेनुं मधुमतीं स्वस्तये ॥
ऊर्जं मदन्तीमदितिं जनेष्वग्ने मा हिंसी: परमे व्योमन्॥३०॥२२

एतत्ते देव: सविता वासो ददाति भर्त्तवे ।
तत्त्वं यमस्य राज्ये वसानस्तार्प्यं चर ॥ ३१ ॥
धाना धेनुरभवद्वत्सो अस्यास्तिलोऽभवत् ।
तां वै यमस्य राज्ये अक्षितामुपजीवति ॥ ३२ ॥

एतास्ते असौ धेनव: कामदुघा भवन्तु ।

एनीः श्येनीः सरूपा विरूपास्तिलवत्सा उप तिष्ठन्तु त्वात्र॥३३॥
एनीर्धाना हरिणीः श्येनीरस्य कृष्णा धाना रोहिणीर्धेनवस्ते।
तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः॥३४॥
वैश्वानरे हविरिदं जुहोमि साहस्रं शतधारमुत्सम्।
स बिभर्त्ति पितरं पितामहान् प्रपितामहान् बिभर्त्ति पिन्वमानः३५
सहस्रधारं शतधारमुत्समक्षितं व्यच्यमानं सलिलस्य पृष्ठे।
ऊर्जं दुहानमनपस्फुरन्तमुपासते पितरः स्वधाभिः॥ ३६ ॥
इदं कसाम्बु चयनेन चितं तत्सजाता अव पश्यतेत।
मर्त्योऽयममृतत्वमेति तस्मै गृहान् कृणुत यावत्सबन्धु॥ ३७ ॥
इहैवैधि धनसनिरिहचित्त इह क्रतुः।
इहैधि वीर्य्यवत्तरो वयोधा अपराहतः॥ ३८ ॥
पुत्रं पौत्रमभितर्पयन्तीरापो मधुमतीरिमाः।
स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयांस्तर्पयन्तु॥३९॥
आपो अग्निं प्र हिणुत पितॄँरुपेमं यज्ञं पितरो मे जुषन्ताम्।
आसीनामूर्जमुप ये सचन्ते ते नो रयिं सर्ववीरं नियच्छान् ४०॥२३
समिन्धते अमर्त्यं हव्यवाहं घृतप्रियम्।
स वेद निहितान्निधीन् पितॄन् परावतो गतान्॥ ४१ ॥
यं ते मन्थं यमोदनं यन्मांसं निपृणामि ते।
ते ते सन्तु स्वधावन्तो मधुमन्तो घृतश्चुतः॥ ४१ ॥
यास्ते धाना अनुकिरामि तिलमिश्राः स्वधावतीः।
तास्ते सन्तु विभ्वीः प्रभ्वीस्तास्ते यमो राजानु मन्यताम्॥४३॥
इदं पूर्वमपरं नियानं येना ते पूर्वे पितरः परेताः।
पुरोगवा ये अभिषाचो अस्य ते त्वा वहन्ति सुकृतामु लोकम् ४४
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने।
सरस्वतीं सुकृतो हवन्ते सरस्वती दाशुषे वार्यं दात्॥ ४५ ॥
सरस्वतीं पितरो हवन्ते दक्षिणा यज्ञमभिनक्षमाणाः।

आसद्यास्मिन् बर्हिषि मादयध्वमनमीवा इष आ धेह्यस्मे ॥४६॥
सरस्वति या सरथं ययाथोक्थैः स्वधाभिर्देवि पितृभिर्मदन्ती ।
सहस्रार्घमिडो अत्र भागं रायस्पोषं यजमानाय धेहि ॥ ४७ ॥
पृथिवीं त्वा पृथिव्यामा वेशयामि देवो नो धाता प्र तिरात्यायुः ।
परापरैता वसुविद्वो अस्त्वधा मृताः पितृषु सं भवन्तु ॥ ४८ ॥
आ प्र च्यवेथामप तन्मृजेथां यद्वामभिभा अत्रोचुः ।
अस्मादेतमघ्न्यौ तद्वशाय दातुः पितृष्विह भोजनौ मम ॥ ४९ ॥
एयमगन्दक्षिणा भद्रतो नो अनेन दत्ता सुदुघा वयोधाः ।
यौवने जीवानुपपृञ्चती जरा पितृभ्य उपसम्पराणयादि-
मान् ॥ ५० ॥ ॥ २४ ॥
इदं पितृभ्यः प्र भरामि बर्हिर्जीवं देवेभ्य उत्तरं स्तृणामि ।
तदा रोह पुरुष मेध्यो भवन् प्रति त्वा जानन्तु पितरः परेतम्॥५१
एदं बर्हिरसदो मेध्योऽभूः प्रति त्वा जानन्तु पितरः परेतम् ।
यथापरु तन्वं सं भरस्व गात्राणि ते ब्रह्मणा कल्पयामि ॥ ५२ ॥
पर्णो राजापिधानं चरूणामूर्जो बलं सह ओजो न आगन् ।
आयुर्जीवेभ्यो विदधद्दीर्घायुत्वाय शतशारदाय ॥ ५३ ॥
ऊर्जो भागो य इमं जजानाश्मान्नानामाधिपत्यं जगाम ।
तमर्चत विश्वमित्रा हविर्भिः स नो यमः प्रतरं जीवसे धात्॥५४॥

यथा यमाय हर्म्यमवपन् पञ्च मानवाः ।
एवा वपामि हर्म्यं यथा मे भूरयोऽसत ॥ ५५ ॥

इदं हिरण्यं बिभृहि यत्ते पिता बिभः पुरा ।
स्वर्गं यतः पितुर्हस्तं निर्मृड्ढि दक्षिणम् ॥ ५६ ॥

ये च जीवा ये च मृता ये जाता ये च यज्ञियाः ।
तेभ्यो घृतस्य कुल्यैतु मधुधारा व्युन्दती ॥ ५७ ॥

वृषा मतीनां पवते विचक्षणः सूरो अह्नां प्रतरीता उषसां दिवः ।
प्राणः सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनी-
षया ॥ ५८ ॥

त्विषस्ते धूम ऊर्णोतु दिवि षं छुक्र आततः।

सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ५८ ॥

प्र वा एतीन्दुरिन्द्रस्य निष्कृतिं सखा सख्युर्न प्र मिनाति सङ्गिरः।

मर्य इव योषाः समर्षसे सोमः कलशे शतयामना पथा ॥६०॥२५

अक्षन्नमीमदन्त ह्यव प्रियाँ अधूषत।

अस्तोषत स्वभानवो विप्रा यविष्ठा ईमहे ॥ ६१ ॥

आ यात पितरः सोम्यासो गम्भीरैः पथिभिः पितृयाणैः।

आयुरस्मभ्यं दधतः प्रजां च रायश्च पोषैरभि नः सचध्वम् ॥६२॥

परा यात पितरः सोम्यासो गम्भीरैः पथिभिः पूर्व्याणैः।

अधा मासि पुनरा यात नो गृहान् हविरत्तुं सुप्रजसः सुवीराः॥६३॥

यद्वो अग्निरजहादेकमङ्गं पितृलोकं गमयं जातवेदाः।

तद्व एतत्पुनरा प्याययामि साङ्गाः स्वर्गे पितरो मादयध्वम् ॥६४॥

अभूद्दूतः प्रहितो जातवेदाः सायं न्यह्न उप वन्द्यो नृभिः।

प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥६५॥

असौ हा इह ते मनः ककुत्सलमिव जामयः।

अभ्येनं भूम ऊर्णुहि ॥ ६६ ॥

शुम्भन्तां लोकाः पितृषदनाः पितृषदने त्वा लोक आ सादयामि ॥ ६७ ॥

येऽस्माकं पितरस्तेषां बर्हिरसि ॥ ६८ ॥

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।

अधा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ६९ ॥

प्रास्मत्पाशान् वरुण मुञ्च सर्वान्यैः समामे बध्यते यैर्व्यामे।

अधा जीवेम शरदां शतानि त्वया राजन् गुपिता रक्षमाणाः ॥ ७० ॥ (२६)

अग्नये कव्यवाहनाय स्वधा नमः ॥ ७१ ॥

सोमाय पितृमते स्वधा नमः ॥ ७२ ॥

तैरेवोपतिष्ठते। अथाग्नेरग्निमिति च द्वावग्नी

पितृभ्यः सोमवद्भ्यः स्वधा नमः ॥ ७३ ॥

यमाय पितृमते स्वधा नमः ॥ ७४ ॥

एतत्ते प्रततामह स्वधा ये च त्वामनु ॥ ७५ ॥

एतत्ते ततामह स्वधा ये च त्वामनु ॥ ७६ ॥

एतत्ते तत स्वधा ॥ ७७ ॥

स्वधा पितृभ्यः पृथिवीषद्भ्यः ॥ ७८ ॥

स्वधा पितृभ्यो अन्तरिक्षसद्भ्यः ॥ ७९ ॥

स्वधा पितृभ्यो दिविषद्भ्यः ॥ ८० ॥ २७ ॥

नमो वः पितर ऊर्जे नमो वः पितरो रसाय ॥ ८१ ॥
नमो वः पितरो भामाय नमो वः पितरो मन्यवे ॥ ८२ ॥
नमो वः पितरो यद्घोरं तस्मै नमो वः पितरो यत्क्रूरं तस्मै॥८३॥
नमो वः पितरो यच्छिवं तस्मै नमो वः पितरो यत्स्योनं तस्मै॥८४॥
नमो वः पितरः स्वधा वः पितरः ॥ ८५ ॥
येऽत्र पितरः पितरोऽत्र यूयं स्थ युष्मांस्तेऽनु यूयं तेषां श्रेष्ठा भूयास्थ ॥ ८६ ॥
य इह पितरो जीवा इह वयं स्म अस्मांस्तेऽनु वयं तेषां श्रेष्ठा भूयास्म ॥ ८७ ॥

आ त्वाग्न इधीमहि द्युमन्तं देवाजरम्।
यद्ध सा ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर॥८८॥
चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ ८९ ॥ २८ ॥

॥ चतुर्थोऽनुवाकः ॥

मय्यग्न आग्निमिति च, मय्यग्ने अग्निं गृह्णामि सह

समारोपयेत्, व्रतवान् स्यादतन्द्रित इति ॥ १ ॥

तत्र श्लोकाः।

ब्रह्मचर्य्याश्रमे खिन्नो गुरु-शुश्रूषणे रतः।
वेदानधीत्यानुज्ञात उच्यते गुरुणाश्रमी ॥ १ ॥
दारमाहृत्य सदृशमग्निमादाय शक्तितः।
ब्राह्मीमिष्टिं यजेतासामहोरात्राणि निर्वपेत् ॥२॥
संविभज्य सुतानर्थैर्ग्राम्यकामान् विसृज्य च।
चरेत वनचर्य्येण शुचौ देशे परिभ्रमन् ॥ ३ ॥

क्षत्रेण वर्चसा बलेन मयि प्रजां मय्यायुर्दधामि स्वाहा इति मन्त्रेण अथो अग्नीन् 'समारोपयेत्' आत्माग्नौ निवेशयेत् समारोपणेन व्रतवान् 'स्यात्' भवेत्, 'तन्द्रा' आलस्यं, तद्रहितोऽतन्द्रितः। 'इति' अर्थसमाप्तौ।

मन्त्राणां सम्मतिमाह, तत्रेति। प्रथममाश्रमक्रमेण ब्रह्मचारि-गृहस्थ-वाणप्रस्थ-लक्षणद्वारा सन्न्यासपीठिकामाह। ब्रह्मेति। वेदं वेदौ वेदान् वेत्येकशेषः, अधीत्य स्थितः सन् गुरुणा अनुज्ञातः सन् दाराग्नीन् परिगृह्य 'आश्रमी' गृहस्थ इत्युच्यते। शक्तित इति। अग्निष्टोमादि-संस्कारान् सम्पाद्येति शेषः। स आश्रमी सन्न्यासविधये 'ब्राह्मीं' पूर्वोक्ताम् इष्टिं 'यजेत्' कुर्य्यात्, 'तासां' देवतानां प्रीतये 'अहोरात्रेण निर्वपेत्' अहोरात्रमुपोष्य ततो निर्वपेत्; इदं हि द्व्यहसाध्यं कर्म, तत्र च जागरणादिकं कुर्य्यात्। संविभज्येति 'सुतान्' पुत्रान् अर्थैः 'संविभज्य' विभक्तधनान् कृत्वा 'ग्राम्यकामान्' स्त्रीसङ्गादीन् विसृज्य चरेत, 'वनचर्य्येण' वनमार्गेणेति क्वचित्पाठः,

वायुभक्ष्योऽम्बुभक्ष्यो वा विहिता नोत्तरः फलैः ।
स्वशरीरे समारोपः पृथिव्यां नाश्रुपातकाः ॥ ४ ॥
सह तेनैव पुरुषः कथं सन्न्यस्त उच्यते ।
सनामधेयस्तु स किं यस्मिन् सन्न्यस्त उच्यते ॥५॥

वनचर्य्यया 'चरेत' चरेत् विचरेत् । साग्निकश्चेत् द्वादशरात्रीः पयसा होमभक्षी वनेऽभिनिवर्त्त्य ततो प्राजापत्येष्टिं कृत्वा समारोप्य चरेदिति द्रष्टव्यम् । 'शुचौ' पवित्रे 'देशे' तीर्थादौ, परिभ्रमतीति परिभ्रमः सन् तस्मिन् काले वायुमात्राहारोऽम्बुमात्राहारो वा भवेत् । "भिक्षार्थं प्रविशेद् ग्रामम्" इत्यादि पक्षस्य दीक्षाविषयत्वादस्य चाद्यापि दीक्षामुपेयादिति वक्ष्यमाणत्वेन दीक्षाया अकृतत्वात् ; 'फलैः' वृक्षादिभवैः विहितम् 'अनस्य' प्राणस्य उत्तरं येन प्राणेन, उत्तरं किं मे दास्यसीति, तत्र फलदानमेवोत्तरं विदधातीति विहितानोत्तरः फलैः शक्तितारतम्येन पक्षत्रय-परिग्रहः । विविधानोत्तरफलैरिति पाठे 'उत्तरफलैः' स्वर्गादिभिः न 'विविधाः' विशेषेण विधत्ते करोति प्रयत्नं, विविधाः, उत्तरफलोद्देशेन प्रयत्नमकुर्वन् ।

अग्निमुपसमाधायेत्युक्तं, तस्याग्नेः का प्रतिपत्तिः ? इत्यत आह, स्वशरीरे समारोप इति । 'स्वशरीरे' स्वदेहे कोष्ठाग्नौ वाह्याग्नीनां समारोपः, यतः परमहंस-दीक्षायामुदराग्नौ लोकाग्नीनां परमहंसोपनिषदि समारोपो विहितः । पृथिव्यां नाश्रुपातका इति । पुत्रादयो भूमौ नाश्रु पातयन्ति ।

नन्वजरामरं वा एतत् सत्रमिति श्रुतेः कथमग्नेः परित्यागः ? इत्यत आह, सह तेनैवेति । 'तेन' अग्निना सहैव वर्त्तमानः पुरुषः कथं 'सन्न्यस्तः' कृतसन्न्यास उच्यते नैवोच्यते इत्यर्थः ।

तस्मात् फलविशुद्धाङ्गी सन्न्यासं सहतेऽर्चिमान्।
अग्निवर्णं निष्क्रामति वानप्रस्थं प्रपद्यते॥ ६॥
लोकाङ्गाख्यया सहितो वनं गच्छति संयतः।

ननु तर्हि कथमग्निशब्दमेवाभिचिन्तयेदिति ओङ्काराग्नौ ध्येये अपरित्यक्ते सन्न्यासोऽग्नित्वाविशेषादत आह, सनामधेयस्त्विति। 'यस्मिन्' प्रणवाग्नौ सति पुमान् सन्न्यस्त उच्यते स प्रणवाग्निः किं सनामधेयः? नैव नामधेयवान्, यथा आहवनीयादि-शब्दवाच्योऽग्निः, नैवमसौ शब्दवाच्यः प्रणवाग्नेर्ब्रह्मार्थकत्वात् ब्रह्मप्रतीकत्वाद्वा ब्रह्मातिरिक्तं नाभिमतं ब्रह्म च न शब्दवाच्यं; तेन सन्न्यासे तस्य त्यागो न भवतीत्यर्थः।

ननु स्वरूपेण तस्य दृश्यान्तर्भूतत्वात् कथं न सन्न्यासविरोधित्वम्? इति शङ्कामुपसंहार-व्याजेन परिहरति, तस्मादिति। 'फलविशुद्धाङ्गी' फलेन ब्रह्माख्येन विशुद्धः संसारातीतो योऽङ्गी संसारातीत-फलप्रदो यः प्रधानमोङ्कारः, 'अर्चिमान्' अर्चिष्मान् अग्निः, स सन्न्यासविरोधी न भवतीत्यर्थः।

ननु तथापि अग्निहोत्रादि-साधितस्य तल्लोक-प्राप्ति हेतुभूतस्य सुकृताख्यस्य तेजसः क्व प्रतिपत्तिः? न हि तत् सुकृतं सन्न्यासिनि तिष्ठति, तल्लोकप्राप्ति-लक्षण-फलाभावादत आह, अग्निवर्णमिति। अग्नेर्वर्ण इव वर्णो यस्य तत् 'अग्निवर्णं' सुकृतं तेजः सन्न्यासिनः 'निष्क्रामति' निर्यााति; क्व याति? स्वाव्यवहितं वानप्रस्थं प्रपद्यते, सन्न्यासाधिकारिणोऽकृतसन्न्यासस्य ये लोकास्ते सन्न्यासे सति वानप्रस्थस्य भवन्तीत्यर्थः 'सुकृतमप्यस्य स्वजना [illegible]ना उपजीवन्ति' इति श्रुत्युक्तेः; अत्रापि सन्न्यासि[illegible]ग्निमत्त्वस्येति बोद्धव्यम्।

ननु वानप्रस्थोऽपि मुक्तिफलभाक् कस्मान्न भवति? इत्यत

त्यक्त्वा कामान् सन्न्यस्यति भयं किमनुतिष्ठति ॥७॥
किं वा दुःखं समुद्दिश्य भोगांस्त्यजति सुस्थितान् ।
गर्भवास-भयाद्भीतः शीतोष्णाभ्यां तथैव च ॥ ८ ॥
गुहां प्रवेष्टुमिच्छामि परं पदमनामयम् ॥ ९ ॥ २ ॥

आह, लोकादिति। वानप्रस्थः प्रकरणाल्लभ्यते, वानप्रस्थः संयतोऽपि 'लोकात्' ग्रामादिभ्यः भार्य्यया सहितो वनं गच्छति, भार्य्यया सहित इत्युच्चैः पठनीयम्; यतो भार्य्यया सहितस्ततः कृतसंयमोऽपि लोकानेव गच्छति, न तु स्वस्थो भवतीत्यर्थः। लोकानित्येव क्वचित्पाठः।

इदानीं मध्यस्थः सन्न्यासफलं जिज्ञासुः पृच्छति, त्यक्त्वेति। 'कामान्' विषयान् त्यक्त्वा सन्न्यस्यति, पुरुषः संसारे किं भयं 'अनुपश्यति' आलोचयति, 'वा' अथवा किं दुःखं 'समुद्दिश्य' हेयत्वेन मनसि निश्चित्य 'सुस्थितान्' सम्यक् स्थितान् भोगान् त्यजति श्रुतिः। तस्योत्तरत्वेन सन्न्यास-प्रयोजनमाह, गर्भेति। संसारे यद्यपि पुण्यातिशयं करोति, तेन नरकं न प्रतिपद्यते; तथापि क्षीणे पुण्ये अवतरणमावश्यकमिति गर्भवासभयं परिहर्त्तुमशक्यम्: तेन ततो भीतः। तथा शरीरिणः पुण्यवतोऽपि शीतोष्णादि-द्वन्द्व-दुःखमपरिहार्य्य-मित्याह, शीतेति। भीतः सन्निति हेतोः सन्न्यस्यति इति किम् अनामयं यत्परं पदं तदेव 'गुहां' संवृतस्थानं ब्रह्माख्यं प्रवेष्टुमिच्छामीति हेतोः सन्न्यासकाले त्यक्त्वेति मन्त्रो गुरुणा पठनीयः प्रश्नरूपेण गर्भेत्यादि शिष्येणेति विधिरूहनीयः। त्यक्त्वेति मन्त्रे सर्वत्र प्रथमपुरुषस्थाने मध्यमो द्रष्टव्यः।

इति सन्न्यस्याग्निमपुनरावर्त्तनं मन्युर्जाया मावहदिति। अथाध्यात्ममन्त्रान् जपन् दीक्षामुपेयात्। काषायवासाः कक्षोपस्थ-लोमयुतः स्यादिति। ऊर्द्ध्वको बाहुर्विमुक्तमार्गो भवत्य-

---

सन्न्यास्य पुनरङ्गीकारे दोषमाह, इति सन्न्यस्येति। अग्निं सन्न्यस्य 'अपुनरावर्त्तनं' पुनः परिग्रहो न कर्त्तव्यः। कस्मादिति शङ्कायां स्त्रियोऽभावादित्युत्तरिते सापि कस्मान्नाङ्गीक्रियते इत्याशङ्क्याह, मन्युरिति। मन्युनामा रुद्रगणो 'जाया' सन्न्यासिपत्नीम् 'आवहन्' गृहीतवान् इति हेतोः सन्न्यासिभार्य्यायां मन्योरधिकार इत्यस्मादेव वाक्यादवसीयते; अयं सन्न्यासत्यागरूपो न तु दीक्षारूपः, तस्मिन् सति निषिद्धत्वात् पुनरङ्गीकारशङ्काभावात्।

तर्हि अग्निशुश्रूषाद्यभावे किं तस्य कार्य्यम्? अत आह, अध्यात्ममन्त्रानिति। एतावन्तं कालं त्याग आसीत् न तु दीक्षारूपः सन्न्यासः इति; तामाह, दीक्षामुपेयादिति। दिव्यं भावं ददाति, क्षीयन्तेऽस्य दोषा इति 'दीक्षा' व्रतविशेषः; तदुक्तम्,

"ज्ञानं दिव्यं यतो दद्यात् कुर्य्यात् पापक्षयं लघु।
तस्माद्दीक्षेति सा प्रोक्ता देशिकैस्तत्त्ववेदिभिः"॥ इति।

ताम् 'उपेयात्' गृह्णीयात् गृहीत्वा पालयेदिति भावः। काषायेति। कषायेण रक्तं 'काषायं' वासो यस्य तादृशः स्यात्।
"कषायो रसभेदे स्यादङ्गरागे विलेपने।
निर्य्यासे च कषायोऽपि सुरभौ लोहितेऽन्यवत्"॥ इति विश्वः॥

कक्षोपस्थलोमानि वर्जयेदिति, अन्यानि वापयेदित्यर्थात्।

नयैव चेद्भिक्षाशनं दद्यात्, पवित्रं धारयेज्जन्तु-संरक्षणार्थम् ॥ ३ ॥

तत्र श्लोकाः ।

कुण्डिकाञ्चमसं शिक्यं त्रिविष्टपमुपानहौ ।
शीतोष्णघातिनीं कन्थां कौपीनाच्छादनन्तथा ॥१॥

ऊर्द्ध्वं को बाहुरिति । ऊर्द्ध्वो बाहुः कर्त्तव्यः । न मे कश्चित् प्रतिबन्धोऽस्तीति भावेन तदेव फलाभिधान-द्वारेण स्पष्टयति, विमुक्तेति। अनयैव चेद्वृत्त्या तिष्ठति, तर्हि 'विमुक्तः' अप्रतिबन्ध मार्गो यस्य तादृशो भवति, कुत्रापि तस्य प्रतिबन्धो न भवतीत्यर्थः । अनिकेतश्चरेदिति पाठे स्पष्टोऽर्थः ।

परिग्रहविशेषानाह, भिक्षाशनं दद्यादिति । भिक्षा अश्यते भुज्यते अनेनेति 'भिक्षाशनं' भोजनपात्रं 'दद्यात्' गृह्णीयात् 'पवित्रं' चामरादिपिच्छं मशकादि-निवारणार्थं, वस्त्रखण्डं वा जलजन्तुनिवारणार्थम् । श्लोकोक्तानामुपलक्षणमेतत् । 'कुण्डिकां' भिक्षाटन-पात्रं 'चमसः' काष्ठमयः पात्रविशेषः 'शिक्यम्' रज्जुमयम् अन्तरिक्षे भाण्डधारणार्थं मञ्च 'त्रिविष्टपं' त्रिविष्टपः अन्योऽन्याश्रयं काष्ठत्रयम् 'अनामयं' मज्जनभग्नं, उपानहाविति पाठे 'उपानहौ' पादत्राणे, कौपीनाच्छादनमिति, कूपं प्रवेशनमर्हतीति कौपीनं पुंलिङ्गं, तद्धि गुह्यत्वात् प्रकाशयितुमयोग्यमिति कूपे प्रवेशनमेवार्हति ; स्त्रीयोनिर्वा कूपः, तस्मिन् हि बहवो मग्ना न पुनरुन्मज्जन्ति, तमर्हतीति कौपीनं, शालीन-कौपीने अधृष्टाकार्य्ययोरिति निपातनात् साधुः, तस्याच्छादनं वासःखण्डः तच्च दद्यात्,

पवित्रं स्नानशाटीञ्च उत्तरासङ्गं त्रिदण्डकम्।
अतोऽतिरिक्तं यत्किञ्चित् सर्वं तद्वर्जयेद् यतिः ॥२॥
नदीपुलिन-शायी स्याद्देवागारेषु वाह्यतः।
नात्यर्थं सुख-दुःखाभ्यां शरीरमुपतापयेत् ॥ ३ ॥
स्नानं दानं तथा शौचमद्भिः पूताभिराचरेत्।
स्तूयमानो न तुष्येत निन्दितो न शपेत् परान् ॥४॥
भिक्षादि वैदलं पात्रं स्नानद्रव्यमुदाहृतम्।
एतां वृत्तिमुपासीना घातयन्तीन्द्रियाणि ते ॥ ५ ॥

विद्याया मनसि संयोगो मनसाकाशस्याका-

'पवित्रं' पूयतेऽनेनेति पुवः सञ्ज्ञायामिति इत्रं ; "पवित्रं घर्षणे कुशे। पवित्रं ताम्र-पयसोर्मध्ये चापि तदन्यवत्" इति विश्वः। इह तु जलपात्रं जलशोधन-वस्त्रखण्डं पिच्छं वा गृह्यते। नदीपुलिनादन्यत्र चेद्वर्षं व्याघ्रादि-भयात् सुप्यात् तर्हि देवागारेषु न पुनर्जनकृत् संस्थानके गृहादौ। नात्यर्थमिति। सुखार्थं दुःखपरिहारार्थञ्च नात्यन्तं यत्नः कर्त्तव्यः, नापि बलाद्दुःखं जनयेत्। 'दानं' तर्पणादि ; ध्यानमिति पाठे ध्यानसाधनमाचमनादि। 'परान्' निन्दकान्, भिक्षादि अवारितं न निषिद्धं यतीनां ; तथा 'वैदलं' फलाबुखण्डादि तदप्यवारितम् ; एताम् 'वृत्तिं' वर्त्तनम् 'उपासीनाः' एतस्या वृत्तेराश्रयं कुर्वाणाः ते 'इन्द्रियाणि' चक्षुरादीनि 'घातयन्ति' हिंसार्थाश्चक्षुरादयः तान् घ्नन्तीत्यर्थः।

कार्य्यकारणयोरैक्यात् ब्रह्मणो जातं ब्रह्मैवेति जीवस्यापि ब्रह्मसम्पत्तिरुपपद्यते इति दर्शयितुमाह, विद्याया इति।

शादायुर्वायोर्ज्योतिर्ज्योतिष आपोऽद्भ्यः पृथिवी पृथिव्या इत्येषां भूतानां ब्रह्म प्रपद्यते, अजरममरमक्षरमव्ययं प्रपद्यते, तदभ्यासेन प्राणापानौ संयम्य ॥

तत्र श्लोकाः ।

वृषणापानयोर्मध्ये पाणी आस्थाय संश्रयेत् ।
सन्दश्य दशनैर्जिह्वां यवमात्रे विनिर्गताम् ॥ १ ॥
माषमात्रां तथा दृष्टिं श्रोत्रे स्थाप्य तथा भुवि ।

'विद्यायाः' स्वरूपज्ञानस्य, मनोऽधिकरणं, सम्बन्धः आध्यात्मिकः ; मनसः सकाशादाकाशः सम्भूत इत्यादि योजना ; छान्दसः सन्धिः ; पृथिव्याः सकाशात्, 'इति' एवम्प्रकाराणाम् एषां 'भूतानां' शरीराणां सम्भव इति शेषः । तेन ज्ञानी 'ब्रह्म प्रपद्यते' तद्भवतीत्यर्थः ; अथवा विद्याया मनसि 'संयोगः' ब्रह्म ज्ञानस्योत्पत्तिः ; तेन मनसि ज्ञानेन लीने तत्कार्य्यं सर्वं लीनं भवतीत्यर्थः । तत्स्वरूपमाह, अजरमिति । किं कृत्वा प्रपद्यते ? 'तस्य' ब्रह्मणोऽभ्यासेन 'प्राणापानौ' वायू 'संयम्य' नियम्य निरुध्य इति पूर्वोक्तयोगानुसन्धानं कृत्वा अक्षरं प्रपद्यते इत्यन्वयः ।

अविलम्बेन सिद्धिदं श्लोकैः प्रयोगविशेषमाह, वृषणापानयोरिति 'अपानात्' पायोरूर्द्धं वृषणयोरधश्च पाणी 'आस्थाय' स्थापयित्वेत्यर्थः, संश्रयेत् प्राणायाममिति शेषः । पुनः किं कृत्वा ? 'दशनैः' दन्तैः यवमात्रे विनिर्गतां जिह्वां संदश्य संश्रयेत् प्राणायाममिति सम्बन्धः । तथा 'माषमात्रां' चक्षु-

श्रवणे नासिके न गन्धाय न त्वचं स्पर्शयेत् ॥२॥
अथ शैवं पदं यत्र तद्‌ब्रह्म तत् परायणम्।
तदभ्यासेन लभ्येत पूर्वजन्मार्जितात्मनः ॥ ३ ॥

चितां दृष्टिं 'श्रोत्रे' वृषणे 'स्थाप्य' स्थापयित्वा, श्रुगताविति शृणोतेर्गत्यर्थत्वात् वीर्य्यश्रवणरूपगत्याधारत्वेन वृषणोऽपि श्रोत्रं भवति; तथा पर्य्यायेण भ्रुवि स्थाप्य, तदुक्तममृतविन्दौ,

"तिर्य्यगूर्द्ध्वमधो दृष्टिं विनिधार्य्य महामतिः" इति।

श्रोत्रे धारणमधः, भ्रुवि धारणमूर्द्ध्वं, श्रवणे तिर्य्यगिति। तथा 'नासिके' नासाग्रे दृष्टिं स्थाप्य संश्रयेत्। नासाग्रे दृष्टिः किं? गन्धैकाग्रतया नेत्याह, न गन्धायेति। गन्धग्रहणमुपलक्षणम्। श्रवणे दृष्टिः न शब्दं श्रोतुम्। एवमधो दृष्टावपि वृषणादौ स्थितायां कामोद्भवेन स्त्रीस्मरणात् तत्स्पर्शनायाभिलाषे प्राप्ते तं निषेधति, न त्वचं स्पर्शयेत् मनसा प्रयोज्येन : पुनर्नेति वचनमुक्तार्थदार्ढ्याय, न शब्द एवार्थो वा अनेकार्थत्वान्निपातनानां नैव स्पर्शयेदित्यर्थः।

तर्हि कुत्र मनः स्थाप्यम्? इत्यत आह, अथेति। यत्र शैवं पदं 'शिवं' ब्रह्म, सदाशिवो वा शिवः, तत्सम्बन्धि 'यत्र' स्थले 'पदं' व्यवसितं निश्चयः, तत्र मनः स्थापयेदिति शेषः। "पदं व्यवसित-त्राण-स्थान-लक्ष्माङ्घ्रि-वस्तुषु" इत्यमरः। तदेवं यच्छैवं पदं तत् ब्रह्म तदेव परमयनम्। तत् कथं लभ्यते? इत्यत आह, तदिति। अभ्यासेन योगस्य; कस्य? येन पूर्वजन्मनि स्वात्मा 'अर्जितः' साधितः प्रसन्नीकृतः; तदुक्तं,

"बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" इति।

अथ तैः सम्भूतैर्वायुः संस्थाप्य हृदयं तपः ।
ऊर्ध्वं प्रपद्यते देहाद्भित्त्वा मूर्धानमव्ययम् ॥ ४ ॥ ४ ॥
अथायं मूर्धानमस्य देहैषा गतिर्गतिमतां ये प्राप्य परमां गतिं भूयस्ते न निवर्तन्ते परात् परमवस्थात् परात् परमवस्थादिति ॥ ५ ॥
इत्यथर्ववेदे सन्न्यासोपनिषत् समाप्ता ॥ १० ॥

अभ्यासे क्रियमाणे यद्भवति तदाह, अथेति । तैः 'सम्भूतैः' मिलितैः साधनैः आसन-प्राणायामादिभिः हृदयं तपः तत् प्राप्त 'हृदयं' मनः 'संस्थाप्य' स्थिरीकृत्य 'वायुः' प्राणः 'देहात्' शरीरात् ऊर्द्धम् 'अव्ययं' ब्रह्म प्रपद्यते ; किं कृत्वा ? 'मूर्द्धानं भित्त्वा' ब्रह्मरन्ध्रेण ।

पश्चात् किं स्यात् ? अत आह, अथायमिति । 'अथ' अनन्तरम् 'अयं' वायुः मूर्द्धानम् 'अस्य' असुक्षेपणे, लिप्ता 'देह' दिदेह, दिह उपचये, उपचयं गतः ब्रह्मणैकीभूतत्वात् ; द्विर्वचने छन्दसि वा वचनमिति द्वित्वाभावः । उपसंहरति, एषा गतिर्गतिमतामिति । गतिमताम् एषा गतिः, अतः परा गतिर्नास्ति, गतेरयमवधिरित्यर्थः । पाठान्तरं दुर्योज्यम् ।

ननु ये मुक्तास्तेऽपीश्वरेच्छया पुनरुत्पत्स्यन्ते इति साधनवैयर्थ्यमित्याशङ्क्य परिहरति, य इति । 'ये' पुरुषाः परमाकृतिं प्राप्य वर्त्तन्ते, 'ते' पुरुषाः भूयो न निवर्त्तन्ते ; कस्मात् ? इत्यत आह, परात्परमवस्थादिति 'परादपि' हिरण्यगर्भादेः यत् 'परं' स्थानं तत् प्राप्य 'अवस्थात्' अवस्थानात् इति, अवस्थानम् अवस्थम्, सुपिस्थ इत्यत्र सुपीति योगविभागात् कः ; नियतिरेषा परमेश्वरस्य, यः स्वतो व्यवस्थितः, तं यदा व्यवस्थितं करोति

आरुणेयोपनिषत् ।

ओँ आरुणिः प्रजापतेर्लोकं जगाम, तं गत्वोवाच, केन भगवन् कर्माण्यशेषतो विसृजामीति । तꣳहोवाच प्रजापतिस्तव पुत्रान् भ्रातॄन् बन्ध्वादीन्

तदा पुनस्तमेव न व्यवदधातीति सत्यप्रतिज्ञत्वात् दत्तापहारा-कारित्वात् मुक्तस्योन्मज्जनं नास्तीति भावः । द्विरुक्तिः समाप्त्यर्था ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्ट-पदवाक्यानां सन्न्यासस्य प्रदीपिका ॥

इति सन्न्यासोपनिषदो दीपिका समाप्ता ।

आरुणेयी पञ्चविंशी खण्डपञ्चकमण्डिता ।
प्रतिखण्डं द्विरुक्तिश्च खण्डा वसति सूचिका ॥१॥

त्रिदण्डी सन्न्यास उक्तः ; इदानीं सर्वपरित्यागरूपं परमहंस-सन्न्यासमुपदेष्टुमारुण्युपनिषदारभ्यते, आरुणिरिति । आख्यायिका विद्या स्तुत्यर्था । विद्वत्-सन्न्यासोऽस्या विषयः ; विष्णुपद-दर्शनं प्रयोजनम् ; विद्वान् निविद्वत्सुरधिकारी ; यथायोगं सम्बन्ध ऊह्यः । अरुणस्यापत्यमारुणिः, 'प्रजापतेः' ब्रह्मणः, 'केन' उपायेन, 'भगवन्' ।

"ऐश्वर्य्यस्य समग्रस्य धर्म्मस्य यशसः श्रियः ।
ज्ञान-वैराग्ययोश्चैव षण्णां भग इतीरणा" ॥

तद्वत् ; एतेन प्रश्नार्हता उक्ता ; 'कर्म्माणि' संसृति-निमित्तानि ; 'इति प्रश्न-समाप्तौ ; तꣳहोवाच प्रजापतिरिति श्रुतेः वचः प्रजापतेर्वच', तवेत्यादि । 'तव' त्वत्सम्बन्धिनः त्वदीयान्

शिखां यज्ञोपवीतञ्च यागञ्च सूत्रञ्च स्वाध्यायञ्च भूर्लोक-भुवर्लोक-स्वर्लोक-महर्लोक-जनलोक-तपोलोक-सत्यलोकञ्च, अतल-पाताल-वितल-सुतल-रसातल-महातल-तलातलं ब्रह्माण्डञ्च विसृजेत्, दण्डमाच्छादनञ्च कौपीनञ्च परिग्रहेत्, शेषं विसृजेत् शेषं विसृजेदिति ॥ १ ॥

ममत्वालम्बनात् 'बन्ध्वादीन्' बन्धवो बान्धवा ज्ञातयः उपकारिणश्च, आदिशब्देन भार्य्यादयः, तान् 'सूत्रं' योगप्रतिपादको ग्रन्थः, 'स्वाध्यायः' वेदराशिः, तदन्ता अष्टौ द्वितीयान्ताः; यज्ञोपवीतयाग-सूत्र-स्वाध्यायेषु प्रत्येकं चशब्दैः तत्सम्बन्धीनि सन्ध्यादि धनादि-पुस्तकादि-षड़ङ्गादीनि गृह्यन्ते; भूर्लोकादीनां सप्तानां समाहारद्वन्द्वः, सत्यलोकं चेति चकारात् प्रकृत्यादि-समुच्चयः।

ऊर्द्ध्वलोकान् हेयत्वेनोक्त्वा अधोलोकानाह, अतलेति। अतलादीनां सप्तानां ब्रह्माण्डेन सह समाहारद्वन्द्वः; तानि च पा-नि-वि-सु रसा-महा-तला-पूर्वाणि तलानि; पाताले तलशब्दस्य दीर्घः; नितलं महातलमप्याहुः। पाताल-रसातल-नितल-तलातल सुतल-वितलानि पादतल-तदग्र-गुल्फ-जङ्घा-जानुरु-तदूर्द्ध्वभागतयोपास्यानि, तथैव क्रमेण उत्तरोत्तराणि तथापि हेयतया अनास्थया व्युत्क्रमेण निर्दिष्टानि। ब्रह्माण्डं विराड्देहः; चकारादमद्विषयं मनोरथमपि विसृजेत्।

सर्वत्यागे कथं शरीर-यात्रा-निर्वाहः? इत्याशङ्क्य शास्त्राण्याह, दण्डमिति। गो-सर्प-निवारणार्थं दण्डं, लज्जा।शीतातप-वृष्टि-बाधा-निवारणार्थमाच्छादनञ्च, चकारात् जलपात्रञ्च

गृहस्थो ब्रह्मचारी वा वानप्रस्थो वा लौकिकाग्नीनुदराग्नौ समारोपयेत्। गायत्रीञ्च स्ववाचाग्नौ समारोपयेत्, उपवीतं शिखां भूमावप्सु वा विसृजेत्। कुटीचरो ब्रह्मचारी कुटुम्बं विसृजेत्, पात्रं विसृजेत्, पवित्रं विसृजेत्,

---

परिग्रहेत्, व्यत्ययेन शेषं परिगृह्णीयात्। देहोपयोगि चेत् ग्राह्यं, तर्हि मञ्चकोष्णीषादीन्यपि प्राप्नुवन्ति इत्यत आह, शेषं विसृजेदिति। मञ्चकोष्णीषादि प्राणात्ययेऽपि न गृह्णीयादित्यादरार्थोऽभ्यासः॥ १॥

अधिकारिणो निर्दिशति, गृहस्थ इत्यादिना। 'लौकिकाग्नीन्' लोकप्राप्ति-हेतून् श्रौत-स्मार्त्ताग्नीन् अन्त्येष्टिं कृत्वा 'उदराग्नौ' कोष्ठाग्नौ सम्यगग्ने इत्यादिमन्त्रेण निर्वाणपुरःसरं समारोपयेत्। ज्ञानिनोऽर्थे प्राप्तेऽपि त्यागे निवृत्तप्रयोजनविषयाणां प्रक्षेपवत् इयमग्न्यादीनां शास्त्रीय-प्रतिपत्तिः, 'गायत्रीं' सवितृदेवत्यां, च शब्दात् अन्यदपि मन्त्रजातं 'स्ववाचाग्नौ' स्वीया वाचा वागेवाग्निः, तत्र 'भूःसावित्रीं प्रविशामि' इत्यादिमन्त्रैः समारोपयेत्; उपवीतं शुद्धोदकालाभे भूमौ शुद्धायां, तल्लाभे शुद्धास्वप्सु वा 'भूःसमुद्रं गच्छ स्वाहा' इति मन्त्रेण विसृजेत्। वाशब्दो व्यवस्थितविकल्पे। 'कुटीचरः' कुटीचरस्त्रिदण्डी पुत्र एव भिक्षानिरतः; उपलक्षणमिदं बहूदक-हंसयोरपि; ब्रह्मचारिग्रहणं तस्य विशेषणम्, आश्रमि-ब्रह्मचारिण उक्तत्वात्, पालाशं बैल्वमित्यादिना तद्दण्डादित्यागस्य वक्ष्यमाणत्वाच्च; कुटुम्बमिति पुत्रभिक्षानिरतस्य कुटुम्बे वाससम्भवात्, 'पात्रं' भिक्षापात्रं 'पवित्रं' जलपावनवस्त्रं 'दण्डान्'

दण्डान् लोकांश्च विसृजेत्, लौकिकाग्नींश्च विसृजेदिति होवाच। अत ऊर्द्ध्वममन्त्रवदाचरेत्, ऊर्द्ध्वगमनं विसृजेत्, त्रिसन्ध्यादौ स्नानमाचरेत्, सन्धिं समाधावात्मन्याचरेत्, सर्वेषु वेदेष्वारण्यकमावर्त्तयेत्, उपनिषदमावर्त्तयेदुपनिषदमावर्त्तयेदिति ॥ २ ॥

त्रीन् वैणवान्, चात्पूर्ववस्त्रादिकमपि। लौकिकाग्नीनिति त्रिदण्डिनो वैश्वदेवाधिकारात्। लोकांश्चेति पाठे स्वतपोऽर्जितान्; तात्तदिन्धनादिकमपि प्रत्येकं विसृजेदित्यावश्यकत्वार्थमुक्तम्। 'इतिह' किल 'उवाच' उक्तवान् प्रजापतिः आरुणिम्। 'अत ऊर्द्ध्व' त्यागानन्तरममन्त्रवत् स्वाध्यायस्य विसृष्टत्वादाचरेत् स्नानाचमनादिकम्।

नन्वमन्त्रस्य कथमूर्द्ध्वलोकाप्तिः? अत आह, ऊर्द्ध्वगमनं विसृजेदिति। भूर्लोकादेस्त्यक्तत्वात् पुनस्तद्वासनामपि त्यजेदित्यर्थः। तर्ह्याचमनादिकमपि अप्रयोजनात् त्यज्यतामित्याशङ्क्याह, त्रिसन्ध्यादाविति। तिसृणां सन्ध्यानाम् 'आदौ' प्राक्काले 'स्नानं' मौषलम्।

सन्ध्यावन्दनकाले किं कार्य्यम्? अत आह, सन्धिमिति। 'सन्धिं' सन्धानं समाधिमाश्रित्य 'आत्मनि' स्वस्मिन् परमात्मना सन्धानमभेदम् 'आचरेत्' भावयेत्। स्वाध्यायस्य परित्याग उक्तः, तस्य प्रतिप्रसवमाह, सर्वेष्विति। सर्वेष्विति निर्द्धारणे सप्तमी, 'आवर्त्तयेत्' पाठतोऽर्थतश्चाभ्यसेत्।

आरण्यकेषु प्रवर्ग्यादयोऽपि कर्ममन्त्रा दृश्यन्ते, किं तस्य-

खल्वहं ब्रह्मसूचनात् सूत्रं ब्रह्म सूत्रमहमेव विद्वान् विवृत्सूत्रं त्यजेद्विद्वान्, य एवं वेद।

हितस्यावृत्तिर्नेत्याह, उपनिषदमिति। ज्ञानप्रतिपादकं भाग-मभ्यस्येत्। वाक्याभ्यास आदरार्थः, सन्न्यासो ह्युपनिषदावर्त्त-नार्थः; तदनावृत्तौ ज्ञानापाटवेन पातित्यं स्यादित्या-दरः॥ २॥

तत्रापि परमामुपनिषदमावृत्त्यर्थमाह, खल्वहं ब्रह्मेति। इदं महावाक्यं, सत्यं ज्ञानमनन्तं ब्रह्म, तच्च सत्यादिवत् 'खलु' निश्चितम् 'अहम्' अहङ्कारोपलक्षितं शोधितजीवचै-तन्यं ब्रह्मैव न ततोऽन्यदितिज्ञाने सर्वानर्थनिवृत्तिः परमा-नन्दावाप्तिश्च फलम्।

ननु प्रबन्धभेदे सति कथमनर्थनिवृत्तिः? इत्याशङ्क्य सूत्र-पटन्यायेनाभेदं वक्तुं ब्रह्मणः सूत्ररूपकमाह, सूचनात् सूत्र ब्रह्मेति। तन्तुर्हि स्वात्मनैवातान-वितानभूतेनापात-रमणीयं पटं सूचयन् न तु जनयन् सूत्रं भवति, तथा ब्रह्मापि जगत्पटसूचनात् सूत्रं, कारणातिरिक्तं कार्य्यं नास्तीति ब्रह्मैव सूत्रमित्यर्थः।

ननु सूचयितुर्मायया जीवो मुह्येदेवेत्याशङ्क्य सत्यमज्ञाने इदं स्यात्, ज्ञाने त्वहमेव सूचयिता कथं मुह्येयमित्याह, सूत्रमहमेव विद्वानिति। यतो विद्वान्, अतोऽहमेव सूत्र-मित्यन्वयः, मायापतित्वेन गृहीतस्य कथं माययाभिभव इत्यर्थः। त्यागमुपसंहरति। विवृत्सूत्रं त्यजेद्विद्वानिति। स विद्वान् विवृत् सूत्रन्त्यजेदित्यन्वयः; विद्वत् सन्न्यासेनै-वोपसंहारः।

सन्न्यस्तं मया सन्न्यस्तं मया सन्न्यस्तं मया इति, त्रिःकृत्वोर्ध्वं वैणवं दण्डं कौपीनञ्च परिग्रहेत्। औषधवदशनमाचरेदौषधवदशनमाचरेत्। अभयं सर्वभूतेभ्यो मत्त इति ब्रूयात्। सर्वं प्रवर्त्तते मत्तः। सखासि मा गोपाय, ओजः सखासि, इन्द्रस्य वज्र इति। ब्रह्मचर्य्यमहिंसाञ्चापरि-

---

इदानीं सूत्रत्यागार्थं सन्न्यासप्रैषानाह, सन्न्यस्तं मया सन्न्यस्तं मया सन्न्यस्तं मयेति। त्रिः कृत्वेति पाठेनैव त्रित्वे लब्धे त्रिरितिवचनं त्रयाणामपि त्रिःपाठार्थं, तत्रायमाम्नायः, एते त्रयोऽपि प्रैषाः सव्याहृतिकास्त्रिभिर्मन्द्रमध्यमोत्तम-स्वरैरुच्चारणीयाः, लोकत्रयं श्रावयितुं त्रिरभिधानं प्रैषोच्चारणेन यत्त्यक्तं तत्पुनरभिलषन् बध्यो निन्द्यो बध्यश्चेति बोधयितुं 'सम्यक्' अपुनरादेयतया न्यस्तं सन्न्यस्तमित्यर्थः। प्रैषानन्तरं 'मत्तः' कृतप्रैषात् सर्वभूतेभ्योऽभयमस्तु। कुतोऽभयं दत्तमित्यत आह, सर्वं प्रवर्त्तते मत्त इति। मत्त एव ब्रह्मणो यतः सर्वं प्रवर्त्तते, न हि जनयितुरेव भयं युक्तम् इति भावः।

इदानीं दण्डादाने मन्त्रमाह। सखेति। त्वं 'सखा' अबन्धकोऽसि 'मा' मां गोसर्पादिभ्यो गोपाय, ओजोनाम शुक्रस्य परिणामो धातूनामष्टमी दशा तत्फलं तेजः शरीरशक्तिः, सखेति यत् त्वं सखा इष्टे कर्म्मणि 'असि' भवसि, 'इन्द्रस्य' परमेश्वरस्य 'वज्रः' अरिभयङ्करोऽसि, एतावत् प्रतीकं मन्त्रस्य शाखान्तरे सम्पूर्णं पठितम्। 'इन्द्रस्य वज्रोऽग्निर्वार्त्रघ्नः

ग्रहञ्च सत्यञ्च यत्नेन हे रक्षत, हे रक्षत, हे रक्षत ॥ ३ ॥

अथातः परमहंस-परिव्राजकानामासन-शय-

शर्म्म मे भव यत्पापं तन्निवारय इति' इतिशब्द इन्द्रस्य वज्रोऽग्निरिति मन्त्र-प्रतीकार्थः। त्रिःकृत्वोद्ध' वैणवं दण्डमित्यनेन मन्त्रेण वैणवं दण्डम् 'ऊर्द्ध्वम्' उपरि दक्षिणकरे निधायेत्यर्थः, अत एव सन्न्यासोपनिषद्युद्ध' गोपायुरिति दण्डविशेषणम् : कौपीनं लज्जाहेतुत्वात्, कूप प्रवेशनमर्हति कौपीनं पुल्लिङ्ग, तन्मात्राच्छादकत्वाद्-यतिवासोऽपि : कौपीन शालीने अधृष्टाकार्य्ययोरिति साधुः, तदपि परिग्रहेत्। औषधवत् प्रीतिं विना शरीरस्थित्यर्थम् 'अशनं' भोजनमाचरेत् ; अभ्यासस्त्वादरार्थः, सर्वथा रसासक्तिं न कुर्य्यात्, त्यागवैयर्थ्यादित्यादरः ॥ ३ ॥

इदानीं यदभावे महापातकिवत् पातित्यं, तानि पञ्चावश्यकान्याह, ब्रह्मचर्य्यमिति। युवतीनां स्मरण-कीर्त्तन केलिप्रेक्षण-गुह्यभाषण-सङ्कल्पाध्यवसाय-क्रिया-निर्वृति-वर्जनं ब्रह्मचर्य्यम् ; अहिंसा च मनो-वाक्-काय-कर्म्मभिर्भूतानिष्टवर्जनम् ; 'अपरिग्रहम्' उक्तपरिग्रह-व्यतिरिक्तवर्जनम् ; सत्यं प्रियहितप्रमाणं दृष्टार्थवचनम् ; द्वौ चशब्दावुक्त-समुच्चयार्थौ ; तृतीयोऽनुक्तास्तेय-समुच्चयार्थः ; एतानि पञ्च यत्नेन हे यतयो रक्षत रक्षत, पुनरेव द्वयोः प्लुतः, तृतीये पर्य्याये हे रक्षतेति प्लुतिरुच्चैः श्रुत्यर्था, सर्वानुच्चैः आवयति प्रजापतिः : विरक्तिरादरार्था ; प्राणात्ययेऽप्येतानि न परित्याज्यानीति ; इतिशब्द उपदेशसमाप्त्यर्थः ; हे शब्द ७अ-उक्ताभिमुखीकरणे, हे मुमुक्षवो ब्रह्मचर्य्यादीनि 'रक्षत' [illegible]नित्यर्थः।

नाभ्यां भूमौ। ब्रह्मचारिणां मृत्पात्रं वालाबु-पात्रं दारुपात्रं वा। काम-क्रोध-लोभ-मोह-

---

इदानीं ब्रह्मचर्य्यादि पञ्चकस्थैर्य्यादि परमहंसधर्म्मं पुन-र्विशेषेणाह, अथातः परमहंस-परिव्राजकानामिति। धर्म्मा वक्ष्यन्त इति शेषः। 'अथ' प्रैषोच्चारण-दण्डग्रहणानन्तरं यतो ब्रह्मचर्य्यादिरक्षणं विना न सिद्धिरतो धर्म्मा वक्ष्यन्ते; केषां? 'परं' केवलम् अहं सः न ततोऽन्योऽहमिति निश्चिताः परम-हंसाः, परिव्रजन्ति गृहबन्धं परित्यज्य परिव्राजकाः, ते च ते च तेषाम्, आसन-शयनाभ्यां भूमाविति, भूमावेवासनेन दिवा, शयनेन रात्रौ कालं नयेदिति शेषः; 'आसनं' स्वरूपावस्थानं, 'शयनं' वाह्यविषय-विस्मृतिः, तदुक्तं,

"यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" इति। तेन पर्य्यङ्कादि-परित्यागेऽपि स्वरूपविस्मृतौ विषयचिन्तनेन चाकृतार्थ एवेति भावः। ब्रह्मचारिणामिति। तेषामेव विशे-षणम्, उपलक्षणमेतत्, अहिंसासत्यास्तेयापरिग्रहवतामित्यपि ज्ञेयम्।

उदकव्यवहारार्थं पात्राण्याह, मृत्पात्रं वालाबुपात्रं दारु-पात्रं चेति। 'अलावुः' तुम्बीफलम्, अशनपात्रन्तु वक्ष्यति, पाणिपात्रश्चेति; वा शब्दोऽनास्थायां यथालाभम् तैजसानि पात्राणि स्युरिति न तव पुत्रानित्यादिना वाह्यानि त्याज्यानि उक्तानि, वैणवं दण्डमित्यादिना वाह्यानि ग्राह्याणि, खल्वहं ब्रह्मत्यादिनान्तरं ग्राह्यमुक्तं; सम्प्रत्यान्तराणि त्याज्यान्याह, काम-क्रोधेत्यादिना। 'कामः' मैथुनेच्छा विषयमात्राभिलाषो वा; 'क्रोधः' कामाविघातेजः कामानुजः प्रज्वलनात्मकः; 'लोभः' उपात्तस्यातितिक्षा; 'मोहः' नित्याशुचिदुःखात्मनि

दम्भ-दर्पासूया-ममत्वाहङ्कारानृतादीन् परित्यजेत्, वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी यतिश्चरेत्, द्वावेव वा चरेत् द्वावेव वा चरेदिति ॥४॥

शरीरे नित्यशुचि-सुखात्मबुद्धिः ; 'दम्भः' धर्मध्वजित्वं ; 'दर्पः' गर्वः परावज्ञानेन स्वात्मन्यधिकबुद्धिः ; 'असूया' परोत्कर्षासहिष्णुता ; 'ममत्वं' परस्मिन् स्वसम्बन्धित्वबुद्धिः ; 'अहङ्कारः' जाति गुण-कर्म्माभिमानः ; 'अनृतम्' अप्रियाहिताप्रमाणदृष्टार्थवचनम् ; आदिशब्देन हर्ष-शोकादि-द्वन्द्वानि गृह्यन्ते। कामादीनां नवानां द्वन्द्वः तत आदिशब्देन बहुब्रीहिः ; तानि परित्यजेत् न पुनः स्मरेत्।

परिव्राजक-सञ्ज्ञया परितो व्रजनकर्त्तृत्वे प्राप्ते तदपवादमाह, वर्षासु ध्रुवशील इति। अग्नेऽष्टावित्युक्तेः पञ्चचतुःपक्षे चत्वारो मासा वर्षाः, तासु ध्रुवं शीलमस्य, ध्रुव इत्येव सिद्धे शीलग्रहणं कीटाकुलायां भूमौ सर्वथाटननिषेधार्थम् ; शेषेष्वर्थसिद्धमटनमित्यनुजानाति, अष्टौ मासानेकाकी यतिश्चरेदिति।

"बहूनां कलहो यस्मात् द्वयोर्वार्त्ता भवेद्यतः।
एक एव चरेद्विद्वान् कुमार्य्या इव कङ्कणम्" ॥ इत्युक्तेः।

समानशीलत्वे द्वितीयमनुजानाति, द्वावेव वा चरेदिति। अध्यात्म-कथारस-व्यसने तु द्वावेव मिलित्वा चरेत्। चरतामिति वक्तव्ये चरेदित्युक्तिरेकचित्ततामावेदयितुम् ; वा शब्दोऽनास्थायाम्। एकचित्तता दशानामपि जायते पाण्डवानां सहाटस्मरणात्। एवकारो भिन्नशीलव्यावृत्त्यर्थः। वाक्याभ्यास आदरार्थः ॥ ४ ॥

खलु वेदार्थं यो विद्वान् सोपनयनादूर्द्ध्वमेतानि प्राग्वा त्यजेत्, पितरं पुत्रमग्न्युपवीतं कर्म कलत्रञ्चान्यदपीह। यतयो हि भिक्षार्थं ग्रामं प्रविशन्त्युदरपात्रं पाणिपात्रं वा। ओं हि ओं हि ओं हीत्येतदुपनिषदं विन्यसेत्, खल्वेतदुप-

सन्न्यासे यथा आश्रम-क्रमनियमो नास्ति, तथा उपनयनस्यापि नास्तीत्याह, खलु वेदार्थमित्यादिना। वेदार्थं विद्वानिति न लोकेति षष्ठीनिषेधः; सोपनयनादिति सन्धिरार्षः; 'तानि' पूर्वोक्तानि, एतानीति पाठे वक्ष्यमाणानि, प्राग्वा त्यजेदिति, यस्तु प्राग्भवीयानन्त-सुकृत-वशादुपनयनमन्तरेणापि केनचिन्निमित्तेन विज्ञातवेदार्थः, स उपनयनात् पूर्वमपि त्यजेत्, तथा स्मर्य्यन्ते हि भरतैतरेयक-दुर्वासो-व्यास-शुकादयः, प्राक् त्यागपक्षे यानि बाल्येन दुस्त्याज्यानि, पितरं त्यजेत्, पुत्रं यतिपिता त्यजेत्, अग्न्याद्युपवीतं विषयं; च शब्देन समुच्चितं सामान्येनाह, अन्यदपीहेति। 'अन्यत्' गृहक्षेत्रादिकम्, अपिशब्दात् यद्यस्य स्वभावप्रियं तदपि त्यजेत्।

यतेर्ग्रामवासश्च कर्त्तव्य इत्याह, यतयो हीति। विशेषविधिः शेषनिषेधफलः ब्राह्मणैः प्रवेष्टव्यमिति वत्; तेन अन्यदग्रामं न प्रविशन्तीत्यर्थः। जलपात्रवद्भिक्षापात्रं न सङ्ग्राह्यमित्याह, पाणीति। पाणिपात्रमुदरपात्रञ्चेति कर्म्मधारयौ 'पाणिः' अञ्जलिः पाणिर्वा पात्रम्, उदरं ग्रासार्थं मुखप्रसारणेन पात्रं, वा शब्दोऽनास्थायाम्; तेन भूम्यादिकमपि भिक्षादौ।

जप्यं मन्त्रमाह ओं हीति। मन्त्रार्थस्तु 'हि' निश्चितं

निषदं विद्वान् य एवं वेद, पालाशं बैल्वमाश्वत्थं दण्डमजिनं मेखलां यज्ञोपवीतञ्च त्यक्त्वा शूरो य एवं वेद। तद्विष्णोः परमं पदं सदा पश्यन्ति

सर्वम् 'ओं' परमात्मैव; त्रिरावृत्तिर्जपप्रकार-प्रदर्शनार्थम्, ओङ्कारस्यैव प्राधान्येऽपि हिशब्दः सन्धिव्यावृत्त्यर्थः। तस्य कल्पोक्तान् न्यासानपि कुर्य्यादित्याह, एतदुपनिषदं विन्यसेदिति। उपनिषद्-शब्दोऽकारान्तो नपुंसकम्, यद्वा, एषा चासावुपनिषच्च तां, रहस्यज्ञानमुपनिषत् उपचारात् मन्त्रोऽपि। न्यासप्रकारस्तु प्रणवकल्पादवसेयः।

उपासनफलमाह, विद्वान् य एवमिति। ब्रह्मचर्य्यादिभिर्यः 'एवं' एवङ्गुणकमोङ्कारं शब्दतोऽर्थतश्च 'वेद' विदित्वा चाभ्यस्यति, स विद्वान् भवति, यथोक्तं ब्रह्म साक्षात् करोतीत्यर्थः।

इदानीं ब्रह्मचारिणां सन्न्यासे कर्त्तव्ये पूर्वदण्डेनैव दण्डित्वनिरासार्थमाह, पालाशमित्यादि। अत्र दण्डस्य पलाशादिप्रकृतित्रयं त्रैवर्णिकाभिप्रायं, द्वयोरनधिकारेऽपि ब्राह्मणस्यैव पूर्वलाभे उत्तरग्रहण-सूचनार्थम्।

"सन्न्यासो ब्राह्मणस्योक्तो नान्यवर्णस्य कस्यचित्" इति स्मृतेः।

अजिन-मेखलयोः पूर्वमनुक्तत्वादुपादानम्। उपवीतस्य दण्डबन्धनशङ्का-निरासार्थं यज्ञोपवीतञ्चेत्युक्तम्, चकारो लौकिकाग्नि-समिद्धोमादीनां समुच्चयार्थः, 'त्यक्त्वा' परित्यज्य शूरः अन्यथानधिकारः भवेदिति शेषः; न हि त्यागमात्रेण किन्तु शूरो मनोऽरिजये स्यात्, तदुक्तं,

"न हि सन्न्यसनादेव सिद्धिं समधिगच्छति" इति।

कः शूरः? इत्यत आह, य एवं वेदेति, 'यः' विदित-

सूरयः दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदमिति, एवं निर्वाणमनुशासनमिति, वेदानुशासनमिति, वेदानुशासनमिति ॥ ५ ॥

इत्यथर्ववेदे आरुणेयोपनिषत् समाप्ता ॥ ११ ॥

वेदार्थः सन्न्यासं सत्यधिकारे कर्त्तव्यत्वेन 'वेद' जानाति, सः 'शूरः' साधकश्रेष्ठः।

उक्तसन्न्यासफलावेदकमृग्द्वयमुदाहरति, तद्विष्णोरित्यादि। सूरयो दिव्यदृष्ट्या 'तत्' मुक्तोपसृप्यं विष्णोः परमं पदं सदा पश्यन्ति। तस्य नित्यत्वात् स्वरूपे दृष्टान्तमाह दिवीति। निर्मल आकाशे 'आततं' व्याप्तं चक्षुर्यथा आवरकाभावाद्वितनं निर्विकल्पकं ज्ञानं भवति, तथा विकल्पकशून्यं चिद्घनं तदित्यर्थः।

ननु कथं तदेवं लभ्यमित्याशङ्क्य गुरूपदेशादित्याह, तद्विप्राम इति। छान्दसोऽसुक्, ब्राह्मणानामेवोपदेशाधिकार इति विप्रग्रहणेन सूचितम्; 'विपन्यवः' विमन्यवः छान्दसो वर्णव्यत्ययः, काम-क्रोधादिरहिताः, यतस्तुतौ पत्युः स्तुतिः तद्रहिताः, तुल्यनिन्दास्तुतय इति वा, 'जागृवांसः' त्यक्ताज्ञाननिद्राः, तदुक्तम्,

"या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी" इति।

'समिन्धते' सम्यक् दीपयन्ति परहिताय प्रकाशयन्ति; किं तत्? यद्विष्णोः परमं 'पदं' पदनीयं मुक्तोपसृप्यं स्थानं स्वरूपात्मकमेव, विप्रोपदेशादेव तल्लभ्यमितिभावः। इति शब्दो मन्त्रद्वयसमाप्त्यर्थः।

ब्रह्मविद्योपनिषत् ।

ओं ब्रह्मविद्यां प्रवक्ष्यामि सर्वज्ञानमनुत्तमाम् ।
यत्रोत्पत्तिं लयञ्चैव ब्रह्म-विष्णु-महेश्वरात् ॥ १ ॥

उपसंहरति, एवं निर्वाणेति वातेर्भावे क्तः, निर्वाणोऽवाते इति निष्ठानत्वं, 'निर्वाणम्' उपशान्तिर्मोक्ष इति यावत्, तस्यानुशासनमिदं द्रष्टव्यम् । ननु किमिदं प्रजापतेरनुशासनम् ? ओमिति चेत्, तथा सति पौरुषेयत्वेनाप्रामाण्य-शङ्का स्यादित्याशङ्क्याह वेदानुशासनमिति । आरुणिप्राजापत्याख्यायिका तु विद्या स्तुत्यर्थैव 'वेदस्य' शब्दराशेः सर्वज्ञस्य सर्ववर्णाश्रमादिव्यवस्थाहेतोः राजकल्पस्यानुशासनं, तदकरणे संसारशूले तस्करादेरिव विनिक्षेपः स्यात् । अभ्यासोऽन्येषामपि वेदानामेतावदर्थ-पर्य्यवसायित्वमित्येतदर्थः । इति शब्द उपनिषत्समाप्त्यर्थः ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानामारुणेय-प्रदीपिका ॥

इत्यारुणेयोपनिषदो दीपिका सम्पूर्णा ॥ ११ ॥

ओं ब्रह्मविद्योपनिषदि द्विखण्डायां त्रिदेवताः ।
स्थित्युत्पत्ति-लयाः प्रोक्ताः प्रणवस्याक्षरत्रयात् ॥ १ ॥

प्रश्ने प्रणवस्त्रिमात्राभेदेनोपास्यतयोपक्षिप्तः, तस्यावयवशः शरीर-वर्ण-स्थान-लया नोक्ता इति तदर्थं ब्रह्मविद्योपनिषदारभ्यते । ब्रह्मविद्यां प्रवक्ष्यामीति श्लोकः क्वचिदेवादौ पठ्यते । 'ब्रह्म' प्रणवः तस्य 'विद्यां' ज्ञानं, तां किम्भूतां ? सर्वेषां 'ज्ञानम्' उपायभूताम. तथा 'यत्र' विद्यायां देवत्रयात् उत्पत्तिं

प्रसादान्तःसमुत्थस्य विष्णोरद्भुतकर्म्मणः।
रहस्यं ब्रह्मविद्यायां ध्रुवाग्निः सम्प्रचक्षते ॥ २ ॥
ओमित्येकाक्षरं ब्रह्म यदुक्तं ब्रह्मवादिभिः।
शरीरं तस्य वक्ष्यामि स्थानं कालं लयं तथा ॥३॥

लयं चकारात् पालनञ्च प्रवक्ष्यामीति पूर्व्वेणान्वयः। श्रुतिः प्रतिज्ञेयम् ॥ १ ॥

प्रसादेति। विष्णोर्ब्रह्मविद्यायां रहस्यं 'ध्रुवाग्निः' प्रणवतेज इति प्रचक्षते बुधा इत्यन्वयः। विष्णुनेयं विद्या प्रवर्त्तितेत्यर्थः। कीदृशस्य ? 'प्रसादेन' भक्तकृपया 'अन्तः' अन्तरात् स्तम्भमध्यात् 'समुत्थस्य' नृसिंहरूपेण प्रकटीभूतस्य, यद्वा "प्रसादो देव-भूभुजाम्" इति कोषात् क्षीरोदार्णव-वैकुण्ठ-बलिगृहद्वारादेः प्रसादस्यान्तरात् जगद्रक्षणार्थं प्रकटीभूतस्य, यद्वा 'प्रसादः' लिङ्गाद्यपेक्षया प्रसन्नरूपो जीवः, तस्य आन्तरम् आवरणमविद्यादि, ततः 'समुत्थस्य' निष्क्रान्तस्य अविद्यावरण-रहितस्येत्यर्थः ; यथोक्तं छान्दोग्ये 'स एष प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतीरूपं सम्पद्य स्वेन रूपेणाभिसम्पद्यते, स उत्तमः पुरुषः' इति। अद्भुतकर्म्मणः मत्स्यादि-रूपेण, ओङ्कारः 'ध्रुवः' अक्षरनिर्घण्टावुक्तः ; तथाहि,

"ओङ्कारो वर्त्तुलस्तारो विन्दुः शक्तिस्त्रिदैवता।
प्रणवो मन्त्रगभश्च पञ्च देवो ध्रुवः शिवः।
मन्त्राद्यः परमं वीजं मूलमाद्यश्च तारकः।
शिवादि व्यापको व्यक्तः परं ज्योतिश्च संविदः" ; इति।

स्थानं कालं लयं तथेति। कालशब्दो मेचकवाचको व

तत्र देवास्त्रयः प्रोक्ता लोका वेदास्त्रयोऽग्नयः।
तिस्रो मात्रार्द्धमात्रा च त्र्यक्षरस्य शिवस्य च॥ ४ ॥
ऋग्वेदो गार्हपत्यश्च पृथिवी ब्रह्म एव च।
अकारस्य शरीरन्तु व्याख्यातं ब्रह्मवादिभिः॥ ५ ॥
यजुर्वेदोऽन्तरिक्षञ्च दक्षिणाग्निस्तथैव च।
विष्णुश्च भगवान् देव उकारः परिकीर्त्तितः॥ ६ ॥
सामवेदस्तथा द्यौश्चाहवनीयस्तथैव च।
ईश्वरः परमो देवो मकारः परिकीर्त्तितः॥ ७ ॥
सूर्य्यमण्डलमिवाभात्यकारः शङ्खमध्यगः।

लक्षयति, तेन वर्णं वक्ष्यामीत्यर्थः। वर्णमित्येव वक्तव्ये काल-ग्रहणं मात्रारूप-कालस्यापि सङ्ग्रहार्थमिति द्रष्टव्यम्॥२॥३॥

अवयवशः शरीरं तावदाह, तत्र देवा इति। त्र्यक्षरस्य शिवस्य चेति, 'शिवः' अर्द्धमात्रार्थः तिस्रो मात्रास्त्र्यक्षरस्य अर्द्धमात्रा शिवस्येत्यर्थः, प्रणवस्य देवादयस्त्रय उक्ताः। तिस्रो मात्रा अर्द्धमात्रा चेति वक्तव्ये छान्दसः सन्धिः। तदुक्तं हट-प्रदीपिकायाम्।

"अकारश्च उकारश्च मकारो विन्दु-सञ्ज्ञकः।
त्रिधा मात्रा स्थिता यत्र तत्परं ज्योतिरोमिति" ॥ ४ ॥

त्रय इत्युक्तं, तदेव विभजते, ऋग्वेद इत्यादिना। ब्रह्म एव चेत्यत्र छान्दसो ह्रस्वः प्रकृतिभावश्च, ब्रह्मा देव इत्यर्थः। ॥ ५—७ ॥

खण्डान्तेन ग्रन्थेन शरीरमुक्तं, सम्प्रति स्थानं वर्णसहित-

उकारश्चन्द्र-सङ्काशस्तस्य मध्ये व्यवस्थितः ॥८॥
मकारस्त्वग्नि-सङ्काशो विधूमो विद्युतोपमः ।
तिस्रो मात्रास्तथा ज्ञेयाः सोम-सूर्य्याग्नि-तेजसः ॥९॥
शिखाभा दीपसङ्काशा यस्मिन्नुपरि वर्त्तते ।
अर्द्धमात्रा तु सा ज्ञेया प्रणवस्योपरि स्थिता ॥ १० ॥
पद्मसूत्रनिभा सूक्ष्मा शिखाभा दृश्यते परा ।

माह, सूर्य्येति । सूर्य्यमण्डलमिव आभाति अकारः, 'शङ्कः' ललाटास्थि 'तन्मध्यं' नेत्रस्थानं तत्र वर्त्तमानः. योऽयं दक्षिणेऽक्षपुरुष इति श्रुतेः ।

"शङ्खो निध्यन्तरे कम्बु-ललाटास्थि-नखेषु च" इति विश्वः। 'तस्य मध्ये' शङ्खस्यैव मध्ये अर्थात् वामनेत्रे स्थितः । मकार इति । अत्रापि तस्य मध्ये इत्यपेक्षते, शङ्खस्य मध्ये अर्थात् तृतीयनेत्रे व्यवस्थितः ; अतएव याज्ञवल्क्येनोक्तम् ।

"इड़ायां पिङ्गलायाञ्च चरतश्चन्द्र-भास्करौ ।
इड़ायां चन्द्रमा ज्ञेयः पिङ्गलायां रविः स्मृतः" ॥ इति।

खेचर्य्याञ्च ।

"जिह्वामूले स्थितो देवि ! सर्वतेजोमयोऽनलः ।
तदग्रे भास्करश्चन्द्रस्तालुमध्ये प्रतिष्ठितः ।
एवं यो वेत्ति तत्त्वेन तस्य सिद्धिः प्रजायते" ॥ इति ।

'तिस्रो मात्राः' अकारादयः, अनेन काल उक्तः, सोम-सूर्य्याग्नि-तेजस इत्यनेन वर्णा उक्ताः, 'यस्मिन्' शङ्खे 'उपरि' तृतीयनेत्रादुपरि, अनेनार्द्धमात्रास्थानमुक्तम् ॥ ८—१० ॥

पद्मसूत्रेति । पद्मसूत्रनिभेति तस्या वर्ण उक्तः, 'शिखाभा'

सा नाडी सूर्य्यसङ्काशा सूर्य्यं भित्त्वा तथा परम्॥११॥
द्वासप्तति-सहस्राणि सूर्य्यं भित्त्वा तु मूर्धनि।
वरदः सर्वभूतानां सर्वं व्याप्यैव तिष्ठति॥ १२॥

ज्वालाभा ऊर्द्ध्वता-वैषद्याभ्यां, तथा मूले स्थूला उपर्य्युपरि तन्वी च।

"शिखा शिखायां ज्वालायां चूड़ायामग्रमात्रके।
लाङ्गल्याञ्चापि शाखायां चूड़ायाञ्च शिखण्डिनः"॥

इति विश्वः।

'सा नाड़ी' सुषुम्णा, तस्या एव वा पूर्वाणि विशेषणानि, 'सूर्य्यं' चक्षुरधिष्ठानम्, अथवा, सूर्य्यात् लब्धरश्मित्वान्मनोऽधिष्ठानश्चन्द्रः सूर्य्यः, तं भित्त्वा, तथापरम् अधस्कन्धे द्वासप्तति-सहस्राणि नाड़ीर्भित्त्वा ऊर्द्ध्वं गता, तदुक्तं गोरक्षेण,

"ऊर्द्ध्वं मेढ्रादधो नाभेः कन्दयोनिः खगाण्डवत्।
तत्र नाड्यः समुत्पन्नाः सहस्राणि द्विसप्ततिः"॥ इति।

पुनरधिदैवतं सूर्य्यं भित्त्वा 'मूर्द्धनि' ब्रह्मलोके द्वादशान्ते च दृश्यते इत्यनुषङ्गः। तदुक्तं याज्ञवल्क्येन,

"तासां मुख्यतमास्तिस्रस्तिसृष्वेकोत्तमोत्तमा।
मुक्तिमार्गेति सा प्रोक्ता सुषुम्णा विश्वधारिणी॥
कन्दस्था मध्यमा गार्गि! सुषुम्णा सुप्रतिष्ठिता।
पृष्ठमध्य-स्थिता नाड़ी सा हि मूर्ध्नि व्यवस्थिता॥
मुक्तिमार्गे सुषुम्णा सा ब्रह्मरन्ध्र-प्रतिष्ठिता।
अव्यक्ता सैव विज्ञेया सूक्ष्मा सा वैष्णवी स्मृता"॥ इति।

प्रणवो नादरूपेण सर्वव्याप्येवेत्याह, वरद इत्यनेन। ओङ्कारोऽनाहतशब्दो विष्णुश्चैक इत्युक्तं भवति॥ ११—१२॥

कांस्यघण्टा-निनादस्तु यथा लीयति शान्तये ।
ओङ्कारस्तु तथा योज्यः शान्तये सर्वमिच्छता ॥१३॥
यस्मिन् संलीयते शब्दस्तत्परं ब्रह्म गीयते ।
ध्रुवं हि चिन्तयेद् ब्रह्म सोऽमृतत्वाय कल्पते ॥
सोऽमृतत्वाय कल्पते ॥ १४ ॥

इति ब्रह्मविद्योपनिषत् समाप्ता ॥ १२ ॥

इदानीं लयमाह, कांस्यघण्टेति । यथा 'लीयति' लीनो भवति उपरतव्यापारो भवति, ओङ्कारस्तथा शान्तये योज्यः प्लुततरो जप्तव्य इत्यर्थः । 'सर्वं' सर्वात्मभावं ब्रह्मभावमिच्छता ॥ १३ ॥

यस्मिन् 'संलीयते' यद्वस्तु अनुभूय 'शब्दः' विषयः नोपलभ्यते विलीयते, तत्परं ब्रह्म । तदुक्तं हठप्रदीपिकायाम्,-

"काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति ।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते ॥
विसृज्य सकलं बाह्यं नादे दुग्धाम्बुवन्मनः ।
एकीभूयास्य मनसा ब्रह्माकाशे विलीयते" ॥ इति ।

लयलक्षणन्तु ।

"लयो लय इति प्राहुः, कीदृशं लयलक्षणम् ? ।
अपुनर्वासनोत्थानात् लयो विषय-विस्मृतिः" ॥ इति ।

यद्वा यतो वाचो निवर्त्तन्ते इत्यर्थः ॥ १४ ॥

...न्मिति । 'ध्रुवम्' ओङ्कारं हि ब्रह्म चिन्त-
...वा एकाग्रतया वा ब्रह्म चिन्तयेत् ।

क्षुरिकोपनिषत् ।

ओं क्षुरिकां सम्प्रवक्ष्यामि धारणां योग-सिद्धये ।
यां प्राप्य न पुनर्जन्म योगयुक्तः स जायते ॥ १ ॥
वेद-तत्त्वार्थ-विहितं यथोक्तं हि स्वयम्भुवा ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानां दीपिका ब्रह्मवेदने ॥
इति ब्रह्मविद्योपनिषदो दीपिका सम्पूर्णा ॥ १२ ॥

ओं क्षुरिका शस्त्रिका प्रोक्ता तत्तुल्या धारणा यतः ।
तद्वाचकस्त्रिखण्डोऽयं क्षुरिकाग्रन्थ उच्यते ॥ १ ॥

गुरुतः प्राप्तविद्यस्य तत एव लब्धज्ञान-प्रणव-मन्त्रस्य षडङ्गे योगेऽधिकार इति तदर्थमुत्तरो ग्रन्थः. क्षुरिकामित्यादि । 'क्षुरिकामिव' संसारोच्छित्तये शस्त्रिकामिव रूपकं, 'धारणाम्' आत्मनि चित्तावस्थानलक्षणाम्, उक्तञ्च योगियाज्ञवल्क्येन,

"शमादि-गुणयुक्तस्य मनसः स्थितिरात्मनि ।
धारणेत्युच्यते सद्भिः शास्त्रतात्पर्य्य वेदिभिः" ॥ इति ।

न पुनर्जन्म भवतीति शेषः । 'स' धारणावान् कुतश्चिदपराधाद् यदि योगभ्रष्टो भवति [illegible] जन्मान्तरे योगयुक्त एव जायते इत्यर्थः योगश्चित्तवृत्ति[illegible] ।

"तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्" इति स्मृतेः ॥१॥

वेदेति । इदं योगस्वरूपं वेदेन 'तत्त्वार्थेन' परमार्थेन 'विहितं' विधि-विषयीकृत 'स्वयम्भुवा' ब्रह्मणा 'यथोक्तं'

निःशब्दं देशमास्थाय तत्रासनमवस्थितः ॥ २ ॥
कूर्मोऽङ्गानीव संहृत्य मनो हृदि निरुध्य च ।

यथा वर्त्तते तथोक्तं न विसंवादीत्यर्थः । तथोक्तं योगियाज्ञवल्क्येन,

"वक्ष्यामि योगसर्वस्वं ब्रह्मणा कीर्त्तितं पुरा" । इति ।

"तथोक्तं परमेष्ठिना"० ० ० इति च ।

योगस्वरूपं साधयितुं षड़ङ्गान्याह, निःशब्दमिति । यदुक्तं,

"कान्तारे विजने देशे फल-मूलोदकान्विते ।

तपश्चरन् वसेन्नित्यम् ० ० ० इति ।

षड़ङ्गलक्षणान्यमृतविन्दावुक्तानि । यमादीनां पूर्वकाण्डादेव सिद्धत्वादिहानभिधानं, न तु कापालिकवदनङ्गीकारात् । यमा यथा

"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचश्चेति यमा दश" ॥

नियमा दश यथा,—

"तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्त-श्रवणञ्चैव ह्रीर्मतिश्च जपो हुतम्" ॥ इति ।

'अवस्थितः' आवस्थिक आरूढ़ः, तदुक्तं गीतासु ।

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिन-कुशोत्तरम्" ॥ इति ।

तथा तन्त्रेणासनं पद्माद्यास्थित इत्यपि बोध्यम् । तदुक्तं हठप्रदीपिकायाम् ।

"हठस्य प्रथमाङ्गत्वादासनं पूर्वमुच्यते ।
तत्कुर्य्यादासनस्थैर्य्यमारोग्यञ्चाङ्ग-पाटवम्" ॥ इति ॥२॥

मात्रा-द्वादश योगेन प्रणवेन शनैः शनैः ॥३॥
पूरयेत् सर्वमात्मानं सर्वद्वारान् निरुध्य च।
उरो-मुख-कटि-ग्रीवं किञ्चिद्धृदयमुन्नतम् ॥ ४ ॥

कूर्म्मोऽङ्गानीवेति प्रत्याहार उक्तः, अत्र इन्द्रियाणीति शेषः। तदुक्तम्,

"इन्द्रियाणां विचरतां विषयेषु स्वभावतः।
बलादाहरणं तेषां प्रत्याहारः स उच्यते" ॥ इति।

आन्तर-प्रत्याहार-सिद्धये मन इति। 'हृदि' हृत्पुण्डरीके। मात्रा इति। द्वादश मात्रा नादविन्दावुक्ताः 'घोषिणी प्रथमा मात्रा' इत्यादिना, तत्रैव द्रष्टव्याः। प्रणवेन शनैरुच्चारितेन वायुं पूरयेत्; कीदृशेन? 'मात्राः' अकारोकार मकारार्द्ध-मात्राख्यास्तस्य, तासां प्रत्येकं तिस्रस्तिस्रो मात्रा घोषिण्या-दयो भूमिपत्यादिफलाः द्वादश, तासां 'योगः' चिन्तनं यस्मिन् तेन, यदा द्वादशभिः प्रणवैः पूरणं, तदा अष्टचत्वारिंशद्भिः कुम्भन, चतुर्विंशतिभिश्च रेचनम्; यदा तु षोड़शभिः पूरणं, तदा चतुःषष्टिभिः कुम्भनं, द्वात्रिंशद्भिः रेचनम्; अष्टभिर्यदा पूरणं, तदा द्वात्रिंशद्भिः कुम्भनं, षोड़षभिः रेचनमिति विवेकः। सर्वमात्मानं न तु कतिपयाङ्गानि, रोधेनोपविशेत्, तथा सति वायुवैषम्यं स्यात्। 'सर्वद्वारान्' सर्वद्वाराणीत्यर्थः। उरो-मुख-कटि-ग्रीवमुन्नतं धारयेदिति शेषः।

तदुक्तं गीतासु,—

"समं काय-शिरो-ग्रीवं धारयन्नचलं स्थिरम्" ॥ इति।

हृदयं किञ्चिदुन्नतं धारयेत्, अनेन जालन्धरबन्धः सूचितः; स यथा,—

प्राणान् सञ्चारयेद्-योगी नासाभ्यन्तरचारिणः ।
भूत्वा तत्र गतः प्राणः शनैरथ समुत्सृजेत् ॥ ५ ॥
स्थिरमात्रा दृढं कृत्वा अङ्गुष्ठे तु समाहितः ।
द्वे तु गुल्फे तु कुर्वीत जङ्घे चैव त्रयस्त्रयः ॥६॥
द्वे जानुनि तथोरुभ्यां गुदे शिश्ने त्रयस्त्रयः ।
वायोरायतनञ्चात्र नाभिदेशे समाश्रयेत् ॥ ७ ॥

"कण्ठमाकुञ्च्य हृदये स्थापयेच्चिवुकं दृढम् ।
बन्धो जालन्धराख्योऽयममृताक्षय-कारकः" ॥ इति ॥३-४॥

सञ्चारयेत् पूरकमात्राभिः, तस्मिन् हृदये। नासेति। तेन मुखेन पूरक-रेचकौ निषिद्धौ ।

भूत्वेति। प्राणः 'तत्र' सर्वशरीरे 'गतः' प्रविष्टः भूत्वा तिष्ठतीति शेषः । एतेन कुम्भक उक्तः, स च पूरक-मात्रापेक्षया चतुर्गुणाभिर्मात्राभिः कार्य्यः। अथ रेचकमाह, शनैरिति। समुत्सर्जनञ्च पूरणापेक्षया द्विगुणाभिर्मात्राभिः ॥५॥

स्थिरेति, 'स्थिराभिः' एकरूपाभिर्मात्राभिः 'दृढं' स्थिरं प्राणं कृत्वा, केवलकुम्भकः सिद्ध इत्यर्थः। ततो धारणाभिः प्रत्याहारमभ्यस्येदित्याह, अङ्गुष्ठ इत्यादिना। अङ्गुष्ठे इत्यादौ जातावेकवचनम्, अङ्गुष्ठयोः गुल्फयोः जङ्घयोः इत्यादि बोद्धव्यम्। अङ्गुष्ठयोर्धारणे कुर्वीतेत्यन्वयः, द्वे तु धारणे कुर्य्यादित्यर्थः। त्रयस्त्रय इति। आद्यन्त-मध्येषु निरोधाः कर्त्तव्याः इति शेषः। जानुनि आद्यन्तयोः ऊरुभ्यां साधनाभ्याम् ऊर्वोरपि तथा द्वे इत्यर्थः। नाभिदेशे इति। अत्र नाभिदेशे वायोः 'आयतनं' मुख्यं स्थानमस्ति। तत्र धारणया समाश्रयेदित्यर्थः ॥ ६—७ ॥

तत्र नाड़ी सुषुम्णा तु नाड़ीभिर्बहुभिर्वृता।

तत्रेति। 'तत्र' नाभौ 'सुषुम्णा' मध्यनाड़ी 'बहुभिः' द्वासप्ततिसहस्रैः वृता ; मूलन्तु तस्याः कन्दमध्ये। कन्दस्तु—

"गुद-ध्वजान्तरे कन्दमुत्सेधाद् द्व्यङ्गुलं विदुः"। इति।

"गुद-मेढ्रान्तरे यद्वै वेणुकन्दं तदुच्यते"॥ इति च।

'वेणुः' सुषुम्णा, सा च षट्चक्रवती मूलाधार-दण्डान्त-विवरं गता मूर्द्धानं भित्त्वा ब्रह्मलोकान्तं निर्गता। तदुक्तं छान्दोग्ये, "शतञ्चैका च हृदयस्य नाड्यः, तासां मूर्धानमभिविसृतैका" इति। नाभेरूर्द्धन्तु चक्रानुक्रमेण धारणा मूर्द्धान्तं द्रष्टव्या, उक्तञ्च योगियाज्ञवल्क्येन,

"मर्मस्थानानि सिद्ध्यर्थं शरीरे योग-क्षेमयोः।
तानि सर्वाणि वक्ष्यामि यथावच्छृणु सुव्रते !॥
पादाङ्गुष्ठौ च गुल्फौ च जङ्घामध्यौ तथैव च।
चित्योर्मूलञ्च जान्वोश्च मध्ये चोरुभयस्य च॥
पायुमूलं ततः पश्चान्मध्यदेहश्च मेढ्रकम्।
नाभिश्च हृदयं गार्गि ! कण्ठकूपस्तथैव च॥
तालुमूलञ्च नासाया मूलञ्चाक्ष्णोश्च मण्डले।
भ्रुवोर्मध्यं ललाटञ्च प्रोक्तानि मुनिसत्तमैः॥
मर्मस्थानानि चैतानि" इति।

एतेषु च तत्रैव धारणोक्ता,—

"स्थानेष्वेतेषु मनसा वायुमारोप्य धारयेत्।
स्थानात् स्थानं समाकृष्य प्रत्याहारं प्रकुर्वतः।
सर्वे रोगाश्च नश्यन्ति योगाः सिध्यन्ति तस्य च"॥ इति।

अङ्गुष्ठादूर्द्ध्वमारोहे फलमिदमुक्तम् ; मूर्ध्नोऽङ्गुष्ठपर्य्यन्तावरोहेऽपि धारणानां फलमुक्तम्,—

अणुरक्ताश्च पीताश्च कृष्णास्ताम्र-विलोहिताः ॥८॥

अतिसूक्ष्माञ्च तन्वीञ्च शुक्लां नाड़ीं समाश्रयेत् ।

"स्थानात् स्थानं समाकृष्य यस्त्वेवं धारयेत् सुधीः ।

सर्वपाप-विशुद्धात्मा जीवेदाचन्द्र-तारकम्" ॥ इति ।

अणुरक्ताश्चेति । अणुरक्ताश्चेत्यादि नाड़ीनां विशेषणम् तदुक्तं छान्दोग्ये, "अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्य" इति । अणवश्च ता रक्ताश्चेति समासः ॥ ८ ॥

एवं केवल-कुम्भके सिद्धे प्राण-मनसोः स्थानविशेषेषु प्रत्याहारमभ्यस्य धारणा-सिद्धये सुषुम्णायां प्राण-मनसोः प्रवेशः कर्त्तव्यः ; तत्रोपायः, मलोड्डियाण-जालन्धर-बन्धैः शक्ति-चालनेनापानमूर्द्ध्वमाकुञ्च्य तेन देहमध्येऽग्निं प्रज्वाल्य तज्ज्वालया कुण्डलीं प्रताप्योद्बोध्य ब्रह्मनाड़ीद्वार-मध्यस्थ-तन्मुख प्रसारणेन तत्र वायु-मनो-वह्नीन् प्रवेशयेदित्याशयेमाह, अतिसूक्ष्मामिति । तत्र जालन्धर-बन्ध उक्तः ; उड्डियाणो यथा,—

"उदरे पश्चिमं तानं नाभेरूर्द्ध्वन्तु कारयेत् ।

उड्डियाणो ह्ययं बन्धो मृत्यु-मातङ्ग-केशरी" ॥ इति ।

मूलबन्धो यथा,—

"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद् गुदम् ।

अपानमूर्द्ध्वमाकृष्य मूलबन्धो निगद्यते" ॥ इति ।

शक्ति-चालनं यथा,—

"सव्यासनस्थस्य फणावती सा प्रातश्च सायं प्रहरार्द्धमात्रम् ।

प्रपूर्य्य सूर्य्यात् परिधानयुक्ता प्रदह्य नित्यं परिचालनीया" ॥

इति ।

ततः सञ्चारयेत् प्राणानूर्णनाभीव तन्तुना ॥९॥
ततो रक्तोत्पलाभासं पुरुषायतनं महत्।
दहरं पुण्डरीकेति वेदान्तेषु निगद्यते ॥ १० ॥
तद्भित्त्वा कण्ठमायाति तां नाडीं पूरयन् यतः।
।नसस्तु क्षुरं गृह्य सुतीक्ष्णं बुद्धि-निर्म्मलम् ॥ ११ ॥

अतिस्वच्छां 'तन्वीं' वालाग्रशत-सहस्रांश-भागोपमां 'नाड़ीं' सुषुम्णां 'समाश्रयेत्' अन्या नाड़ीरुत्सृज्य तत्रैव मनो रुन्ध्यादित्यर्थः। 'ततः' तयेत्यर्थः, तृतीयार्थे तसिः, तन्तुनेति प्रतियोगिनि तृतीया-श्रवणात्, सुषुम्णया प्राणान् 'सञ्चारयेत्' ऊर्द्धं नयेत्। 'ऊर्णनाभी' लूताख्या कीट-विशेषः तन्तुना यथा ऊर्द्धं सञ्चरति, तथा सञ्चारयेदित्यर्थः ॥ ९ ॥

'ततः' सञ्चारणानन्तरं तद्भित्त्वेत्यग्रतनेनान्वयः, 'तत्' पुण्डरीकं, कीदृशं ? रक्तोत्पलवदाभासं रक्तवर्णं नानावर्ण-नाड़ी-योगात् रक्तता "पुण्डरीकं सिताम्बुजे" इति कोषात् सितत्वेऽप्यौपाधिकी ज्ञेया। 'पुरुषायतनं' जीवननीड़ः 'महत्' सर्वावभासकत्वात्, 'दहरं' दभ्रं सूक्ष्मस्वरूपेण हृत्पद्मं दहराख्यमाकाशं 'वेदान्तेषु' छान्दोग्यादिषु 'निगद्यते' पठ्यते ; तद्यथा,— "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" इति ॥ १० ॥

'तत्' पुण्डरीकम् अनाहताख्यं कुण्डलिनीं मन-प्राणाभ्यांभिभित्त्वा 'कण्ठं' विशुद्धचक्र-स्थानम् अर्गलां भेत्तुमायाति जीवः, 'तां' सुषुम्णां 'पूरयन्' व्याप्नुवन् 'यतः' प्रयतः सावधानः,

पादस्योपरि मर्मृज्य तद्रूपं नाम कृन्तयेत् ।
मनोद्वारेण तीक्ष्णेन योगमाश्रित्य नित्यशः ॥१२॥

'पूरयन् दिवि' इति पाठे, दिवि इति निमित्तसप्तमी, फलमपि च निमित्तं भवति, दिवः प्राप्त्यर्थम् ऊर्द्ध्वमारोहेदित्यर्थः। मनःप्रकृतिकं क्षुरं शास्त्रनिष्णातं मन एवेत्यर्थः 'सुतीक्ष्ण' तर्कैश्च घर्षणोपलेन निघृष्टं शानस्थानीयया बुद्ध्या निर्म्मलम् ॥ ११ ॥

पादस्येति। ब्रह्मणः 'पादस्य' श्रुत्यन्तरोक्तस्य पुम्पादस्थानीयस्य उपरि तदुपासनाय 'मर्मृज्य' निर्म्मलीकृत्य, मृजेर्यङन्तात् ल्यप् छान्दसः। ब्रह्मणः पादा यथा,—

"तदेतच्चतुष्पाद् ब्रह्म, वाक् पादः, प्राणः पादः, चक्षुः पादः, श्रोत्रं पादः, इत्यध्यात्मम्, अथाधिदैवतम्, अग्निः पादः, वायुः पादः, आदित्यः पादः, दिशः पादः, इत्युभयमेव आदिष्ट भवति, अध्यात्मञ्चैवाधिदैवतञ्चेति"।

अथवा प्रणवस्य चत्वार्य्यक्षराण्येव जाग्रदादि-रूपाणि पादाः, "ओमित्येतदक्षरस्य पादाश्चत्वारः" इत्यथर्वशिखोक्तेः: 'तत्' प्रसिद्धं 'रूपं' भूतादिस्वरूपं 'नाम' तद्वाचकः शब्दः, तद्द्वयं ब्रह्मणो लोमस्थानीयं स्वरूपाद्-वाह्यं 'कृन्तयेत्' निवर्त्तयेत्, तद्विषयां वृत्तिं भूतशुद्धि-मार्गेण त्यजेदित्यर्थः। इदमेव तस्य निकृन्तनं यदविषयीकरणं मनोमयत्वात् संसारस्य मनमानुपरक्तस्य स्वरूपाभावात्, इष्टपक्षे उत्तरमार्ग-रोधकं सङ्ग्रन्थिनाड़ीचक्रं छिन्द्यात्, तदुक्तं,—

"नासादक्षिण मार्गगाहि-पवनः प्राणातिदीर्घीकृत-
स्वन्तः अः-परिपूरितामृततनुः प्राग्-घण्टिकायां तदा।
छिन्द्यात् काल-विशाजवह्नि-वशतो भूरन्ध्रनाड़ीगणां-
स्तत् कार्य्यं कुरुते पुनर्नवतरं छिन्नद्रुमस्कन्धवत्" ॥ इति।

इन्द्रवज्र इव प्रोक्तो मर्म्म-जङ्घानुकीर्त्तनम्।
तद्ध्यान-बलयोगेन धारणाभिर्निकृन्तयेत् ॥१३॥
ऊरोर्मध्ये तु संस्थाप्य मर्म्म-प्राण-विमोचनम्।

किं कृत्वा निकृन्तयेत्? अत आह, मन इति। मनसा उपायेन 'नित्यशः' अभीक्ष्णं 'योगं' जीवात्म-परमात्मनोरैक्यं, पक्षान्तरे 'योगम्' उद्योगम् आश्रित्य ॥ १२ ॥

कीदृशं योगम्? इन्द्रवज्र इवेति। तथा प्रोक्तं यथा इन्द्रो वज्रेण भेद्यं भिनत्ति, एवमयं योगः छेद्यं वासना-जालम्, 'इन्द्रवज्रः' विद्युत् तत्तुल्यया कुण्डलिन्या नाड़ी जालञ्च छिनत्ति। पुनः कीदृशं? मर्म्मणो जङ्घाया अनुकीर्त्तनं यस्मिन् स तं, जङ्घारूपं मर्म्मध्यानस्थानं यत्र कथितम्। जङ्घाग्रहणमङ्गुष्ठादेरप्युपलक्षणं तुल्यन्यायत्वात्, अङ्गुष्ठादि-मूर्द्धान्तानां मर्म्मणामनुकीर्त्तनात्। 'मर्म्मजङ्घानुकर्त्तनम्' इति पाठे, यथा नापितेन क्षुरस्य तैक्ष्ण्याधानाय जङ्घा अनुकृत्यते मुण्ड्यते, तथा अङ्गुष्ठादिमर्म्मस्थानानि नाड़ीमलानकृन्तनेन निर्म्मलीक्रियन्ते इत्यर्थः। तदिति, तच्छब्देन योग्यता-वशात् मर्म्मजङ्घादि गुणीभूतमपि परामृश्यते, 'तत्' सनाड़ीकं मर्म्मादि धारणाभिश्छिन्द्यात्। अथवा व्यवहितमपि रूपं नाम तच्छब्देन परामृश्यते, स एवार्थः ॥ १३ ॥

ऊरोरिति। ऊरुग्रहणमुत्तरोत्तर-स्थानोपलक्षणम्, ऊरोर्मध्ये समनस्कं प्राणं संस्थाप्य मर्म्मणः प्राणस्य च विमोचनं कर्त्तव्यम्। 'अस्मिन् मर्म्मण्यहं स्थितः' इत्यभिमानं त्यक्त्वा निरालम्बस्तिष्ठेदित्यर्थः। एवं स्थानान्तरेष्वप्यूह्यम्। अथवा

चतुरभ्यास-योगेन छिन्देदनभिशङ्कितः ॥ १४ ॥
ततः कण्ठान्तरे योगी समूहन् नाड़ि-सञ्चयम् ।
एकोत्तरं नाड़िशतं तासां मध्ये वराः स्मृताः ॥१५॥
इड़ा रक्षतु वामेन पिङ्गला दक्षिणेन तु ।
तयोर्मध्ये वरं स्थानं यस्तं वेद स वेदवित् ॥१६॥

सर्वतावच्छेदेन व्यवधायकं नाड्यादि विदार्य्य स्थानात् स्थानान्तरे गमनञ्च ।

चतुरिति । ऊरोरुत्तरेषु 'चतुर्षु' गुद-शिश्न-नाभि-हृदय-स्थानेषु अभ्यासयोगेन नाम-रूप-मर्म्म-प्राणान् छिन्देत् । अथवा 'चतुर्वारं' चतुरावृत्त्या प्रातर्मध्याह्ने सायं निशीथे च सर्वेषु स्थानेष्वभ्यास-योगेन ।

नन्वेवं छेदने देहाभिमान-त्यागेन देहपातः स्यादत आह, अनभिशङ्कित इति । अयं भावः, न ह्यभिमान-त्यागेन देहपातो भवति सुषुम्णादिषु तथा दर्शनात्, ध्यानिनां चिरकालं देहावस्थानस्मृतेश्च, न वा चक्रादि-भेदेनापि सा शङ्केति ॥ १४ ॥

तत इति । तदनन्तरं योगी 'कण्ठान्तरे' कण्ठमध्ये नाड़ी-सञ्चयं 'समूहन्' सञ्चयीकुर्वन् छिन्देदित्यनुषङ्गः । कियत्यो नाड्यः सन्ति ? इत्यपेक्षायां मध्यमसङ्ख्यामाह, एकेति । 'वराः' उत्तमाः ॥ १५ ॥

इड़ा वामेन पिङ्गला दक्षिणेन इत्येवं वक्तव्ये रक्षतुशब्द-योगः शिष्याणामाशिषे विद्यासम्प्रदायोच्छेदो माभूदिति । 'वरं स्थानं' सुषुम्णाख्यं 'तं' तदधिष्ठातारं पुंलिङ्गनिर्देशात् ॥ १६ ॥

सुषुम्णा तु परे लीना विरजा ब्रह्मरूपिणी।
द्वासप्तति-सहस्राणि प्रति नाड़ीषु तैतिलम् ॥१७॥
छिद्यते ध्यानयोगेन सुषुम्णैका न छिद्यते।
योग-निर्म्मलधारेण क्षुरेणानलवर्चसा ॥ १८ ॥
छिन्देन्नाड़ीशतं धीरः प्रभावादिह जन्मनि।
जातीपुष्प-समायोगैर्यथा वास्यन्ति तैतिलम् ॥१९॥
एवं शुभाशुभैर्भावैः सा नाड़ी तां विभावयेत्।
तद्भाविताः प्रपद्यन्ते पुनर्जन्म-विवर्जिताः ॥२०॥

किं तत् स्थानं? कश्च तदधिष्ठाता? इत्यपेक्षायामाह सुषुम्णेति। सुषुम्णा 'परे' परपुरुषे ब्रह्मणि लीना 'विरजाः' निर्म्मला 'ब्रह्मरूपिणी' ब्रह्मस्थानत्वात् सुषुम्णैव वरं स्थानं पर एव तदधिष्ठातेत्यर्थः। कथम्भूता सुषुम्णा? नाड़ीषु मध्ये द्वासप्तति-सहस्राणि नाड़ीः प्रति 'तैतिलम्' उच्छीर्षं गण्डुकं यथा गण्डुकाधारे उत्तमाङ्गं तिष्ठति, एवं सुषुम्णाधारे सर्वा नाड्यः स्थिता इत्यर्थः ॥ १७ ॥

"तैतिलो गण्डुके प्रोक्तस्तैतिलं करणान्तरे"। इति विश्वः।

न छिद्यते तस्याः परमसूक्ष्मत्वेन मनो-विषयत्वायोग्यत्वात्, मनोविषयस्यैव योगेन छेद्यत्वात्, ऋजुतया अप्रतिहन्तित्वाच्च।

तैतिलेन सुषुम्णायाः सादृश्यान्तरमाह। जातीति। 'जाती' वासन्ती, तस्याः पुष्पाणां 'समायोगैः' संयोगैः कृत्वा यथा प्रसाधकाः 'तैतिलं' गण्डुकं 'वास्यन्ति' वासेन परिमलेन युक्तं कुर्वन्ति, एवं सा नाड़ी शुभाशुभैर्भावैः वास्यते

ततो विदित-चित्तस्तु निःशब्दं देशमास्थितः।
निःसङ्गस्तत्त्व-योगज्ञो निरपेक्षः शनैः शनैः ॥२१॥
पाशं छित्त्वा यथा हंसो निर्विशङ्कः खमुत्क्रमेत्।
छिन्नपाशस्तथा जीवः संसारं तरते तदा ॥२२॥
यथा निर्वाण-काले तु दीपो दग्ध्वा लयं व्रजेत्।
तथा सर्वाणि कर्म्माणि योगी दग्ध्वा लयं व्रजेत् २३

इति विपरिणामः। पुष्पादि-वासाश्रयो यथा गण्डुकं भवति, तथेयं नाडी वासनाश्रय इत्यर्थः। तर्हि किं कार्य्यम? अत आह, तास्मिति। चिन्तनफलमाह, तदिति। 'प्रपद्यन्ते' सम्पद्यन्ते॥ १८—२०॥

तत इति। विदितं चित्तं येन स विदितचित्तः। 'मात्राधारेण' मात्राः द्वादशादि-सङ्ख्याः प्रणवमात्राः, ता एव धारा यस्य मनःक्षुरस्य स तथा। 'तन्तुं' वासनारूपम्। छिन्द्यात् निश्चयार्थः; समाप्त्यर्थ इतिशब्दः। अयमारोह-प्रकार उत्क्रान्तिसमये खेचरीपटले उक्तः, यथा,—

"यदा तु योगिनो बुद्धिस्त्यक्तुं देहमिमं भवेत्।
तदा स्थिरासनो भूत्वा मूलाच्छक्तिं समुज्ज्वलाम्॥
सूर्य्यकोटि-प्रतीकाशां भावयेन्नियतात्मनः।
आपादतल-पर्य्यन्तं प्रसृतं जीवमात्मनः॥
संहृत्य क्रमयोगेन मूलाधारपदं नयेत्।
तत्र कुण्डलिनीं शक्तिं संवर्त्तानल-सन्निभाम्॥
जीवं निजश्चेन्द्रियाणि ग्रसन्तीं चिन्तयेद्धिया।
सम्प्राप्य कुम्भकावस्थां तडिज्ज्वलन-भासुराम्॥

प्राणायाम-सुतीक्ष्णेन मात्राधारेण योगवित्।
वैराग्योपल-घृष्टेन छित्त्वा तन्तुं न बध्यते ॥२४॥
अमृतत्वं समाप्नोति यदा कामात् स मुच्यते।
सर्व्वैषणा-विनिर्मुक्तश्छित्त्वा तन्तुं न बध्यते ॥
छित्त्वा तन्तुं न बध्यते ॥ २५ ॥

इति क्षुरिकोपनिषत् समाप्ता ॥ १३ ॥

मूलाधाराद् यतिर्देवि ! स्वाधिष्ठानपदं नयेत्।
तत्रस्थं जीवमखिलं ग्रसन्तीं चिन्तयेद् व्रती ॥
तड़ित्-कोटि-प्रतीकाशां तस्मादुन्नीय सत्वरम्।
मणिपूरपदं प्राप्य तत्र पूर्व्ववदाचरेत् ॥
तत्र स्थित्वा क्षणं देवि ! पूर्व्ववद् योगमार्गवित्।
अनाहतं नयेद् योगी तत्र पूर्व्ववदाचरेत् ॥
उन्नीय तस्माद्-भ्रूमध्ये नीरन्ध्रं ग्रसेत् पुनः।
ग्रस्तं चौरं महाशक्त्या कोटिसूर्य्य-समप्रभा ॥
मनसा सह वागीशा भित्त्वा ब्रह्मार्गलं क्षणात्।
परामृत-महाम्भोधौ विश्रान्तिं तत्र कारयेत् ॥
तत्रस्थं परमं देवं शिवं परम-कारणम्।
शक्त्या सह समायोज्य तयोरैक्यं विभावयेत्" ॥

इति ज्ञातमुत्क्रान्तिकालं वञ्चयित्वा यदि जीवितुमिच्छेत्, तदावरोहं कुर्य्यादित्यपि चतोक्तम्। तद्यथा,

"यदि वञ्चितुमुद्युक्तः काल कालविभागवित्।
कालस्तु यावद् व्रजति तावत्तत्र सुखं वसेत् ॥
ब्रह्मद्वारार्गलस्याग्रे इह कालप्रयोजनम्।

चूलिकोपनिषत्।

ओम् अष्टपादं शुचिहँसं त्रिसूत्रं मणिमव्ययम्।

तस्मादूर्द्ध्वपदं देयं न हि कालप्रयोजनम् ॥
यदा देव्यात्मनः कालमतिक्रान्तं प्रपश्यति।
तदा ब्रह्मार्गलं भित्त्वा शक्तिं मूलपदं नयेत् ॥
शक्तिदेह-प्रसूतन्तु स्वजीवञ्चेन्द्रियैः सह।
तत्तत् कर्म्मणि संयोज्य स्वस्थदेहः सुखं व्रजेत् ॥
अनेन देवि! योगेन वञ्चयेत् कालमागतम्" ॥ इति।

आरोहावरोहाभ्यां स एव सर्वयोग-शास्त्रेषु मुख्यो योग इति द्रष्टव्यम्। स च क्षुरिकायां प्रकाशितः ॥ २१—२५ ॥

नारायणेन रचिता श्रुतिमात्रालम्बिना।
अस्पष्टपद-वाक्यानां दीपिका क्षुरिकाभिधे ॥

इति क्षुरिकोपनिषदो दीपिका सम्पूर्णा ॥ १२ ॥

ओं चूलिका चूलिका लोके स्तम्भाग्रं तीक्ष्णमुच्यते।
तद्वद्वेदान्त-भागोऽयं चतुःखण्डा हि पञ्चमी ॥ १ ॥

योगफलमात्मदर्शनम्, स चात्मा अतिसन्निहितोऽपि कण्ठस्थ-हारवत् पराग्दृष्टिना गुरुं विना न दृश्यते इति तद्बोधनार्थ-मुत्तरो [illegible] तत्र हारकूपकेणाह, अष्टपादमिति। 'अष्टौ प्रकृतिरूपाः 'पा[illegible] अथवा अस्य तम् अष्टपादम्, तदुक्तम्,—

"भूमिरापोऽनलो [illegible] मनो बुद्धिरेव च।
अहङ्कार [illegible]धा" ॥ इति।

अस्याः [illegible]ख्यात्। 'शुचिः' उज्ज्वलं; शुचिः शब्दः [illegible] [illegible]कम्; शुचिमिति वा पाठः। हन्ति अज्ञाना[illegible] [illegible], तीणि 'सूत्राणि' धर्म्मार्थ-कामा

द्विवर्त्तमानं तेजसेद्धं सर्वः पश्यन् न पश्यति ॥१॥
भूतसम्मोहने काले भिन्ने तमसि चैश्वरे।
अन्तः पश्यति सत्त्वस्थं निर्गुणं गुणकोटरे ॥२॥
अशक्यः सोऽन्यथा द्रष्टुं ध्येयमानः कुमारकः।
विकार-जननीं मायामष्टरूपामजां ध्रुवाम् ॥३॥

यस्य, मोक्षस्य स्वरूपानतिरेकात्। त्रयो गुणा वा, त्रिसूत्रं तिस्रो मात्रो वा। 'मणिं' प्रकाशकत्वात्, न विविधमेतीति 'अव्ययम्' एकरूपं, 'द्वयोः' स्थूल-सूक्ष्म-देहयोः 'वर्त्तमानं' तिष्ठन्तं द्विवर्त्तमानं, 'तेजसा' प्रकाशेन 'इद्धं' दीप्तं तेजसेद्धं छान्दसी वृद्धिः। एवंविधमात्मानं कण्ठस्थ-हारमिव 'सर्वः' लोकः पश्यन्नपि न पश्यति। हारोऽपि अष्टकः कण्ठिकावयवः उज्ज्वलः हंसलक्षणोपेतः त्रिवृत्सूत्रः मणिमयः दृढः 'द्वयोः' दक्षिणोत्तरभागयोर्वर्त्तमानः तेजसा दीप्तश्च भवति, सर्वो लोकः तं पश्यन्नप्यतिसान्निध्यान्न पश्यति ॥ १ ॥

तर्हि तद्दर्शने क उपायः ? इत्यत आह, भूतेति। भूतमोह-जनके 'काले' कृष्णवर्णे 'ऐश्वरे' ईश्वराधिष्ठिते 'तमसि' अज्ञाने 'भिन्ने' नष्टे सति 'अन्तरेव' सन्निहितं पश्यति 'सत्त्वस्थं' बुद्धिस्थं तत्साक्षिणं तत् प्रकाश्यं वा दृश्यते त्वग्र्यया बुद्ध्या इति श्रुतेः। स्वयं निर्गुणमपि 'गुणकोटरे' लिङ्गे भासमानं, मेघ-मण्डले इव सूर्यम् ॥ २ ॥

अशक्य इति। सः 'कुमारकः' जरा-रहितः 'अन्यथा दिव्यदृष्टिं विना प्रकारान्तरेण द्रष्टुं न शक्यः, सः 'ध्येयमानः' वाह्यदृष्ट्या चिन्त्यमानोऽपि, छान्दस एकारः। अथवा अद्यापि 'ध्येयं' चिन्तनीयं विचार्य्यं 'मानं' प्रमाणमस्य दुर्विज्ञेयत्वात्,

ध्यायतेऽध्यासिता तेन तन्यते प्रेरिता पुनः।
सूयते पुरुषार्थञ्च तेनैवाधिष्ठिता पुरा ॥ ४ ॥
गौरनादवती सा तु जनित्री भूतभाविनी।
असिता सित-रक्ता च सर्वकामदुघा विभोः ॥५॥

मायां 'ध्यायते' चिन्तयति जगत् सृष्ट्यर्थं सम्भावयति, नारीमिवर्त्तुः, मा तां तदुक्तम्,—

"मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत !" ॥ इति।

तेन 'अध्यासिता' आक्रान्ता आरूढ़ा प्रेरिता च सती 'तन्यते' स्वयमेव कार्य्यरूपेण ततो भवति, कर्म्मकर्त्तरि कर्म्मवत् प्रत्ययः। तेनैवाधिष्ठिता सती पुरा 'पुरुषार्थं' भोग्यं सूयते प्रसूतवती कर्म्म-कर्त्तरि पुरि लुङ् चास्म इति भूतेऽनद्यतने लट् ॥ ४ ॥

भोग्यवस्तु-जनकत्वेन मायां ध्यात्वा रूपयति, गौरिति। इयं 'गौः' दोग्ध्री। दोग्ध्री चेत् हम्मारवं करोति न इत्याह, 'अनादवती' नादरहिता अचेतनत्वादक्षमसमर्था ईश्वराधीनेत्यर्थः। यद्वा 'गौरी' शुक्ला सत्त्वप्रधाना सती नादवती वेदप्रवर्त्तिका, पुंवद्भावः पूर्वस्य। "गौरः शुक्लेऽरुणेऽपि च" इति विश्वः। 'असिता' तामसी, सिता चासौ रक्ता च 'सितरक्ता' सात्त्विकी राजसी चेत्यर्थः। 'विभोः' ईश्वरस्य 'सर्वकामदुघा' सर्वान् कामान् दोग्धि यथेष्ट-कार्य्यकरी। महानारायणोपे श्वेताश्वतरे च अस्याश्छागीसाम्यमुक्तम्,—

"अजामेकां लोहित-शुक्ल-कृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।

पिबन्ति नाम-विषयमसङ्ख्याताः कुमारकाः ।
एकस्तु पिबते देवं स्वच्छन्देन वशानुगः ॥ ६ ॥
ध्यान-क्रियाभ्यां भगवान् भुङ्क्तेऽसौ प्रथमं प्रभुः ।
सर्वसाधारणीं दोग्ध्रीमिज्यमानां सुयज्वभिः ॥ ७॥

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" ॥ इति ॥ ५ ॥

जीवानां बहुत्वं, भोक्तृत्वमीश्वरस्यैकत्वञ्चाह, पिबन्तीति । 'नाम' शब्दः 'विषयः' अर्थः, तयोः समाहारः नाम-विषयं 'पिबन्ति' भुञ्जते 'कुमारकाः' जीवाः, 'एकः' ईश्वरः 'पिबते' पाययतीत्यर्थः, तद्विधम् । "प्रयोजक-व्यापारः कर्त्रभिप्रायः क्रियाफलम्" इति कैयटः । छान्दसत्वादकर्त्रभिप्रायेऽपि क्रियाफले आत्मनेपदम् । 'वशाः' स्वविधेयाः 'अनुगाः' परिवारा यस्य स वशानुगः ॥ ६ ॥

तर्हि किमस्य सर्वथा अभोक्तृत्वं ? नेत्याह, ध्यान-क्रियाभ्यामिति । प्रथमं ध्यायति भगवानिदमिति, ततः पश्यति, सैव क्रिया, ताभ्यां स प्रथमं भुङ्क्ते तदुच्छिष्टमन्यो भुङ्क्ते, ध्यात्वावलोकनमेव तस्य भोजनं "न वै देवा अश्नन्ति, न पिबन्ति, एतदेवामृतं दृष्ट्वा तृप्यन्ति" इति श्रुतेः ।

भुङ्क्ते इत्युक्तम् ; कां भुङ्क्ते ? तत्राह, सर्वेति । सर्वेषां 'साधारणीं' समभोग्याम् अव्याकृतरूपामित्यर्थः । "एकमस्य साधारणम्" इति श्रुतेः । दोग्ध्री तु स्वभक्षण-मपेक्षते, अन्यथा दोहासम्भवादत आह, इज्यमानामिति । 'सुयज्वभिः' साधुयाज्ञिकैः 'इज्यमानां' हव्य-कव्येन पूज्यमानाम् ॥ ७ ॥

पश्यन्त्यस्थां महात्मानं सुपर्णं पिप्पलाशनम् ।
उदासीनं ध्रुवं हंसं स्नातकाध्वर्य्यवो हवेत् ॥ ८ ॥
शंसन्तमनुशंसन्ति बह्वृचाः शस्त्र-कोविदाः ।
रथन्तरे बृहत् सामि सप्तैवैते च गीयते ॥ ९ ॥
मन्त्रोपनिषदं ब्रह्म पदक्रम-समन्वितम् ।
पठन्ति भार्गवा ह्येतदथर्वाणो भृगूत्तमाः ॥ १० ॥

पश्यन्तीति । वृत्तस्थानीयमेकं देहं त्यक्त्वा देहान्तरं गच्छतीति सुपर्णोपमम् ; सुपर्णं 'पिप्पलं' कर्म्मफलमश्नाति, तं पिप्पलाशनं, वस्तुवृत्त्या उदासीनं, स्नातकाध्वर्य्यवः 'हवेत्' होमात् पश्यन्तीत्यन्वयः । वहेदिति पाठे, तानियं 'वहेत्' निर्वहेत् योग-क्षेमादिनेति व्याख्येयम् । हवे इति पाठे, हवनकर्म्मणि । हयेदिति पाठे, तानियं वर्द्धयेत् । हये इति पाठे, 'हयः' अश्वः तदुपलक्षिते अश्वमेध-कर्म्मणि ॥ ८ ॥

आध्वर्य्यव-फलमुक्त्वा होत्रफलमाह शंसन्तमिति । 'शस्त्र-कोविदाः' सपादबन्धो मन्त्रः ऋक्, तया केवलया स्तुतिः शस्त्रं, गीयमानया तया स्तुतिः स्तोत्रम्, "ऋग्भिः शंसन्ति, यजुर्भिः शंसन्ति, सामभिः शंसन्ति" इति यास्कवचनात् । शस्त्रे 'कोविदाः' कुशलाः, फलं पूर्वोक्तमेवानुसन्धेयम् ।

सर्वत्र सामगानां व्यापारमाह, रथन्तरे इति । रथन्तरे गीयते बृहत्साम्नि गीयते सामगैर्दोग्ध्रीति शेषः । किं बहुना, सप्तैवैते च सामभेदा गीयन्ते इति विपरिणामः । रथन्तरं बृहत्साम, वैरूप्यं, वैराजं, महानाम्नी, रेवती, वामदेव्यम्, इति सप्त सामानि । दोग्ध्री फलं पूर्वोक्तं ददातीति शेषम् ॥९॥

अथर्वणां व्यापारमाह, मन्त्रेति । मन्त्राश्च उपनिषदश्च

ब्रह्मचारी च व्रात्यश्च स्कम्भोऽप्यपलितस्तथा।
अनड्वान् रोहितोच्छिष्टः पठ्यते भृगुविस्तरे ॥११॥
कालः प्राणश्च भगवानात्मा पुरुष एव च।
शिवो भवश्च रुद्रश्च ईश्वरः पुरुषस्तथा॥ १२ ॥
प्रजापतिर्विराट् चैव पार्ष्णिः सलिलमेव च।
स्तूयते मन्त्रसंयुक्तैरथर्व-विहितैर्विभुः ॥ १३ ॥
तं षड्विंशकमित्येके सप्तविंशमथापरे।
पुरुषं निर्गुणं साङ्ख्यमथर्वाणः शिरो विदुः ॥१४॥
चतुर्विंशति-सङ्ख्याकमव्यक्तं व्यक्त-दर्शनम्।

मन्त्रोपनिषदम्, उपनिषदशब्दोऽकारान्तो नपुंसकमस्ति। 'ब्रह्म' ब्रह्माणम् ॥ १० ॥

भार्गव-ग्रन्थानां विषयमाह, ब्रह्मचारीत्यादि-सार्द्धद्वाभ्याम्। तर्ह्येतन्निरूपणेन भगवतो निरूपणमित्याशङ्क्याह, स्तूयते इति। 'अथर्वविहितैः' अथर्वप्रतिपाद्यैरर्थैः। 'विभुः' ईश्वरः परमात्मा, षड्विंशकं पौराणिकाः, सप्तविंशं तद्वेदा एव,

"मात्रा भूतानीन्द्रियाणि मनो बुद्धिरहङ्कृतिः।
महान् प्रधानं तत्त्वानि षड्विंशः परमेश्वरः" ॥ इति।

चित्तेन साहित्ये सप्तविंश इति सङ्ख्यायते। अथेति। 'सङ्ख्या' ज्ञानं, तत्सम्बन्धी साङ्ख्यः, तं ज्ञानगम्यमित्यर्थः ॥११-१४॥

चतुर्विंशति-सङ्ख्याकमिति। कापिलाः चतुर्विंशति-सङ्ख्याकमस्तुवन्, तदुपरितनं षड्विंशकमित्यर्थः। तदुक्तम्,—

"मूल-प्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त।
षोड़शकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" ॥ इति।

अद्वैतं द्वैतमित्येतत्त्रिधा तं पञ्चधा तथा ॥ १५ ॥
ब्रह्माद्यं स्थावरान्तञ्च पश्यन्ती ज्ञानचक्षुषः।
तमेकमेव पश्यन्ति परिशुद्धं विभुं द्विजाः ॥ १६ ॥
यस्मिन् सर्वमिदं प्रोतं ब्रह्म स्थावर-जङ्गमम्।
तस्मिन्नेव लयं यान्ति वुद्बुदाः सागरे यथा ॥ १७॥
यस्मिन् भावाः प्रलीयन्ते लीनाश्चा व्यक्ततां ययुः।
नश्यन्ति व्यक्ततां भूयो जायन्ते वुद्बुदा इव ॥ १८ ॥
क्षेत्रज्ञाधिष्ठितञ्चैव कारणैर्व्यञ्जयेद्बुधः।
एवं सहस्रशो देवं पर्य्यस्यन्तं पुनः पुनः ॥ १९ ॥

स्वयम् 'अव्यक्तम्' अप्रत्यक्ष 'व्यक्तदर्शनं' व्यक्तस्य जगतो भासकम्, अद्वैतं वेदान्तिनः, द्वैतं काणादयः, त्रिधा गुणभेदेन, पञ्चधा तु भूतभेदेन, "स एकधा भवति, त्रिधा भवति, पञ्चधा भवति, सप्तधा, नवधा, पुनश्चैकादश इति श्रुत्यन्तरात् ॥१५॥

'द्विजाः' त्रैवर्णिका वेदविदः। ब्रह्मेति ब्रह्मकार्य्यं स्थावरादि तस्मिन् प्रोतं तमेकं ब्रह्मैव पश्यन्तीत्यन्वयः। लयं यान्ति सर्वे भावाः 'लीनाश्चाः' लीनम् आस्यं मुखं द्वारमविद्यालक्षणं येषां ते तथोक्ताः। यस्मिन् प्रोताः सन्तो व्यक्ततां 'ययुः' गताः पुनर्नश्यन्ते नश्यन्ति भूयश्च व्यक्ततां 'जायन्ते' जनयन्ति अन्तर्भावितण्यन्तत्वात् सकर्म्मकः, गच्छन्ति वा। द्विः कथनं सृष्टिप्रलययोरभ्यास ज्ञापनार्थम् ॥ १६—१८ ॥

क्षेत्रज्ञेन अधिष्ठितं शरीरं, 'कारणैः' अनुमिति-कारणैः हेतुभिः विमतत्वेनाधिष्ठितं क्रियावत्त्वाद्रथादिवदित्यादिभिः 'व्यञ्जयेत्' लक्षयेत, 'बुधः' पण्डितः। एवं सहस्रशः पर्य्यस्यन्तं

य एवं श्रावयेच्छ्राद्धे ब्राह्मणो नियतव्रतः।
अक्षय्यमन्नपानञ्च पितृणाञ्चोपतिष्ठते ॥ २० ॥
ब्रह्म ब्रह्मविधानन्तु ये विदुर्ब्राह्मणादयः।
ते लयं यान्ति तत्रैव नीलास्या ब्रह्मशायिने।
नीलास्या ब्रह्मशायिने ॥ २१ ॥

इत्यथर्ववेदे चूलिकोपनिषत् समाप्ता ॥ १४ ॥

अथर्वशिखोपनिषत्।

ओं पिप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वाणं भगवन्तं पप्रच्छ।

तं 'देवं' पुनः पुनर्जन्म-मरणादि प्रबन्धमापद्यमानं जीवम् उक्त-योगेन उद्धरेदिति शेषः। वैराग्यार्थमिदमभिहितं लक्षयेत् चेष्टादिना सर्वशरीरेष्वनुमायादित्यर्थः ॥ २० ॥

'ब्रह्म' कूटस्थं 'ब्रह्मविधानं' तज्ज्ञानोपायम्; नीनम् 'आस्यम्' मुखं प्रवृत्तिद्वारं रागादि येषां ते तथोक्ताः। किमर्थं लीनास्याः? 'ब्रह्मशायिने' ब्रह्मणि शेते तच्छीलो ब्रह्मशायी, भावप्रधानो निर्देशः. ब्रह्मशायिन्, ब्रह्मणि शयनं कर्त्तुम् एको भवितुमित्यर्थः। द्विरुक्तिः समाप्त्यर्था।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपद-वाक्यानां दीपिका चूलिकाभिधे ॥
इति चूलिकोपनिषदो दीपिका सम्पूर्णा ॥ १४ ॥

एषाथर्वशिखा नाम शिर ऊर्द्धं शिखोचिता।
द्विखण्डा सप्तमी मुण्डात् प्रणवार्थं निरूपिणी ॥ १ ॥

किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं ? किं तद्ध्यानं ? को वा ध्याता, ? कश्चिद्ध्येय: ? इति ।

अथैभ्योऽथर्वा प्रत्युवाच, ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यम् ।

सर्वार्थसिद्धिदं शिवमाराध्य विधूत विघ्नव्रातो भगवन्महेश्वरपूजनेन विधूताखिल कल्मषो देशिक: छुरिकोक्त-मार्गेण साधित-यमादि-प्रत्याहारान्त योगाङ्गधारणा-पूर्वकं ध्यानपथमारुरुक्षु: सबीजयोगे मन्त्रस्याङ्गत्वात् सर्वमन्त्र-शिरोमणिं प्रणवमवयवश: स्वरूपतश्च निर्णीय ध्याने विनियोक्तुं पुन: प्रकृतं तमेवानुसन्धत्ते, पिप्पलाद इति । अत्र प्रष्टृणां त्रित्वम् एभ्य इत्यग्रेऽनुवादादवसीयते । आख्यायिका तु विद्यास्तुत्यर्था ॥ १ ॥

प्रश्नानाह, किमादावित्यादि । 'आदौ' सर्वमन्त्रादौ सर्ववेदादौ मुख्यत्वेन च प्रयुक्तं, ध्यायते यत्तदिति व्युत्पत्त्या 'ध्यानं' ध्येयं 'ध्यायितव्यं' ध्यानार्हश्च किमित्यर्थ: । अत्र छान्दसश्चिद्वत् इट् । प्रथमप्रयुक्तो ध्येयश्च मन्त्र: क इति प्रथमप्रश्नार्थ: । किं तद्ध्यानमिति । 'तस्य' ध्यातव्यस्य मन्त्रस्य किं ध्यानमिति द्वितीय: प्रश्न: । को वा 'ध्याता' अधिकारी इति तृतीय: । कश्च 'ध्येय: ईश: इति चतुर्थ: । 'चित्' इति वितर्के, को देवो ध्येय: ? इति विचार्य वक्तव्यमित्यर्थ: । इति शब्द: प्रश्नसमाप्तौ ।

आद्यस्योत्तरमाह, ओमित्येतदक्षरमिति । सर्वस्य वक्तव्यस्य मन्त्र ब्राह्मणादेर्देवता-ध्यानस्य च 'आदौ' प्रथमं प्रयुक्तम् 'आदौ' ईश्वरे वाचकत्वेन प्रतिनिधित्वेन वा प्रयुक्तमित्यर्थ: ।

ओमित्येतदक्षरस्य पादाश्चत्वारो देवाश्चत्वारो वेदाश्चत्वारः।

चतुष्पादेतदक्षरं परं ब्रह्म, पूर्वास्य मात्रा पृथिव्यकारः, स ऋग्भिरृग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः। द्वितीयान्तरिक्षमुकारः, स यजुर्भिर्यजुर्वेदो विष्णू रुद्रास्त्रिष्टुप् दक्षिणाग्निः। तृतीया द्यौर्मकारः स सामभिः सामवेदो विष्णुरादित्या जगत्याऽऽवनीयः। यावसानेऽस्य चतुर्थ्यर्द्धमात्रा, सा लुप्तमकारः, सोऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्त्तकोऽग्निर्मरुतो विराडेकऋषिः।

द्वितीयस्योत्तरमोमित्येतदक्षरस्येति। पाद-देव-वेदाश्चतुःसङ्ख्यकाः, यथासङ्ख्यकं ध्येया इत्यर्थः। 'देवाः' उभयेऽपि अधिष्ठातारो गणदेवताश्च देव-शब्देन गृहीताः, पृथिव्यादयो लोकाः, गायत्र्यादीनि छन्दांसि च रूपाणि त्रिष्वेव सन्ति, न चतुर्थ इति पादादि पङ्क्तौ नोक्तानि ; अग्नयश्चालोकाः, 'पादाश्चत्वारः' अकारादयः।

पादादीन् वक्तुं पुनश्चतुष्पात्त्वं प्रतिजानीते, चतुष्पादेतदक्षरं परं ब्रह्मेति। ऋग्भिरुपलक्षितत्वादृग्वेदः। ब्रह्मादयोऽधिष्ठातारः, वस्वादयो गणदेवताः, लुप्तमकारः मकारस्य विरतत्वात्। सः अथर्वणैर्मन्त्रैरु[illegible]वेदः, 'संवर्त्तकोऽग्निः' ब्रह्मादिस्थानीयो[illegible], '[illegible]' एकोनपञ्चाशत्सङ्ख्यका गणदेवताः। [illegible]डित्ययं [illegible] चतुष्का-

रुचिरा भास्वती स्वभा,

प्रथमा रक्ता ब्राह्मी ब्रह्मदेवत्या। द्वितीया शुभा रौद्री रुद्रदेवत्या। तृतीया कृष्णा विष्णुमती विष्णुदेवत्या। चतुर्थी विद्युन्मती सर्व्ववर्णा पुरुषदेवत्या। स एष ह्योङ्कारश्चतुष्पादश्चतुःशिराः।

पाठेऽपठितत्वात्, अन्यथा पादाश्चत्वार इत्यत्र छन्दांसि चत्वारीति च पठेत्, वर्णावसानत्वाच्चार्द्धमात्रा तुर्य्या, अत्र वर्णधर्म्म-च्छन्दसोऽसम्भवात्। नारसिंहे तु विराडित्यपि पठितं, तच्च औपचारिकं छन्दस्त्वं बोध्यम्। एकर्क्षर्षिर्नामाग्निः।

मूर्द्धन्यवस्थितायास्तु मात्राया ध्यानमाह, रुचिरेति। 'रुचिरा' रम्या 'भास्वती' दीप्तिमती 'स्वभा' अन्यनिरपेक्षप्रकाशा।

इदानीं मात्राणां वर्णानाह, प्रथमेति। रक्ता वर्णेन सृष्टिहेतुत्वेन राजसत्वात्, 'ब्राह्मी' ब्रह्मवती, अग्रे विष्णुमतीत्युक्तत्वात्। ब्रह्मा देवतापि तटस्थो भविष्यति, न सम्बद्ध इति शङ्कानिरासाय ब्राह्मीत्युक्तम्। 'शुभा' शुक्ला चन्द्रसन्निभा 'रौद्री' नित्य-सन्निहितरुद्रा, 'पुरुषः' ईश्वरः।

यद्यपि ब्रह्मविद्यापनिषदि अकारादीनां क्रमेण ब्रह्मविष्णु-रुद्रा देवता उक्ताः, तथा तृतीया मात्रा "मकारश्चाग्निसङ्काशो विधूमो विद्युतोपमः" इत्युक्तम्; अत्र तु ब्रह्म-रुद्रविष्णवो देवता उक्ताः, तथा तृतीया मात्रा च कृष्णा उक्ता इति विरोधः। तथा अथर्वशिरसि "या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा वर्णेन" इति देवता-वर्णविपर्य्यास उक्तः,

चतुर्थ्यर्द्धमात्रा स्थूल-ह्रस्व-दीर्घ-प्लुतः ॥
ओमोमोमिति त्रिरुक्तश्चतुर्थः शान्तात्मा
प्लुतप्रयोगे नसममित्यात्मज्योतिः सकृदावर्त्तव्यः।

तथापि वस्तुतो ब्रह्मादीनां त्रयाणामेकरूपत्वादुपासनाङ्गत्वेन फलभेदाय तत्तद्रूपापादानम्। एतेन वर्णभेदोऽपि परिहृतः, ध्यानभेदेन फलभेदात्; अतएव कालाग्निरुद्रोपनिषदि महेश्वर-सदाशिव-शिवाः शिवं प्रति प्रणव-वर्णत्रये देवा उक्ताः; आगमेषु क्वचित् सात्विकादिभेदेन एकस्या एव देवतायास्त्रिधा ध्यानमुक्तम् वास्तवस्थितिन्त्वत्रैव वक्ष्यति,—

"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च।
पञ्चधा पञ्चदेवत्यः प्रणवः परिपठ्यते" ॥ इति ॥

कल्पभेदेन वा ब्रह्मादीनामुत्पत्तिक्रमे भेदः। चत्वारः 'पादाः' अकारोकार-मकारार्द्धमात्राः विश्व-तैजस-प्राज्ञ-तुरीय-लक्षणाः यस्य, स चतुष्पादः, चत्वारि 'शिरांसि' उत्तमाङ्गानि मुखस्थानीयानि अग्नयो यस्य, स चतुःशिराः। अकारादीनां पादत्वं प्राथम्यात्, सर्वधर्म्माश्रयत्वाच्च; अग्नीनां मुखत्वं "मुखादग्निरजायत" इति श्रुतेः अग्नेः सर्वदेव-मुखत्वादन्यनिर्दिष्टत्वाच्च द्रष्टव्यम्।

स्थूलं रूपं त्रिधा विभक्तं, सूक्ष्मं पृथक् करोति, चतुर्थीति। 'चतुर्थ्यर्द्धमात्रा' नादसञ्ज्ञा लुप्तमकारः। स्थूले विभागमाह, स्थूलेति। यः 'स्थूलः' वर्णकूटरूपः प्रणवः, स ह्रस्व-दीर्घ-प्लुतः, उद्देश्य-विधेययोरपि विशेषणविशेष्यत्वमात्र-विवक्षया समासः।

ह्रस्वादीनां स्वरूपमभिनीय दर्शयति, ओमोमोमिति। प्रथमः एकमात्रः, द्वितीयो द्विमात्रः, तृतीयस्त्रिमात्र इत्यर्थः।

स एष सर्वान् प्राणान् सकृदुच्चारितमात्रः,
स एष ह्यूर्द्ध्वमुत्क्रामयतीत्योङ्कारः ॥ १ ॥
प्रणवः सर्वान् प्राणान् प्रणामयति नामयति

नन्वेवं ह्रस्वो नास्तीति कथं ह्रस्व ओङ्कारः ? नैषः दोषः, पार्ष्वदश्रुतिरियम्, यथा तत्रभवतां नारायणीयानां सुजात एव अश्व सूनृत अध्वर्यो ओम् अद्भिः सुतमिति व्याकरणात् सिद्धे प्रयोगे तस्य ह्रस्वत्वं नास्तीत्यर्थः इति विरुक्त इत्यभिनीय तस्योपसंहारः ।

चतुर्थः पादः क्व वर्त्तते ? अत आह, प्लुतप्रयोगे इति । वर्त्तते इति शेषः, तत्रैवाभिव्यक्तत्वात् ; 'नसमम्' अनुपमं रूपम्, 'इति' हेतोः आत्मज्योतिस्तत् । विरम्यमाण-घण्टानादाद्युपमापि न भवति, ततोऽप्यतिसूक्ष्मत्वात् । 'सकृदावर्त्तव्यः' सकृदावर्त्तयितव्यः अनाहत-शब्दरूप इत्यर्थः । यदा सकृद्विभागः तदापि कुतो भवतीति चेत् ? श्रूयतां, निर्विशेषत्वात् पूर्वापरविभागे भेदकाभावात्, तथा निर्विशेषत्वात् पूर्वापरावृत्तौ भेदकाभावात् सकृदावर्त्तव्यः शब्दब्रह्मसञ्ज्ञः ।

स एष इति । वर्णित-प्रणवस्योपसंहारः । ओङ्कार शब्दस्य प्रवृत्ति-निमित्तमाह, सर्वान् प्राणानिति । 'प्राणाः' दशवायवः ; तान् समनस्कान् साग्नीन् षट्चक्र-भेदनेन सुषुम्णाद्वारेण मूर्द्धानमानयतीत्यर्थः । पुनः स एष इत्यनुवाद आदरार्थः । अनेकार्थत्वान्निपातानाम् । ओमित्यूर्द्ध्वभावे ऊर्द्ध्वान् प्राणान् कारयति उच्चारयितुरित्योङ्कार इति योगिभिरवश्यं ध्येय इति-भावः ।

तस्य नामान्तरमाह, प्रणव इति । प्रणवशब्द-निमित्त-

वै; तस्मात् प्रणवश्चतुर्द्धावस्थितः इति वेद-देवयोनिः, धेयाश्वेति सन्धर्त्ता सर्व्वेभ्यो दुःख-भयेभ्यः सन्तारयति।

तारणात्तानि सर्वाणीति विष्णुः सर्वान् जयति, ब्रह्मावृहत् सर्वकारणानि सम्प्रतिष्ठाप्य ध्यानात्।

माह, सर्वानिति। 'प्रणामः' नम्रतापादन, नामनं न्यग्भावापादनम्। चतुर्धा यतोऽवस्थितः, ततश्चतुर्णां वेदानां देवानाञ्च योनिः; अनेन क्रमेण पूर्वत्रापि वेदाश्चत्वारो देवाश्चत्वार इति पाठेन भवितव्यम्। साम्प्रदायिकैर्निश्चयो विषयः।

किं तद्धात्मेति यत् पृष्टं, तदुत्तरं निगमयति, धेयाश्वेति। धा धातो रूपं, धातव्याः धारणीयाः पादादयो बुद्धा न त्यक्तव्याः ध्यातव्या इत्यर्थः। धारणस्य फलमाह, सन्धर्त्तेति। 'सन्धर्त्ता' एष हि पादादीनां धारयिता तारयति आश्रितान्, स्वस्य किं वक्तव्यम्।

को ध्याता? इति प्रश्नं ध्यातृ-ब्रह्म विष्णु-निदर्शनेनोत्तरयति, तारणात्तानीति। 'तारणेन' आश्रितानां दुःखभयापनयनेन 'अत्तानि', अद्भक्षणे निष्ठा, छान्दसो जग्ध्यभावः, ग्रस्तानि अभिभूतानि दुःखभयानि सर्वाणि 'इति' हेतोः विष्णुः सर्वान् 'जयति' अभिभवति दैत्यादीन्। अथवा 'तारणात्' तारकत्वाद्धेतोः 'तानि' पादादीनि सर्वाणीति पूर्वोक्तप्रकारेण विष्णुर्ध्यातवानिति शेषः।

ध्यानफलमाह, सर्वान् जयतीति। अथ ब्रह्मापि 'अवृहत्' वृहत्त्वं गतवान्, कस्मात्? 'सर्वकारणानि' सर्वेन्द्रियाणि

विष्णुर्मनसि नादान्ते परमात्मनि स्थाप्य ध्येयमीशानं प्रध्यायन्तीशा वा सर्वमिदं प्रयुक्तम्।

ब्रह्म-विष्णु-रुद्रेन्द्राः सम्प्रसूयन्ते सर्वाणि चेन्द्रियाणि सहभूतानि, कारणं सर्वैश्वर्य्यं सम्पन्नं शिवमाकाशं मध्य भ्रुवस्थम्।

'सम्प्रतिष्ठाप्य' स्थिरीकृत्य ध्यानात्, विष्णु ब्रह्मणोर्ध्यानकथनेन तत्फलार्थी ध्यातेत्युक्त भवति।

कश्चिद्ध्येयः? इति चतुर्थमुत्तरयति, विष्णुर्मनसीति। नादान्ते शक्तिद्वारा शान्ते ब्रह्मणि, प्रणवो हि पञ्चकूटात्मकः अकारोकार-मकार-विन्दु नादात्मकः, तत्र नादान्ते परमात्म-स्थाने 'स्थाप्य' आराध्य 'ध्येयं' ध्यानोचितम् ईशानं मनसि विष्णुः 'प्रध्यायन्ति' प्रध्यायतीत्यर्थः। वचन व्यत्ययाऽन्येषा-मपि ईशस्य ध्येयत्वसूचनार्थः।

ननु अन्यान् देवानपहाय ईशान एव किमिति ध्येयः? अत आह, ईशा वेति। वा शब्द एवार्थः, ईशैव सर्वमिदं प्रयुक्तं नान्येन।

ननु भवतु सर्वं प्रयुक्तं, न तु ब्रह्मादय इत्यत आह, ब्रह्मेति। 'इन्द्रः' मघवा, एते चत्वारः ईशा 'सम्प्रसूयन्ते' जन्यन्ते, 'सह-भूतानि, भूतसहितानि इन्द्रियाणि ईशा सम्प्रसूयन्ते।

पुनः किं किमीशा प्रयुक्तम्? अत आह, कारणमिति। 'कारणं' साधकतमम् उपायभूतं, साधकतमं सर्वमेव ईशा प्रयुक्तमित्यर्थः, स हि प्रथममुपायबोधकः, 'ऐश्वर्य्यं' प्रभुशक्तिः सम्पन्नम्। कार्य्यमात्र-निदर्शनाय सर्वकार्य्य-मूर्द्धन्यमाकाश-माह, शिवमिति। 'शिवं' निर्म्मलं 'मध्ये' सर्वस्यान्तः 'भ्रुवम्'

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च।
पञ्चधा पञ्चदैवत्यः प्रणवः परिपठ्यते॥

तत्राधिकं क्षणमेकमास्थाय क्रतुशतस्यापि फलमवाप्नोति, कृत्स्नमोङ्कारगतञ्च सर्वज्ञानयोगध्यानानां शिव एक एव ध्येयः, शिव ओङ्कारः, सर्वमन्यत् परित्यज्य एतामधीत्य द्विजो गर्भवासान्मुच्यते, गर्भवासान्मुच्यते॥ २॥

इत्यथर्वशिखोपनिषत् समाप्ता॥ १५॥

एकरूपेण तिष्ठति। मध्ये भुवस्यम् आकाशम् ईशा प्रयुक्तं, तच्च वायादीनामुपलक्षणं यद्वा सम्पन्नादि चतुष्टयं शिवस्य विशेषणं अन्यत्वशङ्कानिवृत्तये।

नादान्तशब्देन सूचितां प्रणवस्य पञ्चकूटतामाह, ब्रह्मेति। 'पञ्चधा' अकारादिरूपेण।

पञ्चात्मकस्य ज्ञाने फलमाह, तत्रेति। तत्राधिक्ये फलाधिक्यमिति न्यायात्। कृत्स्नमोङ्कारगतञ्चेति। 'कृत्स्नम्' ओङ्कारपादादि कर्म्म ओङ्कारगतञ्च ध्यात्वा क्रतुशतस्यापि फलमवाप्नोतीत्यनुषज्यते।

परमोपदेशमाह, सर्वमन्यत् परित्यज्येति। प्राक्तनेन सम्बध्यते। ईश एव परमो ध्येय इति चतुर्थमुत्तरमुपसंहरन् तदध्ययनफलमाह एतामिति। 'एताम्' उपनिषदम् अथर्वशिखा-सञ्ज्ञाम्। द्विज इति शूद्रनिरासः। द्विरुक्तिः समाप्त्यर्था, इति शिवम्।

ब्रह्मोपनिषत् ।

ओं शौनको ह वै महाशालोऽङ्गिरसं भगवन्तं पिप्पलादं पप्रच्छ ।

दिव्ये ब्रह्मपुरे रम्ये सम्प्रतिष्ठिता-भवन्ति कथं ? सृजन्ति ? कस्यैष महिमा बभूव ? यो ह्येष महिमा बभूव, क एषः ? ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानां दीपिकाथर्व-शिखिके ॥
इत्यथर्वशिखोपनिषदो दीपिका सम्पूर्णा ॥ १५ ॥

ब्रह्मोपनिषदारभ्या ब्रह्मज्ञान-प्रदायिनी ।
चतुःखण्डा तु दशमी शमिनां हृदयङ्गमा ॥ १ ॥

इदानीं चतुरवस्थस्य चतुःस्थानस्य दस्यात्मनो ? निर्गुण-ध्यानसिद्धये स्वस्वरूपं सर्वं वक्तव्यमिति ब्रह्मोपनिषदारभ्यते, ओं शौनक इति । "ओम् अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति, नाभि हृदयं कण्ठं मूर्द्धेति" । तत्र चतुष्पादं ब्रह्म विभातीति ग्रन्थो द्वितीयखण्डादौ पठितः, प्रथमखण्डादा-वपि केचित् पठन्ति, स पाठो नातिप्रयोजनः, अर्थसम्बन्धा-भावात् । 'महाशालः' महत्यः शाला गृहा यस्य स तथा, 'अङ्गिरस' गोत्रतः अपत्यापत्यम् अवान्तरभेदोपचारात्, पिप्पलादं नामतः 'पप्रच्छ' पृष्टवान् ।

प्रश्नानाह, दिव्य इति । 'दिव्ये' वागादिदेव-निवासार्हे ब्रह्मोपलब्धिस्थाने 'ब्रह्मपुरे' शरीरे सम्प्रतिष्ठिता भवन्ति वागा-दयः कथम् ? इति शेषः । किमाधारा वागादयः शरीरे प्रति-ष्ठिताः ? इति प्रथमः प्रश्नः । सृजन्तीत्यत्रापि कथमिति

तस्मै स होवाच ब्रह्म-विद्यां वरिष्ठां प्राणो ह्येष आत्मा, आत्मनो महिमा बभूव।

देवानामायुः, स देवानां निधनमनिधनम्।

दिव्ये ब्रह्मपुरे, विरजं निष्कलं शुभ्रमक्षरं यद् ब्रह्म विभाति, स नियच्छति।

सम्बध्यते, किं बलेन स्वस्वविषयेषु व्याप्रियन्ते? इत्यर्थः; एष द्वितीयः प्रश्नः। कस्यैष महिमा? बुद्ध्यादि-विस्तारो जात इति तृतीयः। यो हि एक एष प्रत्यक्ष महिमा बभूव, क एष किन्तत्त्वकः? महिम तत्त्व-प्रश्नद्वारा महत एव तत्त्वं पृष्टं वेदितव्यमिति चतुर्थः।

उत्तरमाह, तस्मै इति। 'सः' पिप्पलादयः 'ह' प्रसिद्धौ 'उवाच' परितो विचार्य्य बभाषे ब्रह्म-विद्यां, सर्वैरपि प्रश्नैर्ब्रह्मण एव पृष्टत्वात् ब्रह्मविद्येयम्, 'वरिष्ठाम्' अतिशयवतीं; प्राणो ह्येष इति। किं भौतिकः? नेत्याह, आत्मेति। यस्मिन् देवाः प्रतिष्ठिताः, यद्बलेन च सृजन्ति, यस्यैष महिमा, यच्च महिम्नस्तत्वं स एष आत्मेत्यर्थः; सामान्येनेदं चतुर्णामप्युत्तरम्, आत्मनः प्राणत्वं प्राणाश्रयत्वात्, अतएव तथा प्राण इति भगवत् सूत्रम्। विशेषेण तृतीयस्योत्तरमाह, आत्मन इति।

प्रथमस्य विशेषत उत्तरमाह, देवानामिति। 'देवानां' वागादीनाम् 'आयुः' जीवितम्, आत्मा को ह्येवान्यात् कः प्राण्याद्यद्येष 'आत्मा आनन्दो न स्यात्' इति श्रुतिः।

आत्मसत्तयैव तेषां सत्तालाभात्, तदेव विवृण्वन्नाह, स इति। 'निधनं' मरणम्, 'अनिधनं' जीवनम्।

स क्वास्तीत्याशङ्क्याह, दिव्ये ब्रह्मपुरे इति। चतुर्थमुत्तर-

मधुकर-राजानं माचीकवत्। यथा माची-
केकेन तन्तुना जालं विक्षिपति, तेनापकर्षति।
तथैवैष प्राणः यदा याति संसृष्टमाकृष्य।

यति, विरजमित्यादि। यत् 'ब्रह्म' परमात्मा 'विभाति' प्रकाशते तत् 'विरजं' निरवद्यतत्त्वं, 'निष्कलं' कलाविद्याकार्य्यं प्राणादि, तद्रहितम्। निषेधमुखेनोक्ता विधिमुखेनाप्याह, शुभ्रमिति, 'शुभ्रम्' उज्ज्वलं प्रकाशात्मकम् 'अक्षरम्' अश्नुते व्याप्नोति, अश्नोतेर्वासरोऽक्षरमिति स्मृतेः।

कथं सृजन्तीत्यस्य द्वितीयस्योत्तरं, स इति। 'नियच्छति' नियमनं करोति। नियमनं वृहदारण्यके अन्तर्य्यामिब्राह्मणे, "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः, यः पृथिवीं यमयति, यं पृथिवी न वेद, एष त आत्मा अन्तर्य्याम्यमृत" इत्यादि चतुर्विंशतिभिः पर्य्यायैर्व्याख्यातम्।

तत्र प्रत्येकं पृथिव्यादीनां नियन्तृत्वमुक्तं; अत्र तु एकधा इत्याह, मधुकर-राजानमिति। 'मधुकराः' इन्द्रियाणि तेषां 'राजानं' तदभिमानिनं जीवं नियच्छति तेन सर्वाणि नियतानि इत्युक्तं भवति। समासान्तविधेरनित्यत्वाट्टच् न कृतः। एकस्य सर्व्वनियन्तृत्वे दृष्टान्तमाह, माचीकवदिति। मक्षिकाभिर्जीवति 'माचीकः' ऊर्णनाभो लूताख्य-कीटविशेषः, तद्वत्। तद्विवृणोति, यथेति। यथा माचीका, छान्दसमीकारस्य दीर्घत्वं, टाप् च; लूता एकेन 'तन्तुना' लालारूपेण द्वारेण 'जालं' स्वकुलायं 'विक्षिपति' स्वशरीरात् वहिः करोति, 'तेनैव' एकेन तन्तुना 'अपकर्षति' तत्स्थानादन्तर्नयति। वक्ष्यति,—

प्राणदेवतास्ताः सर्वा नाड्यः सुस्वपे श्येना-काशवत्, यथा खं श्येनमाश्रित्य याति स्वमाल-यमेवं सुषुप्तः।

ब्रूते, यथैवैष देवदत्तो यष्ट्यादिना ताडा-

"ऊर्णनाभिर्यथा तन्तून् सृजते संहरत्यपि।

जाग्रत् स्वप्ने तथा जीवो गच्छत्यागच्छते पुनः" ॥ इति।

लूतास्थानीय आत्मा, तन्तुस्थानीयः प्राणः, जालस्थानीयं वागादि। यथायं दृष्टान्तः, तथैवैष प्राणो यदा 'याति' गच्छति, तदा संसृष्टमाकृष्य गच्छति, वागादि-सङ्घातं गृहीत्वैव याति ; यथोक्तम्,—"यथा सुहयः षड्विंश शङ्कून् सञ्छिदेत्, एवमितरान् प्राणान् समखिदददिति"।

ननु वागाद्याकर्षणे प्राणस्य तैः कः सम्बन्धः ? इति प्रश्ने, नाड़ीद्वारक इत्युत्तरिते, नाड़ीभिः प्राणस्य कः सम्बन्धः ? इति शङ्का स्यात्, तामपनेतुमाह, प्राणेति। प्राणो देवता यासां ताः प्राणदेवताः 'ताः' पूर्वोक्ताः सर्वाः 'नाड्यः' सुषुम्णादयः। यातीत्युक्तम्, तत् कदा ? इत्यपेक्षायामाह, सुस्वपे इति। सुतरां स्वपनं 'सुस्वपः' सुषुप्तिः, तत्र सुषुप्तिकाले यातीत्यर्थः। एतत् मरण मूर्च्छादेरप्युपलक्षणम्। क्व यातीति प्रश्ने स्वालयं यातीत्युत्तरम् ; तत्र दृष्टान्तः, श्येनाकाशवदिति। विवरणं यथेति। श्येनो यथा 'खम्' आकाशमाश्रित्य स्वालयं याति, तथा सुषुप्तः 'स्वालयं' ब्रह्म याति।

कथं ज्ञायते स्वालयं ब्रह्म याति, न यत्र कुत्रचित् ? इति पृष्टे उत्तरमाह, ब्रूते इति। उत्थितः सन् सुखमहमस्वाप्समिति

मानो न यति, एवमिष्टापूर्त्तैः शुभाशुभैर्न लिप्यते।
यथा कुमारो निष्काम आनन्दमुपयाति,
तथैवैष देवदत्तः स्वप्ने आनन्दमभियाति।
वेद एव परं ज्योतिर्ज्योतिष्कामो ज्योतिरानन्दयते॥

लोकान् वदति ; तेन आनन्दं स्वालयं गतः, आनन्दाच्चागत इति ज्ञायते, आनन्दश्च ब्रह्म।

ननु शुभाशुभेषु कर्म्मसु सत्सु कथमानन्दानुभवः सुषुप्तेऽपि स्यात्? इत्याशङ्क्य शुभाशुभाभावं प्रतिपादयितुं दृष्टान्तमाह, यथैवैष इति। यथैव एष देवदत्तः 'यष्ट्यादिना' काष्ठेनापि ताड्यमानो 'न यति' न याति, छान्दसो ह्रस्वः, न गच्छति न पलायते, सुषुप्ते तत् कस्य हेतोः? इतरानुभवाभावादित्येव तदपि, कुतः? कारणाधर्म्माभावादेव एवमनेन निदर्शनेन 'इष्टापूर्त्तैः' इष्टापूर्त्तयोः कर्त्ता तत्फलैर्न लिप्यते।

ननु यथा सुषुप्ते दुःखहेतुरधर्म्मो नास्ति, तथा सुखहेतु-धर्म्मोऽपि नास्ति ; तत् कुत आनन्दानुभवः? इत्याशङ्क्य, यद्यपि धर्म्म-हेतुक आनन्दो नास्ति, तथापि नित्यानन्दो वर्त्तते, सोऽनुभूयते इत्युत्तरिते, किं तत्र प्रमाणम्? इति पृष्टे अनुभवं प्रमाणयति, यथेति। ननु तथापि क्रीड़नकादि-निमित्त आनन्दो भविष्यतीत्यत आह, निष्काम इति। तदुक्तम्,—

"द्वावेव चिन्तयामुक्तौ परमानन्द-सम्प्लुतौ।
यो विमुग्धो जड़ो बालो यो गुणेभ्यः परङ्गतः॥" इति।

'स्वप्ने' सुषुप्ते।

नन्वानन्दः सुखं, तत् सुषुप्तौ ज्ञानाभावेन कथं भासते?

भूयस्तेनैव स्वप्नाय गच्छति जलौकावत्। यथा जलौका अग्रमग्रं नयत्यात्मानं नयति परं सन्धय यत् परं नापरं त्यजति, स जाग्रदभिधीयते।

अत आह वेद एवेति। वेत्तीति 'वेदः' जानात्येवेत्यर्थः, यतः 'परं ज्योतिः' परं साधन-निरपेक्षम् आत्मज्योतिः, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुतेः।

ननु यद्यपि वेदस्तथापि निष्कामः कथमानन्दं पश्येदत आह, ज्योतिष्काम इति। आत्मनस्तु कामाय सर्वं प्रियं भवति इति श्रुतेरात्मनो नित्यकामत्वात् ज्योतिष्कामः सन् आत्मरूपं ज्योतिः 'आनन्दयते' आनन्दरूपमनुभवति सुषुप्तावन्यकामाभावे परिशेषसिद्धमात्मकामत्वं विमलतः सकामः पुरुषत्वाज्जाग्रत् पुरुषवत्, न च परमात्मनि व्यभिचारः पक्षतुल्यत्वात्, आप्तकाम आत्मकाम इति श्रुतेः यथास्यात्मनः सकामत्वम्।

इदानीं स्वप्नावस्थामाह, भूय इति। 'तेनैव' येन यथा सुषुप्तिं गतः तेनैव यथावृत्य 'स्वप्नाय' स्वप्नं प्राप्तुं गच्छति।

जलौकावदिति। 'जलौका' तृणस्थ-कीटविशेषः। दृष्टान्तं विवृणोति, यथेति। सा यथा 'अग्रं' पादाग्रम् 'अग्रं' तृणं पादाग्रदेशं 'नयति' प्रापयति पादाभ्यां गृह्णाति, गृहीत्वा तत्र 'आत्मानं' देहं नयति, स्वयं गच्छति तत्रेत्यर्थः। किं कृत्वा ? 'परं सन्धय' परम् अग्रे वर्त्तमानं तृणादिकं सन्धाय अभिप्रेत्येत्यर्थः, छान्दसं धातोर्ह्रस्वत्वम्। अयमर्थः, सा यथा उत्तरं गृहीत्वैव पूर्वं त्यजति, एवमयं स्वप्नदेहाद्यालम्ब्यैव पूर्वावस्थां

यथैवैष कपालाष्टकं सन्नयति, तमेव स्तन इव लम्बते, वेद-देवयोनिः।

यत्र जाग्रति शुभाशुभं निरुक्तम् अस्य

सुषुप्त्यादिरूपां त्यजति, जाग्रदाद्यालम्ब्यैव स्वप्नादि त्यजति, एवं मरणे देहान्तरमालम्ब्यैव पूर्वं देहं त्यजति। तदुक्तम्,—

"यथा तृण-जलौकैवं देही कर्म्मानुगो वशः" इति। तथा, "यथा तृणजलायुका तृणस्यान्तं गत्वा" इत्यादि श्रुतिश्च।

इदानीं जाग्रत् स्थानमाह, यत्परमिति। यत् 'परम्' उत्तरम् 'अपरं' पूर्वं न त्यजति, अवस्थात्रितयानुगतं यत्र पश्यति, स जाग्रदभिधीयते। जाग्रति हि स्वप्न-सुषुप्तयोरप्यनुसन्धानं भवति। यद्वा, 'यत्' यत्र 'परं' धर्मम् 'अपरम्' अधर्मं न त्यजति, शुभाशुभाधिकारी भवति, स जाग्रत्। स्वप्ने तु कृतं शुभाशुभं न फलति।

नन्वेकस्यानेकावस्थाश्रयत्वं कथम्? इत्याशङ्क्य दृष्टान्तमाह, यथैवेष इति। 'एषः' देवदत्तादिः यथा अष्टौ कपालानि 'सन्नयति' समकालं वहति, तथा एकोऽप्यात्मा अनेकावस्था वहतीत्यर्थः।

ननु सङ्कोच-विकाशात्मकमवस्थात्रयं कथमेकरूपे आत्मनि? इत्याशङ्क्य दृष्टान्तेन साधयति, तमेवेति। 'तमेव' आत्मानम् आविर्भाव-तिरोभाव-स्वभावमप्यवस्थात्रयं 'लम्बते' श्रयति, स्तन इव सङ्कोच विकाशात्मकः एकरूपां स्त्रियम्, स जाग्रदेव 'वेददेव-योनिः' वेदयोनिः देवयोनिश्च।

कथं ज्ञायते जाग्रदेव वेद-देव-योनिः, न स्वप्नादिरिति, तत्राह, यत्रेति। यत्र जाग्रति पदस्थाने अस्य देवस्य शुभा-

देवस्य, सम्प्रसारोऽन्तर्यामी, खगः कर्कटकः पुष्करः पुरुषः प्राणो हिंसा परापरं ब्रह्मात्मा देवता वेदयति।

य एवं वेद, स परं ब्रह्मधाम क्षेत्रज्ञमुपैति, स परं ब्रह्मधाम क्षेत्रज्ञमुपैति॥ १॥

अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति, नाभि, हृदयं, कण्ठं, मूर्द्धेति।

शुभं 'निरुक्तं' नितरामुक्तं शुभाशुभफलञ्च वेद देवाधीनं; तेन ते जाग्रदुत्पन्ना इति भावः। नितरामुक्तमित्युक्तत्वात् स्वप्नेऽपि कियानपि फलसम्बन्धो भवतीति लक्ष्यते; अतएव स्वप्ननिमित्तरेतस्खलनादौ प्रायश्चित्त-स्मरणं शास्त्रे। स देवः 'सम्प्रसारः' सम्यक् प्रसारोऽस्मात् लोकस्येति। 'अन्तर्यामी' अन्तःस्थितो नियच्छति वागादीन्। अयं संयच्छतीत्यस्य उपसंहारः। खगो देशान्तरस्थ-वस्तुग्राहित्वात्; 'कर्कटः' जलचरप्राणिभेदः स एव कामितया वक्रगतिमत्त्वात् कर्कटकः; 'पुष्करः' पुष्टिकरः; यद्वा 'पुष्करं' गगनं तद्वत् स्वच्छः; 'पुरुषः' पुरि देहे वसति; 'प्राणः' प्राणकर्त्ता, तेन प्राण इत्युच्यते; 'हिंसा' हिंसको हिंस्रः 'परापरं' परं कारणम्, अपरं कार्य्यं, सगुणनिर्गुण-भेदेन वा स एव ब्रह्मा। तर्हि किं देहिनो भिन्नः? नेत्याह, आत्मेति। 'आत्मा' प्रत्यक्, तेन ब्रह्मात्मनोरभेद इत्यर्थः। सा देवता वेदयति सर्वचेतनत्वात् नान्योऽतोऽस्ति द्रष्टेति श्रुतेः।

फलम्…, य एवमिति। 'धाम' …धारं प्रकाशात्मकं वा, 'क्षेत्रज्ञं' साक्षिणम् 'उपैति' … …तिपद्यते।

तत्र चतुष्पादं ब्रह्म विभाति, ।

जागरितं, स्वप्नं सुषुप्तं, तुरीयमिति । जागरिते ब्रह्मा, स्वप्ने विष्णुः, सुषुप्ते रुद्रः, तुरीये परमक्षरम्, स आदित्यश्च विष्णुश्चेश्वरश्च, स पुरुषः स प्राणः स जीवः सोऽग्निः सेश्वरश्च जाग्रत्; तेषां मध्ये यत् परं ब्रह्म विभाति ।

'पुरुषस्य' उक्तलक्षणस्य स्थानानि, तत्र ध्याने सति शीघ्रमभिव्यक्तेः । 'नाभि' मणिपूरचक्रं, 'हृदयम्' अनाहतं, 'कण्ठ' कण्ठः विशुद्धिचक्रं, 'मूर्द्धा' आज्ञाचक्रम् । आधाराद्यनेक ध्यानस्थानसत्त्वेऽपि प्राशस्त्यर्थं चतुर्णां ग्रहणम्, यदुक्तम्,—

"आधारे प्रथमे चक्रे द्रुतकाञ्चन-सन्निभे ।
नासाग्रदृष्टिरात्मानं ध्यात्वा योगी सुखी भवेत् ॥
स्वाधिष्ठाने शुभे चक्रे, सन्माणिक्य-शिखोपमे ।
नासाग्रदृष्टिरात्मानं ध्यात्वा योगी सुखी भवेत्" ॥ इत्यादि।

ननु किमेतावन्त्येव स्थानानि निर्दिश्यन्ते नाधारादीनि ? इत्यत आह, तत्रेति । 'तत्र' तेषु स्थानेषु 'विभाति' विशेषेण भाति, मत्ध्यानेन प्रकाशते ।

के पादाः ? इत्यत आह, जागरितमिति । एषां पादत्वं पर्य्याय-व्याप्तत्वात्, आरोपितत्वेनानुत्तमाङ्गत्वात्, प्रवृत्तेस्तदधीनत्वाच्च । 'सः' चतुरवस्थः आत्मा आदित्यादिः, सेश्वरश्चेति स ईश्वरश्च । 'जाग्रत्' इति ब्रह्मणो विशेषणं देदीप्यमानमित्यर्थः । 'तेषां' जाग्रदादीनाम् ।

स्वयममनस्कमश्रोत्रमपाणिपादं ज्योतिर्वर्जितम्; न तत्र लोका न लोकाः, देवा न देवाः, वेदा न वेदाः, यज्ञा न यज्ञाः, माता न माता, पिता न पिता, स्नुषा न स्नुषा, चाण्डालो न चाण्डालः, पौल्कसो न पौल्कसः, श्रमणो न श्रमणः, पशवो न पशवः, तापसो न तापसः, इत्येकमेव परं ब्रह्म विभाति।

हृद्याकाशे तद्विज्ञानमाकाशं तत् शुषिरमाकाशं तद्वेद्यं हृद्याकाशं, तस्मिन्निदञ्च विचरति, यस्मिन्निदं सर्वमोतं प्रोतम्।

तस्य स्वरूपमाह, स्वयमिति। ज्योतिर्वर्जितं, किन्तु इन्द्रियादि-रहितमपि ज्योतीरूपमेव; 'स्नुषा' पुत्रवधूः, शूद्राद् ब्राह्मण्यां जातश्चाण्डालः। पौल्कस इति, निषादाच्छूद्रायां जातः 'पुल्कसः' भिल्लः, स एव पौल्कसः। श्रमण इति, सोऽपि नीचजातिभेदः,

"श्रमणा जातिभेदे च श्रमणो निन्द्यजीविनि"। इति विश्वः।

क्व भाति? किंरूपञ्च ब्रह्म? इत्यत आह, हृदीति। 'विज्ञानं' चिद्रूपम्, आकाशं स्वस्थं 'तत्' ब्रह्म। उभयोराकाशयोरविशेषमाशङ्क्य क्रमेण द्वयोर्लक्षणे आह, तत् शुषिरमिति।

मन्त्रेऽप्युक्तं—

"हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्"। इति।

स्वं विभोः प्रजाः संविज्ञायेरन् ।

न तत्र देवा लोका ऋषयः पितर ईशते,
प्रतिबुद्धः सर्वविदिति ।

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः ।
हृदि प्राणश्च ज्योतिश्च त्रिवृत् सूत्रञ्च यन्महत् ॥

हृदि चैतन्ये तिष्ठति ।

एतज्ज्ञानस्य फलं सर्वज्ञतामाह, स्वं विभोरिति। विभोः प्रजाः सम्यक् ज्ञायेरन्, यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवतीत्यर्थः; यच्छान्दोग्ये, "स यदि पितृलोक-कामो भवति, सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति, तेन पितृलोकेन सम्पन्नो महीयते" इत्यादि।

फलान्तरमाह, न तत्रेति। 'तत्र' ज्ञानिनि देवा ऋषयः पितरश्च न ईशते, ऋणत्रयातीतो भवतीत्यर्थः। प्रतिबुद्धो यः, सः 'सर्ववित्' सर्वमात्मत्वेन बुद्धवान्। न ह्यात्मन एव भयं भवतीति हेतोः।

विदित-वेदितव्यस्य सन्न्यासं विवक्षुर्बाह्यदेव-पूजादित्यागः साहसमित्याशङ्क्यान्तरेव सर्वमस्तीति प्रतिपादयति मन्त्रः, हृदिस्था इति। 'देवताः' ब्रह्मादयः, इन्द्रियाधिष्ठातारश्च, 'प्राणाः' वागादयः, 'प्राणः' मुख्यप्राणः 'ज्योतिः' विषयप्रकाशः।

शुद्धं ब्रह्म च सर्वमूलभूतमव्यक्तमपि ह्यद्येवास्तीत्याह, त्रिवृदिति। सत्त्व-रजस्तमसां परस्परसङ्करेण नवगुणमव्यक्तं 'त्रिवृत्' सर्वकर्म्माङ्गं बाह्यं नवतन्तुकञ्च सूत्रं, प्रकृतिश्च तत्त्वतः, 'महत्' अव्याकृतं निष्पन्नमुपवीतम्।

हृदि प्राणश्चेति मन्त्रस्थं हृदीति पदं व्याचष्टे, हृदि चैतन्ये तिष्ठतिति

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥
सशिखं वपनं कृत्वा वहिःसूत्रं त्यजेद्बुधः।
यदक्षरं परं ब्रह्म तत् सूत्रमिति धारयेत्॥
सूचनात् सूत्रमित्याहुः सूत्रं नाम परं पदम्।
तत् सूत्रं विदितं येन स विप्रो वेदपारगः॥

स्थूलोपवीतस्य वाचकं परिधानमन्त्रमाह, यज्ञेति। यत् हृदि चैतन्ये तिष्ठति यज्ञोपवीतं, तत् प्रतिमुञ्चेति योज्यम्। यस्मादेवं हृदि चैतन्ये तिष्ठति यज्ञोपवीतं, तस्मात् हृदयस्योपरि वहिर्विधार्य्यमाणं त्रैवर्णिकैरिदं यज्ञोपवीतं यज्ञोपवीतस्थानत्वात् चिद्वत् कायमादिसूत्रवत्त्वं वीर्य्यवत्तु कर्म्मकारणम्, 'अस्तु' भूयात्, 'तेजः' ब्रह्म-वर्चसादि, उभयं भूयादिति पुरोधे। 'यज्ञस्य' विष्णोः परमात्मानं 'उप' सामीप्येन 'वीतं' विविधभागं तं जीवस्वरूपं 'परम्' उत्कृष्टं 'पवित्र' सर्वपवित्रभूतं 'प्रजापतेः' प्रजानां पालयितुः 'यत्' सिद्धं सर्वव्यवहार-कारणं 'सहजं' स्वभावभूतम्, अथवा देहेन्द्रियादिभिः सहोत्पन्नं 'पुरस्तात्' पूर्वम् आयुष्करम् 'अग्र्यं' श्रेष्ठं 'प्रतिमुञ्च' सर्वतोऽविद्याविमोचनं कुरु, 'शुभ्रम्' उज्ज्वलं कृत्वा दिविमुक्तमित्यर्थः, 'परिमुञ्च' परिधेहि शिष्यबलप्रदं 'तेजः' तेजःप्रदञ्च अस्तु तव इति मन्त्रार्थः। अयं मन्त्रोऽपि हृदि चैतन्ये तिष्ठतीत्यन्वयः।

कर्म्माङ्गभूत-तदुपवीतत्यागेन सन्न्याससयोगमाह, सशिखमिति। 'वहिःसूत्रं' बाह्योपवीतं 'बुधः' विप्रः नस्यैवाधि-

तेन सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
तत् सूत्रं धारयेद्योगी योगवित्तत्त्व-दर्शिवान् ॥
बहिःसूत्रं त्यजेद्विद्वान् योगमुत्तममास्थितः ।
ब्रह्मभावमयं सूत्रं धारयेद्यः स चेतनः ॥
धारणात्तस्य सूत्रस्य नोच्छिष्टो नाशुचिर्भवेत् ।
सूत्रमन्तर्गतं येषां ज्ञानयज्ञोपवीतिनाम् ॥
ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः ।
ज्ञान-शिखिनो ज्ञाननिष्ठा ज्ञान-यज्ञोपवीतिनः ॥
ज्ञानमेव परं तेषां पवित्रं ज्ञानमुत्तमम् ।
अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा ।
स शिखीत्युच्यते विद्वानितरे केशधारिणः ॥
कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः ।
तैः सन्धार्य्यमिदं सूत्रं क्रियाङ्गं तद्धि वै स्मृतम् ॥

कारात् । सूचनादिति, 'सूच्यते' वेदान्तैर्निरूप्यते तत् सूत्रम् । नोच्छिष्ट इति एतन्मूलनाम दोषेण मस्करीति स्मृतिः ।

ध्यानाभ्यासं विधातुं वीतरागाणां कर्मण्यनधिकारात् सरागाणामेव तदित्याह, कर्मणीति । ये 'ब्राह्मणादयः' त्रयः कर्मण्यधिकृताः, ते सरागाः, तैरेव बहिःसूत्रं सम्यक् धार्य्यं न निवृत्तैः । 'हि' यस्मात् तत् कर्माङ्गं स्मृतम्, अङ्गि-निवृत्तौ अङ्गस्याप्रयोजनत्वात् ।

शिखा ज्ञानमयी यस्य उपवीतञ्च तन्मयम्।
ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः॥
इदं यज्ञोपवीतन्तु परमं यत्-परायणम्।
स विद्वान् यज्ञोपवीती स्यात् स यज्ञः स च यज्ञवित्॥

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्व-भूतान्तरात्मा।
कर्म्माध्यक्षः सर्व-भूताधिवासः
साक्षी चेता केवलो निर्गुणश्च॥ १॥

निवृत्तस्य शिखा-सूत्रादित्यागे प्रत्यवायाभावं वक्तुं तयो-रूपकमाह, शिखेति। 'ब्रह्मविदः' वेदविदः।

वाह्योपवीतिभ्यो ज्ञानोपवीतिनो विशेषमाह, इदमिति। 'इदं' ज्ञानाख्यं यज्ञोपवीतं 'यज्ञः' विष्णुः आत्मा, तस्य 'उपवीतं' वेष्टकं तदाकारमिति यावत्, तत् पवित्रं वाह्यापेक्षया, तच्च 'यत् परायणं' यस्य परमयनं सः विद्वान् 'स यज्ञः' स विष्णुः।

यल्लाभेन विविधबन्धो निवृत्तः; यत्प्रसादाद्दिव्यं चक्षुराप्तम्, मृत्युमुखाच्च निष्क्रान्तिः, तं प्रेष्ठतमं मन्त्राभ्यां स्तौति, एक इति। एकस्य सतो नानाभूतेषु स्थितिरलौकिको धर्मः। न च सत्त्वादौ दृष्टत्वात् लौकिक इति वाच्यम्, तत्स्वरूपातिरिक्तस्य सत्त्वादेरनभ्युपगमात्। 'सर्वव्यापी' एकस्य सतः सर्वव्याप्ति-रित्यद्भुतम्, 'सर्वभूतान्तरात्मा' एकस्य सर्वभूतान्तरत्वे दृष्टान्तो नास्ति, 'कर्माध्यक्षः' तत्फलदाता, 'सर्वभूताधिवासः' सर्वावस्थास्वाश्रयत्वाव्यभिचारात्, 'साक्षी' साक्षाद्दीक्षते,

एको मनीषी निष्क्रियाणां बहूना-
मेकं सततं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीराः
तेषां शान्तिः शाश्वती नेतरेषाम् ॥ २ ॥

आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरारणिम् ।
ध्यान-निर्मथनाभ्यासाद्देवं पश्येन्निगूढ़वत् ॥

तिलेषु तैलं दधनीव सर्पिः
आपः श्रोतःस्वरणीषु चाग्निः ।
एवमात्मात्मनि गृह्यतेऽसौ
सत्येनैनं तपसा येऽनुपश्यन्ति धीराः ॥

न त्विन्द्रियादिव्यवधानेन । चेता इति, चितेरणिच्, चेतयितेत्यर्थः । अथवा, पृथिव्यादि-सञ्चयनकर्त्ता, 'केवलः' सजातीय भेदशून्यः, 'निर्गुणः' अद्वितीयत्वात् ॥ १ ॥

'एको मनीषी' असाधारणः पण्डितः, अनेन ज्ञानशक्तिरुक्ता । निष्क्रियाणां बहूनां मध्ये 'एकः' क्रियावान् ; निर्धारणस्य स्वजातीयापेक्षत्वात् । अनेन क्रियाशक्तिरुक्ता । 'एकम्' आत्मानं सततं यो बहुधा करोति मायित्वात्, 'आत्मस्थं' बुद्धिस्थं. 'धीराः' धीमन्तः 'शाश्वती शान्तिः' मोक्षः, न 'इतरेषाम्' उक्तसाधन-रहितानाम् ॥ २ ॥

आत्मानं बुद्धिं, निगूढ़वत् जलूकानिक्षिप्तेन तुल्यं स्थितं देवं 'पश्येत्' साक्षात् कुर्य्यात् ।

'आत्मा' ईशः 'आत्मनि' बुद्धौ 'सत्येन' वाग्नियमेन 'तपसा' शरीरनियमेन ।

ऊर्णनाभिर्यथा तन्तून् सृजते संहरत्यपि।
जाग्रत् स्वप्ने तथा जीवो गच्छत्यागच्छते पुनः॥
पद्मकोश-प्रतीकाशं शुषिरञ्चाप्यधोमुखम्।
हृदयं तद्विजानीयाद्विश्वस्यायतनं महत्॥
नेत्रस्थं जाग्रतं विद्यात् कण्ठे स्वप्नं विनिर्दिशेत्।
सुषुप्तं हृदयस्थन्तु तुरीयं मूर्ध्नि संस्थितम्॥
यदात्मा प्रज्ञयात्मानं सन्धत्ते परमात्मनि।

'जाग्रत्' जीवः यथा स्वप्नदशां गच्छति, तथा पुनः स्वप्नादागच्छते जाग्रद्दशां गच्छति।

हृदये ध्येयत्वात् हृदयलक्षणमाह, पद्मेति। मुखे 'शुषिः' विलम् अस्यास्ति तत् 'अधोमुखं' कदलीकोषवत् 'हृदयं' मांसमयं पद्मं तज्ज्ञेयं तदेव 'विश्वस्यायतनं' सर्वस्य स्थानम्। ननु कथं सूक्ष्मे विश्वं मातीत्यत आह, महदिति।

ननु विरोधः, अतएव केचित् शून्यं तत्त्वं प्रतिपन्नाः, अपरं ज्ञानस्यैवान्तरत्वात् साकारं ज्ञानम्, अनिर्वचनीयं विश्वमित्याचार्य्याः, वटवीजन्यायमपरे, वस्तुतत्त्वन्त्वेको देव एव ज्ञातुमर्हतीति, अनुभवस्तु हृद्येव वस्तुमात्रस्यास्ति वहिःस्थमप्यन्तरेव भाति, अन्तः शून्यानां न किञ्चिद्भाति ; अतोऽनुभवाद् गृहीतया श्रुत्या हृदयस्य महत्त्वं सिद्धम्।

अवस्थाविशेषे पुंसः स्थानभेदमाह, नेत्रस्थमिति। हृदयस्थमिति। पुरीतति स्थितं तुरीयमिति। यदुक्तम्,—

"मनसा सह वागीशा भित्त्वा ब्रह्मार्गलं क्षणात्।
परामृत-महाम्भोधौ विश्रान्तिं तत्र कारयेत्"॥ इति।

तेन सन्ध्याध्यानमेव, तस्मात् सन्ध्याभिवन्दनम् ॥
निरोदका ध्यानसन्ध्या वाक्-काय-क्लेशवर्जिता ।
सन्धिनी सर्वभूतानां सा सन्ध्या ह्येकदण्डिनाम् ॥
यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह ।
आनन्दमेतज्जीवस्य यं ज्ञात्वा मुच्यते बुधः ॥
सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
आत्मविद्या-तपोमूलं तद्ब्रह्मोपनिषत् परम् ॥
सर्वात्मैकत्व-सारेण तद्ब्रह्मोपनिषत् परम् ।
तद्ब्रह्मोपनिषत् परम् ॥

तृतीयः खण्डः ॥ ३ ॥

इत्यथर्ववेदे ब्रह्मोपनिषत् समाप्ता ॥ १६ ॥

तद्ध्यानमेव सन्ध्येत्याह, यदेति । 'निरोदका' निर्गतमाम-मन्त्रादुदकं यस्याः सा, तथा 'सन्धिनी' एकत्वबोधिका,

'आनन्दम्' आनन्दः 'एतत्' एषः ; 'यम्' आनन्दं ज्ञात्वा मुच्यते । यमित्यस्य विशेषणद्वयं सर्वेति ।

इदानीमेतद् ग्रन्थस्य नाम निर्वक्ति, आत्मेति । ब्रह्म आत्मा यस्य उपनिषत् विद्या, सैव तपः, "यस्य ज्ञानमयं तपः" इति श्रुतेः, तस्य 'मूलं' परं कारणम्, अयं ग्रन्थ इत्युपचारात् ग्रन्थोऽपि ब्रह्मोपनिषदित्यर्थः । तदस्माभिरुक्तयन्तरमाह, सर्वेति । सर्वं ब्रह्मेत्युपनिषद्रहस्य-ज्ञानं यस्याः सा ब्रह्मोपनिषदित्यर्थः । द्विरुक्तिः समाप्त्यर्था, इति शब्दश्च तद्द्योतकः ।

प्राणाग्निहोत्रोपनिषत् ।

ओम् अथातः सर्वोपनिषत्सारं संसारज्ञान-मधीतमन्त्रसूत्रं शारीरयज्ञं व्याख्यास्यामः ।

अस्मिन्नेव पुरुषशरीरे विनाप्यग्निहोत्रेण, विनापि साङ्ख्ययोगेन संसार-विमुक्तिर्भवतीति स्वेन विधिना अन्नं भूमौ निक्षिप्य, या ओषधयः सोमराज्ञीरिति तिसृभिः, अन्नपत इति द्वाभ्या-मनुमन्त्रयते ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानां ब्रह्मोपनिषद्दीपिका ॥
इति ब्रह्मोपनिषदो दीपिका सम्पूर्णा ॥ १६ ॥

प्राणाग्निहोत्रोपनिषत् चतुःखण्ड-विराजिता ।
एकादशी शौनकीये सारभूता हि सर्वतः ॥ १ ॥

ननु विरक्तस्यापि देहस्थितये अन्नादनमावश्यकं, तच्च मुक्तावनुपयुक्तत्वादनर्थकं स्यादित्याशङ्क्य उपासनया सार्थक-त्वाय अग्निहोत्रोपनिषदारभ्यते, अथात इति । 'संसारज्ञानं' संसारो हेयतया ज्ञायतेऽनेनेति, अधीतं वेदेषु, अन्नमेव 'सूत्रं' साधनं यस्मिन्, 'शारीरयज्ञं' शरीरे भवं यज्ञम् ।

प्ररोचनार्थमादौ फलमाह, अस्मिन्निति । 'स्वेन' स्वगृह्यो-क्तेन, अन्नं भूमाविति न त्वन्तरिति यदादावन्नपात्रमारोप्य-मित्यर्थः । यद्वा व्याहृतिभिर्बलित्रयं भूमौ दत्त्वेत्यर्थः ।

या ओषधयः सोमराज्ञीर्वह्वीः शतविलक्षणाः ।
बृहस्पति-प्रसूतास्ता नो मुञ्चन्त्वंहसः ॥
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पति-प्रसूतास्ता नो मुञ्चन्त्वंहसः ॥
जीवलां नघारिषां मा ते बध्नाम्योषधे ! ।
यातयापुरुपहरादप रक्षांसि चातयात् ॥
अन्नपतेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः ।
प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥

सोमराज्ञीति । सोमो राजा यासां ताः सोमराज्य इत्यर्थः, ताः 'नः' अस्मान् 'अंहसः' पापात् मुञ्चन्तु इत्यन्वयः । 'शतम्' अनेकजातीयाः, 'विलक्षणाः' रोगाद्यपनयनाः । तयोः कर्म्मधारयः । बृहस्पतिना 'प्रसूताः' दर्शितवीर्य्याः ।

'जीवलां' जीवं लाति आदत्ते सा विषौषधिरित्यर्थः, तां 'नघारिषां' हर्षाजननीम् उद्वेग-कारिणीं, यथा लाङ्गली गृहोपरि निक्षिप्ता कलहं करोति कुटुम्बिनां, तादृशीं ; हे 'ओषधे' ! हे वनभवे ! 'ते' तव त्वत्सम्बन्धिनीं त्वत्स्वामिकां तां 'मा बध्नामि' न स्वीयां करोमि । 'उपहरात्' उपहरेत, रक्षांसि च अप 'आतयात्' आयात् आगतानि कुर्य्यात्, तां मा बध्नामीत्यन्वयः ।

'अनमीवस्य' न अमीवं पापं यस्य, 'शुष्मिणः' तेजस्विनः । "शुष्मं तेजोऽर्कयोरुक्तम्" इति विश्वः । 'प्रप्रदातारं' "प्रसमुपोदः पादपूरणे" इति प्रशब्दस्य द्विर्भावः । 'तारिषः' तारय ऊर्द्ध्वं लोकं नय, 'ऊर्जम्' अन्नं बलं वा 'नः' अस्मभ्यं 'धेहि' देहि

ओं यदन्नमग्निर्बहुधा विराद्धि
रुद्रैः प्रजग्धं यदि वा पिशाचैः।
सर्वं तदीशानो अभयं कृणोतु शिवमीशानाय स्वाहा॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञस्त्वं ब्रह्मा त्वं रुद्रस्त्वं विष्णुस्त्वं वषट्कारः॥
आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरों नमः।
आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु माम्।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्॥
यदुच्छिष्टमभोज्यञ्च यद्वा दुश्चरितं मम।
सर्वं पुनन्तु मामापो असताञ्च प्रतिग्रहम्॥

"डुधाञ्लि धारणे पुष्टौ दाने" इति वोपदेवः। 'द्विपदे' मनुष्याय।

'विराद्धि' सिद्धिविरोधि विराद्धेरवाह, रुद्रैरिति। रुद्रपिशाचादिभ्यो यजमानेनार्पितमित्यर्थः, सर्वं 'तत्' अन्नम् 'ईशानः' परमात्मा 'अभयं' भयाजनकं 'कृणोतु' करोतु, तदर्थम् ईशानाय स्वाहा, आहुतिं ददामीत्यर्थः।

जठराग्नेः प्रार्थना, अन्तरिति।

अपां प्रार्थना, आपो ज्योतिरित्यादि। हे आपः! यूयं 'ज्योतिः' आदिरूपाः स्थ, तेभ्य ओं नम इत्यन्वयः।

आपः पुनन्त्विति तासामिवापरो मन्त्रः। पूता सती मां पुनातु। 'ब्रह्मणस्पतिः' ब्रह्मणस्पतयः पृथिवीं पुनन्तु, 'ब्रह्मपूता' ब्रह्मभिः ब्राह्मणैः पवित्रिता पृथिवी मां पुनातु। मम उच्छिष्टादि सर्वं तदापः 'पुनन्तु' शोधयन्तु इत्यन्वयः।

आपोऽमृतमस्यमृतोपस्तरणमस्यमृतञ्च प्राणे जुहोमि, अमा शिष्यान्तोऽसि प्राणाय प्राधानाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, समानाय स्वाहा, उदानाय स्वाहा, इति कनिष्ठयाङ्गुल्या अङ्गुष्ठेन च प्राणे जुहोमि, अनामिकया अपाने, मध्यमया व्याने, प्रदेशिन्या समाने, सर्वाभिरुदाने, तूष्णीमेकामेकऋषौ जुहोति। द्वे आहवनीये एकां दक्षिणाग्नावेकां गार्हपत्ये एकां सर्वप्रायश्चित्तीये।

प्रथमः खण्डः ॥ १ ॥

अथापिधानमस्यमृतत्वाय उपदधामीत्युपस्पृश्य पुनरादाय पुनरुपस्पृशेत्। स ते प्राणा वापो गृहीत्वा हृदयमन्वालभ्य जपेत्।

आपोऽमृतमसीति, हे आपः! आप्नोतेरसन्, विधेय-वचनानुरोधेन वा असीत्येकवचनम्। अमा सह हे शिष्य प्राण! 'अन्तोऽसि' अमितोऽसि भोजितोऽसि। अम् गतौ भोजने शब्दे। अनामिकया इत्यादौ अङ्गुष्ठः सर्वत्रान्वेति। 'एकऋषौ' अग्नौ तत्राग्नि सूर्य्ये, 'आहवनीये' दर्शनाग्नौ मुखस्थे, 'दक्षिणाग्नौ' शरीराग्नौ हृदयस्थे, 'गार्हपत्ये' कोष्ठाग्नौ नाभिस्थे, सर्वप्रायश्चित्तीये नाभेरधःस्थिते।

'अपिधानम्' आच्छादनम्। अनेन मन्त्रेण द्विराचम्य

प्राणो अग्नि: परमात्मा पञ्चवायुभिरावृत: ।
अभयं सर्वभूतेभ्यो न भवेऽहं कदाचन ॥ इति ।

विश्वोऽसि वैश्वानरो विश्वरूपो
विश्वं त्वया धार्य्यते जायमानम् ।
विश्वन्तु त्वाहुतय: सर्वा
यत्र ब्रह्मा विश्वामृतोऽसि ॥ इति ।

महानवोऽयं पुरुषो योऽङ्गुष्ठाग्रे प्रतिष्ठित: ।
तमद्भि: परिषिञ्चामि सोऽस्यान्ते अमृताय योनौ ॥ इति

एष एवात्मा ध्यायेताग्निहोत्रं जुहोमीति ।
सर्वेषामेव सूनुर्भवति ।

ततो वामेन उदकं गृहीत्वा दक्षिणेन हृदयम् 'आलभ्य' स्पृष्ट्वा अमृतोऽसीत्यन्तं जपेत् ।

अभयमिति । सर्वभूतेभ्योऽभयं भवेत् । अहं 'कदाचन' कदाचिदपि न भवे अपि तु भवेयमेवेत्यन्वय: ।

इमे द्वे प्रार्थने । विश्वन्त्विति । विश्वमिव 'त्वा' तव सर्वा आहुतय: । 'यत्र' विश्वस्मिन् ब्रह्मा वर्त्तते, ब्रह्मादिस्तम्बपर्य्यन्तं जगत् तव आहुतय इत्यर्थ: । तर्हि त्वमपि कस्यचिदाहुति: स्या: ? अत आह, विश्वामृत इति । 'विश्वामृतोऽसि' विश्वेषु नित्योऽसि ।

महानिति । 'अव:' अन्नं तर्पक इत्यर्थ: ; 'अमृताय योनौ' निषेकस्थाने अमृतभावाय ; अनेन दक्षिणाङ्गुष्ठाग्रं सिञ्चेत् ।

'एष:' भोक्ता अङ्गुष्ठाग्रे स्थित', स एवात्मा ज्ञेय: । अत्राग्निहोत्र बुद्धि: कर्त्तव्येत्याह, ध्यायेतेति । 'सूनु:' जनक:

अथ यज्ञपरिवृतयाहुतीर्होमयति स्वे शरीरे यज्ञं परिवर्त्तयामीति, चत्वारोऽग्नयः ; ते किं नामधेयाः ?। तत्र सूर्य्योऽग्निर्नाम सूर्य्यमण्डलाकृतिः सहस्ररश्मिभिः परिवृत एकऋषिर्भूत्वा मूर्द्धनि तिष्ठति। यस्मादुक्तो दर्शनाग्निर्नाम चतुराकृतिराहवनीयो भूत्वा मुखे तिष्ठति।

शारीराग्निर्नाम जराप्रणुद्रा हविरविस्कन्दति। अर्द्धचन्द्राकृतिर्दक्षिणाग्निर्भूत्वा हृदये तिष्ठति।

सोता, सूत इति व्युत्पत्त्या, न तु रूढ्या, "सूनुः पुत्रेऽनुजे रवौ" इति विश्वोक्तेः। यद्वा 'सूनुः' पुत्रः यथा पितुस्तर्पकः, एवं सर्वेषां तर्पको भवतीत्यर्थः।

यज्ञपरिवृते इति। यज्ञपरिवर्त्तनाय, सम्पदादित्वात् क्विप्। 'अथ' अग्निहोत्रबुद्ध्यनन्तरम्, अधिकारप्राप्तौ आहुतयो यास्ता यज्ञबुद्ध्या 'होमयति' मुखे क्षिपति यज्ञं परिवर्त्तयामीति बुद्ध्या। चत्वार इति। पञ्चमस्य प्रायश्चित्तीयस्य असार्वत्रिकत्वात्।

उपासनार्थं नामानि पृच्छति, ते इति। यस्मादुक्त इति पूर्वेण सम्बध्यते, यस्मात् सूर्य्यः सहस्रदलाधिष्ठातेति वेदेषु उक्तः। तदधस्तनमग्निमाह, दर्शनाग्निरिति। 'चतुराकृतिः' चतुरस्राकृतिः। मुखे इति। तदुक्तम्,—

"जिह्वामूले स्थितो देवि ! सर्वतेजोमयोऽनलः।
तदग्रे भास्करश्चन्द्रस्तालुमूले प्रतिष्ठितः" ॥ इति।

तृतीयाग्निमाह, शारीरेति। 'शारीराग्निः' जठराग्निः

तत्र कोष्ठाग्निरिति, कोष्ठाग्निर्नामाशित-पीत-लीढ़-खादितानि सम्यक् श्रपयित्वा गार्हपत्यो भूत्वा नाभ्यां तिष्ठति। प्रायश्चित्तीयस्त्वधस्तात् स्त्रियस्तिस्रो हिमांशुप्रभाभिः प्रजननकर्म्मा।

द्वितीयः खण्डः ॥ २ ॥

ज्ञानाग्निः शुभाशुभभोक्ता, 'जराप्रणुदा' जरां प्रणुदति, क्विप् प्रत्ययः। अजरो न जीवो म्रियत इति श्रुतेः। हृदये इति। तदुक्तम्, "हृत्सरोरुहमध्येऽस्मिन्" इत्युपक्रम्य,

"विश्वार्च्चिषं महावह्निं ज्वलन्तं विश्वतो मुखम्" इत्यादि।

'हविः' भुक्तम् 'अविस्कन्दति' अवस्कन्दति शोषयति तद्रसं गृह्णातीत्यर्थः।

तत्र कोष्ठाग्निरिति य उक्तः, स निरूप्यते इति शेषः। प्रतिज्ञातमर्थं दर्शयति, कोष्ठाग्निर्नामेति। 'अशितं' चोष्यं 'लीढ़' लेह्यम्। नाभ्यामिति। तदुक्तम्,—

"नाभिमध्ये भवत्येष भास्करो देहनायकः"। इति।

प्रायश्चित्तीयस्तु अधस्तादवर्त्तते सर्वेषामिति शेषः। तदुक्तम्,—

"त्रिकोणञ्च पुरं वह्नेरधो मेढ्रादवस्थितम्" इति।

स्त्रियस्तिस्रो यस्य वर्त्तन्ते इति शेषः। नाड़ीनां बाहुल्येऽपि मुख्या नाड्यस्तिस्र एव, इडा-पिङ्गला-सुषुम्णाः; ताभिः किं करोति? इत्यत आह, हिमांश्विति। 'हिमांशोः' ललाटस्थ-चन्द्रमण्डलात् नाड़ीद्वारा च्युताभिः 'प्रभाभिः' शुक्ररूपाभिः 'प्रजननं' प्रजोत्पत्तिः कर्म्म यस्य सः, तथा पुंलिङ्गमूलं ह्यग्नि-कुण्डमध्येऽस्ति; तेनाग्निकुण्डे पतितं शुक्रं प्राणेन

अस्य शरीरयज्ञस्य यूप रशना-शोभितस्य को यजमानः? का पत्नी? के ऋत्विजः? कोऽध्वर्य्युः? को होता? को ब्राह्मणाच्छंसी? कः प्रतिप्रस्थाता? कः प्रस्तोता? को मैत्रावरुणः? क उद्गाता? के सदस्याः? कानि यज्ञपात्राणि? कानि हवींषि? का वेदिः? का उत्तरवेदिः? केडा? को द्रोणकलशः? को रथः? कः पशुः? कः धारापोता? के दर्भाः? कः स्रुवः? का आज्यस्थाली? का वाघारौ? का वाज्यभागौ? के प्रयाजाः? के अनुयाजाः? कः सूक्तवाकः? कः शंयोर्वाकः? का अहिंसा? के पत्नीसंयाजाः? को यूपः? का रशना? का इष्टयः? का दक्षिणा किमवभृथमिति।

तृतीयः खण्डः ॥ ३ ॥

अस्य शरीरयज्ञस्य यूप-रशना-शोभितस्य आत्मा

ष्टं लिङ्गाग्रेण गर्भाशयं प्रविश्य प्रजा भवति; तेनाग्नीषोमात्मकं शरीरमुच्यते।

शरीरयज्ञस्य यूपेनोङ्कारेण रशनयाशया शोभितस्य उपकरणानि पृच्छन्ति, पृच्छा चोत्तरार्थं क्वचित् क्रमेण, क्वचिदुत्क्रमेणानास्थया दृष्टि सम्पादन एव तात्पर्य्यात्। 'केडा' का इडा,।

यजमानः, बुद्धिः पत्नी, वेदा महर्त्विजः, प्राणो ब्राह्मणाच्छंसी, अपानः प्रतिप्रस्थाता, व्यानः प्रस्तोता, समानो मैत्रावरुणः, उदान उद्गाता, अहङ्कारोऽध्वर्युः, होता चित्तं, शरीरं वेदिः, नासिकोत्तरवेदिः, मूर्द्धा द्रोणकलशः, दक्षिण-हस्तः स्रुवः, सव्यहस्त आज्यस्थाली, श्रोत्रे आघारौ, चक्षुषी आज्यभागौ, ग्रीवा धारापोता, तन्मात्राणि सदस्याः, महाभूतानि प्रयाजाः, भूतान्यनुयाजाः, जिह्वेडा, दन्तोष्ठौ सूक्तवाकः, तालुः संयोर्वाकः, स्मृतिर्दयाक्षान्तिरहिंसा पत्नीसंयाजाः, ओङ्कारो यूपः, आशा रशना, मनो रथः, कामः पशुः, केशा दर्भाः, बुद्धीन्द्रियाणि यज्ञपात्राणि, कर्मेन्द्रियाणि हवींषि, अहिंसा इष्टयः, त्यागो दक्षिणा, अवभृथं मरणात्।

वेदाः 'महर्त्विजः' ऋत्विजामपि ऋत्विजः सर्वेषामुपदेष्टृत्वात्। सामान्य-प्रश्नस्य विशेष-पर्य्यवसायित्वात् विशेषेणोत्तरं प्राण इत्यादिना। आत्मादीनां यजमानादिसाम्यं स्वातन्त्र्यादिना यथासम्भवमूहनीयम्, 'ग्रीवा' कन्धरा 'धारा-पोता' धाराभिरुपलक्षितः पोता पावमानाध्येता, 'जिह्वेडा' जिह्वा इडा पात्रविशेषः; स्मृतिः, दया, क्षान्तिः, अहिंसा,

सर्वा ह्यस्मिन् देवताः शरीरेऽधिसमाहिताः ।
वाराणस्यां मृतो वापि इदं वा ब्रह्म यः पठेत् ।
एकेन जन्मना जन्तुर्मोक्षञ्च प्राप्नुयादिति ।
मोक्षञ्च प्राप्नुयादिति ।
चतुर्थः खण्डः ॥ ४ ॥
इत्यथर्ववेदे प्राणाग्निहोत्रोपनिषत् समाप्ता ॥१७॥

नीलरुद्रोपनिषत् ।

ओम् अपश्यं त्वावरोहन्तं दिवितः पृथिवीमवः ।

चत्वारः पत्नीसंयाजाः, 'मनो रथः' मन एव रथः, 'मरणात्' देहाद्य-मलापनयनात्, 'अवभृथः' यजमानस्य यज्ञान्तस्नानम् ।

नन भवन्तु यज्ञोपकरणानि, तथापि देवताऽभावे कथं यज्ञः स्यात्? इत्यत आह, सर्वा ह्रीति । यावदधिदैवतं तावदध्यात्मं वर्त्तते, चक्षुरादीनां सूर्य्याद्यधिष्ठितत्वादिति भावः । ननु ज्ञानाभावे कथं मोक्षः? इत्याशङ्का वाराणसी-मरणं दृष्टान्त', । द्विरुक्तिः समाप्त्यर्था ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपद-वाक्यानामग्निहोत्रस्य दीपिका ॥
इति प्राणाग्नि-होत्रोपनिषदो दीपिका सम्पूर्णा ॥१७॥

श्रीं नीलरुद्रोपनिषदि षोड़श्यां खण्डकत्रयम् ।
श्रुतिरूपेण तं देवं स्तौत्यपश्यमिति क्रमात् ॥ १ ॥
असमग्रंयोगमुद्रा तत्सम्प्रदाय-प्रवर्त्तकं परमगुरुं योगसिद्धि-

अपश्यमस्यन्तं रुद्रं नीलग्रीवं शिखण्डिनम्॥ १॥
दिव उग्रो अवारुक्षत् प्रत्यष्ठाद्भूम्यामधि।
जनासः पश्यते महं नीलग्रीवं विलोहितम्॥ २॥
एष एत्यवीरहा रुद्रो जलास-भेषजाः।
यत्तेऽक्षेममनीनशद्-वातीकारोऽप्येतु ते॥ ३॥

श्रद्रं नीलरुद्रं स्तौति, अपश्यमिति। 'दिवितः' दिवः 'पृथिवीं' भूमिम् 'अवः' अधस्तात् अवरोहन्तं 'त्वा' त्वाम् अहमपश्यमिति मन्त्रद्रष्टुर्वचः। 'अस्यन्तम्' असुक्षेपणे, क्षिपन्तं दुष्टान्, 'शिखण्डिनं' "शिखण्डो बर्ह-चूड़योः" इति विश्वः। तयोरन्यतरदस्यास्ति शिखण्डी, तम्।

दिवः सकाशात् 'उग्रः' रुद्रः 'अवारुक्षत्' अवतीर्णवान्, 'प्रत्यष्ठात्' प्रतिष्ठां स्थितिं कृतवान्, 'भूम्यामधि' अधिरीश्वरे इति, अधिः कर्म्मप्रवचनीयः, यस्मादधिकं यस्य चेश्वर-वचनमिति तत्र सप्तमी, भूमेरीश्वरः इत्यर्थः।

'जनासः' आज्जसेरसुक्, सम्बोधने चेति प्रथमा। 'एति' आगच्छति, न वीरहा 'अवीरहा' सौम्यः; यद्वा 'अवीराणि' पापानि हन्तीत्यवीरहा, जले 'आसः' क्षेपो यासां ताः जलासाः, ताश्च ता भेषजाश्च, ता एतीत्यन्वयः, जलक्षिप्तानामोषधीनामक्षेम—निर्वीजकत्वं रुद्रसन्निधानादेव। यत् 'ते' तव अक्षेममनीनशत्; अनेन क्षेमकारित्वमुक्तम्।

अलब्धलाभो योगः, तत्कारित्वमप्याह, वातीकार इति। 'वातिः' प्राप्तिः, अप्राप्तं प्राप्तं करोतीति वातीकारः, सोऽपि ते तव अपूर्वलाभकरः 'एतु' आगच्छतु, योग-क्षेमकरोऽभि-

नमस्ते भवभावाय नमस्ते भाममन्यवे ।
नमस्ते अस्तु बाहुभ्यामुतो त इषवे नमः ॥ ४ ॥
यामिषुं गिरिशन्तं हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र ! तां कृणु मा हिंसीत् पुरुषान्मम ॥५॥
शिवेन वचसा त्वा गिरिशाच्छावदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ॥ ६ ॥
या ते इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो मृड जीवसे ॥७॥

षेकजले सन्निहितो भवत्वित्यर्थः । मन्त्रलिङ्गादभिषेके विनियोगः ।

'भामः' क्रोधः, 'मन्युः' तत्पूर्वावस्था, 'उतः' उ ते 'इषवे' वाणरूपाय ।

'अस्तवे' असुक्षेपणे तवेत्प्रत्ययस्तुमर्थे, अस्तुं क्षेप्तुमित्यर्थः । कं क्षेप्तुं ? 'गिरिशन्तं' श्यति श्यन्, गिरेः श्यन् गिरिश्यन्, सम्बन्धसामान्ये षष्ठीसमासः । तं गिरिशन्तं, छान्दसो य-लोपः । हे 'गिरित्र !' गिरिरक्षक ! तां 'शिवां' कल्याणीं 'कृणु' कुरु ।

'अच्छावदामसि' 'अच्छं' निर्म्मलं वदाम, अच्छशब्दस्य निपातस्येति दीर्घः । इदन्तो मसि इदमर्थको निपातश्च । 'अयक्ष्मं' नीरोगं 'सुमनाः' सुमनस्कम् 'असत्' भवेत् लिङर्थ लेट् तिप्, इतश्च लोपः परस्मै पदेषु लेटोऽडाटावित्यट् ।

'शरव्या' शरसन्धायिनी ज्या, "शरो दध्यग्र-वाणयोः" इति

या ते रुद्र ! शिवा तनूरघोरा पापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशं त्वाभिचाकशत्॥८॥
असौ यस्ताम्रो अरुण उत बभ्रुर्विलोहितः ।
ये चेमे अभितो रुद्रा दिक्षु श्रिताः सहस्रशो
वैषां हेड़ ईमहे ॥ ६ ॥

प्रथमः खण्डः ॥ १ ॥

अदृशन् त्वावरोहन्तं नीलग्रीवं विलोहितम् ।
उत त्वा गोपा अदृशन्नुत त्वोदहार्य्यः ।
उत त्वा विश्वा भूतानि तस्मै दृष्टाय ते नमः॥१०॥

विश्वः । शरमर्हति यत्, "अव शरस्य" इति अवादेशः । यद्वा शरुःव्रताद्वा सिद्ध "शरुरायुध-कोपयोः" इति विश्वः । उगवादिभ्यो यत्; 'जीवसे' जीवितुं 'मृड़' मोदय ; यद्वा हे मृड़ ! 'तया' तन्वा 'नः' अस्मान् जीवयसि ।

'शन्तमया' अतिशयेन शं शन्तमा तया, 'अभिचाकशत्' कशेर्यङ्लुगन्ताल्लोट तिप्, अट्, अतिशयेन प्रकाशयत्विति प्रार्थना ।

'बभ्रुः' पिङ्गलः, वा एषां ह 'ईडे' स्तुतये 'ईमहे' कामयामहे ॥

'गोपा' गोपालाः 'अदृशन्' अपश्यन् 'उदहार्य्यः' पानीयहारिण्यः । 'विश्वाः' विश्वानि भूतानि अदृशन्, योगिनामप्यदृश्यं त्वां कृपया आविर्भवन्तम् आदित्यवत् प्रकाशमानं पामरा अपि ददृशुरित्यर्थः । 'वाजिने' नेत्रवते बाणरूपाय वा, सीदन्तीति 'सत्वानः' गणाः ।

नमोऽस्तु नीलशिखण्डाय सहस्राक्षाय वाजिने ।
अथो ये अस्य सत्वानस्तेभ्योऽहमकरं नमः ॥११॥
नमांसि त आयुधायानातताय धृष्णवे ।
उभाभ्यामकरं नमो बाहुभ्यां तव धन्वने ॥ १२ ॥
प्रमुञ्च धन्वनस्त्वमुभयो राज्ञोर्ज्याम् ।
याश्च ते हस्त इषवः परस्ता भगवो वप ॥ १३ ॥
अवतत्य धनुस्त्वं सहस्राक्ष ! शतेषुधे ! ।
निशीर्य्य शल्यानां मुखा शिवो नः शम्भुराभरः १४
विज्यं धनुः शिखण्डिनो विशल्यो बाणवानुत ।
अनेशन्नस्येषवः शिवो अस्य निषङ्गतिः ॥ १५ ॥

'नमांसि' नमस्काराः, 'न आतताय' अनातताय, 'धृष्णवे' प्रगल्भाय, बाहुभ्यां कृत्वा धन्वने नमोऽकरवमित्यर्थः ।

'उभयोः' अरि-प्रत्यरि-भूतयोः राज्ञोर्धन्वनो ज्यां 'प्रमुञ्च' अनाततां कुरु, राज्ञोर्विग्रहे लोकानां क्लेशो भवति ; ततस्तं शमय इति भावः । हे भगवः यास्ते हस्ते 'इषवः' बाणाः, ताः 'परावप' पराङ्मुखं मुञ्च, त्वमपि कोपं लोकेषु माकृथा इति भावः ।

इन्द्ररूपेण जगद्रक्षा इति प्रार्थयते । अवतत्येति । धनुः त्वमधिज्य कृत्वा 'सहस्राक्ष !' शक्ररूप ! शतं 'इषुधयः' तूणा यद्रूपा यस्य तत्सम्बोधनं, 'निशीर्य्य' तीक्ष्णीकृत्य 'मुखा' मुखानि 'नः' अस्मान्, 'शिवः' कल्याणरूपः 'शम्भुः' सुखहेतुः सन् 'आभर' धारय पोषय वा ।

'बाणवान्' तूणीरः विशल्योऽस्तु तोमररहितो भवतु, वैरिषु

परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः।
अथो य इषुधिस्तवारे! अस्मिन्निधेहि तम्॥१६॥
या ते हेतिर्मीढुष्टम! हस्ते बभूव ते धनुः।
तया त्वं विश्वतो अस्मानयक्ष्मया परिभुज॥१७॥
नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥१८॥
ये चामी रोचने दिवि ये च सूर्य्यस्य रश्मिषु।
येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः॥१९॥
या इषवो यातुधानानां ये वा वनस्पतीनाम्।
ये वाऽवटेषु शेरते तेभ्य. सर्पेभ्यो नमः॥२०॥

द्वितीयः खण्डः॥२॥

हतेषु तत्-प्रयोजनाभावात्। 'अनेशन्' अदृश्या अभुवन्. नशिषमुमो वलिय्येत्वमिति वार्त्तिकेन लुङि पुषाद्यङि एत्वम्. 'निषङ्गतिः' निषङ्गः।

'विश्वतः' सर्वतः, अस्मान् 'परिवृणक्तु' परिरक्षतु, अरे सम्बोधने, 'अथो' पश्चात् रक्षणानन्तरं यः तव इषुधिः, अस्मिन् 'तं' हेतिं वाणं निधेहि स्थापय।

हे मीढुष्टम! सेवकतमं 'अयक्ष्मया' अयक्ष्मया 'तया' हेत्या 'परिभुज' परिपालय।

'सदस्कृतं' गृहं 'यातुधानानां' रक्षसां, वनस्पतीनां ये सर्पाः, ते हि जनान् दंशन्ति। 'अवटेषु' गर्तेषु।

य: स्वजनान्नीलग्रीवो य: स्वजनान् हरिरुत ।
कल्माष-पुच्छमोषधे ! जम्भयाश्वरुन्धति ॥ २१ ॥
वभ्रुश्च वभ्रुकर्णश्च नीलगलमाल: शिव: पश्य ।
शर्वेण नीलशिखण्डेन भवेन मरुतां पिता ॥२२॥
विरूपाक्षेण वभ्रूणां वाचं वदिष्यतो हत: ।
सर्वनील-शिखण्डेन वीर ! कर्म्मणि कर्म्मणि ॥२३॥
इमामस्य प्राशं जहि येनेदं विभजामहे ।

केदाराधीशं महिषरूपं स्तौति, य इति । 'य:' शिव: 'स्वजनान्' भक्तान् प्रति नीलग्रीव:, यश्च स्वजनान् भक्तान् प्रति 'हरि:' हरितवर्णो भक्तवात्सल्येन भवति । महिषस्य हि तादृग्रूपं सम्भवति । हे ओषधे ! 'अरुन्धति' रोधरहिते तं 'कल्माषपुच्छं' कृष्णपाण्डरपुच्छम् 'आशु' शीघ्रं 'जम्भय' स्ववीर्य्येण वीर्य्यवन्तं कुरु, ओषधीनां पशुभ्यो वलप्रदत्वात् । "कल्माषो राक्षसे कृष्णे कल्माष: कृष्ण-पाण्डुरे" इति विश्व: । केदारेश्वरस्य महिषरूपत्वात् पुच्छवत्ता सम्भवति ।

'वभ्रु:' क्वचिदवयवे पिङ्गलवर्ण: ; अत: पिङ्गलवर्णकर्ण:, नीला गले माला यस्य स:, शिव इत्यत्र नीलग्रीवश्च य: शिव इति पाठो युक्त: । पितेति तृतीयार्थे प्रथमा, पित्रा इत्यर्थ: ।

अथ वाचं वदिष्यत: पिता देहमात्रस्य जनको ब्रह्मा येन ईश्वरेण हत:, तं त्वं पश्येत्यन्वय: । 'हे वीर ! 'कर्मणि कर्मणि' विहित-प्रतिषिद्धरूपे ।

इमाम् 'अस्य' जनस्य 'प्राशं' पृच्छतीति प्राट्, तां प्राशं पृच्छिकां वाचं 'जहि' वेद-विहित-प्रतिषिद्ध-कर्मविषयं संशयं

नमो भवाय नमः सर्वाय नमः कुमाराय शत्रवे २४

नमो नीलशिखण्डाय नमः सभाप्रपादिने ।

यस्य हरी अश्वतरौ गर्दभावभितः सरौ ॥ २५ ॥

तस्मै नीलशिखण्डाय नमः सभाप्रपादिने ।

नमः सभाप्रपादिने ॥ २६ ॥

तृतीयः खण्डः ॥ ३ ॥

इति नीलरुद्रोपनिषत् समाप्ता ॥ १८ ॥

कण्ठश्रुत्युपनिषत् ।

ओं योऽनुक्रमेण सन्न्यसति, स सन्न्यस्तो

निराकुरु इत्यर्थः। 'येन' कर्मणा 'इदं' जगत् 'विभजामहे' कर्मभूमि-भोगभूमि-रूपेण विभक्तं कुर्महे। 'कुमाराय' कालानभिभूताय, 'शत्रवे' संहर्त्रे।

'सभाप्रपादिने' सभां प्रपद्यते तच्छीलः सभाप्रपादी तस्मै सभ्याय इत्यर्थः। 'अश्वतरौ' ईषदनमश्वत्वं ययोः तौ अश्वतरौ, गर्दभादश्वायां जातौ द्विसरौ, अभितः सरत इति अभितः सरौ गर्दभौ वर्त्तेते। द्विरुक्तिः समाप्त्यर्था।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपद-वाक्यानां नीलरुद्रस्य दीपिका ॥
इति नीलरुद्रोपनिषदो दीपिका सम्पूर्णा ॥ १८ ॥

यजुर्वेदे तु चरका द्वादशैषां कण्ठाश्रयः।
सन्न्यासोपनिषत्तुल्या चतुःखण्डा कृतश्रुतिः ॥ १ ॥

य आश्रमानुक्रमेण सन्न्यासः, स एव मुक्त्युपयोगी, न तु

भवति। कोऽयं सन्न्यास उच्यते? कथं सन्न्यस्तो भवति?।

य आत्मानं क्रियाभिः सुगुप्तं करोति, मातरं पितरं भार्य्यां पुत्रान् सुहृदो बन्धूननुमोदयित्वा, ये चास्यर्त्विजस्तान् सर्वांश्च पूर्ववद्वृणीत्वा वैश्वानरीमिष्टिं कुर्य्यात्, सर्वस्वं दद्यात्, यजमानस्याङ्गान् ऋत्विजः सर्वैः पात्रैः समारोप्य,

---

सति रागे आश्रमव्युत्क्रमेण, इत्याह, योऽनुक्रमेणेति। ब्रह्मणो देवान् प्रत्युक्तिरूपा आख्यायिका विद्या सम्प्रदाय-प्रदर्शनार्था। 'अनुक्रमः' "ब्रह्मचारी वेदमधीत्य" इत्यादिवक्ष्यमाणः। कोऽयमिति सन्न्यास-स्वरूपप्रश्नः। कथमिति प्रकारप्रश्नः।

'क्रियाभिः' ब्रह्मचर्य्यादारभ्य नित्य-नैमित्तिकाभिः 'सुगुप्तं' रचितं पापास्पृष्टम्। 'पूर्ववत्' यथा अग्निष्टोमादौ वृतवान्, तथा वृणीत्वा सन्न्यासकालेऽपि 'वैश्वानरीं' विश्वानर-देवत्यां, 'सर्वस्वं' यथायोग्यं मात्रादिभ्यः। यद्वा ऋत्विग्भ्यः सर्वस्वं दक्षिणां दद्यात्, ऋत्विजः वृत्वेत् पृत्विक् वृणीत्वा कारणात्, 'अङ्गान्' अङ्गानि हस्त मुख-नासिकादीनि, ऋत्विजः प्रयोज्यकर्तॄन् सर्वैः 'पात्रैः' स्थाल्यादिभिः अधिकरणभूतैः करणैः, यथा स्थाल्या पचतीति, 'समारोप्य' समारोपं कारयित्वा, अग्निषु प्राणान् समारोपयेत् इत्यन्वयः। अयमर्थः। प्रेते यजमाने चितायां यस्मिन्नङ्गे यत् पात्रं स्थाप्यते, तस्याङ्गस्य तस्मिन् पात्रे ऋत्विग्भिः समारोपः कारयितव्यः। यथा स्थाल्यां

यदाहवनीये गार्हपत्ये अन्नाहार्य्य-पचने सभ्यावसथ्ययोश्च प्राणापान-व्यानोदान-समानान्, सर्वान् सर्वेषु समारोपयेत्, सर्वान् सर्वेषु समारोपयेत्।

प्रथमः खण्डः ॥ १ ॥

सशिखान् केशान् निष्कृत्य, विसृज्य यज्ञोपवीतं, निष्क्रम्य, पुत्रं दृष्ट्वा, त्वं ब्रह्मा त्वं यज्ञस्त्वं सर्वमित्यनुमन्त्रयेत्। यद्यपुत्रो भवति, आत्मानमेवं ध्यात्वाऽनपेक्षमाणः प्राचीमुदीचीं वा दिशं प्रव्रजेत्, चतुर्षु वर्णेषु भैक्षचर्य्यं चरेत्,

---

दक्षिणहस्तस्य, स्रुवयोर्नासिकायाः, इत्येवं तत्तत्पात्रेषु तत्तदङ्गानां समारोपः।

एवं कस्मिन्नग्नौ कस्य प्राणादेः समारोपः? इत्यत आह, यदाहवनीये इति। 'आहवनीये' पूर्वदिग्भागस्थे प्राणं 'गार्हपत्ये' पश्चिम-दिग्भागस्थे अपानम्, 'अन्वाहार्य्य-पचने' दक्षिणदिग्भागस्थे व्यानं, 'सभ्यावसथ्ययोश्च उत्तरदिग्भागस्थयोः क्रमेण उदान-समानौ समारोपयेत्, 'सर्वान्' प्राणान् 'सर्वेषु' अग्निषु वा। अयमङ्गानां प्राणानाञ्च समारोपो यतीनां विदेहत्व-सिद्धये, अङ्गादिषु हि पात्रादिषु समारोपितेषु शुद्धोऽवतिष्ठते ॥ १ ॥

सशिखान् न तु शिखावर्जं 'निष्कृत्य' मुण्डयित्वा, विसृज्य अप्सु, 'निष्क्रम्य' पुरत उत्तरतो वा गन्तुमारभ्य अनुमन्त्रयेत्

पाणिपात्रेणाशनं कुर्य्यात्, औषधवत् प्राश्नीयात्, यथालाभमश्नीयात् प्राणसन्धारणार्थं, यथा मेदो-वृद्धिर्न जायते ।

कृशीभूत्वा ग्रामे एकरात्रं, नगरे पञ्चरात्रं, चतुरो मासान् वार्षिकान् ग्रामे वा नगरे वापि वसेत्, विशीर्णं वस्त्रं वल्कलं वा प्रतिगृह्णमाणो नान्यत् प्रतिगृह्णीयात् । यद्यशक्तो भवति, यो न क्लेशः, स तप्यते तप इति ।

यो वा एवं क्रमेण सन्न्यसति, यो वा व्युत्ति-ष्ठति, किमस्य यज्ञोपवीतं ? का वास्य शिखा ? कथं वास्योपस्पर्शनमिति ।

पुत्रम् । 'एवम्' एवं ध्यात्वा अहं ब्रह्मा अहं यज्ञः अहं सर्व-मिति । 'भैक्षचर्य्यं' भिक्षैव भैक्षं, प्रज्ञादिभ्यो णः, भिक्षायाः समूहो वा भैक्षं, भिक्षादिभ्योऽण् इत्यण् । तस्य चर्य्यं चरणं, गद-चर-यम-श्चानुपसर्गे इति यत् । 'चरेत्' आचरेत् ।

'कृशीभूत्वा' कृशीभूय: कामादि-विकार-निरासार्थम् । 'विशीर्णं' जीर्णं यतीनां वृहद्वस्त्र-स्वीकाराचारस्तु श्रुतिविरुद्धः । 'अन्यत्' नूतनम् अधिकं वा ।

यद्यशक्तो भवति, तर्हि गृह्णीयादित्यनुषङ्गः । 'यो न क्लेशः' तपसि शीतोष्ण-क्षुधादि-सहने न क्लेशः क्लेशरहितः समर्थः, स तप्यते तपः, तत् सहेतैवेत्यर्थः ।

'एवं' मातरं पितरमित्यादि-प्रकारेण 'क्रमेण' ब्रह्मचर्य्या-

तान् होवाच, इदमेवास्य तद्यज्ञोपवीतं यदात्मध्यानं, विद्या सा शिखा, नीरैः सर्व्वत्रावस्थितैः कार्य्यं निर्व्वर्त्तयन्नुदपात्रे जलतीरे निकेतनं हि ब्रह्मवादिनो वदन्ति।

अस्तमित आदित्ये कथं वास्योपस्पर्शनमिति। तान् होवाच, यथाहनि तथा रात्रौ नास्य नक्तं नवा दिवा। तदप्येतदृषिणोक्तं सकृद्दिवाहैवास्मै भवति। य एवं विद्वान् नैतेनात्मानं सन्धत्ते, सन्धत्ते।

द्वितीयः खण्डः ॥ २ ॥

अनुक्रमेण। 'वा' अथवा यः 'व्युत्तिष्ठति' व्युत्क्रमेण सन्न्यस्यति, यदि चेतरथेत्याद्युक्तत्वात् यदहरेव विरजेदित्येवकारेणाविलम्बोक्तेश्च। किमस्येति। यज्ञोपवीताद्यभावे कथं ब्राह्मण्यम्? इति प्रश्नः। कथं वेति। परमहंसस्य यात्राभावात् 'उपस्पर्शनम्' आचमनादि।

'विद्या' ज्ञानम्। कथं वेत्यस्योत्तरं नीरैरिति। 'उदपात्रे' परकीये।

अस्तमिते इति। अत एव लिङ्गाद्रात्रौ तडाकाद्युदकं न स्प्रष्टव्यमिति गम्यते। यथाहनीति, सरागविषयः प्रतिषेध इति भावः। 'ऋषिणा' वेदेन, 'सकृद्दिवा' एकं दिनमेव नित्यं ब्रह्मदर्शितत्वात्। 'एतेन' सन्न्यासोपायेन, इयं शाखान्तरछान्दोग्यश्रुतिः,

"न हि सन्न्यसनादेव सिद्धिं समधिगच्छति" इति स्मृतेः।

देवा ह वै समेत्य प्रजापतिमब्रुवन्, न विदामो न विदाम इति। सोऽब्रवीत् ब्रह्मिष्ठेभ्यो, मे तद्वदतो ज्ञास्यथेति।

ततो वै ते ब्रह्मिष्ठा न वदन्तो न वदन्त इत्येतत् सर्वम्।

देवानां सार्ष्टितां सालोक्यतां सायुज्यतां गच्छति। य एवं वेद, सशिखान् केशान् निष्कृत्य, विसृज्य यज्ञोपवीतं, निष्क्रम्य, पुत्रं दृष्ट्वा, त्वं

सन्न्यासेनाकृतार्थतां मन्वानास्त्वरमाणा ऊचुः, देवा ह वा इति। 'देवाः' पण्डिताः 'प्रजापतिं' गुरुम् अब्रवीत् 'ब्रह्मिष्ठेभ्यः' ब्रह्मविद्भ्यः, तमतिशयेन ब्रुवन्तो ये ते ब्रह्मिष्ठाः, वेदनिष्ठान् देवान् प्रत्यूचिवानित्यर्थः। ईप्सिततमस्यापि क्रिययाभिप्रेयमाणत्वविवक्षया सम्प्रदानत्वम्। वेदत एव ज्ञानप्राप्तिर्नान्यथेति दर्शयितुं देवानां ब्रह्मिष्ठत्व-विशेषणम्।

किमुक्तवान्? इत्याह, मे तदिति। 'मे' मम 'वदतः' ब्रुवतः सम्बन्धेन 'तत्' ब्रह्म 'ज्ञास्यथेति' ज्ञानं प्राप्स्यथेति सोऽब्रवीत्।

'ततः' अनन्तरं गुरुप्रसादेन ज्ञानप्राप्त्यनन्तरं 'वै' निश्चितं 'ते' देवा ब्रह्मिष्ठा वेदवित्तमाः 'न वदन्तो न वदन्तः' प्रत्येकं मौनिनः स्थिताः, यैर्यैर्ज्ञानं प्राप्तं, ते ते नोचुः कृतार्थत्वादित्यर्थः। वाक्यद्वयीच्छान्दसि। 'इति' उपदेशसमाप्तौ। उक्तं सन्न्यासपूर्वकृत्यमुपसंहरति एतत् सर्वमिति। तत् 'एतत् सर्वं' परमहंससन्न्यास-ज्ञानं कथितमित्यर्थः।

ज्ञानस्य फलमाह, देवानामिति। 'सार्ष्टितां' समानर्द्धितां

ब्रह्मा त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं स्वाहा त्वं स्वधा त्वं धाता त्वं विधाता त्वं त्वष्टा त्वं प्रतिष्ठासीति। अथ पुत्रो वदति, अहं ब्रह्माऽहं यज्ञोऽहं वषट्कारोऽहमोङ्कारोऽहं स्वाहा अहं स्वधाऽहं धाताऽहं विधाताऽहं त्वष्टाऽहं प्रतिष्ठास्मीति तान्येतानि।

अनुव्रजन्नाश्रुमापातयेत्। यदश्रुमापातयेत्, प्रजां विद्यां छिन्द्यात्, प्रदक्षिणमावृत्य एतच्चैतच्चानवेक्षमाणाः प्रत्यायन्ति, स स्वर्गो भवति, स स्वर्गो भवति।

तृतीयः खण्डः ॥ ३ ॥

'सालोक्यतां' सलोकतां 'सायुज्यतां' संयुक्तताम् ऐक्यं, स्वार्थस्य जन्ताभ्यां भावे तल्।

परमहंसविधिः संक्षेपत उक्तः, विस्तरेणाह, सग्निखानिति। 'धाता' धारयिता, 'विधाता' कर्त्ता। प्रतिवचनेऽपि अहं स्वाहा अहं स्वधेति द्रष्टव्यम्। 'तान्येतानि' प्रतिवचनानीति शेषः।

पितरि व्रजति नातिदूरमनुव्रजनं कर्त्तव्यं, शोकश्च न कर्त्तव्य इत्याह, अनुव्रजन्नाश्रुमिति। अश्रुपाते दोषमाह, यदिति। 'यत्' यदि, तत उदकान्तं चैत्यवृक्षपर्य्यन्तं वा गत्वा निवर्त्तमानाः 'प्रदक्षिणमावृत्य' पितरं प्रदक्षिणीकृत्य पुत्रादयः 'एतच्चैतच्च' इति वृक्षाराम-तड़ाकादि 'अनवेक्षमाणाः'

ब्रह्मचारी वेदमधीत्य वेदौ वेदान् वा चरित-ब्रह्मचर्य्यो दारानाहृत्य पुत्रानुत्पाद्यताननुरूपाभिर्वृत्तिभिर्वितत्येष्ट्वा च शक्तितो यज्ञैस्तस्य सन्न्यासो गुरुभिरनुज्ञातस्य बान्धवैश्च सोऽरण्यं परेत्य द्वादशरात्रं पयसाग्निहोत्रं जुहुयात्, द्वादशरात्रं पयो भक्षः स्यात्, द्वादशरात्रस्यान्ते-

---

अनवलोकयन्तः 'प्रत्यायन्ति' प्रत्यागच्छन्ति, यमुद्दिश्य न शोचन्ति, स पुमान् पित्रादिः, 'स्वर्गः' नित्यसुखं मोक्षः तमनुभवति ॥ ३ ॥

क्रमसन्न्यास-प्रकारमाह, ब्रह्मचारीति। ब्रह्मचारी सन् वेदं वेदौ वेदान् वा अधीत्येति शक्त्यपेक्षो विकल्पः। चरितं 'ब्रह्मचर्य्यं' ब्रह्मचर्य्य-व्रतानि येन, विद्या-व्रत-स्नातो न्यायागताभिः 'वृत्तिभिः' जीविकाभिः 'वितत्य' विस्तृतधनाः कर्त्तव्याः इत्युक्तत्वात्, यज्ञैः शक्तित इष्ट्वा च यः स्थितः, तस्य सन्न्यासो नान्यस्य, तदुक्तं याज्ञवल्क्येन,—

"अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान्।
शक्त्या तु यज्ञकृन्मोक्षे मनः कुर्य्यात्तु नान्यथा" ॥ इति।

तत्रापि विशेषो गुरुभिरिति। 'बान्धवैः' पत्न्यादिभिश्चानुज्ञातः "आश्रमादाश्रमं गच्छेत्" इति वचनात् वानप्रस्थाश्रमपूर्वकः सन्न्यास इति, तमादावाह, सोऽरण्यमिति। 'परेत्य' गत्वा। एकं द्वादशरात्रं होम-भोजने पयसा कार्य्ये इत्याह, द्वादशेति। "यदन्नः पुरुषो लोके तदन्नस्तस्य देवता" इति स्मृतेः पयसा भोजनवद्धोमोऽपि युक्तः।

ऽग्नये वैश्वानराय प्रजापतये च प्राजापत्यं चरुं वैष्णवं त्रिकपालम्, अग्निसंस्थितानि पूर्वाणि दारुपात्राण्यग्नौ जुहुयात्, मृण्मयान्यप्सु जुहुयात्, तैजसानि गुरवे दद्यात्।

मा त्वं मामवहाय परागाः, नाहं त्वामवहाय परागामित्येवं गार्हपत्यमेवं दक्षिणाग्निमेवमाहवनीयमरणिदेशाद् भस्ममुष्टिं पिबेदित्येके।

सशिखान् केशान् निष्कृत्य, विसृज्य यज्ञोपवीतं भूः स्वाहेत्यप्सु जुहुयात्। अत ऊर्द्ध्वमन-

---

सन्न्यासविधिमाह, द्वादशरात्रस्येति। अग्नये आग्नेयं, वैश्वानराय वैश्वानरं, प्रजापतये प्राजापत्यं चरुं जुहुयादित्यन्वयः। 'त्रिकपालं' त्रिषु कपालेषु संस्कृतं पुरोडासं विष्णुदेवताकं जुहुयात्, 'अग्निसंस्थितानि' अग्न्यर्थं स्थापितानि अरण्यादीनि "यज्ञाद्-यज्ञं गच्छ" इति मन्त्रेणाग्नौ 'जुहुयात्' प्रक्षिपेत्। 'गुरवे' आचार्य्याय ऋत्विजे।

अग्निप्रार्थनमाह, मात्वमिति। माम् 'अवहाय' हित्वा त्वं मा 'परागाः' परागच्छ। अहमपि त्वां हित्वा 'न परागां' न परागच्छेयमिति त्रीनग्नीन् प्रार्थयते। अरणिदेशादिति। यत्र अरणिर्दग्धा, ततो देशात् 'उद्धृत्य' गृहीत्वा मुष्टिमात्रं भस्म पिबेदित्येके।

'निष्कृत्य' समूलान् निष्काश्य स्थानाद्बहिःकृत्य, डुकृञ्-करणे ; यद्वा कृतीच्छेदने, 'निष्कृत्य' निःशेषं छित्त्वा 'सशिखान्' शिखासहितान्, शिखापि न रक्षणीयेत्यर्थः। 'विसृज्य'

शनमपां प्रवेशमग्निप्रवेशं वीराध्वानं महाप्रस्थानं वृद्धाश्रमं वा गच्छेत् ।

स यः सायं प्राश्नीयात्, सोऽस्याः सायं होमः, यत् प्रातः सोऽयं प्रातः, यद्दर्शे तद्दर्शे, यत् पौर्ण-मास्ये तत् पौर्णमास्ये, यद्वसन्ते केश-श्मश्रु-लोम-नखानि वापयत्, सोऽस्याग्निष्टोमः, सोऽस्याग्नि-ष्टोमः ।

चतुर्थः खण्डः ॥ ४ ॥

कण्ठादुत्तार्य्य । अत ऊर्द्ध्वमिति । एतावत् स्वयं कृत्वा अन-न्तरमनशनादि कुर्य्यात्, इच्छाविकल्पोऽयम् । 'वीराध्वानं' हि युद्धे सम्मुखतयाऽकातर्य्येण मरणम् । तदुक्तम्—

"द्वाविव पुरुषौ लोके सूर्य्यमण्डल-भेदिनौ ।
परिव्राड्योग-युक्तात्मा रणे वाभिमुखो हतः" ॥ इति ।

यद्वा वीराध्वान-नामकं तीर्थं ; तदुक्तं वायुपुराणे उत्तर-खण्डे तीर्थावलिवर्णने,—

"शाङ्करं मानसञ्चैव देवखातमथापरम् ।
वीराध्वानं महापीठं पश्चिमोत्तर-दक्षिणे" ॥ इति ।

'महाप्रस्थानं' यावन्मरणमुत्तराशा-गमनम्, 'वृद्धाः' ज्ञानिनः, तेषामाश्रमं स्थानं निवासं वा गच्छेत् । अस्मिन् पक्षे वृद्धेभ्यो दीक्षामुपेयात्, दीक्षोपादाने महावाक्योपदेशो योग-यज्ञदानञ्च ।

कर्म्म-परित्याग-प्रयुक्त-प्रत्यवाय-शङ्कां निरस्यति, स य इति । अनेन द्विरशनमनुज्ञायते, कादाचित्काभिप्रायञ्चेदं, यद्दर्शे

सन्न्यस्याग्नीन् न पुनरावर्त्तयेत्, यन्मन्युर्जायामावहेदिति। अथाध्यात्म-मन्त्रान् जपेत्, स्वस्ति सर्वजीवेभ्य इत्युक्त्वा दीक्षामुपेयात्, काषायवासः, कक्षोपस्थलोमान् वर्जयेत्; लघुमुण्डोऽसूत्रोदरपात्रं कस्मादित्यध्यात्ममस्य ध्यायत ऊर्द्ध्वगो बाहुः।

विमुक्तमार्गो भवेदनिकेतश्चरेत्, भिक्षाशी

प्राश्नीयात् तदर्थे कर्त्तव्यं, दर्शे दृष्टि-लक्षितं कर्म करोतीत्यर्थः। केशेति, कक्षोपस्थवर्जम्। अस्मादेव लिङ्गाद्वसन्ते क्षौरमिति गम्यते। द्विरुक्तिः खण्डसमाप्त्यर्था॥ ४॥

सन्न्यस्येत्यादि सन्न्यासोपनिषदि व्याख्यातम्। शाखाभेदात् क्वचित् पाठभेदः। 'इत्युक्त्वा' अभयं दत्त्वेत्यर्थः। 'दीक्षां' सन्न्यासदीक्षाम् एतावन्तं कालं चैतन्यमेव स्थितः। कक्षोपस्थं श्रितानि 'लोमान्' लोमानि वर्जयेत्; अतएव 'लघुमुण्डः' न गुरुमुण्डनक्रियः, लघुमुण्डं शिरो यस्य इति च। 'असूत्रः' अयज्ञोपवीतसूत्रः, छान्दसः सन्धिः। उदरपात्रं कस्मादिति प्रश्नस्त्रयविषयः, अस्योदरमेव पात्रम्, असूत्रत्वं, मुण्डशिरस्त्वञ्च कस्मादित्यर्थः। अध्यात्ममस्य ध्यायत इति भवेदित्यन्तम् उत्तरम्। 'अस्य' यतेः अध्यात्मं ध्यायतः सतः ऊर्द्ध्वगो बाहुः 'भवेत्' वर्त्तते, प्रसिद्धोऽयमध्यात्मनिष्ठ इति किं वाह्योपवीतादिना इत्यर्थः। ऊर्द्ध्वगोपायुरिति पाठे ऊर्द्ध्वलोकस्यायं 'गोपायुः' रक्षकः नास्येह लोके प्रयोजनमस्तीत्यर्थः। ऊर्द्ध्वो 'गोपायुः' दण्डो यस्य इति वा।

न दद्यात् लवैकं धारयेज्जन्तु-संरक्षणार्थं वर्षा-
वर्ज्जमिति ।

तदपि श्लोकः ।

कुण्डिकां चमसं शिक्यं त्रिविष्टपमुपानहौ ।
शीतोपघातिनीं कन्थां कौपीनाच्छादनन्तथा ॥१॥
पवित्रं स्नानशाटीञ्च उत्तरासङ्गमेव च ।
यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेद्यतिः ॥ २ ॥
स्नानं दानं तथा शौचमद्भिः पूताभिराचरेत् ।

ननु शिखादिकं परलोकोपयोग्यपि भवत्येव इत्यत आह, विमुक्तमार्ग इति। अनेन, दक्षिणोत्तरमार्गौ विमुक्ताविहैव समवनीयत इति श्रुतेरिति भावः। भिक्षामश्नातीति भिक्षाशी, 'न दद्यात् लवैकम्' अन्नमध्ये एकं लवमपि न दद्यात् अधिकाराभावात्, 'धारयेत्' एकत्र तिष्ठेत्। किमर्थम्? जन्तु-संरक्षणार्थम्, कदा? 'वर्षावर्ज्जं' विरोधिलक्षणया वर्षास्वित्यर्थः।

अथवा, अनिकेतः, सन् 'चरेत्' अटेदेव, वर्षावर्ज्जं वर्षासु नाटेत्। तत् कुतः? जन्तु-संरक्षणार्थमित्यन्वयः; वर्षास्वटने हि जन्तवो म्रियन्ते। न दद्यात् भिक्षान्नं भिक्षुकान्तराय, लवैकं धारयेदित्यत्र न इत्येव, भिक्षान्न-लवस्य सङ्ग्रहं न कुर्यादित्यर्थः। इति शब्दो ब्राह्मण-समाप्तौ।

कुण्डिकादिकं त्रिदण्डिनः प्राप्तं परमहंसस्य निषिध्यते, कुण्डिकामित्यादिना। 'यतिः' परमहंसः। ननु स्नान-शौचादिकं पात्राद्यभावे कथं स्यात्? अत आह, स्नानमिति।

नदी-पुलिन-शायी स्याद्देवागारेषु वा स्वपेत् ॥३॥
नात्यर्थं सुख-दुःखाभ्यां शरीरमुपतापयेत्।
स्तूयमानो न तुष्येत निन्दितो न शपेत् परान्॥४॥
एतां वृत्तिमुपासन्ते घातयन्तीन्द्रियाणि च ॥

पञ्चमः खण्डः ॥ ५ ॥

इति कण्ठश्रुतिरुपनिषत् समाप्ता ॥ १९ ॥

पिण्डोपनिषत्।

ओं देवता ऋषयः सर्वे ब्रह्माणमिदमब्रुवन्।

'दानं' जलदानं प्रणवतर्पणम्; ध्यानमिति पाठे 'ध्यानं' समर्पणम्। 'पूताभिः' शुद्धनद्यादि-निष्ठाभिः। जनाकुले देशे शयनं निषेधति, नदीति। 'स्वपेत्' सुप्यात्। न मिष्टान्न-रुचिर्नापि कृच्छ्रादिपरः स्यादित्याह, नात्यर्थमिति। गमनादि-समर्थं शरीरं धारयेदित्यर्थः। तुल्यनिन्दात्मसंस्तुतिः स्यादि-त्याह, स्तूयमान इति। 'घातयन्ति' अभिभवन्ति। अन्ते द्विरुक्तिर्द्रष्टव्या।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपद-वाक्यानां दीपिकेयं कण्ठश्रुतेः॥
इति कण्ठश्रुत्युपनिषदो दीपिका सम्पूर्णा ॥ १९ ॥

ओं खण्डमेकं पिण्डहेतुः सप्तविंशति-पूरणी।
पिण्डोपनिषदुद्दण्ड-वैराग्य-जननाय सा ॥ १ ॥
संसार-विमुक्तये परमहंससन्न्यास उक्तः; तद्रहितानां विप-

मृतस्य दीयते पिण्डं कथं गृह्णन्त्यचेतसः ? ॥१॥
भिन्ने पञ्चात्मके देहे गते पञ्चसु पञ्चधा ।
हंसस्त्यक्त्वा गतो देहं कस्मिन् स्थाने व्यवस्थितः ?॥२॥

ब्रह्मोवाच,—

अहं वसति तोयेषु अहं वसति चाग्निषु ।
अहमाकाशगो भूत्वा दिनमेकन्तु वायुगः ॥ ३ ॥
प्रथमेन तु पिण्डेन कलानां तस्य सम्भवः ।
द्वितीयेन तु पिण्डेन मांस-त्वक्-शोणितोद्भवः ॥४॥
तृतीयेन तु पिण्डेन मतिस्तस्याभिजायते ।
चतुर्थेन तु पिण्डेन अस्थि-मज्जा प्रजायते ॥ ५ ॥
पञ्चमेन तु पिण्डेन हस्ताङ्गुल्यः शिरो मुखम् ।

नानां का गतिः ? इति संशये वैराग्यजननाय संसारिणां पराधीनां गतिं निरूपयितुं पिण्डोपनिषदारभ्यते, देवता इति। आख्यायिका विद्या सम्प्रदायाविच्छेद-प्रदर्शनार्था दीयते पिण्डं लोकैरिति शेषः। तत्र शरीरमन्तरेण चेतना-रहिता मृताः कथं गृह्णन्ति ? इति प्रश्नः।

'पञ्चसु' भूतेषु विषये पञ्चधा देहे गते सति हंसः कस्मिन् स्थाने व्यवस्थितः ? इति द्वितीयः प्रश्नः।

द्वितीयस्योत्तरमाह, अहमिति।

भोगोचित-शरीरोत्पत्तिद्वारा चेतनः सन् पिण्डं गृह्णातीति।

आद्यस्योत्तरमाह, प्रथमेन त्विति। 'कलाः' षोडश षष्ठ-प्रश्नोक्ताः, यथा,—

षष्ठेन कृतपिण्डेन हृत्-कण्ठं तालु जायते ॥ ६ ॥
सप्तमेन तु पिण्डेन दीर्घमायुः प्रजायते ।
अष्टमेन तु पिण्डेन वाचं पुष्यति वीर्य्यवान् ॥ ७॥
नवमेन तु पिण्डेन सर्वेन्द्रिय-समाहृतिः ।
दशमेन तु पिण्डेन भावानां प्लवनं तथा ॥ ८ ॥
पिण्डे पिण्डे शरीरस्य पिण्डदानेन सम्भवः ।
पिण्डदानेन सम्भवः ॥ इति ॥ ९ ॥

इत्यथर्ववेदे पिण्डोपनिषत् समाप्ता ॥ २० ॥

"कलाः षोड़श भूतानि प्राणोऽन्नं जन्म कर्म्म च ।
श्रद्धा यज्ञस्तपो मन्त्रा मनो मात्रं शरीरकम्" ॥ इति ।

दश पिण्डा दशसु दिनेषु पुत्रादिभिर्दीयमानाः प्रथमादि-शब्देनोक्ताः । 'भावाः' क्षुत्तृषादयः, 'प्लवनम्' उद्बोधः । अय-मर्थो गरुड़पुराणे एतच्छ्रुतिमूल एव सोपपत्तिको भगवता गरुड़ं प्रत्युपपादितः । देहावयवोत्पत्तौ च मूर्द्धादिक्रम उक्तः ; तथा हि,—

"प्रथमेऽहनि यः पिण्डस्तेन मूर्द्धा प्रजायते ।
ग्रीवास्कन्धं द्वितीये च तृतीये हृदयं भवेत् ॥
चतुर्थे च भवेत् पृष्ठिः पञ्चमे नाभिरेव च ।
षट्-सप्तमे कटिर्गुह्यमूरू चाप्यष्टमे तथा ॥
जानु-पादौ तु नवमे दशमेऽह्नि क्षुधा भवेत् ।
देहभूतः क्षुधाविष्टो गृहद्वारे च तिष्ठति ॥
दशमेऽहनि यः पिण्डस्तं दद्यादामिषेण तु ।
यतो देहे समुत्पन्ने प्रेतो जीवः क्षुधान्वितः ॥

आत्मोपनिषत्।

ओम् अथाङ्गिरा-स्त्रिविधः पुरुषः ; तद्यथा,— बाह्यात्मा, अन्तरात्मा, परमात्मा चेति।

त्वगस्थि-मांस-मज्जालोमाङ्गुल्यङ्गुष्ठ-पृष्ठि-वंश-नख--गुल्फोदर--नाभि--मेढ्र--कट्यूरु--कपोल-भ्रू-ललाट-बाहु-पार्श्व-शिरो-धमनिकाक्षीणि श्रोत्राणि भवन्ति, जायते, म्रियते, इत्येष बाह्यात्मा नाम।

प्रथमः खण्डः ॥ १ ॥

अतस्त्वामिष-वाह्येन क्षुधा तस्य न नश्यति।
एकादशं द्वादशञ्च प्रेतो भुङ्क्ते दिनद्वयम्" ॥ इति।
नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपद-वाक्यानां पिण्डोपनिषद्दीपिका ॥
इति पिण्डोपनिषदो दीपिका सम्पूर्णा ॥ २० ॥

आत्मत्रयी परात्मोपनिषत् खण्डत्रयान्विता।
अष्टाविंशी ग्रन्थसङ्ख्या शाखा शौनकवर्त्तिता ॥ १ ॥

पिण्डग्रहणे विरक्तस्य परमात्मानं बोधयितुं शाखाचन्द्र-न्यायेन आत्मद्वयं निरूप्य निरञ्जनं संसारातीतं परमात्मानं निरूपयितुमियमारभ्यते, अथाङ्गिरा इति। 'अथ' ब्रह्मणा देवर्षीन् प्रति पिण्डनिरूपणानन्तरं तद्विमोक्षार्थी अङ्गिरा उवाचेति शेषः। बाह्यात्मादयो वक्ष्यमाणलक्षणाः।

जायते म्रियते इति, प्रत्याहारेण षड्भावविकारा यास्कोक्ता गृह्यन्ते। ते यथा, "जायते, अस्ति, वर्द्धते, विपरिणमते,

अथान्तरात्मा नाम पृथिव्यप्-तेजो-वाय्वा-काश-मिच्छा-द्वेष-सुख-दुःख-काम-मोह--विकल्प-नादिभिः स्मृतिलिङ्गोदात्ताऽनुदात्त-ह्रस्व-दीर्घ-प्लुत-स्खलित-गर्जित--स्फुटित--मुदित-नृत्य-गीत-वादित्र-प्रलय-विजृम्भितादिभिः श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः पुराणं न्यायो मीमांसा धर्म्मशास्त्राणीति श्रवण-घ्राणाकर्षण-कर्म्मविशेषणं करोति, एषोऽन्त-रात्मा नाम ।

द्वितीयः खण्डः ॥ २ ॥

अथ परमात्मा नाम, यथाक्षरमुपासनीयः । स च प्राणायाम-प्रत्याहार-समाधि-योगानुमाना-ध्यात्म-चिन्तकम् ।

अपचीयते नश्यति च” इति । यत्र पञ्चविंशतिस्त्वगादयो भवन्ति, षड्भावविकाराश्च, स वाह्यात्मा नाम इत्यन्वयः ॥१॥

पृथिव्यादि-विजृम्भितादि-पर्य्यन्तैरुपलक्षितः ‘विज्ञानात्मा’ बुद्धिमयः ‘कर्म’ सामान्यं श्रवणादि-लक्षणं यः करोति, सोऽन्त-रात्मेत्यन्वयः ॥ २ ॥

ननु परमात्मा वाङ्मनस-गोचरातीतत्वात् कथं ज्ञेयः ? इत्याशङ्क्याह, यथेति । ‘यथाक्षरम्’ यथोपदेशम् ‘उपासनीयः’ उपास्यो ज्ञेयः, तं त्वौपनिषदं पुरुषं पृच्छामीति तस्य वेदैक-गम्यत्वात्, मनसैवानुद्रष्टव्यमिति श्रुतेः असंस्कृतेन च मनसा

वटकणिका श्यामाक-तण्डुलो बालाग्रशत-सहस्रविकल्पनादिभिर्न लभ्यते, नोपलभ्यते, न जायते, न म्रियते, न शुष्यते, न क्लिद्यते, न दह्यते, न कम्पते, न भिद्यते, न छिद्यते, निर्गुणः साक्षी भूतः शुद्धो निरवयवात्मा केवलः सूक्ष्मो निष्कलो निरञ्जनो निरभिमानः शब्द-स्पर्श-रूप-रस-गन्ध-वर्जितो निर्विकल्पो निराकाङ्क्षः।

अग्राह्यत्वात् संस्कारानाह, प्राणायामेति। प्राणायामादिभिर्योगानुमानेन च अध्यात्मचिन्तकं प्रति प्रकाशते इति शेषः।

नन्वसौ विभुर्विश्वाधिक-प्रमाणः कथमप्रत्यक्षः? इत्याशङ्क्याह, वटकणिकेति। यथा 'वटकणिका' वटबीजं सूक्ष्मापि महान्तं वटं सूते, एवमसौ सूक्ष्मोऽपि जगत् सूते। श्यामाक-तण्डुलोऽतिसूक्ष्मोऽपि महान्तं स्तम्बं सूते, तद्वदसावित्यर्थः।

ननु बीजवद्दृष्टीनां प्रत्यक्षोऽपि किं न स्यात्? अत आह, बालाग्रेति।

"बालाग्र-शतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते"॥

इति श्रुतेः। अतिसूक्ष्मत्वात् सर्वथा अप्रत्यक्ष इत्यर्थः। न लभ्यते कर्मेन्द्रियैः, नोपलभ्यते ज्ञानेन्द्रियैः, जन्म-मरण-शोष-क्लेद-दाह-कम्प-भेद-च्छेद-निषेधैः क्रियामात्रं निषिद्धम्। 'साक्षी' साक्षाद्द्रष्टा 'भूतः' सिद्धः 'शुद्धः' सहजागन्तुक-मल-रहितः 'निरवयवात्मा' सावयवात्मभेदशून्यः 'केवलः' सजा-

सर्व्वव्यापी सोऽचिन्त्योऽवर्ण्यश्च, पुनात्यशुद्धान्यपूतानि, निष्क्रियः संस्कारो नास्ति, इत्येष परमात्मा पुरुषो नाम, एष परमात्मा पुरुषो नाम।

तृतीयः खण्डः ॥ ३ ॥

इत्यथर्व्ववेदे आत्मोपनिषत् समाप्ता ॥ २१ ॥

तीय-विजातीय-भेदशून्यः 'सूक्ष्मः' दुर्लक्ष्यः 'निष्कलः' षोड़श-कला-रहितः 'निरञ्जनः' आगन्तुक-मलरहितः 'निरभिमानः' अहङ्कार-दोष-रहितः शब्देति वाह्येन्द्रिय-दोष-रहितः 'निर्व्विकल्पः' मनोदोष-रहितः 'निराकाङ्क्षः' आकाङ्क्षादि-बुद्धिदोष-रहितः।

ननु सूक्ष्मश्चेत् कथमाकाशादीनामात्मप्रदः ? इत्यत आह, सर्व्वव्यापीति। अत एव विकल्पनादिभिरित्युक्तं वस्तुतस्तु अणु-महत्त्वादि-परिमाण-रहित एव स्वमहिम्ना सर्व्वं व्याप्नोति भगवान्; अतएव 'सः' ईश्वरः अचिन्त्योऽवर्ण्यश्च, 'अशुद्धानि' चाण्डालादीनि 'अपूतानि' पापादिदुष्टानि सत्त्वानि 'निष्क्रियोऽपि ध्यानस्थः पुनाति। यद्यपि आगमशास्त्रे ज्ञानात्मापि चतुर्थ उक्तः शरीरान्तःकरण-जीव-परमात्म-भेदेन, तथापि जीव-परमात्मनोरभेदमाश्रित्य इह त्रिविध एवोक्तः। तदुक्तं गीतासु,—

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि, कूटस्थोऽक्षर उच्यते।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" ॥ इति ॥

इदमात्मचतुष्टयं प्रणवस्याकारोकार-मकारात् परं बिन्दु-

रामपूर्वतापनीयोपनिषत् ।

ओं चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ ।
रघोः कुलेऽखिलं राति राजते यो महीस्थितः ॥१॥

नाद-शक्ति-शान्ताख्यावस्था-चतुष्टयात्मकं द्रष्टव्यम् । 'संस्कारः' पूर्वप्रज्ञा, स नास्ति स्वतोऽसङ्गत्वात् । द्विरुक्तिः समाप्त्यर्था ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्ट-पद-वाक्यानामात्मोपनिषद्दीपिका ॥

इत्यात्मोपनिषदो दीपिका सम्पूर्णा ॥ २१ ॥

ओं श्रीराम-तापनीयेऽस्मिन् पञ्चत्रिंशत्तमे मते ।
आथर्वणे तथा खण्डा दश पूर्वाभिधे मताः ॥ १ ॥

"यस्याम्भसि शयानस्य योगनिद्रां वितन्वतः ।
नाभिह्रदाम्बुजादासीत् ब्रह्मा विश्वसृजां पतिः ॥
यस्यावयव-संस्थानैः कल्पितो लोक-विस्तरः ।
तद्वै भगवतो रूपं विशुद्धं सत्वमूर्जितम् ॥
एतन्नानावताराणां निधानं बीजमव्ययम्" ॥ इति स्मृतेः नारायण-कथनानन्तरं सदवतार-कथनावसरे प्राप्ते मुख्यत्वात् रामावतारमादौ निरूपयति, चिन्मये इति । श्रीरामस्वरूपन्तु नारसिंहे निर्णीतम् । 'दशरथे' अधिकरणे 'रघोः' दिलीपात्मजस्य सूर्यवंश्यस्य कुले 'चिन्मये' ज्ञानस्वरूपे 'महाविष्णौ' नानावतार-मूलकारणे हरौ जाते सति रामाभिधा प्रवृत्तेति शेषः । अनेनास्य पूर्णावतारता सूचिता । तस्य निर्वचनम् अखिलं रातीत्यादि ।

स राम इति लोकेषु विद्वद्भिः प्रकटीकृतः।
राक्षसा येन मरणं यान्ति स्वोद्रेकतोऽथवा ॥ २ ॥
रामनाम भुवि ख्यातमभिरामेण वा पुनः।
राक्षसान् मर्त्त्यरूपेण राहुर्मनसिजं यथा ॥ ३ ॥
प्रभाहीनांस्तथा कृत्वा राज्यार्हाणां महीभृताम्।
धर्म्ममार्गं चरित्रेण ज्ञानमार्गञ्च नामतः ॥ ४ ॥

'सः' हरिः विद्वद्भिः लोकेषु राम इति प्रकटीकृतः। 'मही-स्थितः' भूमौ नित्यं वसन् 'राति' ददाति साधुभ्योऽखिलं वाञ्छितम्, 'राजते' शोभते च, इत्यन्वर्थता-श्रयणेन राम इति लोकेषु विद्वद्भिः स्मृतः। रातेः प्रकृति-मात्रशेषः, महीस्थित-शब्दस्याद्याक्षरशेषः।

राक्षस-मरण-शब्दयोराद्याक्षर शेष इत्याह, राक्षसा इति। "रामो राक्षस-मर्दनः" इति प्रसिद्धेः। अथवा डित्थादि-शब्द-वद् यदृच्छाशब्द एवायं न क्रिया-शब्दः, गुणातिशयात् प्रसिद्धिं गत इत्याह, स्वेति। 'स्वोद्रेकतः' स्वमहिमतो गुणातिशयाद्वा अनलार्कादेरिव ॥ १ ॥ २ ॥

राम इति नाम भुवि 'ख्यातं' प्रसिद्धिमागतं, नत्वयं क्रियानिमित्त इत्यर्थः। चतुष्टयी शब्दानां प्रवृत्तिरिति पक्षे गुणक्रिया-जाति-शब्दवद्यदृच्छाशब्दोऽस्ति स्वरूपनिमित्तः। नि-मित्तान्तरमाह, अभिरामेणेति। रमयतीति रामः, ज्वलिति-कसन्तेभ्यो णः। विग्रहान्तरं राक्षसानिति। राक्षसान् मर्त्यरूपेण रामः, आद्याक्षरशेषः। 'मनसिजं चन्द्रं "चन्द्रमा मनसो जातः" इति मन्त्रवर्णात्, यथा प्रभाहीनं करोति, तथा राक्षसान् प्रभाहीनान् कृत्वा विख्यातो यः स राम

स्वस्य ध्यानेन वैराग्यमैश्वर्य्यं स्वस्य पूजनात्।
तथा रामस्य रामाख्या भुवि स्यादथ तत्त्वतः ॥५॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥ ६ ॥
चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना ॥ ७॥

इत्यर्थः। निमित्तान्तरमाह, राज्यार्हाणामिति। धर्ममार्गमिति। स्वस्य चरित्रेण श्रुतेन धर्ममार्गं राति, 'नामतः' उच्चारितात् ज्ञानमार्गं राति, स्वस्य ध्यानेन वैराग्यं राति, स्वस्य पूजनात् ऐश्वर्य्यं 'राति' ददाति, राज्यार्हाणां महीभृतां तथेति समुच्चये। अतोऽस्य रामस्य रामाख्या भुवि स्यात्। अथ 'तत्त्वतः' वस्तुतः अर्थत उच्यते इति शेषः ॥ ३ ॥ ४ ॥ ५ ॥

रमन्ते इति। 'अनन्ते' देश काल-कृत-परिच्छेद-शून्ये 'नित्ये' नियते अवयव विकार-शून्ये च, 'आनन्दे' सुखैकरूपे 'चिदात्मनि' चिद्घने अमूर्त्तब्रह्मणि 'योगिनः' निरुद्धेन्द्रियग्रामाः 'रमन्ते' ध्यानेन तृप्यन्ति ; 'इति' हेतोः रामपदेन 'असावेव' दशरथात्मजः 'परं' मुख्यं ब्रह्म अभिधीयते, अधिकरणे घञ्।

ननु मूर्त्तस्य कथमानन्त्यादि ? नन्वमूर्त्तस्यापि कथमानन्त्यादि ? इति चेत्, समः समाधिः, अपरिदृष्टार्थ-स्वीकारस्तूभयत्रापि समः ; तस्मात् "द्वावेव ब्रह्मणो रूपे मूर्त्तञ्चामूर्त्तञ्च" इति श्रुतेरसङ्कोच एव न्यायः, वचनानि त्वपूर्वत्वादिति न्यायादलौकिकार्थ-बोधनं श्रुतेरलङ्कार एव ॥ ६ ॥

रामशब्दार्थं निरूप्य ब्रह्मणः कथं शरीरित्वमित्याशङ्क्य

रूपस्थानां देवतानां पुंस्त्वाङ्गास्त्रादि-कल्पना।
द्वि चत्वारि षड्ष्टासां दश द्वादश षोड़श॥ ८॥
अष्टादशापि कथिता हस्ताः शङ्खादिभिर्युताः।
सहस्रान्तास्तथा तासां वर्ण-वाहन-कल्पना॥ ९॥
शक्ति-सेना-कल्पना च ब्रह्मण्येवं हि पञ्चधा।

उत्तरमाह, चिन्मयस्येति। चिन्मयस्य ब्रह्मणः 'रूपकल्पना' मायिकं रूपमित्यर्थः। स्वरूपानतिरिक्तया मायाशक्त्या नरस्येवैकस्यापि विरुद्ध-नानाधर्माविरोध इति भावः॥ ७॥

तदायुधादिकमपि कल्पितमेवेत्याह, रूपस्थानामिति। रूपे तिष्ठन्तीति रूपस्थाः, तासां, देवतानां पुंस्त्वकल्पना यथा रामः पुमान्, स्त्रीत्वकल्पना यथा सीता स्त्री, अङ्ग-कल्पना यथा त्रिनयनचतुर्भुजत्वादि रुद्र विष्ण्वादीनाम्, अस्त्र-कल्पना यथा शार्ङ्गं धनुः, नन्दकः खड्गः; आदिशब्दाद्भूषण-वाहनादि-कल्पना।

उक्तमर्थमुदाहरति, द्वि चत्वारीति। 'आसां' देवतानां 'द्वि' द्वौ हस्तौ कथिताविति विपरिणामोऽविभक्तिकस्य निर्देशः। तथा 'चत्वारि' चत्वारो हस्ताः कथिताः, यथा छन्दोलिङ्गव्यत्ययः। तथा तासां षड्भुजाः कथिताः, यथा मूर्त्तिभेदानामम्बिकाया अष्टहस्ताः पुरुषोत्तमस्य दश शङ्करस्य द्वादश षोड़शाष्टादश चण्डिकामूर्त्तिभेदानाम्। 'शङ्खादिभिः' आयुधैः। सहस्रहस्ता विश्वरूपस्य। 'वर्णाः' श्याम-श्वेतादयः, 'वाहनानि' पक्षीन्द्रादीनि तेषां कल्पना न तु वस्तुवृत्तिः॥८॥९॥

शक्तेरपि कल्पना, स्वरूपातिरिक्तायाः पृथक् शक्तेरभावात् तस्याः पार्थक्यं कल्प्यते। अथवा, प्रभु-मन्त्रोत्साह-लक्षणा-

कल्पितस्य शरीरस्य तस्य सेनादि-कल्पना ॥१०॥
ब्रह्मादीनां वाचकोऽयं मन्त्रोऽन्वर्थादि-सञ्ज्ञकः।
जप्तव्यो मन्त्रिणा नैवं विना देवः प्रसीदति ॥११॥

स्त्रियः शक्तयः, तासां कल्पना, 'सेना' सैन्यं, तस्याः कल्पना। एवं ब्रह्मणि पञ्चधा कल्पना, रूपकल्पना, ।१। पुंस्त्र्यङ्गास्त्रादि-कल्पना ।२। वर्णवाहन-कल्पना ।३। शक्ति-कल्पना ।४। सेना-कल्पना चेति ।५। अथवा, ब्रह्मण्येवं हि पञ्चधेति परेणान्वेति। ब्रह्मणि पञ्चायतनभेदेन कल्पितस्य देहस्य सतः तस्य सेनादि-कल्पना ॥१०॥

'ब्रह्मादीनां' स्थावरान्तानां वाचकोऽयं 'मन्त्रः' राममन्त्रः। वक्ष्यति हि "तथैव रामबीजस्थं जगदेतच्चराचरम्" इति। यद्वा "इति रामपदेनासौ परं ब्रह्म" इत्यादीनां पूर्वोक्तानामर्थानां 'वाचकः' रामनामात्मको मन्त्रः। आदिशब्दः पूर्वोक्तसन्निवेशापेक्षः।

यद्वा 'ब्रह्म' अद्वैत-परमानन्दात्मा, तदादीनां वक्ष्यमाण-सप्तचत्वारिंशद्‌ग्रहाणां, "रमन्ते योगिनोऽनन्ते" इत्याद्युक्तस्य मूलव्यूहस्य च वाचकः, 'अन्वर्थं' सर्वार्थानुगतं ब्रह्म तत्त्वादि-प्रपञ्चजातं, तस्य 'सञ्ज्ञा' ज्ञानं यस्मात् सोऽन्वर्थसञ्ज्ञः, स्वार्थे कः, सर्ववाचक इत्यर्थः।

यद्वा द्वन्द्वगर्भो बहुव्रीहिः, अन्वर्थ-सञ्ज्ञकः, आदिसञ्ज्ञकश्च, अन्वर्थता "मननात्त्राणनान्मन्त्र" इति, "राक्षसा मरणं यान्ति" इत्यादिश्च; आदिसञ्ज्ञकः आदिमन्त्रत्वात्। स च 'मन्त्रिणा' गुरुतो लब्धमन्त्रेण जप्तव्यः। विपक्षे बाधकम् एवमिति। 'एवं विना' अर्थस्मरण-पूर्वकमन्त्रजपं विना 'देवः' परमेश्वरः न प्रसीदति ॥ ११ ॥

क्रिया-कर्मेति-कर्तॄणामर्थं मन्त्रो वदत्यथ।
मननात्त्राणनान्मन्त्रः सर्ववाच्यस्य वाचकः ॥१२॥
सोऽभयस्यास्य देवस्य विग्रहो यन्त्रकल्पना।
विना यन्त्रेण चेत् पूजा देवता न प्रसीदति ॥१३॥
स्वभूर्ज्योतिर्मयोऽनन्तरूपी स्वेनैव भासते॥

'क्रिया' आह्वानादिरूपा, 'कर्म' रक्षोमारणादि, 'इति' इदमात्मकं कर्तॄणां मतं देवानाम् अर्थं मन्त्रो वदति। मन्त्रत्वं कस्मादत आह, अथेति। 'मननात्' बोधनात् 'त्राणनात्' त्राणात् मन्त्रः, त्राणस्य कारणं त्राणनं, मननेन त्रायते इति विग्रहः। आद्यः सम्पदादित्वात् क्विबन्तः, अन्त्यः सुपिस्थ इति कान्तः। सर्वस्य 'वाच्यस्य' वक्तव्यस्य व्यूहद्वयात्मकस्य वाचकः प्रणववत् ब्रह्माभिधायकत्वात् ब्रह्मणि च सर्वान्तर्भावादित्यर्थः ॥ १२ ॥

सेति। 'सा' यन्त्रकल्पना उभयस्य पुम्प्रत्यक्षात्मकस्य मूर्त्तात्मकस्य सूक्ष्मस्थूल-व्यूहात्मकस्य वा अस्य देवस्य 'विग्रहः' शरीरं, यन्त्रस्य देवानां सेनारूपत्वात्, तस्य सेनादि-कल्पनेति श्रुतेश्च सर्वदेव-शरीरमित्यर्थः।

अथवा 'सः' मन्त्रः 'अभयस्य' निर्भयस्य 'देवस्य' रामस्य 'विग्रहः' शरीरं "मूर्त्तिं मूलेन कल्पयेत्" इति स्मृतेः, ततो यन्त्रकल्पना कर्त्तव्या, अयं विधिः। अकरणे बाधकं-विनेति ॥ १३ ॥

देवस्वरूपमाह, स्वभूरिति। 'स्वयम्' अन्यनिरपेक्षः 'भवति' विद्यते स्वभूः, 'ज्योतिर्मयः' प्रकाशात्मा, 'अनन्तः' देशतः कालतश्च परिसमाप्तिरहितः। अनन्त इत्येव वक्तव्ये

जीवत्वेनेदमों यस्य सृष्टि-स्थिति-लयस्य च ॥१४॥
कारणत्वेन चिच्छक्त्या रजःसत्त्व तमो-गुणैः ।
यथैव वटबीजस्थः प्राकृतश्च महाद्रुमः ॥ १५ ॥
तथैव रामबीजस्थं जगदेतच्चराचरम् ।
रेफारूढ़ा मूर्त्तयः स्युः शक्तयस्तिस्र एव चेति ॥१६॥
सीता-रामौ तन्मयावत्र पूज्यौ
जातान्याभ्यां भुवनानि द्विसप्त ।

रूपीतिपदं रूपवत्त्वेऽप्यनन्तताऽव्याहतिसूचनार्थम् । स्वेनैव भासते न त्वन्येन स्वप्रकाशत्वात् । अथच 'स्वभूः' बिन्दुः 'ज्योतिर्मयः' रेफमिलितः आकारेण निरूपितो मध्य आलिङ्गितो रामितिमन्त्रः 'स्वेनैव' स्वात्मनैव भासते, शब्दस्य हि स्वं स्वं रूपमर्थो वाच्यश्चेति । यद्वा स्फोटस्य ब्रह्मरूपत्वात्, तस्य च स्वप्रकाशत्वात् ।

जीवत्वेनेति । यस्य जीवत्वेन स्थित्युत्पत्ति-लयस्य च कारणत्वेन चिच्छक्त्या रजः-सत्त्व तमो-गुणैः यथासङ्ख्य-मिदं वर्त्तते, यस्य चिच्छक्त्या जीवत्वेन गुणैः कारणत्वेन च 'इदं' सर्वं भातीत्यर्थः । कथं भूतम् इदम् ? 'ओं' परमात्मरूपमेव, वस्तुगत्या यथैवोङ्कारः, तथैव रामबीजमिति ।

वटबीजं दृष्टान्तमाह, यथैवेति । प्राकृतः प्रकृतेर्वटबीजादुत्पन्नः ॥ १४ ॥ १५ ॥

रेफारूढ़ा इति । रेफोपरिस्थाः 'रः' कृष्णः 'आ' ब्रह्मा 'मः' महेश्वरः तिस्रो मूर्त्तयः, तिस्रः 'शक्तयः' उत्पत्ति-स्थिति-संहारशक्तयः ॥ १६ ॥

सीता-रामौ 'तन्मयौ' प्रकृति-पुरुषमयौ अत्र बीजेन पूज्यौ

स्थितानि च प्रहृतान्येव तेषु
ततो रामो मानवो माययाऽधात् ॥ १७ ॥
जगत्-प्राणायात्मनेऽस्मै नमः स्यात्
नमस्त्वैक्यं प्रवदेत् प्राग्गुणेन इति॥ १८ ॥ २ ॥
जीवावाचि नमो नाम चात्मा रामेति गीयते।
तदात्मिका या चतुर्थी तथा चायेति कथ्यते ॥१९॥

वीजस्य मूर्त्तित्वात् "मूर्त्तिं मूलेन कल्पयेत्" इत्युक्तेः। 'आभ्यां' सीतारामाभ्यां 'द्विसप्त' द्विरावृत्तानि सप्त, चतुर्दशेत्यर्थः, 'जातानि' उत्पन्नानि, 'स्थितानि च' तयोरेव स्थितिं प्राप्तानि, 'प्रहृतानि' लीनान्येव, 'तेषु' अकारोकार-मकारेषु ब्रह्म विष्णु-महेश्वरेषु ; 'ततः' कारणात् रामो 'मायया मानवोऽधात्' कपटेन मानवोऽहमिति दध्यौ ॥ १७ ॥

'जगत्-प्राणाय' जगतां प्राणाय आत्मने 'अस्मै' रामाय नमनं 'नमः' नमस्कारः स्यात्, कर्त्तव्य इत्यर्थः। नमस्तु कृत्वेति शेषः, नमस्कारन्तु कृत्वा 'प्राक् गुणेन' गुणेभ्यः प्राग्रूपेण ब्रह्मणा सह ऐक्यं नमस्यदेवताया वदेत्। नमस्यैक्यमिति पाठे स्पष्टोऽर्थः। इति प्रथमः खण्डसमाप्तौ ॥ १८॥ २ ॥

मन्त्रपदार्थमाह, जीवावाचीति। 'नमो नाम' नम इति नाम, नम इति प्रातिपदिकम्, 'जीवावाचि' जीवमावक्ति, तस्य नामत्वात् नत्वाभिधानम्। रामेति नाम्ना च आत्मा गीयते। 'तदात्मिका' तेन रामेण आत्मना सह ऐक्यमापन्ना एकपदतां गता या चतुर्थी-विभक्तिः आयेति, तया तथा कथ्यते

मन्त्रोऽयं वाचको रामो वाच्यः स्याद्योग एतयोः।
फलदश्चैव सर्वेषां साधकानां न संशयः ॥ २० ॥
यथा नामी वाचकेन नाम्ना योऽभिमुखो भवेत्।
तथा वीजात्मको मन्त्रो मन्त्रिणोऽभिमुखो भवेत्॥२१॥
वीज-शक्ती न्यसेद्दक्ष-वामयोस्तनयोरपि।
कीलो मध्ये विना भाव्यः स्ववाञ्छा-विनियोगवान् २२

तथोच्यते, जीवात्म-परमात्मनोरैक्यमेवोच्यते; तेन यस्तत्त्वमस्यादिवाक्यार्थः, स एवास्य मन्त्रस्यार्थ इत्यर्थः ॥ १९ ॥

वाक्यार्थमाह, मन्त्रोऽयमिति। अयं मन्त्रो वाचको रामस्य; रामोऽस्य मन्त्रस्य वाच्यः स्यात्; 'एतयोः' वाच्य-वाचकयोः 'योगः' योजनमात्मना सहैक्यापादनं, सर्वेषां साधकानां फलप्रदः इति निश्चितमेव, तत उक्तम्,—

"देवता-गुरु-मन्त्राणां भावयेदैक्यमात्मना"। इति। २० ॥

यथेति। यथा यः 'नामी' नामवान्, स वाचकेन नाम्ना आकारितः सन् अभिमुखो भवेत् आकारयितुरिति शेषः। यद्वा, 'आययति' आकारयति आय्, अय्गतावाङ्पूर्वः क्विप्, तस्य, आकारयितुरित्यर्थः। तथा वीजात्मकः नामवज्ज्ञातव्यं, येन आकारितो देवो मन्त्रिणोऽभिमुखः शीघ्रफलदो भवेदिति पदार्थ-वाक्यार्थ-ज्ञानफलमुक्तम् ॥ २१ ॥

न्यासमाह, वीजेति। 'वीजम्' आद्यपदं, 'शक्तिः' उत्तर-पदम्, तदुक्तं शौनककल्पे,—

"जानीयात् प्रथमं वर्णं वीजं शक्तिं नतिन्तथा" ॥ इति।

वीजं दक्षिणस्तने, शक्तिं वामस्तने न्यसेत्। केचन आयेति शक्तिमाहुः। कील इति। कीलो य इति वर्णौ 'मध्ये' स्तनयोः

सर्व्वेषामेव मन्त्राणामेष साधारणः क्रमः।
अत्र रामोऽनन्तरूपस्तेजसा वह्निना समः॥ २३॥

मध्ये विना भाव्यः, नियमेन न्यसनीयः। न केवलं हृदि कीलो न्यास्यः, किन्तु स्वस्य 'वाञ्छा' अभिलाषो विनियोगश्च, तावपि न्यास्याविल्याह, स्वेति। प्रयोगस्तु, श्रीराम-प्रीत्यर्थं लक्ष्म्यादि-प्राप्तये वा जपे पूजायां वा विनियोग इति हृदि स्मर्त्तव्यमिति। यद्वा ननु हृदये कीलन्यासस्य किं प्रयोजनम्? अत आह, स्वेति। स्वस्य या 'वाञ्छा' साधकस्य योऽभिलाषः, तस्याः यो 'विनियोगः' विशेषेण नियोगः भवेदिति प्रेरणं, तद्वान् साधकेच्छापूरक इत्यर्थः॥ २२॥

सर्व्वेषामिति। वीजं, शक्तिः, कीलकमिति त्रयं स्ववाञ्छा-विनियोगाभ्यां सहितमुक्तस्थानेषु न्यसनीयमिति, सर्व्वमन्त्रस्य साधारणो विधिरित्यर्थः। उद्धारः शिष्टन्यासा ऋष्यादयः षड़ङ्गानि च यथा,—

"अनन्तो न्यासतः सेन्दुर्वीजं रामाय हृन्मनुः।
षड़क्षरोऽयमादिष्टो भजतां कामदो मणिः॥
ब्रह्मा प्रोक्तो मुनिश्छन्दो गायत्रं देवता मनोः।
देशिकेन्द्रैः समाख्यातो रामो राक्षस-मर्दनः॥
दीर्घभाजा स्ववीजेन कुर्य्यादङ्गानि षट् क्रमात्।
ब्रह्म-रन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यन्धुषु पादयोः॥
षड़क्षराणि विन्यस्येन्मन्त्रस्य मनुवित्तमः"॥ इति।

आद्यं वीजन्तु रां, तस्य ध्यानमाह, अत्रेति। 'रामः' दाशरथिः, 'अनन्तरूपः' ब्रह्मरूपः 'तेजसा' बलेन वह्नितुल्यः, अथ च रामः 'अनुष्णगुना' चन्द्रेण सीतया विश्वो व्याप्तः वेष्टितश्चेत्, तदा पुम्प्रकृत्यात्मकं जगत् सिद्धम्, अथ 'चन्द्रेण'

सत्वनुष्वागु विश्वश्चेदग्नीषोमात्मकं जगत् ।
उत्पन्नं शीतया भाति चन्द्रश्चन्द्रिकया यथा ॥२४॥
प्रकृत्या सहितः श्यामः पीतवासा जटाधरः ।
द्विभुजो कुण्डली रत्नमाली धीरो धनुर्धरः ॥२५॥
प्रसन्नवदनो जेता धृष्ट्यष्टक-विभूषितः ।
प्रकृत्या परमेश्वर्य्या जगद्योन्याङ्किताङ्कभृत् ॥२६॥
हेमाभया द्विभुजया सर्वालङ्कृतयाचिता ।
श्लिष्टः कमल-धारिण्या पुष्टः कौशलजात्मजः ॥२७॥

विश्वविन्दुनाविष्टश्चेत्, तदा अग्नीषोमात्मकं जगत्, तद्वाचकः रामिति सिद्धम् । उत्पन्नमिति पूर्वेण सम्बध्यते । स रामः 'शीता' लाङ्गल-पद्धतिः, शेते शीता, औणादिकस्तन् प्रत्ययः । तज्जत्वात् जनकात्मजापि शीता, तया भाति ; दृष्टान्तश्चन्द्र इति ॥ २३ ॥ २४ ॥

इदानीं ध्यानार्थं देवस्वरूपमाह, प्रकृत्येति । श्यामो वर्णेन 'धीरः' निर्भयः ।

'धृष्टिः' प्रागल्भ्यः सा च 'अष्टकम्' अणिमाद्यष्टकञ्च, तेन 'विभूषितः' शोभितः । अथवा, धृष्ट्याद्यष्टकावरणेन । 'प्रकृत्या' मूलप्रकृतिरूपया 'परमेश्वर्य्या' परमया ईश्वर्य्या जगतां 'योन्या' उत्पत्तिहेतु-भूतया 'अङ्कितः' चिह्नितः यः 'अङ्कः' उत्सङ्गः, तं बिभर्त्ति ॥ २५ ॥ २६ ॥

'सर्वालङ्कृतयाचिता' सर्वेण अलङ्कृतेन अलङ्कारेण 'आचितया' व्याप्तया । सर्वालङ्कृताचितया इति वक्तव्ये छान्दसो विभक्तमंश्चे प्रयोगः । यद्वा, सर्वैरलङ्कारैरलङ्कृतया, तथा

दक्षिणे लक्ष्मणेनाथ सधनुष्पाणिना पुनः।
हेमाभेनानुजेनैव तदा कोणत्रयं भवेत्॥ २८॥
तथैव तस्य मन्त्रस्य यस्याणुश्च स्वङेतया।
एवं त्रिकोणरूपं स्यात् तं देवा ये समाययुः॥२९॥
स्तुतिं चक्रुश्च जगतः पतिं कल्पतरौ स्थितम्।
कामरूपाय रामाय नमो माया-मयाय च ॥३०॥

'चिता' चिच्छक्ति-रूपया। सर्वथालङ्कृतया तथा श्लिष्ट इति युक्तः पाठः। 'पुष्टः' विपुलाङ्गः, 'कोमलाङ्गः' कौशलजायाः कौशल्यायाः आत्मजः पुत्रः॥ २७॥

दक्षिणे इति। दक्षिणे भागे लक्ष्मणेन श्लिष्टः, अर्थात् वामे सीतया श्लिष्टः। तदुक्तम्—

"वामभागे समासीनां सीतां काञ्चन-सन्निभाम्" इति।

'तदा' देवतात्रय उपविष्टे सति 'कोणत्रयं भवेत्' एकं त्रिकोणं भवेदित्यर्थः। अनुजेनैवेत्येवकारेण अस्मिन् त्रिकोणे देवतान्तर-पूजा वार्य्यते॥ २८॥

तथैवेति। यथा वीजमुक्तम्, एवं तस्य 'मन्त्रस्य' राममन्त्रस्य शेषोऽंश उच्यते इति शेषः। तस्य कस्य? यस्य स्वङेतया सह अणुः 'स्वं' रामस्वरूपं शब्दः, तस्य 'ङेता' विभक्तिश्चतुर्थ्येकवचनं तेन सह 'अणुः' सूक्ष्मो भागः नम्रांशो नतिः नमःशब्द इत्यर्थः। ङेतो रामो नमःशब्दः स्वमन्त्रशेषोऽंश इत्यर्थः। 'एवं' सति षड़क्षरे मन्त्रे सिद्धे सति द्वितीयं त्रिकोणरूपं स्यात्, त्रिकोणद्वये कोणषट्क-षड़क्षर-समावेशार्थं, तं देवा इति। ये देवाः तं समाययुः॥ २९॥

द्रष्टुं लब्धावसरास्ते तं स्तुतिं स्तूयते यः, स स्तुतिः, तं

नमो वेदादिरूपाय ओङ्काराय नमोनमः।
रामाधाराय रामाय श्रीरामायात्ममूर्त्तये॥ ३१ ॥
जानकीदेह-भूषाय रक्षोघ्नाय शुभाङ्गिने।
भद्राय रघुवीराय दशास्यान्तक-रूपिणे॥ ३२ ॥
रामभद्र! महेष्वास! रघुवीर! नृपोत्तम!।
भो दशास्यान्तकास्माकं रक्ष, देहि श्रियञ्च ते॥३३॥
त्वमैश्वर्य्यं दापयाथ सम्प्रत्याखरमारणम्।
कुर्विति स्तुत्य देवाद्यास्तेन सार्द्धं सुखं स्थिताः॥३४

'स्तुतिं' स्तुतिविषयं चक्रुः। स्तुतिमाह, कामेति। 'कामिन' स्वेच्छया रूपं यस्य, तस्मै, 'रामा' स्त्री, तस्याः 'धाराय' धर्त्रे, रमाधारायेति युक्तः पाठः। 'शुभाङ्गिने' शुभमङ्गमस्यास्ति शुभाङ्गी, तस्मै। छान्दसत्वात् कर्मधारयादपि मत्वर्थीयः साधुः, शुभश्चासावङ्गी चेति वा, 'अङ्गी' प्रधान-पुरुषः॥३०॥३१॥३२॥

रामभद्र इत्यादि सम्बोधन-चतुष्टयम्। भो भगवन् 'दशा- स्यान्तक!' दश आस्यानि यस्य सः दशास्यः रावणः, तस्य अन्तक! अस्माकं 'रक्ष' रक्षणं कुरु, 'ते' तव श्रियञ्च अस्मभ्यं देहि। यद्वा 'ते अस्मान्' त्वदीयानस्मान् श्रियं देहीत्यन्वयः। त्वम् 'ऐश्वर्य्यम्' ईश्वरभावं 'दापय' राक्षसैर्गृहीतं प्रत्यर्पय, 'अथ सम्प्रति' इदानीं सङ्क्षेपेण प्रार्थयामहे, 'आखरमारणं' खरो नाम राक्षसः, तस्य मारण-पर्य्यन्तं कुरु, भो दशास्या- न्तक! अस्माकं रक्षेत्यादिना प्रार्थितन्तु पौरुषं पश्चात् करि- ष्यसि। 'इति स्तुत्य' एवं स्तुत्वा 'देवाद्याः' मुख्यदेवाः 'तेन' रामेण सार्द्धं सुखं यथा स्यात्तथा स्थिताः रावणवधेन निज-

स्तुवन्त्येवं हि ऋषय-स्तदा रावण आसुरः।
रामपत्नीं वनस्थां यः स्वनिवृत्त्यर्थमाददे ॥ ३५ ॥
स रावण इति ख्यातो यद्वा रावाच्च रावणः।
तद्व्याजेनेक्षितुं सीतां रामो लक्ष्मण एव च ॥३६॥
विचेरतुस्तदा भूमौ देवीं सन्दृश्य चासुरम्।
हत्वा कबन्धं शवरीं गत्वा तस्याज्ञया तया ॥३७॥

सीलाभं प्रतीक्षमाणाः। अन्तिस्तुत्येति पाठे 'अन्ति' समीपे स्थिता इत्यन्वयः ॥ ३३ ॥ ३४ ॥

न केवलं देवाद्याः, किन्त्वन्येऽपौत्याह, स्तुवन्तीति। यथा च देवाः स्तुवन्ति, एवमृषयोऽपीत्यर्थः। 'तदा' खरादिषु हतेषु रावणनामा 'आसुरः' असुर एव आसुरः 'यः' प्रसिद्धः, स रामपत्नीं वनस्थां 'स्वनिवृत्त्यर्थं' स्वविनाशार्थम् आददे ॥ ३५ ॥

स इति। रामपत्नीं वनस्थामाददे यः, स रावण इति रावणपदव्युत्पत्तिः। 'यद्वा' अथवा, 'रावात्' शब्दात्, कैलास-तोलनावसरे ईश्वरेण भारे दत्ते रौति स्म; तेन रावणः; ततः पूर्वन्तु दशाननामाभूत्। तदिति। 'तत्' तस्मात्, यतः रामपत्नीमाददे, तस्मात् कारणात् सीतामीक्षितुं यद्व्याजं, तेन। सीताशब्दो दन्त्यादिस्तालव्यादिरपि ॥ ३६ ॥

विचेरतुरिति। न सीतेक्षणमुद्देश्यम्, किन्तु दशास्य-वध एवोद्देश्यः, यदर्थं देवप्रार्थनया अवतीर्णः। 'भूमौ' उपानदाद्यनन्तर्हितायां विचेरतुः, 'देवीं' राजपत्नीं सीतां 'सन्दृश्य' इतस्ततो विलोक्य असुरं कबन्धं हत्वा 'शवरीं' तापसीं 'गत्वा' प्राप्य तत्र तत् स्वागतं गृहीत्वा 'तस्य' रामस्य आज्ञया 'तया'

पूजितावीरपुत्रेण भक्तेन च कपीश्वरम् ।
आहूय शंसतां सर्वमाद्यन्तं राम-लक्ष्मणौ ॥ ३८ ॥
स तु रामे शङ्कितः सन् प्रत्ययार्थञ्च दुन्दुभेः ।
विग्रहं दर्शयामास यो रामस्तमचिक्षिपत् ॥ ३९ ॥
सप्ततालान् विभिद्याशु मोदते राघवस्तदा ।
तेन हृष्टः कपीन्द्रोऽसौ सरामस्तस्य पत्तनम् ॥ ४० ॥

शवर्य्या पूजितौ सन्तौ 'ईरः' वायुः तस्य पुत्रेण 'भक्तेन' भजनपरेण हनूमता करणेन प्रयोज्यकर्त्रा वा 'कपीश्वरं' सुग्रीवम् आहूय 'शंसताम्' अशंसतां कथितवन्तौ सर्वम् 'आद्यन्तम्' आदिश्च अन्तश्च आद्यन्तौ तम् आद्यन्तं, वाहिताग्न्यादिषु, आदित आरभ्य अन्तं यावत् ॥ ३७ ॥ ३८ ॥

ततो रामेण सुग्रीवस्य राज्ये प्रतिज्ञाते सति, स तु रामे 'शङ्कितः' बालिबधे रामस्य सामर्थ्यमस्ति न वेति सन्दिग्धः सन् 'प्रत्ययार्थं' स्वविश्वासार्थम्। 'तत्प्रत्ययार्थम्' इति पाठे 'तस्मिन्' रामे पौरुषस्य विश्वासार्थं 'दुन्दुभेः' दैत्यस्य बालिहतस्य 'विग्रहम्' अस्थिपुञ्जं रामाय दर्शयामास, अयं दैत्यो बालिना हत इति। ततो 'यः' रामो दुन्दुभेर्द्रष्टा, स 'तं' दुन्दुभिम् 'अचिक्षिपत्' अनतिप्रयत्नेनैव क्षिप्तवान्। अथवा "यस्तु मातरिश्वनि" इति निर्घण्टः ; 'यः' मातरिश्वा इव वायुरिव तूलपुञ्जं, शीघ्रकारी रामः 'तं' विग्रहम् अचिक्षिपत् ॥ ३९ ॥

ततो बलनिश्चये सत्यपि धानुष्कता-सन्देह-निरासार्थं सप्ततालान् एकेन बाणेन 'आशु' शीघ्रं 'विभिद्य' निर्भिद्य मोदते रघोरपत्यं 'राघवः' रामः। वर्त्तमानकाल-निर्देशस्तु कल्पे कल्पे एवं भवतीति द्योतनार्थम्। तेन सुग्रीवो हृष्टः सन्

जगामागर्जदनुजो बालिनो वेगतो गृहात्।
वाली तदा निर्जगाम तं वालिनमथाहवे ॥ ४१ ॥
निहत्य राघवो राज्ये सुग्रीवं स्थापयेत्ततः।
हरीनाहूय सुग्रीवस्त्वाह चाशाविदोऽधुना ॥४२॥
आदाय मैथिलीमद्य ददत श्वाशु गच्छत।
ततस्ततार हनूमानब्धिं लङ्कां समाययौ ॥ ४३ ॥
सीतां दृष्ट्वासुरान् हत्वा पुरं दग्ध्वा तथा स्वयम्।
आगत्य रामाय स्वयं न्यवेदयत तत्त्वतः ॥ ४४ ॥

'सरामः' रामसहितः 'तस्य' बालिनः 'पत्तनं' नगरं 'जगाम' गतवान्। ततः 'अगर्जत्' सिंहनादं कृतवान् 'अनुजः' कनिष्ठः, बालिन इत्युभाभ्यां सम्बध्यते। 'वेगतः' वेगेन गृहात् जगाम, अगर्जच्चेत्यन्वयः। 'निर्जगाम' गृहान्निर्गतः ॥ ४०॥४१ ॥

'आशाविदः' दिक्कुशलान्। 'अधुना' शीघ्रं गच्छत, आशु मैथिलीमादाय अद्य ददत, 'श्व' आशु स्वरूपतो वा सन्देशतो वा शु आदाय आशु ददतेत्यर्थः। शुशब्द आश्चर्ये। ददत, शु, आशु, इति पदच्छेदः।

'ततः' तदनन्तरं 'हनुमान्' ईरपुत्रः 'अब्धिं' समुद्रं 'ततार' तीर्णवान्, तीर्त्वा लङ्कां समाययौ। कथाविस्तरस्तु वाल्मीकीयाद्बोद्धव्यः ॥ ४२ ॥ ४३ ॥

अशोकवनिकायां सीतां दृष्ट्वा 'असुरान्' रक्षःकुमारादीन् हत्वा 'पुरं' लङ्कां पुच्छाग्निना दग्ध्वा तथा स्वयं रामं प्रति आगत्य रामाय 'स्वयं' स्वमुखेन तत्त्वतः 'न्यवेदयत' नितरां बोधितवान्। द्विःस्वयम्पदमादरातिशयार्थम् ॥४४॥

तदा रामः क्रोधरूपी तानाहूयाथ वानरान् ।
तैः सार्द्धमादायास्त्रांश्च पुरीं लङ्कां समाययौ ॥४५॥
तां दृष्ट्वा तदधीशेन सार्द्धं युद्धमकारयत् ।
घट-श्रोत्र-सहस्राक्षजिद्भ्यां युक्तं तमाहवे ॥ ४६ ॥
हत्वा विभीषणं तत्र स्थाप्याथ जनकात्मजाम् ।
आदायाङ्कस्थितां कृत्वा स्वपुरं तैर्जगाम सः ॥४७॥
ततः सिंहासनस्थः सन् द्विभुजो रघुनन्दनः ।
धनुर्धरः प्रसन्नात्मा सर्वाभरण-भूषितः ॥ ४८ ॥
मुद्रां ज्ञानमयीं याम्ये वामे तेजः-प्रकाशनम् ।

'क्रोधरूपी' क्रोधं रूपयति निरूपयति आत्मना दर्शयति, तद्धर्मी। तैः सार्द्धं लङ्कां समाययौ। किं कृत्वा ? 'अस्त्रान्' एकोनपञ्चाशतः प्रयोग-मन्त्रान्, एकोनपञ्चाशतः संहार-मन्त्रान् विश्वामित्रोपदिष्टान् कृशाश्वसुतान् 'आदाय' गृहीत्वा ॥ ४५ ॥

तामिति। 'ताम्' लङ्कां दृष्ट्वा 'तदधीशेन' रावणेन सार्द्धं युद्धम् 'अकारयत्' कृतवान्, कारितवान् वानरैरिति वा। 'घट-श्रोत्रः' कुम्भकर्णः, 'सहस्राक्षजित्' इन्द्रजित् मेघनादः। 'तैः' वानरविभीषणादिभिः ॥ ४६ ॥ ४७ ॥ ४८ ॥

'याम्ये' दक्षिणे बाहौ। ज्ञानमुद्रा, तल्लक्षणन्तु,—
"तर्जन्यङ्गुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् ।
वामं हस्ताम्बुजं वामे जानुमूर्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य वल्लभा" ॥ इति ॥

वामे 'तेजः प्रकाशनं' धनुः धृत्वा, यद्वा 'प्रकाशनं तेजः'

धृत्वा व्याख्यान निरतश्चिन्मयः परमेश्वरः ॥ ४९ ॥
उदग्-दक्षिणयोः स्वस्य शत्रुघ्न भरतौ धृतः।
हनूमन्तञ्च श्रोतारमग्रतः स्यात्त्रिकोणगम् ॥ ५० ॥
भरताधस्तु सुग्रीवं शत्रुघ्नाधो विभीषणम्।
पश्चिमे लक्ष्मणं धृत्वा धृतच्छत्रं सचामरम् ॥ ५१ ॥

पुस्तकाख्यमुद्रां धृत्वा वाममुष्टिं स्वाभिमुखौ कृत्वा पुस्तक-मुद्रिकाव्याख्यान-निरतः स्थितः। व्याख्यानमुद्रा तु,—

"दक्षिणाङ्गुष्ठ-तर्जन्यावग्रलग्ने पराङ्गुली:।
प्रसार्य्य संहतोत्ताना एषा व्याख्यानमुद्रिका।
रामस्य च सरस्वत्या अत्यन्तं प्रेयसी मता" ॥ इति ॥

ज्ञान-व्याख्यान-पुस्तकानां युगपत् सम्भवः। धनुर्मुद्रा तु,—

"वामस्य मध्यमाग्रन्तु तर्जन्यग्रे नियोजयेत्।
अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीड़येत्।
दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमीरिता" ॥ इति ॥ ४९ ॥

'स्वस्य' रामस्य। धृत इत्यत्र धृतचामरौ इति पदलोपो द्रष्टव्यः। तदुक्तम्,—

उभौ भरत-शत्रुघ्नौ पार्श्वयोर्धृतचामरौ" ॥ इति ॥

यद्वा धृङ् स्थैर्य्ये, व्यत्ययेन परस्मैपदम्, छान्दसः शप्लुक्। 'धृतः' स्थिरीभूय तिष्ठतः। हनूमन्तञ्च श्रोतारं रामे व्याख्यातरि शिष्यम् 'अग्रतः' गुरोरग्रे त्रिकोणगं पूजयेदिति प्रकारः स्यात्। अथवा भरत-शत्रुघ्नौ धृतवान् रामः स्यात् अग्रतो हनूमन्तञ्च धृतः स्यात्, कर्त्तरि क्तः, न लोकाव्ययेति षष्ठी-निषेधः ॥ ५० ॥

'भरताधः' रामात् भरतव्यवधानेन धृत्वा स्थापयित्वा

तदधस्तौ तालवृन्तकरौ त्र्यस्रं पुनर्भवेत् ।
एवं षट्कोणमादौ स्वदीर्घाङ्गैरेष संयुतः ॥ ५२ ॥
द्वितीयं वासुदेवाद्यैराग्नेय्यादिषु संयुतः ।
तृतीयं वायुसूनुञ्च सुग्रीवं भरतन्तथा ॥ ५३ ॥
विभीषणं लक्ष्मणञ्च अङ्गदञ्चारिमर्द्दनम् ।
जाम्बवन्तञ्च तैर्युक्तः ततो धृष्टिर्जयन्तकः ॥ ५४ ॥
विजयश्च सुराष्ट्रश्च राष्ट्रवर्द्धन एव च ।
अकोपो धर्म्मपालश्च सुमन्त्रैरेभिरावृतः ॥ ५५ ॥
सहस्रदृग्वह्नि-धर्म्म-रक्षो-वरुणानिलाः ।
इन्द्वीश-धातनन्ताश्च दशभिस्त्वेभिरावृतः ॥ ५६ ॥

रामः कर्त्ता । 'तदधः' लक्ष्मणाधः 'तौ' भरत-शत्रुघ्नौ धृत्वा व्याख्यान-निरतः स्थित इत्यनुषङ्गः । पुनस्त्र्यस्रं भवेत्; तेन एवं षड़स्रं जातम् । इदानीमावरणान्याह, आदाविति । 'एषः' देवः 'आदौ' प्रथमावरणे 'स्वदीर्घाङ्गैः' स्वस्य दीर्घाङ्गैः रा० री० रू० रै० रौ० रः इत्येतैः संयुक्तः स्यात् ॥ ५१ ॥ ५२ ॥

इदं दलमूले । तृतीयमिति । वायुपुत्रादीन् प्राप्य तैर्युक्तो देवो यदा भवति, तदा तृतीयं भवेदित्यर्थः । एते पूर्वादिष्वष्टसु क्रमेण पूज्याः । 'ततः' अनन्तरं 'सुमन्त्रैः' सुमन्त्र-सहितैः एभिरावृतश्चेत्, तदा चतुर्थं भवति । धृष्टिस्थाने दृष्टिरिति केचित् पठन्ति । इदं दलाग्रे ॥ ५३—५५ ॥

पञ्चममाह, सहस्रदृगिति । 'सहस्रदृक्' इन्द्रः 'धर्म्मः' यमः, 'रक्षोवरुण-वायवः' इति युक्तः पाठः । 'इन्दु-' चन्द्रः 'ईशः' ईशानः ; 'धाता' पूब्रह्मा, सर्वेशानयोर्मध्ये

वह्निस्तदायुधैः पूज्यो नलादिभि-रलङ्कृतः।
वशिष्ठ-वामदेवादि-मुनिभिः समुपासितः ॥५७॥
एवमुद्देशतः प्रोक्तं निर्देशस्तस्य चाधुना।
त्रिरेखापुटमालिख्य मध्ये तारद्वयं लिखेत् ॥५८॥
तन्मध्ये वीजमालिख्य तदधः साध्यमालिखेत्।
द्वितीयान्तञ्च तस्योर्द्धं षष्ठ्यन्तं साधकं तथा ॥५९॥

पूज्यः; 'अनन्तः' शेषः, स निरृति-वरुणयोर्मध्ये; ततो वह्निः, 'तदायुधैः' इन्द्राद्यायुधैः आवृतः पूज्यः; तदायुधान्युक्तानि, यथा,—

"वज्रं शक्तिं दण्डमसिं पाशमङ्कुशकं गदाम्।
शूलं चक्रं पद्ममेषामायुधानि क्रमाद्विदुः" ॥ इति।

'नलः' नाम वानरः अनलावतारः, येन बद्धः सेतुर्नलसेतुरुच्यते। आदिशब्दत्वात् नीलाद्यान् षोड़श दलावरणे वक्ष्यामः। वशिष्ठादिभिश्च द्वादशभिः सेवितः; तेऽप्यावरणे पूज्या इति भावः। तानपि वक्ष्यामः; एतेन दशावरण-पक्षः सूचितः ॥ ५६ ॥ ५७ ॥

एवम् 'उद्देशतः' सङ्क्षेपतः पूजनं प्रोक्तं, तस्याधुना 'निर्देशः' निःशेषतो देश उपदेशः क्रियते स्पष्टतरम् धारण-यन्त्रमुपदिश्यते, तदेव चाङ्गादि-देवता-सहितं मन्त्रवर्णसहितं पूजनयन्त्रमित्यर्थः। त्रिधा रेखा 'त्रिरेखा' त्रिकोणं, तस्याः 'पुटं' द्वयं षट्कोणम् आलिख्य 'मध्ये' षट्कोणमध्ये 'तारद्वयं' प्रणवद्वयं सव्यवधानं लिखेत् ॥ ५८ ॥

तयोर्मध्ये आद्यवीजमालिख्य तस्याधः साध्यं षट्प्रासयान्यतर-विषयमालिखेत्। कीदृशं? द्वितीया-विभक्त्यन्तं

कुरुद्वयञ्च तत्पार्श्वे लिखेद्बीजान्तरे रमाम्।
तत् सर्वं प्रणवाभ्याञ्च वेष्टयेद् बुद्धि-बुद्धिमान् ॥६०॥
दीर्घभाजि षड़स्रेषु लिखेद्बीजं हृदादिभिः।
कोणपार्श्वे रमा-माये तदग्रेऽनङ्गमालिखेत् ॥६१॥
क्रोधं कोणाग्रान्तरेषु लिख्य मन्त्राभितो गिरम्।

'तस्योर्द्ध्वं' वीजस्योर्द्ध्वभागे षष्ठीविभक्त्यन्तं 'साधकं' वश्यादि-कारकं लिखेत्। कुरु कुरु इति वर्णद्वयं 'तत्पार्श्वे' वीजपार्श्वे वीजस्य वाम-दक्षिणयोः लिखेत्। 'वीजान्तरे' वीजमध्ये साध्यस्योर्द्ध्वभागे 'रमां' श्रीवीजं लिखेत्। 'तत्सर्वं' वीजादि 'प्रणवाभ्यां' पूर्वोक्ताभ्यां यथा वेष्टितं स्यात्, तथा लिखेत्। बुद्धेर्वृद्धिः, तद्वान् लिपिविचक्षणः ॥ ५९ ॥ ६० ॥

दीर्घेति। 'षड़स्रेषु' षट्कोणेषु 'हृदादिभिः' सह, हृदयाय नमः इत्यादि-जातिसहितं मूलस्य वीजं लिखेत्। कीदृशं वीजं? 'दीर्घभाजि' दीर्घान् भजति तच्छीलं दीर्घभाजि षड्दीर्घयुक्तमित्यर्थः। कोणपार्श्वे त्रिकोण-गण्डेषु रमावीज-मायावीजे लिखेत्। 'तदग्रे' कोणाग्रे 'अनङ्गं' कामवीजं लिखेत्। तेषामुद्धारो यथा—

"वान्तं वह्नि-समारूढ़ं वामनेत्रेन्दु-संयुतम्।
वीजमेतच्छ्रियः प्रोक्तं चिन्तारत्नमिवापरम् ॥
नकुलीशोऽग्निमारूढ़ो वामनेत्रार्द्धचन्द्रवान्।
वीजं तस्याः समाख्यातं सेवितं सिद्धिकाङ्क्षिभिः ॥
ब्रह्मा भूम्या समासीनः शान्तिविन्दु-समन्वितः।
वीजं मनोभुवः प्रोक्तं जगत्त्रय-विमोहनम्" ॥ इति ॥ ६१

क्रोधमिति। 'क्रो॰' हुङ्कारः "हुं क्रोधवीजं कवचम्"

वृत्तत्रयं साष्टपत्रं सरोजं विलिखेत् स्वरान् ॥६२॥
केसरेष्वष्टपत्रेषु वर्गाष्टकं तथा लिखेत्।
तेषु मालामन्त्र-वर्णान् विलिखेदूर्म्मि सङ्ख्यया ॥६३॥
अन्ते पञ्चाक्षरानेवं पुनरष्टदलं लिखेत्।
तेषु नारायणाष्टार्णं लिखेत् तत् केसरे रमाम् ॥६४॥
तद्बहिर्द्वादशदलं विलिखेद् द्वादशाक्षरम्।
तथों नमो भगवते वासुदेवाय इत्ययम् ॥ ६५ ॥
आदिक्षान्तान् केसरेषु वृत्ताकारेण सं लिखेत्।

इति लक्ष्मीकुलार्णवे। तं क्रोधं कोणाग्रेषु कोणान्तरेषु च 'लिख्य' लिखित्वा 'अभितः' परितः 'गिरं' सारस्वतं वीजम् ऐमिति लिखेत्। वृत्तत्रयं षट्कोणस्योपरि एकं वृत्तं, मध्ये चैकं, पत्राग्रे चैकम्, अष्टपत्र-सहितं 'सरोजं' कमलं विलिखेत्। स्वरान् केसरेषु च द्विशो लिखेत्। अष्टपत्रेषु स्वरोपरि वर्गाष्टकम् क-च-ट-त-प-य-श-लाख्यं लिखेत्। तेषु पत्रेषु वक्ष्यमाण-मालामन्त्र-वर्णान् षट् संख्यया विलिखेत् ॥६२॥६३॥

'अन्ते' चरमपत्रे पञ्चाक्षरान् तावतामेवावशिष्टत्वात्। 'एवं' पूर्वोक्त-वृत्तत्रयं साष्टपत्रमित्यादि-मार्गेण पुनरष्टदलं लिखेत्, 'तेषु' दलेषु नारायणस्य अष्टाक्षरम् ओं नमो नारायणायेति प्रत्येक-मेकैकाक्षरं लिखेत्।

केसरेषु 'रमां' श्रीवीजं लिखेत् ॥ ६४ ॥

'तद्बहिः' तदुपरि द्वादशदलं पद्मं विलिखेत्। द्वादशाक्षरमाह, ओं नम इति। अयं द्वादशार्णो ज्ञेय इत्यर्थः ॥ ६५ ॥

'आदिक्षान्तान्' अकारादि-क्षकारान्तान् वृत्ताकारेण न नु

तद्बहिः षोड़शदलं विलिखेत् केसरे ह्रियम् ॥ ६६ ॥
वर्म्मास्त्र-नति-संयुक्तं दलेषु द्वादशाक्षरम् ।
तत्सन्धिष्वीरजादीनां मन्त्रान् मन्त्री समालिखेत्॥६७
हं स्रं भ्रं व्रं लं श्रं ज्रञ्च लिखेत् सम्यक् ततो वहिः ।
द्वात्रिंशारं महापद्मं नाद-विन्दु-समायुतम् ॥ ६८॥
विलिखेन्मन्त्र-राजार्णान् तेषु पत्रेषु यत्नतः ।
ध्यायेदष्टवसूनेकादश रुद्रांश्च तत्र वै ॥ ६९ ॥

वैषम्येण प्रतिकेसरं चतुरश्चतुरो लिखित्वा अन्तिमे सप्तेति सम्भवः 'ह्रियं' मायां, 'वर्म्म' हुं 'अस्त्रं' फट् 'नतिः' नमः शब्दः 'दलेषु' षोड़शसु प्रत्येक-मेकैको वर्णः 'तत् सन्धिषु' षोड़शपत्रसन्धिषु, ईरजादीनामिति । 'ईरः' वायुः, तज्जो हनुमान्, तदादीनाम् आवरणोक्तानां षोड़शानां स्वाद्याक्षरादीनि ऋकारविन्दु-सहितानि षोड़श-वीजानि, अङ्गदस्य त्रंमिति, अकोपस्याप्यमिति, घृष्टेर्धर्म्मपालस्य घृमिति, राष्ट्रवर्द्धनस्य ऋमिति, वीजानि, चकारसमुच्चितानि हनुमतो ह्रमिति, सुग्रीव-सुराष्ट्रयोः स्रमिति, भरतस्य भ्रमिति, विभीषण-विजययोर्व्रमिति, लक्ष्मणस्य ल्रमिति, शत्रुमर्दनस्य श्रमिति, जाम्ब-वज्जयन्तयोर्ज्रमिति, सप्तैतानि पृथक् षोड़श-सन्धिस्थानेषु लिखेत् ।

नादेति । 'नादः' अर्द्धचन्द्रः 'विन्दुः' चन्द्रः, ताभ्यां प्रान्ते अङ्कितम् । यद्वा नाद-विन्दु-समायुतं यथा स्यात्तथा 'मन्त्र-राजार्णान्' नारसिंहान् सविन्दुकान् लिखेत् ।

ध्यायेदष्टवसूनिति । ते यथा,—

"भवो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ।

द्वादशैनांश्च धातारं वषट्कारञ्च तद्बहिः।
भूगृहं वज्र-शूलाढ्यं रेखात्रय-समन्वितम् ॥७०॥

प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः" ॥ इति।
रुद्रानिति। ते यथा,—
"वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः॥
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः।
स्थाणुर्भवश्च रुद्रश्च" इत्येकादश।
महायशा विशाम्पतिरिति विशेषणे।६६।६७।६८।६९॥
'इनान्' सूर्य्यांश्च; ते यथा,—
"धातार्य्यमा च मित्रश्च वरुणोऽंशो भगस्तथा।
इन्द्रो विवस्वान् पूषा च पर्य्यन्यो दशमः स्मृतः।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः"॥
इति द्वादश। धातारमिति, 'धाता' प्रथमादित्यः; अयन्तु वषट्कारस्य विशेषणम्। पुनरुक्तो वषट्कारो हि दानार्थः, दानेन लोका धीयन्ते इति वषट्कारो धाता भवति। भुवादि-वषट्कारान्तान् द्वात्रिंशत् पत्रेषु न्यसेत्। ततो वह्निर्भागे 'भूगृहं' भूपुरं; तल्लक्षणन्तु, "भूमौ चतुरस्रं सवज्रकं पीतञ्च" इति। दिक्षु वज्राढ्यं, कोणेषु शूलाढ्यञ्च। वज्रलक्षणन्तु, "चतुरस्र-सम्पातरेखाः सम्बुद्ध्याष्ट-वज्राणि कुर्य्यात्" इति केचित्। सम्प्रदायविदस्तु चतुरस्ररेखास्वेवाष्टवज्राणि कार्य्याणि इति वदन्ति। स्वरूपन्तु अन्योऽन्याभिमुखतमात्रिचक्रं रेखा-द्वयं परस्पर-सम्बद्धं परस्परसम्बद्धमधोरेखाद्वय-मिति केचित्। रेखेति। सात्विकराजस-तामस-भेदेन॥ ७०॥

द्वारोपेतञ्च राश्यादि-भूषितं फणिसंयुतम् ।
एवं मण्डलमालिख्य तस्य दिक्षु विदिक्षु च ॥७१॥
नारसिंहञ्च वाराहं लिखेन्मन्त्रद्वयं तथा ।
क-ष-रेफानुग्रहेन्दु-नाद-शक्त्यादिभिर्युतः ॥७२॥
यो नृसिंहः समाख्यातो ग्रह-मारण-कर्मणि ।

'द्वारोपेतं' मण्डपवत्, 'राश्यादि-भूषितं' ज्योतिश्चक्र-विराजितं परितो राश्यादि स्थाप्यमित्यर्थः। भूपुरमेव शूलाढ्यं सद्राशिचक्रं भवति। 'फणिसंयुतं' फणिना शेषेण वृतमिति लेख्यम्।

दिक्षु नारसिंहं, विदिक्षु वाराहं लिखेत्। नारसिंहमुद्धरति, कषेति। क-ष-योगे क्षः, ततो रेफः, ततः 'अनुग्रहः' औकारः, 'इन्दुः' अनुस्वारः 'नादः' अनुस्वारानन्तरो रवविशेषः कांस्य-चरमध्वनिनिभः, ततः 'शक्तिः' मन्त्र-सामर्थ्यम्; आदि-शब्दात् ब्रह्म शान्ताख्यं, क्ष्रौमिति रूपम्॥ ७१ ॥ ७२ ॥

अस्य स्वातन्त्र्यमाह, य इति। 'ग्रह-कर्म्मणि' भूतादि-विमोचणे, 'मारण-कर्म्मणि'-शत्रु-क्षयादौ। अस्य ऋष्यादिकं यथा,—

"ऋषिरत्रिश्च गायत्री च्छन्दः श्रीनृहरिः प्रभुः।
देवता दीर्घयुग्-बीजेनैवाङ्गं कल्पयेत् सुधीः।
ध्यानं सर्वस्य देवस्यैकलक्षं प्रजपेन्मनुम्।
तद्दशांशं हुते सम्यक् घृताक्तैः पायसैः शुभैः।
अर्चा-होमादिकं सर्वमस्य पूर्ववदाचरेत्।
मन्त्रराजवदेवास्य प्रयोगानपि साधयेत्।
हृल्लेखा-सम्पुटं केचित् सङ्गिरन्ते मनुन्त्विमम्" ॥ इति।

अन्त्यार्घीश-युतो विन्दु-नादैर्बीजञ्च सौकरम्॥७३॥
हुङ्कारञ्चात्र रामस्य मालामन्त्रोऽधुनेरिता।
तारो नतिश्च निद्रायाः स्मृतिर्मेदश्च कामिका॥७४
रुद्रेण संयुता वह्निर्मेधामर-विभूषिता।

वाराहमन्त्रमुद्धरति, अन्त्य इतिः। 'अन्त्यः' केवलमातृका-वर्णान्त्यो हकारः 'अर्घीशः' उकारः तेन युतः, 'विन्दु-नादैः' विन्दु-नाद-शक्त्यादिभिरपि युतः। 'सौकरं' सूकरस्येदं वर्म्मात्मकम्॥ ७३ ॥

दशाक्षर-राममन्त्र-वीजमाह, हुङ्कारञ्चात्र रामस्येति। रामस्य दशाक्षरस्य 'हुङ्कारं' ह्रस्वोकार-विन्दुसहितं हकारं वीजं जानीयात्। तच्चात्र वाराहवीज-समीपे लिखेत्। दशाक्षरो यथा,—

"जानकीवल्लभायाथ भवेत् पावक-वल्लभा।
हुमादिरेष कथितो राममन्त्रो दशाक्षरः" ॥ इति।

मालामन्त्रोऽधुनेरितेति। रामस्य इत्येव। अधुना रामस्य मालामन्त्रः ईरिता, लुट्, अद्यतनेऽपि छान्दसः। ईरिष्यते कथयिष्यते।

'तारः' प्रणवः 'नतिः' नमः शब्दः 'निद्रायाः' भकारात् परा 'स्मृतिः' गकारः। प्रणव-कलासु प्रायेणैतानि नामानि। अत्र स्वरानुक्तौ प्रथमत्वादकारो बोद्धव्यः। 'मेदो धातुः' वकारः 'कामिका' तकारः, सा 'रुद्रेण' एकारेण, एकादशत्वात्, 'संयुता' सहिता ; तेन ओं नमो भगवते इति सिद्धम्।

'वह्निः' रेफः 'मेधा' घकारः, सा 'अमरविभूषिता' अमरः उकारः, तेन 'विभूषिता' शोभमा[illegible] रघु इति सिद्धम्।

दीर्घा-क्रूरयुता ह्लादिन्यथो दीर्घा समानदा ॥७५॥
क्षुधा क्रोधिन्यमोघा च विश्वमप्यथ मेधया ।
युक्ता दीर्घा ज्वालिनी च ससूक्ष्मा मृत्युरूपिणी ॥७६
सप्रतिष्ठा ह्लादिनी त्वक्ष्वेलः प्रीतिश्च सामरा ।
ज्योतिस्तीक्ष्णाग्नि-संयुक्ता श्वेतानुस्वार-संयुता ॥७७
कामिका-पञ्चमो लान्तस्तान्तान्तो धान्त इत्यथ ।
स सानन्तो दीर्घयुतो वायुः सूक्ष्मयुतो विषः ॥७८॥

'दीर्घा' कला नकारः 'अक्रूरेण' अनुस्वारेण संयुता नं, 'ह्लादिनी' दकारः, 'अथो' अनन्तरं 'दीर्घा' नकारः सा 'समानदा' मानदया कलया आकारेण सह वर्त्तमाना, 'क्षुधा' यकारः ; तेन नन्दनाय इति सिद्धम् ।

'क्रोधिनी' रेफः 'अमोघा' चकारः । अनन्ता चेति युक्तः पाठः, प्रणवकलासु अनन्तायाः चकार कलात्वात्, कीर्त्यादिष्वमोघायास्तत्सर्वाचर कालकलात्वाच्च । 'विश्वम्' ओकारः, 'अपि' अथ, 'मेधया' धकारेण युक्ता 'दीर्घा' नकारः 'ज्वालिनी' वह्निकला वकारः सा 'ससूक्ष्मा' सूक्ष्मेण श्रीकण्ठादि-तृतीय-रूपेण इकारेण सहिता 'मृत्युरूपिणी' मृत्युः प्रणवकला शकारः, 'सप्रतिष्ठा' प्रतिष्ठया आकारेण सहिता 'ह्लादिनी' दकारः 'त्वक्' यकारः ; तेन रक्षोघ्न-विशदायेति सिद्धम् ।

'क्ष्वेलः' मकारः 'प्रीतिः' धकारश्च 'सामरा' सोकारा, 'ज्योतिः' रेफः तीक्ष्णा पकारः 'अग्नि-संयुक्ता' रेफसंयुक्ता, 'श्वेता' सकारः 'अनुस्वार-संयुता' सानुस्वारा 'कामिका पञ्चमः' तकारपञ्चमः नकारः 'लान्तः' वकारः 'तान्तान्तः' तस्यान्तः

कामिका कामिका-रुद्र-युक्ताथोऽथ स्थिरा स ए।
तापिनी दीर्घयुक्ता भूरनिलोऽनन्तगोऽनलः॥७९॥
नारायणात्मकः कालः प्राणोऽम्भो विद्यया युतम्।
पीता रतिस्तथा लान्तो योन्या युक्तोऽन्ततो नतिः ८०
सप्तचत्वारिंशद्वर्णो गुणान्तः सगुणः स्वयम्।
राज्याभिषिक्तस्य तस्य रामस्योक्तक्रमाल्लिखेत्॥८१॥

थकारः, तस्यान्तो दकारः 'धान्तः' नकारः, सः 'सानन्तः' अनन्तेन आकारेण सहितः 'दीर्घस्वरेण' आकारेण युतः 'वायुः' यकारः सूक्ष्मेण इकारेण युतः 'विषः' मकारः 'कामिका' तकारः, पुनः सैव 'रुद्रेण' एकारेण युक्ता, 'अथो अथ' अनन्तरं 'स्थिरा' जकारः, ततः सः, सकारात् परः एकारः; तेन मधुर-प्रसन्नवदनायामित-तेजसे इति सिद्धम्।

अत्र सन्धिर्न कार्य्यः। 'तापिनी' बकारः दीर्घयुक्ता 'भूः' लकारः, 'अनिलः' यकारः; तेन बलायेति। 'अनन्तगः' आकारगः 'अनलः' रेफः, 'नारायणः' आकारः, तदात्मकः 'कालः' मकारः, 'प्राणः' यकारः; तेन रामायेति सिद्धम्। 'अम्भः' वकारः 'विद्यया' इकारेण 'युतं' सहितं 'पीता' षकारः, 'रतिः' णकारः, तेन 'युता' संयुता, 'लान्तः' वकारः 'योन्या' एकारेण युक्तः; तेन विष्णवे इति सिद्धम्। 'अन्ततः' अन्ते 'नतिः' नमः शब्दः॥७४॥७५॥७६॥७७॥७८॥७९॥८०॥

एवं सप्तचत्वारिंशत् 'अर्णः' वर्णः। 'गुणान्तः सगुणः स्वयम्' स्वयं सगुणोऽपि भक्तानां 'गुणान्तः' त्रैगुण्यनाशकः मोक्षदत्वात्। अथवा, 'गुणान्तः' बीजत्रयान्तः 'सगुणः' बीजत्रयादिः। तदुक्तम्,—

"तारकं कामवीजैश्च सम्पुटं प्रजपेदमुम्।
शिरस्याननवक्त्रे च भ्रूमध्ये सिद्धयेऽपि च॥
श्रोत्रयोर्घ्राणयोश्चैव गण्डयो रोष्ठयोरपि।
दन्तयोरास्यदेशे च दोः-पत्-सन्ध्यग्रकेषु च॥
कण्ठे हृदि स्तनद्वन्द्वे पार्श्वयोः पृष्ठदेशतः।
जठरे चाप्यधिष्ठाने गुह्ये वर्णान् प्रविन्यसेत्।
सप्त षट् सप्तदश षड् रुद्रसङ्ख्यैः षड़ङ्गकम्॥
उन्निद्र-नीलकमलामलकान्ति-मञ्ज-
चापासि-बाण-करमम्बुज-पत्रनेत्रम्।
पीताम्बरं स्मितसुधा-मधुरं मुरारिं
सञ्चिन्तयेन्मिथिलराज-सुता-सहायम्॥
जपेद् द्वादश-लक्षञ्च ध्यात्वैवं विजितेन्द्रियः।
विल्वैः फलैः प्रसूनैश्च पत्रैस्त्रिमधुर-प्लुतैः॥
मधुरत्रय-युक्तेन पयोऽन्नेन सिताम्बुजैः।
होमं दशांशतः कुर्य्यात् तथा सर्वत्र तर्पणम्॥
प्राक् प्रोक्ते पूजयेत् पीठे पूज्याश्च वाह्यदेवताम्।
प्रथमाङ्गा रतिः प्रोक्ता सप्तमी ज्या समीरिता॥
लक्ष्मणो भरतश्चैव शत्रुघ्नश्च हनूमता।
सुग्रीवः पञ्चमः प्रोक्तः षष्ठ उक्तो विभीषणः॥
अङ्गदः सप्तमः प्रोक्तो नीलोऽष्टम उदाहृतः।
नारदश्च वशिष्ठश्च वामदेवस्तृतीयकः॥
जावालो गौतमश्चापि भरद्वाजोऽथ कश्यपः।
वाल्मीकिश्चाष्टमः प्रोक्तो लक्ष्मीश्चाथ सरस्वती॥
रतिः प्रीतिः कीर्त्ति-कान्ती तुष्टिः पुष्टिरिमाः क्रमात्।
धृष्टिर्जयन्त-विजयौ सिद्धार्थः कार्य्य-साधकः॥
अर्शोकश्चैव सर्वस्यां श्रीवत्सश्च गदा तथा।

इदं सर्वात्मकं यन्त्रं प्रागुक्तमृषि-सेवितम्।
सेवकानां मोक्षकरमायुरारोग्य-वर्द्धनम् ॥ ८२ ॥
अपुत्रिणां पुत्रदञ्च बहुना किमनेन वै।
प्राप्नुवन्ति क्षणात् सम्यगत्र धर्म्मादिकानपि ॥८३॥
इदं रहस्यं परममीश्वरेणापि दुर्गमम्।
एवं यन्त्रं समाख्यातं न देयं प्राकृते जने॥ इति॥८४॥

पाञ्चजन्यः कौस्तुभाख्यो वनमाला च दक्षिणे॥
उत्तरे चक्र-पद्मे च शार्ङ्गं वाणं सखड्गकम्।
पश्चिमे धर्म्म-गरुड़-धर्म्मपाल-सुमन्त्रकान्॥

इत्युक्तक्रमादेकैकस्मिन् षट् षट् मन्त्ये पञ्चेति क्रमेण अस्योद्धारोऽन्यत्राप्युक्तः।

ओँ नमो भगवते ब्रूयाच्चतुर्थ्यां रघुनन्दनम्।
रक्षोघ्न विशदायेति मधुरादि समीपयेत्॥
प्रसन्न-वदनायेति पश्चादमित-तेजसे।
बलाय पश्चाद्रामाय विष्णवे तदनन्तरम्॥
प्रणवादि-नमोऽन्तोऽयं मालामनुरुदीरितः॥ ८१ ॥

'सर्वात्मकम्' त्रैलोक्यमयं 'प्रागुक्तं' पूर्वाचार्य्यैरुक्तम्, 'अनेन' उक्तेन, 'धर्म्मादिकान्' धर्म्मार्थ काम मोक्षान्, धर्म्म-ज्ञान-वैराग्यैश्वर्य्याणि वा, 'अपि' शब्दात् अणिमादि सिद्धिरपि ॥ ८२ ॥ ८३ ॥

'ईश्वरेण' सर्वशक्तिमतापि उपदेशं विना 'दुर्गमम्' अगम्यम्। इति शब्दो यन्त्राभिधान-समाप्तौ॥ ८४ ॥

भूतादिकं शोधयेद् द्वारपूजां
कृत्वा पद्माद्यासनस्थः प्रसन्नः ।
अर्चाविधावस्य पीठाधरोर्द्ध्वं
पार्श्वार्च्चनं मध्यपद्मार्च्चनञ्च ॥ ८५ ॥

भूतादिकमिति । 'भूतानि' पृथिव्यादीनि पञ्च ; आदि-शब्दान्महदहङ्कारादि, तत् 'शोधयेत्' आत्मनि विलापयेत् । भूतशुद्धिः प्राणप्रतिष्ठाया मातृकान्यासस्य चोपलक्षणम् ; भूत-शुद्धिप्राणप्रतिष्ठे मातृकान्यासञ्च कुर्य्यादित्यर्थः । तत् करण-प्रकारस्तु,—

भूतशुद्धिं ततः कुर्य्यात्तत्प्रकारोऽधुनोच्यते ।
पादादिजानुपर्य्यन्तं चतुरस्रं सवज्रकम् ॥
लंयुतं पीतवर्णञ्च भुवः स्थानं विचिन्तयेत् ।
जानो रानाभि चन्द्रार्द्धनिभं रामेण लाञ्छितम् ॥
शुक्लवर्णं स्ववीजेन युतं ध्यायेदपां स्थलम् ।
नाभितः कण्ठपर्य्यन्तं त्रिकोणं रक्तवर्णकम् ॥
स्ववीजेन युतं ०००० वह्नेस्तु मण्डलम् ॥
कण्ठाद् भ्रूमध्य-पर्य्यन्तं कृष्णं वायोस्तु मण्डलम् ॥
षट्-कोणं विन्दुभिः षड्भिर्युतं वीजेन चिन्तयेत् ।
भ्रूमध्याद्-ब्रह्म-रन्ध्रान्तं वर्त्तुलं ध्वज-लाञ्छितम् ॥
धम्रवर्णं स्ववीजेन युक्तं ध्यायेन्नभस्तलम् ।
एवं ध्यात्वा पुनस्तानि भूतानि प्रविलापयेत् ॥
पृथ्वीमप्सु च ता वह्नौ वह्निं वायौ समीरणम् ।
प्रविलाप्य तथाकाशेऽप्याकाशं प्रकृतौ ततः ॥
अपर ब्रह्मरूपां तां मायाशक्तिं परात्मनि ।

इत्थं समस्तदेहादि-प्रपञ्चं परमात्मनि ॥
प्रविलाप्य पर ब्रह्मरूपस्तिष्ठेत् कियत्-क्षणम्।
पुनरुत्पादयेद्देहं पवित्रं परमात्मनः ॥
शब्दब्रह्मात्मिका जाता प्रकृतिः परमात्मनः।
अजायत जगन्मातुराकाशं ० ० ० ० ०।
नभसोऽभिन्न ० ० ० ०।
समीरणादभूद्वह्निर्वह्नेरापस्ततः ० ० ०।
स्तीयमेभ्योऽपि भूतेभ्यस्तेजो रूपं कलेवरम्।
देवताराधने योग्यमुत्पन्नमिति भावयेत्।
तस्मिन् देहे परात्मानं सर्वज्ञं सर्वशक्तिमत्।
समस्त-देवतारूपं सर्वमन्त्रमयं शुभम्।
आत्मरूपेण देहे स्वे वीजभावेन तिष्ठति।
इत्येषा भावना मुख्या भूतशुद्धिरितीरिता ॥
अथवान्य-प्रकारेण भूतशुद्धिर्विधीयते।
धर्मकन्द-समुद्भूतं जानता लं सुशोभनम्।
ऐश्वर्य्याष्टदलञ्चैव परं वैराग्य-कर्णिकम्।
स्तीयहृत् कमलं ध्यायेत् प्रणवेन विकाशितम्।
कृत्वा तत्कर्णिकासंस्थं प्रदीपकलिकाकृतिम्।
सुषुम्णा वर्त्मना तच्च परमात्मनि योजयेत्।
योगयुक्तेन विधिना सोऽहं मन्त्रेण साधकः।
तत्रैव सर्वतत्त्वानि विलीनानि विचिन्तयेत्।
पुरुषाभं ततः पापमनादिभव-सञ्चितम्।
ब्रह्महत्या शिरस्कञ्च स्वर्णस्तेयं भुजद्वयम्।
सुरापानहृदा युक्तं गुरुतल्प-कटिद्वयम्।
तत्संयोगि-पदद्वन्द्वमङ्ग-प्रत्यङ्ग-पातकम्।
उपपातक-रोमाणं रक्त-श्मश्रु-विलोचनम्।

खड्ग-चर्म्म-धरं कृष्णं कुचौ दक्षिणत: स्मरेत्।
तत: संशोधयेद्देहं पूरकादि-क्रमेण वै।
विधाय प्राणसंरोधं वायुवीजेन वायुना।
वह्निवीजेन तेनैव सन्दहेत् सकलां तनुम्।
भस्म तद्घ्राणमार्गेण निर्गतं चिन्तयेत् सुधी:।
ततो वमिति वीजेन प्लावयेत् सकलां तनुम्।
सञ्जाते निर्म्मले देहे देवतोपासन-क्षमे।
आत्मजीवादि-तत्वानि स्वस्थानं प्रापयेत्तत:।
आत्मानं हृदयाम्भोजमानयेत् परमात्मन:।
हंसमन्त्रेण विधिवद्देवावश्यं विधीयते।
भूतशुद्धि-विहीनेन कृता पूजाभिचारिका।
विपरीतं फलं दद्यादभक्त्या पूजनं यथा।
भूतशुद्धिं विधायेत्थं ततो वै स्थापयेदसून्।
पाशाङ्कुशेन पुटितां शक्तिमादौ समुच्चरेत्।
यकारादि-सकारान्तान् विन्दु-मस्तक-लाञ्छितान्।
तदन्त उच्चरेत् प्राज्ञो व्योममर्द्धेन्दु-संयुतम्।
ततो हंस-परात्मानौ ततोऽमुष्य पदं वदेत्।
प्राणा इति वदेत् पश्चादिह प्राणास्तत: परम्।
अमुष्य जीव इह तु स्थितोऽमुष्य पदं तत:।
सर्वेन्द्रियाण्यमुष्यान्ते वाङ्मनश्चक्षुरन्तत:।
श्रोत्र-घ्राण-पदे प्राणा इहागत्य सुखं चिरम्।
तिष्ठन्त्वग्निवधू: पूर्वं प्रत्यमुष्यपदं बुध:।
पाशाद्यानि प्रयोज्येवं प्राणमन्त्रं समुद्धरेत्।
ब्रह्मर्षिरस्यच्छन्दस्तु विराट् प्राणस्तु देवता।
प्रणवोऽग्निवधूर्वीजं शक्तिरुक्ता मनीषिभि:।
शिरो-वदन-हृद्गुह्य-पाद-दृष्टादि विन्यसेत्।

अमुष्येति पदस्थाने साध्यनाम समुच्चरेत्।
विजपेत् साध्य-संस्पर्शं कृत्वा मन्त्रमुदारधीः।
एष प्राण-प्रतिष्ठायाः प्रकारः परिकीर्त्तितः।

आं पाशः, ह्रीं माया, क्रोम् अङ्कुशः। मातृकान्यासो यथा ऋष्यादिपूर्वः।

ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छन्द ईरितम्।
सरस्वती समाख्याता देवता देशिकोत्तमैः।
अक्लीव-ह्रस्व-दीर्घान्तर्गतैः षड्वर्गकैः क्रमात्।
षडङ्गानि विधेयानि जातियुक्तानि देशिकैः॥
पञ्चाशल्लिपिभिर्विभक्त-मुख-दोःपन्मध्य-वक्षस्थलां
भास्वन्मौलि-निबद्ध-चन्द्र-शकलामापीन-तुङ्गस्तनीम्।
मुद्रामक्षगुणं सुधाढ्य-कलशं विद्याञ्च हस्ताम्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतां संश्रये॥
ललाट-मुख-वृत्ताक्षि-श्रुति-घ्राणेषु गण्डयोः।
ओष्ठ-दन्तोत्तमाङ्गास्ये दोः-पत्-सन्ध्यग्रकेषु च।
पार्श्वतः पृष्ठतो नाभौ जठरे हृदयेऽंसके।
ककुद्यंसे च हृत्पूर्वं पाणौ पादयुगे ततः।
जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात्॥ इति॥

द्वारपूजां कृत्वेति। सा यथा,—

देशिको विधिवत् स्नात्वा कृत्वा पूर्वाह्णिकाः क्रियाः।
यायादलङ्कृतो मौनी यागार्थं यागमण्डपम्॥
आचम्य विधिवत्तत्र सामान्यार्घ्यं विधाय च।
द्वारमस्त्राम्बुभिः प्रोक्ष्य द्वारपूजां समाचरेत्॥
ऊर्द्धोडुम्बरके विघ्नं महालक्ष्मीः सरस्वती।
ततो दक्षिण-शाखायां विघ्नक्षेत्र-समन्वितः॥
तयोः पार्श्वगते गङ्गा-यमुने पुष्पवारिभिः।

कृत्वा मृदु-श्लक्ष्ण-सतूलिकायां
रत्नासने देशिकमर्च्चयित्वा ।
शक्तिञ्चाधाराख्यकां कूर्म्म-नागौ
पृथिव्यब्जे स्वासनाधः प्रकल्प्य ॥ ८६ ॥

देहल्यामर्च्चयेदस्त्रं प्रतिद्वारमिति क्रमात्” ॥ इति ॥
पद्माद्यासनस्य इति । पद्मासनन्तु,—

“वामोरूपरि दक्षिणन्तु चरणं संस्थाप्य वामं तथा
याम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढ़म् ।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेत्
एतद्व्याधि-विघात-कारि यमिनां पद्मासनं प्रोच्यते”॥इति

आदिशब्दात् स्वस्तिकादि । पूजाविधौ तु तन्निर्वाहार्थ-मङ्गुष्ठ बन्धनं हस्ताभ्यां न कर्त्तव्यम् । आदौ द्वारपूजां कृत्वा पद्मासने उपविश्य प्रसन्नचित्तो भूतशुद्ध्यादिकं कुर्य्यादित्य-न्वयः ।

अर्च्चाविधाविति । ‘अस्य’ रामस्य ‘अर्च्चाविधौ’ पूजाविधौ, पीठस्य अधरदेशार्च्चनम्, ऊर्द्ध्वदेशार्च्चनम्, पार्श्वदेशार्चनं, मध्य-वर्त्तिनः पद्मस्य चार्चनं कृत्वा पीठस्याङ्घ्रिषु धर्म्मादिकानर्चये-दिति सम्बन्धः ॥ ८५ ॥

रत्नबद्धे आसने ‘मृदुः’ कोमला, ‘श्लक्ष्णा’ मनोहरा, ‘समाना’ रत्नासनतुल्य-परिमाणा या तूलिका, तस्यां ‘देशिकं’ देशः उप-देशोऽस्यास्ति देशिकः अत इति ठन् । उपदेष्टा, तञ्च ‘अर्च-यित्वा’ सम्पूज्य । पीठाधर-भागादिपूजामर्चनं विशदयति, शक्ति-मिति । ‘शक्तिञ्चाधाराख्यकाम्’ आधारशक्तिं ‘कूर्म्मः’ कच्छपः

विघ्नं दुर्गां चेत्रपालञ्च वाणीं
वीजादिकांश्चाग्नि-देशादिकांश्च ।
पीठस्याङ्घ्रिष्वेषु धर्म्मादिकांश्च
नञ्पूर्वां-स्तांस्तस्य दिक्ष्वर्च्चयेच्च ॥ ८७ ॥

'नागः' शेषः तौ च पृथिवीलक्षणे च 'अब्जे' कमले एताः स्वासनस्य देवताः, स्वासनस्य अधः प्रकल्प्य । तदुक्तम्,—

"आधारशक्तिं प्रजपेत् पङ्कजद्वयधारिणीम् ।
मूर्ध्नि तस्याः समासीनं कूर्म्मं नीलाभमर्चयेत् ।
ऊर्द्ध्वं ब्रह्म शिलासीनमनन्तं कुन्द-सन्निभम् ।
यजेच्चक्रधरं मूर्ध्नि धारयन्तं वसुन्धराम् ।
तमाल-श्यामलां तस्मिन् नीलेन्दीवर-धारिणीम् ।
अभ्यर्चयेद्वसुमतीं स्फुरत्सागर-मेखलाम् ।
तस्यां रत्नमयं द्वीपं तस्मिंश्च मणिमण्डपम्" ॥ इति ।

एवं मण्डपान्तं पूजयित्वा मण्डपं प्रविशेत् । द्वारे विं विघ्नाय नमः, दुं दुर्गायै नमः, चं चेत्रपालाय नमः, वां वाण्यै नमः, इति वीजादिकान् यथास्थानमभ्यर्च्य 'अग्नि-देशादिकान्' धर्म्मादीन् ; तदुक्तम्,—

"यजेत् कल्पतरूंस्तस्मिन् साधकाभीष्ट-सिद्धिदान् ।
अधस्तात् पूजयेत्तेषां वेदिकां मण्डलोज्ज्वलाम् ।
पश्चादभ्यर्चयेत्तस्यां पीठं धर्मादिभिः पुनः ।
रक्त-श्याम-हरिदिन्द्र-नीलाभान् पाद-रूपिणः ।
वृष-केशरि-भूतेभरूपान् धर्मादिकान् यजेत् ।
गात्रेषु पूजयेत्तांस्तु नञ्पूर्वकाननुक्रमात् ।
आग्नेयादिषु कोणेषु दिक्षु चायाम्बुजं यजेत्" ॥ इति ।

मध्ये क्रमादर्क-विध्वग्नि-तेजां-
स्युपर्य्युपर्य्युत्तमैरर्च्चितानि ।
रजः सत्वं तम एतानि वृत्त-
त्रयं वीजाढ्यं क्रमाद्भावयेच्च ॥ ८८ ॥
आशा-व्याशास्वप्यथात्मानमन्तः
आत्मानञ्च परमात्मानमन्तः ।
ज्ञानात्मानञ्चार्च्चयेत्तस्य दिक्षु
माया-विद्ये ये कला पारतत्वे ॥ ८९ ॥

'अङ्घ्रिषु' पादेषु 'नञ्पूर्वान्' धर्म्मादिकान् 'तस्य' पीठस्य 'दिक्षु' पूर्वादिषु ॥ ८६ ॥ ८७ ॥

मध्ये इति । सूर्य्येन्द्वग्नयः क्रमेण पूज्याः, यत् 'वृत्तत्रयं' तत् रजः सत्वं तमः एतानि यानि गुणरूपाणि तज्ज्ञातव्यम् 'वीजाढ्यं' कलिकारूपं 'क्रमात्' अनुक्रमेण 'भावयेत्' पूजयेत् ॥ ८८ ॥

आशेति । 'आशा-व्याशासु' दिक्षु-विदिक्षु च अष्टौ पद्म-पत्राणि पूजयेदिति शेषः । अथेति । 'आत्मानं' लिङ्गम् 'अन्त-रात्मानं' जीवं 'परमात्मानम्' ईश्वरं 'ज्ञानात्मानं' ब्रह्म विन्दु-नाद-शक्तिशान्तात्मकान् एतान् 'अन्तः' मध्ये अर्चयेत् । माया, विद्या, कला, पारतत्वं' परमं तत्वञ्च, एतानि चत्वारि तत्वानि दिक्षु पूज्यानि । तदुक्तम्,—

"आनन्दकन्दं प्रथमं संविन्नालमनन्तरम् ।
सर्वतत्वात्मकं पद्ममभ्यर्च्य तदनन्तरम् ॥
मन्त्री प्रकृति-पत्राणि विकारमय-केशरान् ।

सम्पूजयेद्विमलादींश्च शक्ती
रभ्यर्च्चयेद्देवमावाहयेच्च ।

पश्चाश्चद्दर्ण-वीजाभ्यां कर्णिकां पूजयेत्ततः ॥
कलाभिः पूजयेत् सार्द्धं तस्यां सूर्य्येन्दुपावकान् ।
प्रणवस्य त्रिभिर्मन्त्रैरथ सत्त्वादिकान् गुणान् ॥
आत्मानमन्तरात्मानं परमात्मानमर्च्चयेत् ।
ज्ञानात्मानञ्च विधिवत् पीठं मन्त्रावसानिकम्" ॥ इति।
तत्त्वपूजायां, मां मायातत्त्वाय नमः, विं विद्यातत्त्वाय नमः, कं कलातत्त्वाय नमः, पं परतत्त्वाय नमः इति प्रयोगः ॥ ८८ ॥

विमलादींश्चेति। 'विमला' उत्कर्षिणी ज्ञानक्रियायोगेति शक्तयः,
"प्रह्वी सत्या यथेशानानुग्रहा नवमी मता"।
इत्यासनस्थानमुक्तम्।
"पीठशक्ति-केशरेषु मध्ये च सवराभया"।
इति पीठमन्त्रो नारायणीये उक्तः।

देवमावाहयेच्चेति, मूलमन्त्रेण आहूतो भव इत्याद्युक्त्वा-वाहनादिमुद्राः प्रदर्शयेत्। ता यथा,—
"आवाहनादिका मुद्रा नव साधारणी मताः ।
तथा षडङ्गमुद्राश्च सर्वमन्त्रेषु योजयेत् ॥
हस्ताभ्यामञ्जलिं बद्ध्वानामिका-मूलपर्वणोः ।
अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहनी स्मृता ॥ १ ॥
अधोमुखी त्वियं चेत्स्यात् स्थापनी मुद्रिका स्मृता ॥ २ ॥
उच्छ्रिताङ्गुष्ठ मुष्ट्योस्तु संयोगात् सन्निधापनी ॥ ३ ॥
अन्तः प्रवेशिताङ्गुष्ठा सैव संरोधिनी मता ॥ ४ ॥

अङ्गव्यूहानि जलाद्यैश्च पूज्य
धृष्ट्यादिकैर्लोकपालैस्तदस्त्रैः ॥ ६० ॥

उत्तानमुष्टि-युगला सम्मुखीकरणी मता ॥ ५ ॥
देवताङ्गे षडङ्गानां न्यासः स्यात् सकलीकृतिः ॥ ६ ॥
सव्यहस्ताकृता मुष्टिर्दीर्घाधो-मुखतर्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता सती ॥ ७ ॥
अन्योऽन्याभिमुखाश्लिष्ट-कनिष्ठानामिका पुनः ।
तथैव तर्जनीमध्या धेनुमुद्रा समीरिता ।
अमृतीकरणं कुर्य्यात् तया साधक-सत्तमः ॥ ८ ॥
अन्योऽन्य-ग्रथिताङ्गुष्ठा प्रसारित-पराङ्गुली ।
महामुद्रेयमाख्याता परमीकरणे बुधैः ।
प्रयोजयेदिमा मुद्रा देवताह्वान-कर्म्मणि" ॥ ९ ॥ इति ।

अङ्गव्यूहानीति । 'अङ्गव्यूहानि' हृदयादीनि 'जलाद्यैः' उदकदानाद्यैः पाद्यादिभिः सम्पूज्येत्यर्थः । अङ्गव्यूहानिलजाद्यैरिति पाठे, अङ्गव्यूहैः 'अनिलजाद्यैः' हनुमदाद्यैश्च साकं देवं पूज्येत्यन्वयः । अङ्गव्यूहानलाद्यैरिति तु युक्तः पाठः । 'नलाद्यैः' नीलाद्यैः षोड़शभिः सहेत्यर्थः । तेषां स्थानानि "आग्नेयादिषु कोणेषु हृदयादीनि पूजयेत् । नेत्रमग्रे दिशास्वस्त्रम्" इति ।

अङ्गमुद्रा यथा—

"अङ्गन्यासस्य या मुद्रास्तासां लक्षणमुच्यते ।
अनङ्गुष्ठा ऋजवो हस्तशाखा भवेन्मुद्रा हृदये शिरस्यपि ।
अधोऽङ्गुष्ठा खलु मुष्टिः शिखायां करद्वन्द्वाङ्गुलयो वर्म्मणि स्युः ॥
नाराचमष्ट्युद्धृतहस्तयुग्मकाङ्गुष्ठ-तर्जन्युदितो ध्वनिस्तु ।
विष्वग्विषक्तः कथितास्त्रमुद्रा यत्राक्षिणी तर्जनिमध्यमे स्तु ।

वशिष्ठाद्यैर्मुनिभिर्नीलमुख्यै-
राराधयेद्राघवं चन्दनाद्यैः।
मुख्योपहारैर्विविधैश्च पूज्य
तस्मै जपादींश्च समर्प्य सम्यक् ॥ ८१ ॥

नैवत्रयं तत्र भवेद्नामा षड़ङ्गमुद्राः कथिता यथावत्" ॥ इति ॥
इृष्ट्यादिकैरिति। दृष्ट्यादीनन्ये पठन्ति। तथा हि,—

पूजयेद्वैष्णवे पीठे मूर्त्तिं मूलेन कल्पयेत्।
ओं सीतायै दिगन्तेन सीतां पार्श्वगतां यजेत् ॥
अग्रे पार्श्वद्वये शार्ङ्ग-शरानङ्गानि तद्बहिः।
हनूमन्तं ससुग्रीवं भरतं सविभीषणम्।
लक्ष्मणाङ्गद-शत्रुघ्नान् जाम्बवन्तं दलेष्विमान्।
वाचयन्तं हनूमन्तमग्रतो धृतपुस्तकम् ॥
यजेद्भरत-शत्रुघ्नौ पार्श्वयोर्धृतचामरौ।
धृतातपत्रं हस्ताभ्यां लक्ष्मणं पश्चिमे यजेत् ॥
दृष्टिं जयन्तं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम्।
अकोपं धर्म्मपालाख्यं सुमन्त्रञ्च दलाग्रतः ॥
सर्व्वाभरण-सम्पन्नाल्लोकेशानर्च्चयेत्ततः।
तदस्त्राणि ततो वाह्ये वज्रादीनि च पूजयेत्" ॥ इति। ८०

वशिष्ठाद्यैरिति। वशिष्ठ-वामदेव-जावाल-गौतम-भरद्वाज-कौशिक-वाल्मीकि-नारद-सनक-सनन्दन-सनातन-सनत्कुमारान् द्वादश कमण्डलुधरान् सर्व्वान् मन्त्रमुच्चरतो मुनीन् द्वादशाब्जे अर्च्चयेत् पूर्व्वदिक्-क्रमेण च तत्परान्। नीलमुख्यैरिति। नील-सुषेण-मैन्द-शरभ-द्विविद-धनद-गवाक्ष-किरीट-कुण्डल-श्रीवत्स-कौस्तुभ-शङ्ख-चक्र-गदा-पद्मानि षोड़शाब्जे अर्च्चयेत्

एवम्भूतं जगदाधारभूतं

रामं वन्दे सच्चिदानन्दरूपम् ।

गदारि-शङ्खाब्जधरं भवारिं

स यो ध्यायेन्मोक्षमाप्नोति सर्वतः ॥ ९२॥

विश्वव्यापी राघवोऽथो तदानीम्

अन्तर्दधे शङ्ख-चक्रे गदाब्जे ।

धृत्वा रमासहितः सावृतश्च

ससपत्नजः सानुजः सर्वलोकी ॥ ९३ ॥

तद्भक्ता ये लब्धकामांश्च भुक्त्वा

तथा पदं परमं यान्ति ते च ।

पूर्वदिक्क्रमेण कृताञ्जलीन् । 'चन्दनाद्यैः' सुगन्धिभिः । जपादीनिति । आदिशब्देन उपचाराः । जपसमर्पणे मन्त्रः,—

"गुह्यातिगुह्य-गोप्ता त्वं गृहाणास्मत्कृतं जपम् ।

सिद्धिर्भवतु मे देव ! त्वत्प्रसादात्त्वयि स्थिताः" ॥ इति ।

'सर्वतः' सर्वस्मात् बन्धनात् । सर्वः इति तु युक्तः पाठः ॥ ९१ ॥ ९२ ॥

राघवः, अथो, तदादनीम्, इति पदच्छेदः । 'अन्तर्दधे' लोकादृश्यो बभूव, न तु देहधर्मं गतः, रामायणेऽपि तेनैव रूपेण ब्रह्मलोके गमनमुक्तम् । 'सावृतः' आवरणैः परिवारैः सहितः, 'ससपत्नजः' सपत्नजेन वैरिसन्तानेनापि सहितः, समदर्शित्वात् 'सर्वलोकी' सर्वदर्शी ॥ ९३ ॥

ये तद्भक्ताः, ते कामान् लभन्ते, लब्धांश्च कामान् भुक्त्वा परमं पदं यान्ति ।

इमा ऋचः सर्वकामार्थदाश्च
ये ते पठन्त्यमला यान्ति मोक्षम्।
ये ते पठन्त्यमला यान्ति मोक्षम्॥इति॥६४॥१०
इत्यथर्ववेदे रामपूर्व-तापनीयोपनिषत् समाप्ता॥२२॥

उपनिषत् पाठे फलमाह, इमा इति। द्विरुक्तिः समाप्त्यर्था। दशावरण-पूजा गण-संहितायामुक्ता,—

"षट्कोणे प्रथमा वृत्तिः स्यादङ्गैरन्वितः क्रमात्।
द्वितीयात्मादिकैः प्रोक्ता देवैरष्टाब्जमूलके"॥ इति।

तथा, आत्मा १। निवृत्तिः २। अन्तरात्मा ३। प्रतिष्ठा ४। परमात्मा ५। विद्या ६। ज्ञानात्मा ७। शान्तिः ८। इत्यादयः।

"तृतीया वासुदेवाद्यैरष्टपत्रे तथैव च।
चतुर्थी वायुपुत्राद्यैः पत्रान्ते पूर्वतः क्रमात्॥
धृष्ट्याद्यैः पञ्चमी वृत्तिर्द्वितीयाष्टदले तथा।
षष्ठी द्वादश-पत्रेषु नारदाद्यैर्महर्षिभिः॥
सप्तमी षोड़शाब्जे स्यान्नीलाद्यैः कपिपुङ्गवैः।
भरताद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपद्मके॥
इन्द्राद्यैर्भूगृहे चाद्ये नवमावरणं भवेत्।
तदस्त्रैर्वज्रशक्त्याद्यैर्दशमावरणं शुभम्।
दशावरण-पूजेयं कर्त्तव्या साधकोत्तमैः"॥ इति।

पूजायन्त्रे चैतान्यावरणानि, अस्य धारण-यन्त्रादयं विशेषः। अत्र हि षट्कोणादि-भूपुरान्ते देवरूपाणि भवन्ति। धारण-यन्त्रे तु मन्त्रवर्णा इति, आवरणक्रमोऽप्ययमेव श्रुतौ द्रष्टव्यः, पाठक्रमादर्थक्रमस्य बलीयस्त्वात्।

रामोत्तरतापनीयोपनिषत् ।

ओँ बृहस्पतिरुवाच याज्ञवल्क्यम् । यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्म-सदनम् । अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । तस्माद् यत्र क्वचन गच्छति, तदेव मन्येतेति ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्ट-पद-वाक्यानां रामपूर्वस्य दीपिका ॥
इति रामपूर्वतापनीयोपनिषदो दीपिका सम्पूर्णा ॥ २२ ॥

ओँ रामोत्तर-तापनीयं स्वरूप-महिमोक्तये ।
रामचन्द्रस्य षट्त्रिंशं खण्ड-पञ्चक-मण्डितम् ॥ १ ॥

ऋषि-संवादेन रामचन्द्रस्य मन्त्रतोऽर्थतश्च महिमानं स्वरूपञ्च प्रकाशयितुमादौ क्षेत्रोत्तमं विविनक्ति, बृहस्पतिरुवाच याज्ञवल्क्यमिति । यत् क्षेत्रम् 'अनु' हीनं कुरुक्षेत्रं कुरुक्षेत्रादपि यन्महिम्ना अधिकं, कुरुक्षेत्रं हि 'कुरोः' ब्रह्मणो वरदानात् क्षेत्रोत्तमं प्रसिद्धं, तत्तु यतो हीनमित्यर्थः । हीने द्योत्ये अनुः कर्म्मप्रवचनीयम्, तद्योगे यदिति द्वितीया । तथा देवानामपि देवपूजास्थानं, तथा सर्वेषां प्राणिनां ब्रह्मलोकतुल्यं, तत् वाक्पतिः याज्ञवल्क्यापत्यं प्रति 'उवाच' तन्नामतो विशेषतश्च दर्शयेति पप्रच्छेत्यर्थः । याज्ञवल्क्यस्तु उत्तरयन् तावत्तन्नामतो निर्दिशति, अविमुक्तं वै इति । 'नविमुक्तम्' ईश्वरेणापरित्यक्तम् अविमुक्तं वाराणसीक्षेत्रं कुरुक्षेत्रं, कुरु इति

इदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्। अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे, येनासावमृती भूत्वा मोक्षी भवति। तस्मादविमुक्तमेव निषेवेत, अविमुक्तं न विमुञ्चेदेवमेवैतद् याज्ञवल्क्यः॥

प्रथमः खण्ड ॥ १ ॥

देवैः प्रार्थितेन शिवेन कृतत्वात् कुरुक्षेत्रम्। तथा देवानामित्यादि विशेषणद्वयम् उत्तरेऽप्यनूदितम्। देशान्तरं तद्ध्योपास्यमित्याह, तस्मादिति। 'तदेव' अविमुक्तमेव 'मन्येत' जानीयात्।

तस्य मननोल्लेखमाह, इदं वा इति। 'इदं' यत्र वयं विचरामः, तदेव विशेषण-त्रय-युक्तमविमुक्तमिति मन्येतेत्यन्वयः। एवं कृते सति अविमुक्त-निवासफलं भवतीति भावः। नन्वस्यान्येभ्यः क्षेत्रेभ्यः को विशेषः? अत्राह, अत्र हीति। 'जन्तोः' प्राणिमात्रस्य न मनुष्यस्यैव 'तारकं' षडक्षरं वीजं वा। तस्य किं फलम्? अत आह, येनेति। 'अमृतीभूत्वा' ब्रह्मीभूय मोक्षी भवति, मोक्षोऽस्यास्तीति; बन्धाद्रहितो भवति। कर्त्तव्यमाह, तस्मादिति। निषेवणं चिन्तनादि। देशान्तरस्थस्यापि सम्भवतीत्यत उक्तं न विमुञ्चेदिति। 'एवमेवैतत्' भवदुक्तं याज्ञवल्क्येति आह वृहस्पतिः; याज्ञवल्क्योऽनोक्तमर्थं स्वीकृतवान्। 'एवमेष भगवन्' इति पाठे, हे भगवन्! 'एषः'

अथ हैनं भरद्वाजः पप्रच्छ याज्ञवल्क्यम्, किं तारकं ? किं तरतीति ? । स होवाच याज्ञवल्क्यः, तारकं विन्दुपूर्वकं दीर्घानलं पुनर्माय नमः, चन्द्राय नमः, भद्राय नमः, इति । ओं तत् ब्रह्मात्मकाः सच्चिदानन्दाख्या इत्युपासितव्यम् ।

भवदुक्तोऽर्थः एवं, नान्यथा, इति याज्ञवल्क्यं श्रोता बृहस्पतिराह इत्यर्थः ॥ १ ॥

एवं बृहस्पति-प्रोक्तार्थतत्त्वं याज्ञवल्क्यं प्रश्नस्वरूपम् आह, किं तारकमिति । ननु तरणक्रिया कर्म्म प्रसिद्धमेव इत्याशङ्क्य प्रश्नस्य विशेषतामाह, किं तरतीति । यत् 'तरति' संसारं तारयति, तस्य किं स्वरूपमित्यर्थः । तरतिरन्तर्भूतण्यर्थः । यद्वा कर्म्मप्रश्नोऽयं, यस्य गर्भत्वाद्युत्तरं भावि, उत्तरमाह, स होति ॥ 'दीर्घानलं' दीर्घे आकारे आरूढ़ः 'अनलः' रेफः यस्मिन् तत्, तच्च 'विन्दुपूर्वकं' विन्दोः पूर्वमेव पूर्वकं रा सिद्धम् । दीर्घानलं रा इति । पुनर्माय नमः इति स्वरूपम् । चन्द्राय नमः, भद्राय नमः इति द्वौ मन्त्रौ पृथक् । तदुक्तम्,—

"रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति" ॥ इति ।

ओं रूपाः तद्रूपाः ब्रह्मरूपाः, तथा सदाख्याश्चिदाख्या आनन्दाख्याश्चेत्येवमेता रामाद्याख्या उपासितव्याः । तदुक्तं गीतायाम्,—

"ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा" ॥ इति ।

अकारः प्रथमाक्षरो भवति, उकारो द्वितीयाक्षरो भवति, मकारस्तृतीयाक्षरो भवति, अर्द्धमात्रश्चतुर्थाक्षरो भवति, बिन्दुः पञ्चमाक्षरो भवति, नादः षष्ठाक्षरो भवति, तारकत्वात्तारको भवति ; तदेव तारकं ब्रह्म त्वं विद्धि, तदेवोपास्यमिति ज्ञेयम् ; गर्भ-जन्म-जरा-मरण-संसार-महद्भयात् सन्तारयतीति ; तस्मादुच्यते तारकमिति ।

य एतत्तारकं ब्राह्मणो नित्यमधीते, स सर्वं पाप्मानं तरति, स मृत्युं तरति, स ब्रह्महत्यां तरति, स भ्रूणहत्यां तरति, स वीरहत्यां तरति, स सर्वहत्यां तरति, स संसारं तरति, स सर्वं तरति, सोऽविमुक्तमाश्रितो भवति, स महान् भवति, सोऽमृतत्वञ्च गच्छतीति ।

द्वितीयः खण्डः ॥ २ ॥

ओङ्कारात्मिका रामाद्याख्या इत्युक्तम् ; तेन रामादीनां तारकत्व-मुपपादयितु-मोङ्कारस्य तारकत्वमुपपादयति, अकार इत्यादिना । अकारादयस्त्रयो मूर्त्ताः, अर्द्धमात्रादयस्त्रयोऽमूर्त्ताः, नादात् परे शक्तिशान्ताख्ये अप्यवस्थे वेदितव्ये । 'तदेव' रां बीजमेव प्रणवात्मकत्वाद् ब्रह्मणो वाचकम्, 'अविमुक्तं' वाराणसीक्षेत्रम्, यत्र तत्र स्थितो वाराणस्यामेव स्थितो भवति,

अथैते श्लोका भवन्ति ;

अकाराक्षर-सम्भूतः सौमित्रिर्विश्वभावनः ।
उकाराक्षर-सम्भूतः शत्रुघ्नस्तैजसात्मकः ॥ १ ॥
प्राज्ञात्मकस्तु भरतो मकाराक्षर-सम्भवः ।
अर्द्धमात्रात्मको रामो ब्रह्मानन्दैक-विग्रहः ॥ २ ॥
श्रीराम-सान्निध्य-वशाज्जगदानन्द-दायिनी ।
उत्पत्ति-स्थिति-संहार-कारिणी सर्वदेहिनाम् ॥३॥
सा सीता भवति ज्ञेया मूलप्रकृति-सञ्ज्ञिता ।
प्रणवत्वात् प्रकृतिरिति वदन्ति ब्रह्मवादिनः । इति ४

यत्र तत्र मृतो वाराणस्यामिव मृतो भवतीत्यर्थः । आश्रितो भवतीत्यस्यानन्तरं स महान् भवतीति केचित् पठ्यते ; तेन भुक्तिरुक्ता, अमृतत्वञ्चेति मुक्तिरुक्ता ॥ २ ॥

प्रणव-षड़क्षराणां क्रमेणार्थानाह मन्त्रैः, अथैते इत्यादिना। 'विश्वभावनः' विश्वाभिधानः जाग्रदभिमानी सङ्कर्षणः 'तैजसात्मकः' स्वप्नाभिमानी प्रद्युम्नः 'प्राज्ञात्मकः' सुषुप्त्यभिमानी अनिरुद्धः रामः ॥ १ ॥ २ ॥

तुरीयावस्थं ब्रह्मलक्षणाख्यं विन्द्वर्थमाह, श्रीरामेति । आनन्दस्य ब्रह्मांशत्वात् केवलया प्रकृत्या स दातुमशक्यः, कार्य्यकर्तृ-विन्द्वंश-वाच्या कार्य्योन्मुखी नादांशवाच्या सा रुक्मिणी। सीतायाः शक्ति-शान्त्याख्ये अप्यवस्थे आह, प्रणवत्वादिति । वाच्य-वाचकभावं त्यक्त्वा प्रणवेन यदाऽभेदं गता, तदा प्रकृतिरिति वदन्ति 'ब्रह्मवादिनः' ज्ञानिनः । इति शब्दः श्लोकसमाप्त्यर्थः ॥ ३ ॥ ४ ॥

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं, भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्य-त्त्रिकालातीतं, तदप्योङ्कार एव। सर्वं ह्येतद्ब्रह्म, अयमात्मा ब्रह्म, सोऽयमात्मा चतुष्पाज्जागरित-स्थानो वहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः, स्थूलभुग्-वैश्वानरः प्रथमः पादः।

स्वप्नस्थानेऽन्तःप्रज्ञः सप्ताङ्ग एकोन-विंशति-मुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः।

यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, तत् सषुप्तं, सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः।

एष सर्वेश्वरः, एष सर्वज्ञः, एषोऽन्तर्यामी, एष योनिः, सर्वस्य प्रभवाप्ययौ हि भूतानां, नान्तःप्रज्ञं न वहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघनं न घनप्रज्ञं न प्रज्ञानम-दृष्ट-मव्यवहार्य्य-मग्राह्य-मलक्षण-मलिङ्ग-मचिन्त्य-मव्यवदेश्य-मेकात्म-प्रत्ययसारं प्रपञ्चोपशमं शिव-मद्वैतं चतुर्थं मन्यन्ते।

'त्रिकालातीतम्' आत्मस्वरूपम्। ननु कथमेकस्य मूर्त्ता-मूर्त्तरूपता? विरोधात्; अत आह, सर्वं ह्येतद् ब्रह्मेति।

स आत्मा स विज्ञेयः सदोज्ज्वलोऽविद्या-तत्कार्य्यहीनः स आत्मा बन्धहरः सर्वदा द्वैत-रहितः आनन्दरूपः सर्वाधिष्ठानः सन्मात्रो निरस्ताविद्या-तमोमोहोऽहमेवेति सम्भाव्योऽह-मित्योंं तत् सत् यत् परं ब्रह्म रामचन्द्रः।

चिदात्मकः सोऽहमों तद्रामभद्रः परं ज्योतीरसोऽहमित्यात्मानमादाय मनसा ब्रह्मणै-कीकुर्य्यात्। सदा रामोऽहमित्येतत् तत्त्वतः प्रवदन्ति ; येन ते संसारिणो नूनं राम एव, न

मायिकत्वात् मूर्त्तस्य न विरोध इति भावः। ननु तथापि जीवस्य ब्रह्मणो भेदे कथमैक्यसिद्धिरित्यत आह, अयमात्मा ब्रह्मेति। योऽयम् 'आत्मा' जीवः प्रसिद्धः, सोऽपि ब्रह्मैव, तस्य आत्मनो ब्रह्मणः ओङ्कार-वाच्यस्य रामस्यैकात्मत्वे कथं भेद-व्यवहारः? इत्याशङ्क्योपाधि-भेदादित्याह, सोऽहमिति। चतुर्थं मन्यन्ते इत्यन्तो ग्रन्थो माण्डूक्ये नारसिंहे च व्याख्यातः। स आत्मेत्यादिः स्पष्टः। 'अहमित्योंं तत्सदिति' एतच्छब्द-चतुष्टयवाच्यं यत् परं ब्रह्म, स रामचन्द्रः।

स किं भूतात्मकः? न इत्याह, चिदात्मक इति। ज्ञानैक-विग्रहः, सोऽहमिति, 'सः' प्रसिद्धः अमुकपुत्रोऽमुकनामा अह-मस्य। स मनुष्यादिरूपो न, किन्तु ओङ्काररूपः तद्रूपः परं ज्योतीरूपः, इत्येवमात्मानं प्रसिद्धमादाय तत्त्वमस्यादि व्याख्यानन्यायेन 'मनसा' करणेन 'ब्रह्मणा' अविकृतेन सहै-

संशयः, इत्युपनिषत्, य एवं वेद, स मुक्तो भवतीति याज्ञवल्क्यः।

तृतीयः खण्डः ॥ ३ ॥

अथ हैनमत्रिः पप्रच्छ, याज्ञवल्क्य! य एषोऽनन्तोऽव्यक्त आत्मा, तं कथमहं जानीयामिति। स होवाच याज्ञवल्क्यः। सोऽविमुक्त उपास्यः, य एषोऽक्षरोऽनन्तोऽव्यक्तः परिपूर्णानन्दैकरसश्चिदात्मा, योऽयमनन्तोऽव्यक्त आत्मा, सोऽविमुक्ते प्रतिष्ठित इति। सोऽविमुक्तः कस्मिन् प्रतिष्ठितः? इति। वरणायां नाश्याञ्च मध्ये प्रतिष्ठित इति। का वै वरणा? का च नाशी? इति। सर्वानिन्द्रियकृतान् दोषान् वारयतीति, तेन वरणा भवतीति। सर्वानिन्द्रिय-कृतान् पापान् नाशयतीति, तेन नाशी भवतीति।

कौकुर्य्यात्। एकीकरणे फलमाह, सदेति। 'उपनिषत्' परमार्थज्ञानं याज्ञवल्क्यः आह भरद्वाजं प्रतीति शेषः ॥ ३ ॥

अविमुक्ताधिष्ठान-पुरुष-स्वरूपमाह, य एष इति। 'अव्यक्तः' इन्द्रियाग्राह्यः। अविमुक्ते किमित्युपास्यः? इत्यत उक्तम् अविमुक्ते प्रतिष्ठित इति। नन्वविमुक्तो देशो न ज्ञायते ; अतः पृच्छति, स इति। 'वरणायां' वरण-नामिकायां नद्यां, 'नाश्यां' नाशी-नामिकायाञ्च, मध्ये यो देशः ऐतिह्य-प्रसिद्ध, तत्र प्रतिष्ठितोऽविमुक्तः। प्रवृत्ति-निमित्तं पृच्छति, का वै

कतमच्चास्य स्थानं भवति ? । भ्रुवोर्घ्राणस्य च यः सन्धिः, स एव द्यौर्लोकस्य परस्य च सन्धिर्भवति, एतद्वै सन्धिं सन्ध्या ब्रह्मविद उपासत इति । सोऽविमुक्त उपास्य इति । सोऽविमुक्तं ज्ञानमाचष्टे, यो वै तदेवं वेदेति । अथ तं प्रत्युवाच स्वयमेव याज्ञवल्क्यः ।

वरणा इति । उत्तरमाह, सर्वानिति । यत्र स्नाताः पापदोषरहिता भवन्ति । तदुक्तम्,—

"असी-वरणयोर्मध्ये पञ्चक्रोशं महत्तरम् ।
अमरा मरणमिच्छन्ति का कथा इतरे जनाः" ॥ इति ।

स्कान्दे बाह्यस्य प्रसिद्धैव ज्ञातत्वादान्तराभिप्रायेण पृच्छति कतमच्चेति । 'अस्य' अविमुक्तस्य । भ्रुवोर्घ्राणस्य च यः सन्धिः कूर्पस्थानमित्यर्थः ; तत्र हि इड़ा-पिङ्गले सङ्गते । सन्धिशब्दस्य निमित्तान्तरमाह, स एष इति । द्यौरिति प्रसिद्धस्य लोकस्य परस्य दिवो ज्योतिषश्च 'एतत्' वस्तु-सन्धिरूपं 'ब्रह्मविदः' योगिनः सन्ध्येत्युपासते, सोऽविमुक्तः सन्धिधिया उपास्य इत्यर्थः । इति शब्दो वाक्यसमाप्तौ । स रामः परमात्मा अविमुक्त-क्षेत्रे उपास्य इति विधिफलमाह, स इति । 'अविमुक्तं ज्ञानम्' अविमुक्त-प्रदेशे ध्यानबलेन यत् प्राप्तम् । यद्वा 'अविमुक्तम्' अत्यक्तं नित्यं 'ज्ञानं' ब्रह्माख्यं यत्, तत् 'आचष्टे' कथयति । 'यः' पुमान् 'वै' निश्चितं 'तत्' अविमुक्तं स्थानम् उक्तप्रकारं 'वेद' जानाति ।

अथेति । 'तम्' अत्रिं प्रति याज्ञवल्क्यः कथान्तरमुवाच,

श्रीरामस्य मनुं काश्यां जजाप वृषभध्वजः।
मन्वन्तर-सहस्रैस्तु जपहोमार्चनादिभिः॥ ५॥
ततः प्रसन्नो भगवान् श्रीरामः प्राह शङ्करम्।
वृणीष्व यदभीष्टं तद्दास्यामि परमेश्वरः॥६॥इति॥
अतः सत्यानन्द-चिदात्मा श्रीराममीश्वरः पप्रच्छ।
मणिकर्ण्यां वा मत्क्षेत्रे गङ्गायां वा तटे पुनः।
म्रियते देहि तज्जन्तोर्मुक्तिं नातो वरान्तरम्॥७इति

अथ सहोवाच श्रीरामः।

क्षेत्रेऽत्र तव देवेश! यत्र कुत्रापि वा मृताः।
क्रिमि-कीटादयोऽप्याशु मुक्ताः सन्तु न चान्यथा॥८

श्रीरामस्येति। वृषभध्वजः काश्यां श्रीरामस्य 'मनुं' मन्त्रं जजाप। ततः श्रीरामः प्राह, अहं परमेश्वरः, यदभीष्टं तत् दास्यामि। 'इति' वाक्यसमाप्तौ।

अतः परं श्रीराममीश्वरः 'पप्रच्छ' ययाचे इति। सत्यानन्दचिदात्मेति द्वितीयार्थे प्रथमा, सत्यानन्द-चिदात्मानं श्रीरामम् ईश्वरः पप्रच्छ इति। अस्य स्थाने सहोवाचेति क्वचित् पाठः।

'मणिकर्ण्यां' मणिकर्णिकायां, 'मत्क्षेत्रे' काश्यां यो म्रियं[illegible] तज्जन्[illegible] [illegible] देहि; अतः परं वरान्तरं न प्रार्थनीयम्।

[illegible] क्षेत्रमपि तुभ्यं मया दत्तमिति भावः। क्रमेरर्थोपधाया[illegible] [illegible]। 'क्रिमिः' क्रमचारी पिपीलि-

अविमुक्ते तव क्षेत्रे सर्वेषां मुक्ति-सिद्धये ।
अहं सन्निहितस्तत्र पाषाण-प्रतिमादिषु ॥ ९ ॥
क्षेत्रेऽस्मिन् योऽर्चयेद्भक्त्या मन्त्रेणानेन मां शिव ! ।
ब्रह्महत्यादि-पापेभ्यो मोक्षयिष्यामि मा शुचः ॥१०॥
त्वत्तो वा ब्रह्मणो वापि ये लभन्ते षडक्षरम् ।
जीवन्तो मन्त्रसिद्धाः स्युर्मुक्ता मां प्राप्नुवन्ति ते॥११॥
मुमूर्षोर्दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् ।
उपदेक्ष्यसि मन्मन्त्रं स मुक्तो भविता शिव! १२॥ इति

श्रीरामचन्द्रेणोक्तं योऽविमुक्तं पश्यति, स जन्मान्तरितान् दोषान् नाशयतीति ।

चतुर्थः खण्डः ॥ ४ ॥

अथ हैनं भरद्वाजो याज्ञवल्क्यमुवाच । अथ कैर्मन्त्रैस्तुतः श्रीरामः प्रीतो भवति, स्वात्मानं

कादिः । कीट बन्ध-वर्णयोः, कीटति बध्नातीति । 'कीटः' लूतादिः । न चान्यथा इति मद्वाक्यशेषः । 'अनेन' षडक्षरेण । 'मा शुचः' प्राणिदुःखेन शोकं मा कृथाः । 'मुक्ताः' त्यक्तदेहाः । 'यस्य कस्यापि' पशु-पक्षि-मृगादेरपि । 'जन्मान्तरितानिति' अन्यजन्मार्जितानपि दोषान् 'नाशयति' छिनत्ति । तेन वरेणेति क्वचित् पाठः, श्रीराम-दत्तेन वरेण । इति शब्दः खण्डसमाप्तौ । इदं वाराणसी शब्दस्य व्युत्पत्त्यन्तरम्, वरेण नाशयति दोषान् वाराणसीति ॥ ४ ॥

श्रीरामेणेति, यद्यपि शङ्करः प्रकृतस्तथापि समयान्तरे

दर्शयति, तन्नो ब्रूहि भगवन्निति। स होवाच याज्ञवल्क्यः। श्रीरामेणैवं शिक्षितो ब्रह्मा पुनरेतया गदया नमस्करोति।

विश्वाधारं महाविष्णुं नारायणमनामयम्।
पूर्णानन्दैक-विज्ञानं परं ज्योतिः स्वरूपिणम्।
मनसा संस्मरन् ब्रह्मा तुष्टाव परमेश्वरम्॥

ओं यो वै श्रीरामः, स भगवानद्वैत-परमानन्दात्मा, यः परं ब्रह्म भूर्भुवः स्वस्तस्मै वै नमो नमः॥ १॥

ओं यो वै श्रीरामः स भगवान् यश्चाखण्डैकरसात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः॥ २॥

ओं यो वै श्रीरामः स भगवान् यश्च ब्रह्मानन्दामृतं भूर्भुवः स्वस्तस्मै वै नमो नमः॥ ३॥

ब्रह्मापि एवं वारागणो वृत्तान्तं रामेण शिक्षितः सन्नित्यर्थः। 'गदया गद्येन गाथया व्यक्तवाचा, गद् व्यक्तायां वाचि। 'यः' प्रसिद्धः 'वै' निश्चितं श्रिया जुष्टो रामचन्द्रः, स 'भगवान्' षड्विधैश्वर्य्य-सम्पन्नः 'अद्वैत-परमानन्दात्मा' अद्वैतो यः परमानन्दः तदात्मा यः 'परम्' उत्कृष्टं ब्रह्मापि सन् 'भूर्भुवः स्वः' लोकत्रयीरूपः सूक्ष्म स्थूल व्यूहरूपः, 'तस्मै' एवं रूपाय 'वै' निश्चितं नमो नमः।

ओं यो वै श्रीरामः स भगवान् यश्च तारकं ब्रह्म भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४ ॥

ओं यो वै श्रीरामः स भगवान् यश्च ब्रह्मा विष्णुरीश्वरो यः सर्ववेदात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ५ ॥

ओं यो वै श्रीरामः स भगवान् ये च सर्वे वेदाः साङ्गाः सशाखाः सपुराणा भूर्भुवः स्वस्तस्मै वै नमो नम. ॥ ६ ॥

ओं यो वै श्रीरामः स भगवान् यो जीवात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ७ ॥

ओं यो वै श्रीरामः स भगवान् यश्च सर्व-भूतान्तरात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥८॥

ओं यो वै श्रीरामः स भगवान् ये देवासुर-मनुष्यादिभावा भूर्भुवः स्वस्तस्मै वै नमो नमः ९

ओं यो वै श्रीरामः स भगवान् यश्च मत्स्य-कूर्माद्यवतारः भूर्भुवः स्वस्तस्मै वै नमो नमः १०॥

ओं यो वै श्रीरामः स भगवान् यश्च प्राणो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ११ ॥

ओं यो वै श्रीरामः स भगवान् यश्चान्त-करण-चतुष्टयात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १२ ॥

ओं यो वै श्रीरामः स भगवान् यश्च यमो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १३ ॥

ओं यो वै श्रीरामः स भगवान् यश्चान्तको भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १४ ॥

ओं यो वै श्रीरामः स भगवान् यश्च मृत्युः भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १५ ॥

ओं यो वै श्रीरामः स भगवान् यश्चामृतं भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १६ ॥

ओं यो वै श्रीरामः स भगवान् यानि च पञ्च महाभूतानि भूर्भुवः स्वस्तस्मै वै नमो नमः॥१७॥

ओं यो वै श्रीरामः स भगवान् यः स्थावर-जङ्गमात्मको भूर्भुवः स्वस्तस्मै वै नमो नमः ॥१८॥

ओं यो वै श्रीरामः स भगवान् ये च पञ्चाग्नयो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ १९ ॥

ओं यो वै श्रीरामः स भगवान् यश्च सप्त व्याहृतयो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥२०॥

ओं यो वै श्रीरामः स भगवान् या विद्या भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २१ ॥

ओं यो वै श्रीरामः स भगवान् या च सरस्वती भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २२ ॥

ओं यो वै श्रीरामः स भगवान् या च लक्ष्मी-
र्भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २३ ॥

ओं यो वै श्रीरामः स भगवान् या च गौरी
भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २४ ॥

ओं यो वै श्रीरामः स भगवान् या च जानकी
भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २५ ॥

ओं यो वै श्रीरामः स भगवान् यच्च त्रैलोक्यं
भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २६ ॥

ओं यो वै श्रीरामः स भगवान् यश्च सूर्यो
भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २७ ॥

ओं यो वै श्रीरामः स भगवान् यश्च सोमो
भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २८ ॥

ओं यो वै श्रीरामः स भगवान् यानि च
नक्षत्राणि भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ २९ ॥

ओं यो वै श्रीरामः स भगवान् ये च नव-
ग्रहा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३० ॥

ओं यो वै श्रीरामः स भगवान् ये चाष्टौ
वसवो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३१ ॥

ओं यो वै श्रीरामः स भगवान् ये चाष्टौ
लोकपाला भूर्भुवः स्वस्तस्मै वै नमो नमः ॥३२॥

ओं यो वै श्रीरामः स भगवान् ये चैकादश रुद्रा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३३ ॥

ओं यो वै श्रीरामः स भगवान् ये च द्वादशादित्या भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३४ ॥

ओं यो वै श्रीरामः स भगवान् यच्च भूतं भव्यं भविष्यत् भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३५ ॥

ओं यो वै श्रीरामः स भगवान् यश्च ब्रह्माण्डस्यान्तर्बहिर्व्याप्नोति विराट् भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३६ ॥

ओं यो वै श्रीरामः स भगवान् यश्च हिरण्यगर्भो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३७ ॥

ओं यो वै श्रीरामः स भगवान् या च प्रकृतिभूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३८ ॥

ओं यो वै श्रीरामः स भगवान् यश्चोङ्कारो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ३९ ॥

ओं यो वै श्रीरामः स भगवान् यश्च चतस्रोऽर्द्धमात्रा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४० ॥

ओं यो वै श्रीरामः स भगवान् यश्च परमपुरुषो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४१ ॥

ओं यो वै श्रीरामः स भगवान् यश्च महेश्वरो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४२ ॥

ओं यो वै श्रीरामः स भगवान् यश्च महादेवो भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४३ ॥

ओं यो वै श्रीरामः स भगवान् यश्चों नमो भगवते वासुदेवाय महाविष्णुर्भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४४ ॥

ओं यो वै श्रीरामः स भगवान् यश्च परमात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४५ ॥

ओं यो वै श्रीरामः स भगवान् यश्च ज्ञानात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४६ ॥

ओं यो वै श्रीरामः स भगवान् यश्च सच्चिदानन्दाद्वैतैकरसात्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ॥ ४७ ॥

एतान् ब्रह्मवित् सप्त-चत्वारिंशन्मन्त्रैर्नित्यं

एवं सप्तचत्वारिंशत् पर्य्यायाः पूर्वोद्धृत-मालामन्त्राचर-सङ्ख्यका नारसिंहस्यैवानुष्टुभाचर-सङ्ख्यका द्रष्टव्याः; अतः प्रतिपर्य्यायं क्रमेण मालामन्त्राचराण्येकैकश आदावुच्चार्य्याणि। अयं षडचर-वाच्य-राममूल-व्यूहस्य मालामन्त्र-वाच्यः सप्त-चत्वारिंशद्व्यूहः। तदुक्तम्,—

"कल्पितस्य शरीरस्य तस्य सेनादि-कल्पना"। इति।

देवं स्तुवन्; ततो देवः प्रीतो भवति; तस्माद् य एतैर्मन्त्रैर्नित्यं देवं स्तौति, स देवं पश्यति, सोऽमृतत्वञ्च गच्छति सोऽमृतत्वञ्च गच्छतीति।

पञ्चमः खण्डः ॥ ५ ॥

इत्यथर्ववेदे रामोत्तर-तापनीयोपनिषत् समाप्ता ॥ २३ ॥

'शरीरस्य' मूलव्यूहस्य 'सेनादि-कल्पना' सप्तचत्वारिंशद्व्यूहस्य कल्पना इत्यर्थः। इति शब्दः स्तुतिसमाप्तौ।

'एतान्' पूर्वोक्तान् अद्वैत-परमानन्दात्मादीन् ब्रह्मत्वेन 'वित्' वेत्ता एतैर्मन्त्रैः 'नित्यं' प्रत्यहं 'देवं' रामं स्तुवन् भवेत्। 'ततः' स्तवनात् देवः 'प्रीतः' अनुकूलो भवति। तस्मात्, यतः अयं स्तवः प्रीतिकृत्, तस्मात् 'यः' पुमान् एतैर्मन्त्रैः 'नित्यं' त्रिसन्ध्यं देवं स्तौति 'सः' स्तोता 'देवं' विष्णुं 'पश्यति' साक्षात् करोति, अमृतत्वञ्च गच्छति। द्विरुक्तिः समाप्त्यर्था। उक्तमेव पुनरुच्यते, उत्तर-ग्रन्थाभावादिति हि द्विरुक्त्या सूच्यते।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपद-वाक्यानां रामोत्तर-प्रदीपिका ॥

इति रामोत्तर-तापनीयोपनिषदो दीपिका सम्पूर्णा ॥ २३ ॥

रामोत्तरतापन्यां बहुषु मूल-पुस्तकेषु पञ्च खण्डाः सन्ति क्वचित् पुस्तके तु सप्त खण्डा दृश्यन्ते। दीपिकायामप्यस्यातिरिक्त-खण्डद्वयस्य व्याख्या नास्ति तत्खण्डद्वयम् अत्र निवेश्यते। यथा,—

अथैनं भरद्वाजो याज्ञवल्क्यमुपसमेत्योवाच।
श्रीरामचन्द्रस्य महात्मनो ब्रूहि भगवन्! इति।
स होवाच याज्ञवल्क्यः॥
स्वप्रकाशः स्वयं ज्योतिः स्वयम्भूरेक-चिन्मयः।
तदेव रामचन्द्रस्य मनुरध्यक्षरः स्मृतः॥ १॥
अखण्डैक-रसानन्द-तारक-ब्रह्म-वाचकः।
रामायेति सुविज्ञेयः सदानन्द-चिदात्मकः॥ २॥
नमः पदं सुविज्ञेयं पूर्णानन्दैक-विग्रहम्।
सदा रमन्ति हृदये सर्ववेदा मुमुक्षवः॥ इति॥ ३॥

य एतं मन्त्रराजं रामचन्द्रस्य षड़क्षरं नित्यमधीते, सोऽग्नि-पूतो भवति, स सोमपूतो भवति, स ब्रह्मणा पूतो भवति, स विष्णुना पूतो भवति, स रुद्रेण पूतो भवति, स सर्वेण पूतो भवति, स सर्वयज्ञ-क्रतुभिरिष्टवान् भवति, स सर्वदेवैर्ज्ञातो भवति, इतिहास-पुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति, गायत्र्याः षष्टिशत-सहस्राणि जप्तानि भवन्ति, प्रण-वानामयुतानि जप्तानि भवन्ति। दश पूर्वान् दशोत्तरान् पुनाति, स पङ्क्ति-पावनो भवति, स महान् भवति, सोऽमृत-त्वञ्च गच्छति।

षष्ठः खण्डः॥ ६॥

अथ पुराणेषु उदाहरन्ति,—

गाणपत्येषु शैवेषु शाक्त-सौर्य्य-मन्त्रेष्वथ।
वैष्णवेष्वपि सर्वेषु राममन्त्रः फलाधिकः॥ १॥
गाणपत्यादि-मन्त्रेषु जपः कोटिगुणाधिकः।
मन्त्रराजस्त्वनायास-फलदोऽयं षड़क्षरः॥ २॥
षड़क्षरोऽयं मन्त्रस्तु सर्वाघौघ-विनाशनः।
मन्त्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः॥ ३॥

कृतं दैन्येन दुरितं पञ्च-मासर्त्तु-वर्षजम्।
स हरेत निःशेषन्तु चलाचलमिवाचलः॥ ४॥
ब्रह्महत्या-सहस्राणि ज्ञानाज्ञान-कृतानि च।
स्वर्णस्तेय-सुरापाण-गुरुतल्पायुतानि च॥ ५॥
कोटिकोटि-सहस्राणि उपपातकजान्यपि।
सर्वाण्यपि प्रणश्यन्ति राम-मन्त्रानुकीर्त्तनात्॥ ६॥
भूत-प्रेत-पिशाचाद्याः कुष्माण्ड-ग्रह-राक्षसाः।
दूरादेव प्रधावन्ति राममन्त्र-प्रभावतः॥ ७॥
ग्राम्यारण्य-पशुघ्नत्वे सञ्चितं दुरितञ्च यत्।
मद्यपानेन यत् पापं तदप्याशु विनाशयेत्॥ ८॥
अभक्ष्य-भक्षणोत्पन्नं मिथ्याज्ञान-समुद्भवम्।
सर्वं विलीयेत पापं राममन्त्रानुकीर्त्तनात्॥ ९॥
श्रोत्रियः स्वर्णहरणात् यच्च पापमुपस्थितः।
रत्नादे-र्वाथ हरणाज्जपेन तद्विनाशयेत्॥ १०॥
गत्वापि मातरं मोहादगम्याश्चैव योषितम्।
उपासितेन मन्त्रेण रामस्तदपि नाशयेत्॥ ११॥
महापातकया बध्वा सङ्कल्य सञ्चितञ्च यत्।
बुद्धिपूर्वमघं कृत्वा तदप्याशु विनाशयेत्॥ १२॥
कृच्छ्रैः सप्त पराकाद्यैर्नानाचान्द्रायणैरपि।
पापं दुरपनोद्यं यत् तदप्याशु विनाशयेत्॥ १३॥
आत्मतुल्य-सुवर्णाद्यैर्दानैर्बहुविधैरपि।
एतदप्यपरिक्षीणं तदप्याशु विनाशयेत्॥ १४॥
अवस्थासु त्रयश्चैव मूलबन्धमघञ्च यत्।
तन्मन्त्र-स्मरणादेव न शेषं तत् प्रणश्यति॥ १५॥
तत्तद्गुरूपदिष्टेन वर्त्मनानुष्ठितञ्च यत्।
रामात्मा मनुरेवायं पापराशि-विनाशकृत्॥ १६॥

हनुमदुक्त-रामोपनिषत् ।

ओं सनकादयो योगीन्द्रा अन्ये च ऋषयस्तथा ।
प्रह्लादाद्या विष्णुभक्ता हनुमन्तमिदं ब्रुवन् ॥ १ ॥

आ ब्रह्मबीजदोषाच्च नाशयेत पृथक् तथा ॥ १७ ॥
पितृ-मातृ-वधोत्पन्नं बुद्धिपूर्वमघञ्च यत् ।
निःशेषं नाशयेत्त्वेव राममन्त्रानुकीर्त्तनात् ॥ १८ ॥
पितृ-मातृ-स्वसृघ्नानां यद्वा विश्वास-घातिनाम् ।
यद्वा बालबोधोत्पन्नं कृत्याः शस्त्रासुसायकम् '?' ॥१९॥
गुरुपुत्र-कलत्रादि-वधोत्पन्नमघञ्च यत् ।
तदनुध्यानमात्रेण सर्वमेतद्विलीयते ॥ २० ॥
यः प्रयागादि-तीर्थेषु सर्वेषु कुरुक्षेत्रादिषु ।
सूर्य्य-नियमादि-क्रमाद् भूयः ० ० ० ० ॥ २१ ॥
स्त्रीणाञ्च पुरुषाणां स्यान्मन्त्रेणानेन दोषतः ॥ २२ ॥
येषु येषु विरोधेषु रामभद्रमुपासते ।
दौर्बल्यादि-भयान्येषु न भवन्ति कदाचन ॥ २३ ॥
शान्तः प्रसन्न वदनो अक्रोधी भक्तवत्सलः ।
अनेन सदृशो मन्त्रो जगत्स्वपि न विद्यते ॥ २४ ॥
सम्यगाराधितो रामः प्रसीदत्येव सत्वरम् ।
ददात्यायुष्यमैश्वर्य्यमन्ते विष्णु-पदञ्च यत् ॥ २५ ॥
तदेतदृचाभ्युक्तं तद्विष्णोः परमं पदम् ॥ २६ ॥
स मुक्तो भवति, स मुक्तो भवति ॥ २७ ॥

इत्याथर्वण-रहस्ये रामोत्तर-तापनीयोपनिषत् समाप्ता ॥

पूर्वतापनीये साङ्गस्तारको वर्णितः। उत्तरतापनीये प्रणवस्यापि तारकत्वमुक्तम्, रामस्य परब्रह्मणः प्रणव-बीजा-

वायुपुत्र! महाबाहो! किं तत्त्वं? ब्रह्मवादिनाम्।
पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥ २ ॥
चतुर्वेदेषु शास्त्रेषु सर्वाध्यात्म-विद्यासु च।
सर्वेषु विष्णुभिधानेषु विघ्न-सूर्य्येश-शक्तिषु ॥ ३ ॥
एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल!।

हनुमानुवाच।

भो भो योगीन्द्रा ऋषयो विष्णुभक्तास्तथैव च ॥४॥

भ्यास्य वाच्यत्वमुक्तम्। इदमिदानीं सन्दिह्यते, किं विघ्नराजादयः पञ्चापि तुल्यसामर्थ्या एव? आहोस्विदन्यतरस्मिन् विशेषोऽस्ति? किं श्रेष्ठं नाम? अथ के च रामस्याङ्गमन्त्राः? तथा प्रणवे गृहस्थ-ब्राह्मणानामधिकारोऽस्ति? उत यतीनामेवेति?। अधिकार-पक्षे कियांश्च प्रणवो जप्यः? कियांश्च षड़क्षरः? इति। विभीषणकृता रामस्तुतिश्च किमित्यप्रसिद्धा? कियता च पुरश्चरणेन परम-पुरुषार्थसिद्धिः? के च पुरश्चरणानुकल्पाः? इति। तदर्थं रामोपनिषदारभ्यते, ओं सनकादय इति।

अस्य अनुष्टुप्छन्दः। 'अन्ये च' नारदादयः, 'ब्रुवन्' अब्रुवन्, बहुलं छन्दसीत्यमाङ्योगेऽप्यड्भावः। ब्रह्मवादिनामभिमतमिति शेषः। पुराणादिषु प्रतिपाद्यं किं तत्त्वं? सर्वेषु विष्णोः 'अभिधानेषु' नामसु मध्ये किं 'तत्त्वं'? श्रेष्ठं नाम?। 'विघ्नः' गणेश्वरः 'सूर्य्यः' आदित्यः 'ईशः' रुद्रः 'शक्तिः' चण्डी, प्रकृतत्वात् विष्णुश्च, एतेषु मध्ये किं 'तत्त्वं'? परमदैवतम्?।

शृणुत मामकीं वाचं भवबन्ध-विनाशिनीम् ।
एतेषु चैव सर्वेषु तत्त्वञ्च ब्रह्म तारकम् ॥ ५ ॥
राम एव परं ब्रह्म राम एव परं तपः ।
राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥ ६ ॥

वायुपुत्रेणोक्ता योगीन्द्रा ऋषयो विष्णुभक्ताः पुनः पप्रच्छुर्हनुमन्तं, रामस्याङ्गान् नो ब्रूहि हनुमन्!। स होवाच वायुपुत्रः, विघ्नं वाणीं दुर्गां क्षेत्रपालं सूर्य्यं चन्द्रं नारायणं नारसिंहं वासुदेवं वाराहम् अन्यांश्च कांश्चित् सर्वान् मन्त्रान् श्रीसीतां लक्ष्मणं हनुमन्तं शत्रुघ्नं विभीषणं सुग्रीवम् अङ्गदं जाम्बवन्तं प्रणवम् एतान् रामस्याङ्गान् जानीयात् । अङ्गान् विना रामो विघ्नकरो भवति।

भो भो इत्यादरे वीप्सा। 'एतेषु' शास्त्रेषु तत्त्वं प्रतिपाद्यं, देवेषु तत्त्वं परमदैवतं, नामसु तत्त्वं सर्वाधिकफलं ब्रह्म तारकं, 'राम एव' श्रीराम एव तारकं ब्रह्म।

राममन्त्रं जपता के चाङ्गमन्त्रा जप्तव्याः? इति तृतीयं सन्देहं पृच्छन्ति, वायुपुत्रेणोक्ता इति। 'अङ्गान्' अङ्गस्थानीयान् मन्त्रान् देवांश्च ब्रूहि हे हनुमन्!। 'वाणी' सरस्वती, विघ्नादयो वाराहान्ता दशाङ्गदेवताः, अन्यांश्च कांश्चि: वशिष्ठवामदेवादीन्, अन्येषामप्राधान्य-सूचनाय सामान्यशब्दप्रयोगः। श्रीबीज-पूर्विकां सीतां, सीताशब्दं चतुर्थ्यन्तं

पुनर्वायुपुत्रेणोक्तास्ते हनुमन्तं पप्रच्छुः। आञ्जनेय! महाबल! विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यात्? इति।

पुनरुवाच हनुमान्।

अयोध्यानगरे रम्ये समासीनो रामो मया पृष्टः, सीतापते! योगि-मानस-हंस! विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यात्? इति। स होवाच रामः। येषामेष षड़क्षराधिकारो वर्त्तते, तेषां प्रणवाधिकारः स्यात्, नान्येषाम्।

स्वाहान्तं, सीतादयः प्रणवान्ता दश, एतान् रामस्य 'अङ्गान्' अङ्गमन्त्रान् जानीत। एषां प्रणवादि विन्द्वन्तमाद्यक्षरं वीजं. चतुर्थ्यन्तं नाम मन्त्रः। तदुक्तं डामरे।—

"आङ्कार-विन्दु-मध्यस्थं नामधेयाद्यमक्षरम्।

देवतानां स्ववीजं तत् पूजायामृद्धि-सिद्धिदम्" ॥ इति।

एतन्मन्त्रोल्लङ्घने बाधकमाह, अङ्गान् विनेति। विघ्नकारित्वे जप-पूजनादिकमेव न सिध्यति।

चतुर्थं संशयं पृच्छन्ति, आञ्जनेयेति। अञ्जनाया अपत्यम् आञ्जनेयः, तत् सम्बोधनम्। महाबलेति संशय-निराकरण-सामर्थ्यं सूचितम्। कथं स्यादिति यतीनामेव स्वातन्त्र्येण तदुपासन-विधानात्।

सीतापते! इत्यादि हनुमदुक्तं रामस्य सम्बोधनम्। येषामिति। गृहस्थ-साधूनां षड़क्षराधिकारः सम्प्रतिपन्नः प्रणवस्याङ्गत्वात्, तत्समान-योगक्षेमः प्रणवाधिकारः, 'नान्येषां'

प्रणवं केवलम् अकारमकार मकारमर्द्धमात्रा-सहितं जपित्वा यो रामचन्द्रमन्त्रं जपते, तस्य शुभकरोऽहं स्यात्; तस्मात् प्रणवस्य चाकारस्य चोकारस्य च मकारस्य चार्द्धमात्रस्य च ऋषि-च्छन्दो-देवताः तद्वत् वर्ण-चतुःस्थान-स्वर-वेदाग्नि-गुणादीन्युच्चार्य्य न्यासं कृत्वा प्रणवमन्त्रान् द्विगुणं जप्त्वा पश्चाद्राममन्त्रमाद्यन्त-प्रणवं यो जपते, स रामो भवेत्, इति रामेणोक्तम्; तस्मात् रामाङ्ग प्रणवः कथित इति वायुपुत्रेणोक्ताः पुनर्हनुमन्तं पप्रच्छुः।

स होवाच हनुमान् रामभक्त-विभीषणकृत-रामपरिचर्य्यायां सप्त सहस्राणि संस्कृतवाक्यानि,

षड़क्षरेणादौ चिन्तितानाम्। प्रणवजपं विना राममन्त्रजपेऽधिकार एव नास्तीत्याह, प्रणवमिति। अकारादि-चतुरक्षर-सहितमिति वक्तव्यम्। अकारादिषु पृथग्विभक्त्युच्चारणं स्वातन्त्र्येण छन्दऋष्याद्यभिधान-सूचनार्थम्। तदेवाह, तस्मादिति। एषामर्थादयोऽथर्वशिरसि, माण्डूक्ये, नारसिंहे चोक्ताः। न्यासं कृत्वा प्रणवकलोक्त-मन्त्रान् षड़क्षरान्, 'आद्यन्त-प्रणवम्' आदौ अन्ते च प्रणवोऽस्य तं, प्रणव-पुटितमित्यर्थः, 'जपते' जपति। उपसंहारः, तस्मादिति। इत्यमृतकल्पे उक्ताः।. पुनः पञ्चमं संशयं पप्रच्छुरित्यन्वयः।

रामस्य भक्तो यो विभीषणः, तेन कृता 'रामपरिचर्य्या'

सप्त सहस्राणि गद्यानि, पञ्चशतान्यार्य्याः, अष्टौ सहस्राणि श्लोकाः, चतुर्विंशति-सहस्राणि पद्यानि, दश सहस्राणि दण्डकाः, इत्येवमनुक्रमं ज्ञात्वा कृतकृत्यो भवेदिति। इति हनुमदुपनिषत्।

प्रथमः खण्डः ॥ १ ॥

हनुमानुवाच।

सिंहासने समासीनं रामं पौलस्त्यसूदनम्।
प्रणम्य दण्डवद्-भूमौ पौलस्त्यो वाक्यमब्रवीत् ॥७
रघुनाथ! महाबाहो कैवल्यं कथितं मया।
अज्ञाना-सुलभञ्चैव कथनीयञ्च सौलभम् ॥ ८ ॥

रामस्तुतिः, मा विस्तरतः सम्प्रति श्रोतुमशक्या बहुत्वात्, उद्देशतस्तु वक्ष्यामीत्याशयेनाह, स होवाचेति। 'गद्यानि' संस्कृत-प्राकृत-साधारणानि, 'आर्य्या' गणच्छन्दः, 'श्लोकाः' वृत्तानि 'पद्यानि' अनष्टुप्प्रायाः, 'दण्डका' षड्विंशत्याद्यक्षरपादाः। ननु उद्देशमात्रेण तदर्थाज्ञानात् फलासम्बन्धः? इत्याशङ्क्य फलमाह, इत्येवमिति। उद्देशेन अनुक्रमो ज्ञातः, तावतापि कृतार्थो भवेदित्यर्थः। इति हनुमदुक्तं रहस्यज्ञानम्। अति-विस्तृतत्वात् सा न सर्वजनप्रसिद्धेति भावः।

षष्ठं सन्देहं निरस्यति, हनुमानुवाचेति।

'पौलस्त्यः' पुलस्त्यापत्यं रावणः तस्य 'सूदनं' निरसितारम्; सूद् निरसने। 'पौलस्त्यः' विभीषणः। कैवल्यमिति। यन्मया संस्कृतवाक्यादिषु कैवल्यं 'कथितं' निरूपितं, तत् 'अज्ञानानाम्'

श्रीराम उवाच ।

अथ पञ्च दण्डकाः, पितृघ्नो मातृघ्नो जारो गुरुहानेककोटि-यतिघ्नोऽनेक-कृतपापो यो मम षण्णवति-कोटि-नामानि जपते, स तेभ्यः पापेभ्यः प्रमुच्यते ; स्वयमेव सच्चिदानन्दस्वरूपो भवेन्न किम् ? ।

पुनरुवाच विभीषणः । तत्राप्यशक्तो यः, स किं करोति ? । स होवाच रामः । पञ्चाशच्च-मन्मन्त्र माद्यन्त-प्रणवं मन्मन्त्राद्द्विगुणः प्रणवो यो जपते, स स्वयमेवाहं भवेन्न किम् ? । पुनरुवाच कार्कशेयः । तत्राप्यशक्ता ये, ते किं कुर्वन्तीति । स होवाच रामः । अथ त्रीणि पद्यानि पुरश्च-

अकृतबुद्धीनाम् 'असुलभं' दुष्प्रापं, च शब्दो हेतौ, ततः 'सौलभं' सुलभस्य ज्ञानस्य इदं कारणं सौलभं सुलभज्ञान-प्राप्तिसाधनं त्वया कथनीयमिति प्रार्थितो राम उवाच ।

'अथ' शब्दः पञ्चव्यावृत्त्यर्थः । पञ्च दण्डकाः पठनीयाः विभीषणोक्त-दशसहस्रेभ्य उद्धृत्य पञ्च पठनीयाः । 'जारः' गुरुतल्पगः, चतुर्न्यून-शतकोटिनामानि रामेत्यादीनि । सच्चि-दानन्दरूपः स्वयमेव किं न भवेत् ? अपि तु भवेदेव । इदं मुख्यं पुरश्चरणम् ।

सप्तमं सन्देहं निरस्यन् अनुकल्पान् प्रश्नपूर्वकमाह, पुनरिति । इति । मन्मन्त्रं यो जपते इत्यन्वयः । मन्मन्त्राच्च द्विगुणः प्रणवो

रणानि, तत्राप्यशक्तो यो मम गीता मन्नामसहस्रं मद्विश्वरूपं मदष्टोत्तर-शताभिधानं नारदोक्तं स्तवराजं हनुमदुक्तं मन्त्रराजात्मक-स्तवञ्च सीता-स्तवञ्च राम! रत्नेत्यादिभिः स्तवैरेतैर्यो मां नित्यं स्तौति, स मत्सदृशो भवेन्न किम् इति।

द्वितीयः खण्डः ॥ २ ॥

इत्याथर्वण-रहस्ये रामोपनिषत् समाप्ता ॥ २४ ॥

सर्वोपनिषत्सारः।

ओँ कथं बन्धः कथं मोक्षः काऽविद्या का विद्येति जाग्रत्-स्वप्न-सुषुप्तं तुरीयञ्च कथम् अन्न-

---

जप्तव्य इति शेषः। स स्वयमेव 'अहं' रामः किं न भवेत्?। पक्षान्तरं पुनरिति। कर्कशाया अपत्यं कार्कशेयः। त्रीणि 'पद्यानि' श्लोकाः, गीतादीन्यष्ट।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्ट-पद-वाक्यानां रामोपनिषद्दीपिका॥

इति श्रीभट्टरत्नाकरसूनु-भट्टनारायण-विरचिता
श्रीरामोपनिषदो दीपिका सम्पूर्णा ॥ २४ ॥

ओँ बन्धादिमायापर्य्यन्तं लक्षणं तैत्तिरीयके।
सर्वोपनिषदां सारः सप्तविंशे चतुर्दशे ॥ १ ॥

त्रयोविंशति-रर्थानामादौ स्वरूप-लक्षणप्रश्ने बन्धस्वरूपं

मयः प्राणमयो मनोमय आनन्दमयः कथं कर्त्ता जीवः क्षेत्रज्ञः साक्षी कूटस्थोऽन्तर्य्यामी कथं प्रत्यगात्मा परमात्मा आत्मा माया चेति कथमात्मेश्वरः। अनात्मनो देहादीनात्मत्वेनाभिमन्यते सोऽभिमान आत्मनो बन्धः; तस्मिन् निवृत्तिर्मोक्षः तमभिमानं कारयति या, साऽविद्या; सोऽभिमानो यया निवर्त्तते, सा विद्या; मन आदिचतुर्दशकरणैः पुष्कलैरादित्याद्यनुगृहीतैः शब्दादीन् विषयान् स्थूलान् यदोपलभते, तदात्मनो जागरणम्।

तद्वासनारहितश्चतुर्भिः करणैः शब्दाद्यभावे-

तावदाह, आत्मेश्वर इति। अनात्मनः स्थूलत्वात् देहेन्द्रियादीन् 'आत्मत्वेन' ब्राह्मणोऽहं, स्थूलोऽहं, गच्छामीत्यात्मत्वेनाभिमन्यते, सोऽभिमानो बन्धः; तत्त्यागो मोक्षः; तत्कारिका अविद्या; तन्निवर्त्तिका विद्या। मन आदीति, मनो-बुद्धि-चित्ताहङ्कार-श्रोत्र-त्वक्-चक्षूरसना-घ्राण-वाक्-पाणि-पाद-पायू-पस्थाख्यैर्ज्ञान-कर्मकरणैः 'पुष्कलैः' वहिराविर्भूतैश्चन्द्राच्युत-शङ्कर-चतुर्मुख-दिक्-वातार्क-प्रचेतोऽश्वि-वह्नीन्द्रोपेन्द्र-मित्र-ब्रह्मभिरनुगृहीतैः सङ्कल्पाध्यवसाय-चेतनाभिमान-शब्द-स्पर्श-रूप-रस-गन्ध-वक्तव्यादानगमनविसर्गानन्दान् स्थूलान् वहिर्भूतान् यदोपलभते, तदा आत्मनो जाग्रद् व्यवहारः।

तद्वासनारहित इति। देवतानिमित्ते अदृष्टनिमित्ते च

ऽपि वासनामयान् शब्दादीन् यदोपलभते तन्मनः स्वप्नम्। चतुर्दशकरणोपरमाद्विषय-विशेष-विज्ञानाभावात् यदा, तदा आत्मनः सुषुप्तम्। अवस्थात्रयाभावाद्-भावसाक्षि स्वयं भावरहितं नैरन्तर्य्यं चैतन्यं यदा, तदा तत्तुरीयं चैतन्यमित्युच्यते।

अन्नकार्य्याणां षण्णां कोशानां समूहोऽन्नमयः कोश इत्युच्यते। प्राणादि-चतुर्दश वायु-भेदा

स्वप्न इति बोद्धव्यम्, चिन्तास्वप्ने वासनाया निमित्तत्वात्; अतएव वासनामयानित्युक्तम्। अरहित इति वा च्छेदः। देवतादृष्टकृते तु वासनाद्वये वासनाशब्देन देवेच्छा धर्माधर्मौ च व्याख्येयौ। तन्मनःस्वप्नमिति। सा मनोवृत्तिः स्वप्न इत्यर्थः। तदा आत्मनः स्वप्नमिति तु युक्तः पाठः जागरण-सुषुप्त्योरात्मशब्दग्रहणात्। चतुर्दशेति, स्वप्ने तु दशानामेवोपरमः, चतुर्णामन्तःकरणानां व्यापारः करणाभावे विषयाणां शब्दादीनां विशेषतो ज्ञानाभावात् यदा आत्मनोऽवस्थानमिति शेषः, तदा आत्मनः 'सुषुप्तं' सुषुप्तिरित्यर्थः। तन्मनः सुषुप्तमिति क्वचित् पाठः, तदा तन्मनः सुषुप्तम् उपरम इति व्याख्येयम्। 'भावसाक्षि' भावानां साक्षि साक्षाद्द्रष्टृ, साक्षिशब्दः साक्षाद्द्रष्टृवाची, स्वयं भावरहितं निर्लेपत्वात्, 'नैरन्तर्य्यं' स्वार्थे भावप्रत्ययः, व्यवधायक-वस्त्वन्तर-रहितं 'चैतन्यं' ज्ञानमात्रं यदा अवतिष्ठते इति शेषः, तदा तुरीयम्।

अन्नेति। षट्कोशा यथा—

"अस्थि मज्जा मेद-त्वङ्मांस-शोणितम्।

अन्नमये कोशे यदा वर्त्तन्ते, तदा प्राणमयः कोश इत्युच्यते। एतत्कोशद्वयसंयुक्तो मन आदिभिश्चतुर्भिः करणैरात्मा शब्दादिविषयान् सङ्कल्पादिधर्म्मान् यदा करोति, तदा मनोमयः कोश इत्युच्यते। एतत्-कोशत्रय-संयुक्तस्तद्गत-विशेषाविशेषज्ञो यदा भासते, तदा विज्ञानमयः कोश इत्युच्यते। एतत् कोशचतुष्टय स्वकारण-विज्ञाने वटकणिकायामिव वृक्षो यदा वर्त्तते, तदा आनन्दमयः कोश इत्युच्यते।

षट्कोशिकमिदं प्रोक्तं सर्वदेहेषु देहिनाम्" ॥ इति।

प्राणादिचतुर्दशेति। प्राणापान-व्यानोदान-समान-नाग-कूर्म्म-कृकर-देवदत्त-धनञ्जया दश, चत्वारोऽन्ये,—

वैरम्भणः स्थानमुख्यः प्रद्योतः प्रकृतस्तथा।

"वैरम्भणादयस्तत्र सर्ववायु-वशङ्गताः" ॥ इति।

एते चतुर्दश वायवो देहे यदा कृतास्पदाः, तदा प्राणमयः कोशः। एतदिति, 'एतौ' अन्नमय-प्राणमयौ कोशौ, तयोर्द्वयं, तेन संयुक्तः आत्मा 'शब्दादिविषयान्' शब्दादयः पञ्च विषया येषां ते तान्, सङ्कल्पादयो ये धर्म्मास्तान्। एतदिति, 'एतेन' पूर्वोक्त-कोशत्रयेण संयुक्तः 'तद्गत-विशेषा-विशेषज्ञः' तद्गत सङ्कल्पादिगतः विशेषः ब्राह्मणत्वादिः, 'अविशेषः' मनुष्यत्वादि-सामान्यं, तयोर्ज्ञाता, स विकल्प-कल्पनादिमान्, 'स्वकारण-विज्ञाने' स्वस्य कारणीभूतं यदा एतत् कोशचतुष्टयं

कं ज्ञानं ब्रह्म तत्र वर्त्तते। तत्र दृष्टान्तः, वटवीजे यथा

सुख-दुःख-बुद्ध्याश्रयो देहान्तःकर्त्ता यदा, तदा इष्टविषये बुद्धिः सुखबुद्धिः, अनिष्टविषये बुद्धिर्दुःखबुद्धिः, शब्दस्पर्श-रूप-रस-गन्धाः सुख-दुःख-हेतवः।

पुण्य-पाप-कर्म्मानुसारी भूत्वा प्राप्त-शरीर-सम्बन्ध-वियोगम् अप्राप्तशरीर-संयोगमिव कुर्वाणो यदा दृश्यते, तदोपहितत्वाज्जीव इत्युच्यते।

घटो वर्त्तते तद्वत्, स च निर्विषये जाग्रति मनसि सुषुप्ते च भवति।

कर्त्तृलक्षणमाह, सुखेति। सुखं मे भवतु, दुःखं मे मा भूदिति प्रवृत्तः सुख-दुःखयोरनुभविता देहान्तः स्थूल-सूक्ष्म-देहोपाधिः कर्त्तेत्यर्थः। यदा तदेति पूर्वेण सम्बध्यते; यदा देहोपाधिस्तदा कर्त्तेत्यर्थः।

सुख-दुःखबुद्ध्योर्लक्षणे लक्षणाङ्गतया आह, इष्टेति। इष्टानिष्ट-विषयानाह, शब्देति। अनुकूलवेद्याः सुखहेतवः, प्रतिकूलवेद्या दुःखहेतवः।

सुख-दुःख-हेतून् निदर्शयन् जीवलक्षणमाह, पुण्येति। पुण्य-पापानुसारित्वं ज्ञान-संस्कारयोरप्युपलक्षणम्, "तमेनं विद्या-कर्म्मणी समन्वारभते पूर्वप्रज्ञा च" इति श्रुतेः। प्राप्तस्य शरीरस्य यः सम्बन्धः, तस्य वियोगमिव कुर्वाणः अप्राप्तस्य शरीरस्य संयोगमिव शब्दो वस्तुतोऽसङ्गत्वात्। 'उपहितत्वात् नाना-शरीरोपाधिमत्त्वात् जीव इत्युच्यते। प्राप्त-शरीर-सन्धि-योगमिति पाठे प्राप्तः शरीर-योग-सन्धिः येन सः। एकशरीर-

मन आदिश्च, प्राणादिश्च, सत्त्वादिश्च, इच्छादिश्च, पुण्यादिश्चैते पञ्च वर्गा इति।

एतेषां पञ्चवर्गाणां धर्मीभूतात्मज्ञानादृते न विनश्यति। आत्मसन्निधौ नित्यत्वेन प्रतीयमान आत्मोपाधिर्यस्तल्लिङ्गशरीरं हृदयग्रन्थिरित्युच्यते।

तत्र यत् प्रकाशते चैतन्यं, स क्षेत्रज्ञ इत्युच्यते। ज्ञातृ-ज्ञान-ज्ञेयानामाविर्भाव-तिरोभाव-

---

त्यागेन अपर-शरीर-ग्रहणम्। सन्धिर्योगमित्यस्यैव व्याख्यानम् अप्राप्त-शरीर-संयोगमिति।

क्षेत्रज्ञं लक्षयितुं लिङ्गं लिलक्षयिषुः पञ्च वर्गानाह, मन आदिरिति। मनो बुद्धिश्चित्तमहङ्कारश्च; 'प्राणादिः' पञ्च वायवः; 'सत्त्वादिः' त्रयो गुणाः; 'इच्छादिः' कामः सङ्कल्पो विचिकित्सा, श्रद्धाऽश्रद्धा, धृतिरधृतिर्ह्रीर्धीर्भीश्च; 'पुण्यादिः' पुण्यपाप-ज्ञान-संस्काराः; पञ्च एते वर्गाः, 'इति' वाक्य-समाप्तौ।

लिङ्गस्य मन आदिसन्धिमाह, एतेषामिति। 'धर्मी भूतात्मज्ञानात्' भूतसिद्धो य आत्मा, तस्य ज्ञानं विना न नश्यति, आत्मज्ञाने तु नश्यति "भिद्यते हृदयग्रन्थिः" इत्यादि-श्रुतेः।

इदानीं लिङ्गलक्षणान्तर्भूतमात्मान्तरमाह, आत्मसन्निधाविति। आत्मनो नित्यत्वधर्माध्यासात् नित्य इव भासमान इति स्वरूपकथनम्, एवंविधो य आत्मोपाधिः, तस्य द्वे सञ्ज्ञे, लिङ्गं हृदयग्रन्थिरिति च।

यदर्थं लिङ्गलक्षणमुक्तं, तल्लक्षणमाह, तत्रेति। 'ज्ञाता'

ज्ञाता स्वयमेव-माविर्भाव-तिरोभाव-हीनः स्वयं ज्योतिः, स साक्षीत्युच्यते। ब्रह्मादि-पिपीलिका-पर्य्यन्तः सर्वप्राणि-बुद्धिष्वविशिष्टतयोपलभ्यमानः सर्वप्राणि-बुद्धिस्थो यदा, तदा कूटस्थ इत्युच्यते। कूटस्थाद्युपहितभेदानां स्वरूप-लाभ-हेतुर्भूत्वा मणिगणसूत्रमिव सर्वक्षेत्रेष्वनुस्यूतत्वेन यदा प्रकाशते आत्मा, तदान्तर्यामीत्युच्यते। सर्वोपाधि-विनिर्मुक्त-सुवर्णघनवद्विज्ञानचिन्मात्र-स्वभाव आत्मा यदावभासते, तदा त्वं पदार्थः प्रत्यगात्मेत्युच्यते।

प्रमाता, 'ज्ञानं' चित्तवृत्तिः, 'ज्ञेयाः' विषयाः, तेषामुत्पत्ति-विलयौ जानाति स्वयमेवं ज्ञात्रादिवत् यस्य तौ नस्तः, किन्तु निर्विकारः, स्वप्रकाशश्च, स 'साक्षात्' अव्यवधानेन तद्द्रष्टृत्वात् साक्षीत्युच्यते। 'अविशिष्टतया' विशेष-रहित चेतनाकारेण सर्वप्राणिबुद्धिस्थः ध्यायतीव लेलायतीव सुधीर्गिति श्रुतेः, 'कूटे' बुद्ध्यादौ मिथ्याभूते तिष्ठति कूटस्थः, कूटस्थादयो ये उपहिताः 'भेदाः' उपाधियुक्ता विशेषाः, तेषां स्वरूपलाभं प्रति हेतुः सन् मणिगुच्छस्थसूत्रवत् सर्वशरीरेष्वनुगतत्वेन यदा भात्यात्मा तदान्तर्यामि-सञ्ज्ञो भवति। तदुक्तम्—

> "अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा।
> मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव"॥ इति।

सत्यं ज्ञानमनन्तमानन्दं ब्रह्म, सत्यमविनाशि, नाम-देश-काल-वस्तु-निमित्तेषु विनश्यत्सु यन्न विनश्यति, तदविनाशि ज्ञानमिति उत्पत्ति-विनाश-रहितं चैतन्यं ज्ञानमित्यभिधीयते। अनन्तं नाम मृद्विकारेषु मृदिव, सुवर्णविकारेषु सुवर्णमिव, तन्तुकार्य्येषु तन्तुरिव, अव्यक्तादि-सृष्टिप्रपञ्चेषु पूर्वं व्यापकं चैतन्यमनन्तमित्युच्यते। आनन्दो नाम सुखचैतन्य-स्वरूपोऽपरिमितानन्द-समुद्रः।

अविशिष्ट-सुख-स्वरूपश्च आनन्द इत्युच्यते।

त्वम्पदार्थः शोधित इति शेषः, न ह्यशोधिते त्वम्पदार्थे सर्वोपाधि-विनिर्मुक्तत्वादि-विशेषण-सम्भवः।

परमात्मानं तत्पदार्थं वक्तुं ब्रह्मणो रूप-चतुष्टयमाह, सत्यमिति। चतुष्टयं क्रमेण लक्षयति, सत्यमविनाशीति। अविनाशीत्यस्य कोऽर्थः ? इत्यत आह, नामेति। नामादिपञ्चसु नष्टेष्वपि यत् तत्त्वं स्थिरं, तदविनाशि ज्ञातव्यमिति शेषः। ज्ञानपदार्थमाह, ज्ञानमितीति। आद्यं ज्ञानपदं प्रतीकम्, उत्तरमर्थनिर्देशः। एवमनन्तानन्दयोरपि द्रष्टव्यम्। 'पूर्वं' कार्य्यात् प्राग्-वर्त्तमानं कार्य्यजातस्य च व्यापकं रूपाच्छादकं शुक्तिरिव रजत-व्यापिका। सुखेति, सुखात्मकं यच्चैतन्यं तद्रूपः, न तु ज्ञानाद्भिन्नं सुखमस्ति। तस्य निरवधितामाह, अपरिमितेति। दृष्टिसुखं श्रोत्रसुखमितिवत्।

विशेषोऽत्र नास्तीत्याह। अविशिष्टेति। लक्षणमिति।

एतद्वस्तुचतुष्टयं यस्य लक्षणं देश-काल-निमित्त-ष्वव्यभिचारि, स तत्पदार्थः परमात्मा परं ब्रह्मेत्युच्यते। त्वंपदार्थादौपाधिकात् तत्पदार्थादौपाधिकाद् विलक्षणः आकाशवत् सूक्ष्मः केवलः सत्तामात्रस्तत्पदार्थस्यात्मेत्युच्यते।

अनादिरन्तर्वती प्रमाणाप्रमाण-साधारणा, न सती, नासती, न सदसती, स्वयमविकारा-

एतच्चतुष्टयं रूपमित्यर्थः। 'अव्यभिचारि' सदोपलभ्यमानं यद्रूपं, स तत्पदार्थ ईश्वर इत्युच्यते। तस्यैव पुनर्नामद्वयमाह, परमिति। परमित्युभयत्राप्यव्ययम्। तत्त्वं पदलक्षितमर्थं लक्षयति, त्वम्पदार्थादिति। अतत्पदार्थश्च तत्पदार्थादौपाधिकाद्विलक्षण इत्यर्थः। 'आत्मा' शुद्धं ब्रह्मेत्यर्थः।

मायालक्षणमाह, अनादिरिति। 'अनादिः' पूर्वावधिविधुरा, 'अन्तवती' गर्भिणी कार्य्योत्पादन समर्था। अन्तवतीति पाठे कार्य्य-रूपेण नश्वरा, चिद्रूपेण कारणात्मना तु नित्यैव शक्ति शक्तिमतोरभेदात् चिच्छक्तित्वाच्चास्याः कदाचिदपि ब्रह्मणो जगज्जननाद्यसामर्थ्यासम्भवात् स्वभावहानिप्रसङ्गात् प्राग्ज्ञानात् सत्वात् सास्तेति सम्प्रदायविदः।

प्रमाणेति। उभयोरतत्त्व-विषयत्वात् ब्रह्मणः स्वप्रकाशत्वेन प्रमाणाविषयत्वात् 'न सती' ब्रह्मातिरेकेण 'नासती' उपलम्भविरोधात्, 'न सदसती' विरोधात्, किन्तु सदसद्विलक्षणानिर्वचनीया ज्ञानबाध्या इति साम्प्रदायिकाः। वयन्तु ब्रूमः ब्रह्मरूपेण सती, कार्य्यरूपेणासती; तेन सर्वात्मना सती,

द्विकारहेतौ निरूप्यमाणे असती, अनिरूप्यमाणे सती, लक्षणशून्या, सा मायेत्युच्यते ।

इत्यथर्ववेदे सर्वोपनिषत्सारः समाप्तः ॥ २५ ॥

—०—

हंसोपनिषत् ।

गौतम उवाच ।

भगवन् सर्वधर्मज्ञः सर्वशास्त्रार्थपारगः ।
ब्रह्मविद्या-प्रबोधो हि केनोपायेन जायते ? ॥१॥

नाप्यसती, नापि सदसती, सद्रूपेणासत्त्वाभावात् असद्रूपेण सत्त्वाभावात्, एतदुपपादितम् अधस्तात् स्वयमधिष्ठानस्य ब्रह्मणोऽविकारात् विकारहेतौ निरूप्यमाणे 'असती' आत्मानमदर्शयन्ती ब्रह्मातिरेकेणानुपलभ्यमाना 'अनिरूप्यमाणे' अविवेक-दशायां 'सती' स्वकार्यं दर्शयन्ती 'लक्षणशून्या' ईदृशी तादृशीति निर्वक्तुमशक्या सा माया । माशब्दो निषेधे, याशब्दः प्राप्तौ, प्राप्तापि सती या नास्ति, सा माया ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्ट-पद-वाक्यानां सर्वोपनिषद्दीपिका ॥

इति सर्वोपनिषत्सारस्य दीपिका सम्पूर्णा ॥ २५ ॥

ओं हंसोपनिषदं विद्यादष्टत्रिंशत्तमीं ततः ।
आथर्वणे चतुःखण्डां हंसज्ञान-पटीयसीम् ॥ १ ॥

शाश्वते ब्रह्मणि ज्ञाते सति तत्साक्षात्-कारायोपाय उप-

सनत्सुजात उवाच।

विचार्य्य सर्ववेदेषु मतं ज्ञात्वा पिनाकिनः।
पार्वत्या कथित तत्त्वं शृणु गौतम! तन्मम ॥२॥
अनाख्येयमिदं गुह्यं योगिनां कोश-सन्निभम्।
हंसस्यागति-विस्तारं भुक्ति-मुक्ति-फल-प्रदम् ॥३॥

अथ हंस-परमहंस-निर्णयं व्याख्यास्यामः, ब्रह्मचारिणे शान्ताय दान्ताय गुरुभक्ताय हंस हंसेति सदा अयं सर्वेषु देहेषु व्याप्तो वर्त्तते, यथा ह्यग्निः काष्ठेषु, तिलेषु तैलमिव। तं विदित्वा न मृत्युमेति। गुदमवष्टभ्य आधाराद्वायुमुत्थाप्य स्वाधिष्ठानं त्रिः प्रदक्षिणीकृत्य मणिपूरकञ्च गत्वा अनाहतमतिक्रम्य विशुद्धौ प्राणान् निरुध्य आज्ञामनुध्यायन् ब्रह्मरन्ध्रं ध्यायन् त्रिमात्रोऽहमित्येव सर्वदा ध्यायन्। अथो

दिश्यते। तत्रापि प्रामाण्य-दार्ढ्याय आख्यायिकारभ्यते, भवत्विति। ब्रह्मविद्यायाः प्रबोधः "आदिशान्त-दलस्यार्णान् संहरेत् कमलासनः" इत्यादि कुण्डल्यनुसारेण वायोरपि चोर्द्ध्वं गच्छतः त्रिः परिवृत्तिः, 'मणिपूरकं' नाभिचक्रं 'गत्वा' प्राप्य 'अनाहतम्' अनाहतचक्रं हृदि चक्रम् 'अतिक्रम्य' उल्लङ्घ्य 'विशुद्धौ' कण्ठदेशे 'प्राणान्' वायून् निरुध्य 'आज्ञाम्' आज्ञाचक्रं भ्रूमध्यवर्त्ति अनुध्यायन् ब्रह्मरन्ध्रञ्च सहस्रदलपङ्कजे

नादमाधाराद्-ब्रह्मरन्ध्र-पर्य्यन्तं शुद्धस्फटिक-सङ्काशं स वै ब्रह्म परमात्मेत्युच्यते ॥ १ ॥

अथ हंसऋषिः पङ्क्तिश्छन्दः परमहंसो देवता-ऽहमिति वीजं स इति शक्तिः सोऽहमिति कीलकं षट्सङ्ख्यया अहोरात्रयोरेक-विंशति सहस्राणि षट्शतान्यधिकानि भवन्ति। सूर्य्याय सोमाय निरञ्जनाय निराभासाय तनु सूक्ष्म

ध्यायन् 'त्रिमात्रः' ओङ्कारः अहमित्येव 'सर्वदा' नित्यं ध्यायन्। अथो नादं ध्यायन्, कीदृशं? 'आधारात्' आधार-मारभ्य ब्रह्मरन्ध्रपर्य्यन्तं प्रतीयमानं तथा उज्ज्वलं स वै ब्रह्म आत्मा परमात्मैव ॥ १ ॥

हंसमन्त्रस्य ऋष्यादिकमाह, अथ हंस इति। अन्यत्र तु भिन्ना ऋष्यादय उक्ताः, यथा,—

"ऋषिर्ब्रह्मा स्मृतो देवी गायत्रीच्छन्द ईरितम्।
देवता जगतामादिः सम्प्रोक्तो गिरिजापतिः" ॥ इति।

तत् हंसस्य वाह्यपुरश्चरण-विषयं ज्ञातव्यम्। षट्सङ्ख्यया ऋष्यादयो ज्ञेया इति शेषः। यद्वा 'षट्शतानि' षट्सङ्ख्यया अधिकानि भवन्तीन्वयः, षट्शतोपरि षट् इत्यर्थः। २१६०६ इत्यङ्कतः। अमृतविन्दौ तु—

"अशीतिः षट्शतञ्चैव सहस्राणि त्रयोदश।
लक्षश्चैकोऽपि निश्वासा अहोरात्र-प्रमाणतः" ॥ इति
सङ्ख्याभेद उक्तः, स तत्रैव समाहितः।

षड़ङ्गान्याह, ओं सूर्य्याय हृदयाय नमः, ओं सोमाय शिरसे स्वाहा, ओं निरञ्जनाय शिखायै वषट्, ओं निराभासाय

प्रचोदयादिति, अग्नीषोमाभ्यां वौषट्, हृदयाद्यङ्गन्यास-कराङ्गन्यासौ भवतः एवं कृत्वा हृदये अष्टदले हंसात्मानं ध्यायेत्।

अग्नीषोमौ पक्षावोङ्कारः शिरो विन्दुस्तु नेत्रं मुखं रुद्रो रुद्राणी चरणौ बाहू कालश्चाग्निश्चोभे पार्श्वे भवतः। पश्यत्यनागारश्च शिष्टोभयपार्श्वे भवतः।

एषोऽसौ परमहंसो भानुकोटि-प्रतीकाशः

कवचाय हुं, ओँ तनु सूक्ष्म नेत्रत्रयाय वौषट्, ओँ प्रचोदयात् अस्त्राय फट्। एभिरेवादौ करन्यासः। हसां हसीमित्यादिना षडङ्गानीत्यपरे। हसां सूर्य्यात्मने हूं, हसीं सोमात्मने शिर इत्यादिनेत्यन्ये। अग्नीषोमाभ्यां वौषड़िति षस्णां शेषः। 'हस्' अग्निः 'सः' सोमः "हं पुमान् प्रकृतिस्तु सः" इति चोक्तम्। हृदयादीनि यानि अङ्गानि तेषां न्यासः करन्यासश्च तौ भवतः। एवं न्यासं कृत्वा हृदये अष्टदलं, तत्र हंसात्मानं ध्यायेत्।

ध्येयस्वरूपमाह, अग्नीषोमाविति। हंसस्य पक्षित्वात् पक्षिरूपेण ध्यानं ताभ्यां जगत् प्रवृत्तेः। ओङ्कारः शिरः उत्तमाङ्गत्वात्, विन्दुस्तु नेत्रं प्रकाशकत्वात्, मुखं रुद्रो वक्तृत्वात्, रुद्राणी चरणौ सर्वाधारत्वात्, बाहू कालश्च सर्वदातृत्वात्, अग्निश्चोभे पार्श्वे भवतः पूर्वापरे दक्षिणोत्तरे वासौ सत्वसामान्यात्, 'पश्यति' दृशधातुः लक्षणया ज्ञानम्, 'अनागारः' अनिकेतः वैराग्यं, ते अवशिष्टे उभयपार्श्वे भवतः पूर्वापरे दक्षिणोत्तरे वा।

ध्यानमुपसंहरति, एषोऽसाविति। तस्याष्टसु दलेषु स्थितस्य

येनेदं व्याप्तम्, तस्याष्टधा वृत्तिर्भवति। पूर्वदले पुण्ये मतिः, आग्नेय्यां निद्रालस्यादयो भवन्ति, याम्ये क्रूरे मतिः, नैर्ऋते पापे मनीषा, वारुण्यां क्रीड़ा, वायव्ये गमनादौ बुद्धिः, सौम्ये रतिप्रीतिः, ईशाने द्रव्यादान मध्ये वैराग्यं,

---

अष्टधा वृत्तिमाह, तस्येति। तत्र दिक्पाल-बुद्ध्यनुसारेण फलं बोद्धव्यम्। इदञ्च दिगभिप्रायेण सामान्यतः फलमुक्तम्, तत्तद्दलाभिप्रायेण तु विशेषफलमध्यात्मविवेके उक्तम्, तद्यथा—

गुद-लिङ्गान्तरे चक्रमाधारन्तु चतुर्दलम्।
परमः सहजस्तद्वदानन्दो वीरपूर्वकः॥
योगानन्दश्च तस्य स्यादीशानादिदले फलम्।
स्वाधिष्ठान-लिङ्गमूले षट्पत्रं चक्रमस्य तु॥
पूर्वादिषु दलेष्वाहुः फलान्येतान्यनुक्रमात्।
प्रश्रयः क्रूरता गर्व नाशो मूर्च्छा ततः परम्॥
अवज्ञा स्यादविश्वासो जीवस्य चरतो ध्रुवम्।
नाभौ दशदलं पद्मं मणिपूरक-सञ्ज्ञकम्॥
सुषुप्तिरत्र तृष्णा स्यादीर्ष्या पिशुनता तथा।
लज्जाभय-घृणा-मोह-कुधियोऽथ विषादिता॥
हृदयेऽनाहतं चक्रं दलैर्द्वादशभिर्युतम्।
लौल्य-प्रणाशः कपटं वितर्कोऽप्यनुतापिता॥
आशाप्रकाशश्चिन्ता च समीहा ममता ततः।
क्रमेण दम्भो वैकल्यं विवेको ह्यहङ्कृतिस्तथा॥
फलान्येतानि पूर्वादि-दलस्थस्यात्मनो विदुः।
कण्ठेऽस्ति भारतीस्थानं विशुद्धिः षोड़शच्छदम्॥

केशरे जाग्रदवस्था, कर्णिकायां स्वप्नं, लिङ्गे सुषुप्तिः, पद्मत्यागे तुरीयं, यदा हंसो नादे लीनो भवति, तदा तुर्य्यातीतमुन्मननमजपोपसंहार-मित्यभिधीयते।

एवं सर्वं हंसवशात्; तस्मान्मनो हंसो विचार्य्यते; स एव जपकोट्या नादमनुभवति; एवं सर्वं हंसवशात्।

तत्र प्रणव उद्गीथ हुं फड्वषड्थ स्वधा।
स्वाहा नमोऽमृतं सप्तस्वराः षड्जादयो मताः॥
इति पूर्वादिपत्रस्थे फलान्यात्मनि षोड़श" ॥ इति ॥३॥

स्थानान्तरेषु नियममाह, मध्य इति। 'लिङ्गे' नाले 'पद्मत्यागे' पद्मादूर्द्ध्वं निरालम्ब-प्रदेशे 'नादे' वक्ष्यमाणे 'तुर्य्यातीतं' तुरीयात्परम्, 'उन्मननम्' मनन रहितम् 'अजपोपसंहारं' प्राणव्यापार-रहितम्। त्रय एते पर्य्यायाः।

एवं सर्वमित्यादि। 'एवं' तुरीयातीतपर्य्यन्तमुक्तं सर्वं फलं 'हंसवशात्' हंसजप-निवेदनाधीनं वेदितव्यम्। 'तस्मात्' सर्वफलदत्वात् मनो 'हंसः' हन्ति गच्छति हंसः सप्तदशकं लिङ्गं मनो विचार्य्यते मनःस्वरूपमेव विचार्य्य निश्चेतव्यम्, येन त्वमर्थोऽवभासते, 'स एव' हंसोपासकः 'जपकोट्या' कोटिसङ्ख्यकजपनिवेदन-पूर्वकमनो-नियमे सति नादं वक्ष्यमाणम् अनुभवति। तस्यैवेति पाठे हंसस्यैव, पुनरेवमित्यादिरुपसंहारः नादहेतुत्वस्याधिकस्योक्तत्वात्।

नादो दशविधो जायते। चिणीति प्रथमं, चिञ्चिणीति द्वितीयं, घण्टानादस्तृतीयः, शङ्ख-नादश्चतुर्थः, पञ्चमस्तन्त्रीनादः, षष्ठस्ताल-नादः, सप्तमो वेणुनादः, अष्टमो मृदङ्गनादः, नवमो भेरीनादः, दशमो मेघनादः ; नवमं परित्यज्य दशममेवाभ्यसेत्।

प्रथमे चिञ्चिणी गात्रं, द्वितीये गात्रभञ्जनम्।
तृतीये खेदनं याति, चतुर्थे कम्पते शिरः॥
पञ्चमे स्रवते तालु षष्ठेऽमृतनिषेवणम्।
सप्तमे गूढविज्ञानं परा वाचा तथाष्टमे॥
अदृश्यं नवमे देहं दिव्यं चक्षुस्तथामलम्।
दशमे परमं ब्रह्म भवेद्ब्रह्मात्म-सन्निधौ॥

तस्मिन् मनो विलीयते मनसि सङ्कल्प-

सप्रकारां नादोत्पत्तिमाह, नाद इति। चिण्यादयोऽनु-करणशब्दाः ; इति शब्दा अनुकरणत्वद्योतकाः ; 'घण्टानादः' घण्टाया इव नादः, एवमग्रेऽपि। नवमं परित्यज्येति, नव-मपर्यन्तान् त्यक्त्वा ब्रह्मभवनफलं दशममेव अभ्यसेत्॥

दशानां प्रत्येकं लक्षणानि, फलानि चाह, प्रथमे इति। चिञ्चिणीशब्दाकारं तद्वदिदं भवति। 'गात्र-भञ्जनं' गात्रभङ्गः इव भवति, 'खेदनं' खिन्न इव भवति, 'अमृतनिषेवणम्' अमृत-पानमिव। दशममिति, दशमश्चेदभ्यस्यति परमं ब्रह्म भवेत्। तस्य फलमाह, ब्रह्मात्मेति। तस्मिन् ब्रह्मण आत्मनः सन्निधौ

विकल्पे दग्धे पुण्यपापे सदाशिवः शक्त्यात्मा सर्वत्रावस्थितः स्वयं ज्योतिः शुद्धो बुद्धो नित्यो निरञ्जनः प्रकाशते इति ॥ २ ॥

सति मनो 'विलीयते' विलीनं भवति, मनसि सङ्कल्प-विकल्प-रूपे गते सति, पुण्यञ्च पापञ्च तयोः समाहारे दग्धे सति, सदाशिवो भवति। शक्त्यात्मा च शिवशक्ति-रूपो भूत्वा सर्वत्रावस्थितादिरूपो ब्रह्मरूपः प्रकाशते ब्रह्मैव भवति। इति शब्दो हंसवर्णन-समाप्त्यर्थः ॥ २ ॥

सनत्सुजातेन गौतमं प्रति पार्वती-परमेश्वर-संवादे हंस-वर्णनमुक्तम्। स संवादो यथा,—

ओं ईश्वर उवाच।

अजपाराधनं देवि! कथयामि तवानघे!।
यस्य विज्ञानमात्रेण परं ब्रह्माधिगच्छति ॥ १ ॥
हंसं परं महेशानि! प्रत्यहं जपते नरः।
मोहान्धो यो न जानाति मोक्षस्तस्य न विद्यते ॥२॥
श्रीगुरोः कृपया देवि! ज्ञायते जप्यते यदा।
तच्छ्वासैस्तु निश्वासैस्तदा बन्धक्षयो भवेत् ॥३॥
उच्छ्वासे चैव निश्वासे हंस इत्यक्षर-द्वयम्।
तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः ॥४॥
नाभेरूर्द्ध्वं स निश्वासो हृदयाग्रे व्यवस्थितः।
षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता ॥५॥
षष्टिनाड्या ह्यहोरात्रं जपसंख्या क्रमो मतः।
एकविंशति-साहस्रं षट्शताधिकमीश्वरि! ॥६॥
प्रत्यहं जपते प्राणी सान्द्रानन्दमयीं पराम्।

उत्पत्तिर्जप आरम्भोऽमृतिरस्य निवेदनम् ॥ ७ ॥
विना जपेन देवेशि ! जपो भवति मन्त्रिणः ।
अजपेयं ततः प्रोक्ता भवपाश-निकृन्तनी ॥ ८ ॥
एवं जपं महेशानि ! प्रत्यहं विनिवेदयेत् ।
गणेश-ब्रह्म विष्णुभ्यो हराय परमेश्वरि ! ॥९॥
जीवात्मने क्रमेणैव तथा च परमात्मने ।
षट् शतानि सहस्राणि षडेव च तथा पुनः ॥ १० ॥
षट् सहस्राणि च पुनः सहस्रञ्च सहस्रकम् ।
पुनः सहस्रं गुरवे क्रमेण विनिवेदयेत् ॥११॥
आधारे स्वर्णवत् स्मृत्वा वादि-सान्तानि संस्मरेत् ॥१२॥
द्रुतसौवर्ण-वर्णानि दलानि परमेश्वरि ! ।
स्वाधिष्ठाने हि हेमाभे वादिलान्तानि च स्मरेत् ॥१३॥
विद्युत्पुञ्ज-प्रभाभानि सुनीलमणिपूरके ।
डफान्तानि महानील-प्रभाणि च विचिन्तयेत् ॥१४॥
पिङ्गवर्ण-महावह्नि-कर्णिकाभानि चिन्तयेत् ।
कादिवान्तानि पत्राणि चतुर्थेऽनाहते प्रिये ! ॥१५॥
विशुद्धौ धूम्रवर्णे तु रक्तवर्णान् स्वरान् स्मरेत् ।
आज्ञायां विद्युदाभायां शुभौ हक्षौ विचिन्तयेत् ॥१६॥
कर्पूर-द्युति-संराजत्-सहस्रदल-नीरजे ।
नादात्मकं ब्रह्मरन्ध्रं जानीहि परमेश्वरि ! ॥ १७ ॥
एतेषु सप्त चक्रेषु स्थितेभ्यः परमेश्वरि ! ।
जपं निवेदयेदेनमहोरात्र-भवं प्रिये ! ॥ १८ ॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अस्याः सङ्कल्पमात्रेण नरः पापैः प्रमुच्यते ॥ १९ ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं पुण्यं न भूतं न भविष्यति ॥ २० ॥

अस्य पुरश्चरणरूपेणापि सारदातिलके विधानमुक्तम्, तद्यथा—

वियदर्द्धेन्दु-ललितस्तदादिः सर्गसंयुतः।
अजपाख्यो मनुः प्रोक्तो ह्यचरः सुरपादपः॥ १॥
ऋषिर्ब्रह्मा स्मृतो देवी गायत्री च्छन्द ईरितम्।
देवता जगतामादिः प्रोक्तोऽत्र गिरिजापतिः।
हंसा षड्दीर्घ-युक्तेन कुर्य्यादङ्ग-क्रियां मनोः॥ २॥
उद्यद्भानु-स्फुरित-तड़िदाकार मूर्द्धाब्धिकेशं
पाशाभीती वरद-परशू सन्दधानं कराब्जैः।
दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं
सौम्याग्नेयं वपुरवतु नश्चन्द्रचूड़ं त्रिनेत्रम्॥ ३॥
भानुलक्षं जपेन्मन्त्रं पायसेन ससर्पिषा।
दशानां जुहुयात् सम्यक् ततः सिद्धो भवेन्मनुः॥ ४॥
दीप्तादीप्तजिते पीठे प्रागुक्ते प्रयजेद्विभुम्।
मूर्त्तिं मूलेन सङ्कल्प्य यजेदङ्गादिभिः सह॥५॥
ऋतुं वत्सर रव्यारो दिग्दलेषु विदिक्षु च।
अर्चयेद्दतजां गोजामशाक्या-मद्रिजां पुनः॥६॥
लोकेश्वरांस्तदस्त्राणि पूजयेद्देवमन्वहम्।
अर्घ्यञ्च विधिवद्दद्यात् प्राक् प्रोक्तेनैव वर्त्मना॥७॥
मन्त्राद्य मातृकापद्मे पूर्णकुम्भं निधाय तम्।
पिधाय वामहस्तेन ततो मन्त्रेण संयतः॥ ८॥
अष्टोत्तर-शतं मन्त्रं जपेत् [illegible]यं सुधामयम्।
स्नात्वा तेनाभिषिञ्चेद्यं स भवेद्विगतामयः॥ ९॥
आयुरारोग्य-विभवानमितांल्लभते नरः।
अनेनैव विधानेन विषार्त्तो निर्विषो भवेत्॥ १०॥
इन्दुभ्यां विगलत्-सुधा परिचितं मन्त्राद्यवीजं ततः

ओँ वेदप्रवचनं वेदप्रवचनम् ॥
इत्यथर्ववेदे हंसोपनिषत् समाप्ता ॥ २६ ॥

परमहंसोपनिषत् ।

अथ योगिनां परमहंसानां कोऽयं मार्गः ?

प्रश्नो तत्परमामिताहं-शशिना संसिक्तमाद्यं स्मरन् ।
मन्त्री मन्त्रमिमं जपन् विष-गदोन्मादापमृत्यु-ज्वरान्
जित्वा वर्षशतं समग्र-विभवो जीवेत् सुखं बन्धुभिः”
इति ॥ ११ ॥

ओँ वेदप्रवचनमिति। इदं हंसनिरूपणम् अकाराद्यात्मकस्य वेदस्य ‘प्रवचनं’ निर्वचनहेतुः। तद्यथा हंसमन्त्रस्यैव पुम्प्रकृत्यात्मकस्य वर्णविपर्य्यासे सोऽहं भवति ; स च परमात्ममन्त्रः, तस्य चतुष्टयवद्व्यञ्जन-परित्यागे पूर्वरूपे च ओमिति भवति, स च शुद्धब्रह्मवाची, तत्प्रतीकश्च ओङ्काराच्चतस्रो व्याहृतयः, ताभ्यस्त्रिपदा, त्रिभ्यः पदेभ्यस्त्रयो वेदाः, वेदेभ्यो लोकत्रयमिति। द्विरुक्तिः समाप्त्यर्था।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्टपद-वाक्यानां हंसोपनिषद्दीपिका ॥
इति हंसोपनिषदो दीपिका सम्पूर्णा ॥ २६ ॥

ओँ शुद्धात्मा परमो हंसस्तस्योपनिषदुच्यते ।
त्रिखण्डाथर्वशिखरे चत्वारिंशत्तमो मता ॥ १ ॥

सन्न्यासोपनिषदि परमहंस-सन्न्यास उक्तः, हंसोपनिषदि

तेषां का स्थितिः? इति नारदो भगवन्तमुप-
गम्योवाच। तं भगवानाह।

च योग उक्तः, तत्र प्राप्तयोगस्य ज्ञानिनः कीदृशी लोके
स्थितिः? इति सन्दिह्यते। यदुक्तम्,—
"स्थितप्रज्ञस्य का भाषा? समाधिस्थस्य केशव!।
स्थितधीः किं प्रभाषेत? किमासीत? व्रजेत किम्?"॥ इति।
तथा च, पामरत्व-शङ्कया अवज्ञा स्यात्, ततो महान् प्रत्य-
वाय इत्येतत् स्वरूपज्ञानार्थं परमहंसोपनिषदारभ्यते। 'योगः
चित्तवृत्ति-निरोधः, तद्वन्तो योगिनः 'परमहंसाश्च' उत्पन्न-
तत्त्वज्ञानाः, तत्र निरुद्धचित्तोऽप्यणिमादि-सिद्धिषु वियुक्ति-
दशायां समासक्तः सन् आत्मनि संलीनो विपर्य्यस्तश्च परम-
पुरुषार्थाद् भ्रश्यतीति परमहंसपदं, परमहंसश्च विवेकेनैश्व-
र्य्यस्वसारतां बुद्धा विरज्यति। तदुक्तम्,—
"चिदात्मन इमा इत्थं प्रस्फुरन्तीह शक्तयः।
इत्यस्याश्चर्य्य-जालेषु नाभ्युदेति कुतूहलम्"॥ इति।
परमहंसो विद्याबलेन विधि-निषेधान् लङ्घयति, ततः
शिष्टविज्ञानं स्यात्। तदुक्तम्,—
"सर्वे ब्रह्म वदिष्यन्ति सम्प्राप्ते तु कलौ युगे।
नानुतिष्ठन्ति मैत्रेय! शिश्नोदर परायणाः"॥ इति॥
तदर्थं योगिग्रहणम्। अधिकारप्राप्त-निष्काम-कर्म्मानु-
ष्ठानमपि योग एव। विशेषणद्वयेन स्थितप्रज्ञत्व-गुणाती-
तत्वासङ्गत्वादयोऽपि विशेषा दर्शिताः। यदुक्तं प्रश्न-प्रतिवच-
नाभ्यां वाशिष्ठे,
"एवं स्थिते हि भगवन् जीवन्मुक्तस्य सन्मतः।

योऽयं परमहंसमार्गो लोकेषु दुर्लभतरो न

अपूर्वातिशयः कोऽसौ भवत्यात्मविदांवर !" ॥ १ ॥

वशिष्ठ उवाच ।

"नास्य कस्मिंश्चिदेवांशे भवत्यतिशयेन धीः ।
नित्यतृप्तः प्रशान्तात्मा स आत्मन्येव तिष्ठति ॥ २ ॥
मन्त्रसिद्धैस्तपःसिद्धैर्योग-सिद्धैश्च भूरिशः ।
कृतमाकाश-यानादि तत्र का स्यादपूर्वता ॥ ३ ॥
एक एव विशेषोऽस्य न समो मूढ़बुद्धिभिः ।
सर्वत्रास्था-परित्यागः सदा निर्वासनं मनः ॥
एतावदेव खलु लिङ्गमलिङ्ग-मूर्त्तेः
संशान्त-संसृति-चिरभ्रम-निर्वृतस्य ।
तज्ज्ञस्य यन्मदन-कोप-विषाद-मोह-
लोभापदामनुदिनं निपुणं तनुत्वम्" ॥ ५ ॥ इति ॥

को मार्ग इति प्रष्टव्ये अयमिति वचनमदृष्टपूर्वं प्रत्यक्षतो दर्शय इति प्रश्नार्थम्। प्रकृतान्वयेनैव सिद्धे पुनस्तेषामिति वचनं गौरवार्थम्। 'नारदः' ब्रह्मपुत्रो देवर्षिः 'भगवन्तं' सनत्कुमारं, स हि नारदाय शोकतरणाय भूमानमुपदिष्टवान्। यथा "छन्दोगानामाम्नातमधीहि भगव ! इति हो मससाद सनत्कुमारं नारदः" इत्यारभ्य "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः" इत्यन्तेन। स ततो लब्धसाक्षात्कारो मार्ग-स्थिती पृच्छति विज्ञानदार्ढ्याय 'उपगम्य' न्यायेनोपसन्नः सन् 'उवाच' पप्रच्छ। उत्तरोपक्रमः, तमिति। 'आह' ब्रवीति; कालसामान्ये लट्।

श्रद्धातिशयाय प्रशंसामाह योऽयमिति। यः पृष्टः सोऽयं

तु बाहुल्योऽपि, यद्येकोऽपि भवति, स एव नित्य-पूतस्थ इति, स एव वेदपुरुष इति विदुषो मन्यते ॥

मनसि स्फुरन् परमकाष्ठां प्राप्तस्य वैराग्यात् दृष्टचरत्वात् दुर्लभतरत्वम्। अत्यन्तासत्त्वमाशङ्क्याह, न त्विति। बाहुल्यमस्यास्तीति बाहुल्यः अर्शआद्यच्॥

अयं मार्गोऽतिदुर्लभश्चेन्नादर्त्तव्यः,

"अतिक्लेशेन ये ह्यर्था अनर्थास्ते मता मम"।

इति न्यायादित्याशङ्क्याह, यदीति।

"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।

यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः"॥

इति न्यायेन यद्येकः कश्चिद् भवति पुरुषधौरेयः। यथा जाबालोपनिषद्युक्तं "तत्र परमहंसा नाम संवर्त्तकारुणि-श्वेतकेतु-दुर्वास-ऋभु-निदाघ-जडभरत-दत्तात्रेय-रैवतक-प्रभृतयोऽव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्त" इति। स एव 'नित्यपूतः' परमात्मा, तत्र तिष्ठति नित्यपूतस्थः स एव न केवलो योगी, नापि केवलः परमहंसः, स एव 'वेदपुरुषः' वेदप्रतिपाद्यः पुरुषो ब्रह्मेति 'विदुषः' विद्वांसः ब्रह्मानुभवचित्तविश्रान्ति-प्रतिपादक-शास्त्रपारङ्गताः, मन्यते, वचनव्यत्ययः। तस्य ब्रह्मनिष्ठत्वन्तु अन्येऽपि मन्यन्ते, विद्वांसस्तु ब्रह्मत्वमेव मन्यते। तथा च स्मृतिः,—

"दर्शन-स्पर्शने हित्वा स्वयं केवलरूपतः।

यस्तिष्ठति स तु ब्रह्मण्! ब्राह्मणो ब्रह्मवित् स्वयम्"॥ इति।

न तु बाहुल्योऽपि यद्येकोऽपि इत्यपिशब्दद्वयमार्थपाठे दृश्यते, तत्र पदार्थे अपिशब्दावस्पतां द्योतयतः,

महापुरुषो यच्चित्तं तत् सदा मय्येवावतिष्ठते ; तस्मादहञ्च तस्मिन्नेवावस्थीयते ।

असौ स्वपुत्र-मित्र-कलत्र बन्धूादीन् शिखां

नित्यपूतत्वं वेदपुरुषत्वञ्च मुखतो विषदयन् अर्थात् का स्थितिरिति प्रश्नस्योत्तरं सूचयति, महापुरुष इति। महापुरुषत्वे हेतुः 'यत्' यस्मात् चित्तं तदीयं 'मय्येव' भगवत्यात्मनि अवतिष्ठते, तत् तस्मात् महापुरुषः संसारगोचराणां मनोवृत्तीनाम् अभ्यास-वैराग्याभ्यां निरुद्धत्वादात्मन्येव स्थापनात् भगवान् शास्त्रसिद्ध परमात्मानं स्वानुभवेन परामृशन् मयीति व्यपदिशति, यस्मात् योगी मय्येव चित्तं स्थापयति, तस्मात् 'अहञ्च' अहमपि परमात्म-स्वरूपत्वेन 'तस्मिन्नेव' योगिनि प्रादुर्भूतः 'व्यवस्थीयते' अवतिष्ठे, पुरुषादिव्यत्ययः, नान्येषु योग्यताहीनेषु।

इदानीं पृष्टमार्गमुपदिशति, असाविति। 'असौ' जनकयाज्ञवल्क्यादिन्यायेन गार्हस्थ एवोत्पन्न-ज्ञानोऽयं विद्वान् चित्तविश्रान्ति-सिद्धये स्वपुत्रादि सन्यस्य कौपीनादि परिग्रहेत्। यद्यपि विदुषोऽर्थसिद्ध एव सन्यासः, तथापि ज्योतिष्टोमे कृष्णविषाणया कण्डूयेदिति प्रतिपत्तिवदयं लौकिको वैदिकस्य त्यागः। न च

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः।
नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित्" ॥

इत्यादि-स्मृति-विरोधः, सत्यपि ज्ञाने विश्रान्ति-रहितस्य तृप्त्यभावेन विश्रान्ति-सम्पादन-लक्षण-कर्त्तव्य-सद्भावेन कृतकृत्यत्वाभ/वात् चित्त-विश्रान्ति-प्रतिबन्ध-वारणस्य दृष्टफलस्य

यज्ञोपवीतञ्च यागञ्च स्वाध्यायञ्च सर्वकर्म्माणि सन्न्यस्यायं ब्रह्माण्डञ्च हित्वा कौपीनं दण्ड-माच्छादनञ्च स्वशरीरस्योपभोगार्थाय च लोक-स्योपकारार्थाय च परिग्रहेत्।

सम्भवेन श्रवणादि-विधिवज्ञानादृष्ट-फलकल्पना ; तस्मात् विविदिषुरिव विद्वानपि गृहस्थो नान्दीमुख-श्राद्धोपवास-जाग-रणादि विधिपूर्वकमेव सन्न्यसेत् ; प्रकृतिवद्विकृतिरिति न्याये-नात्र विविदिषा सन्न्यासवत् प्रैषमन्त्रेणैव पुत्रवित्तादि त्यागः। बन्धादीत्यादिशब्देन भृत्य-पशु-क्षेत्रादि-लौकिक-परिग्रहादि-विशेषाः संगृह्यन्ते। शिखां यज्ञोपवीतञ्च यागञ्च स्वाध्याय-ञ्चेति चकारेण तदर्थोपयुक्तानि पद-वाक्य-प्रमाण-शास्त्राणि, वेदोपबृंहणादीनि, इतिहास-पुराणानि च समुच्चिनोति। औत्सुक्यनिवृत्तिमात्र-प्रयोजनानां काव्य-नाटकादीनां त्यागः कैमुतिकन्याय-सिद्धः। सर्वकर्म्माणीति सर्वशब्देन लौकिक-वैदिक-नित्य-नैमित्तिक-निषिद्ध-काम्यानि संगृह्यन्ते। पुत्रादि-त्यागेनैहिकभोगाः परिहृताः। सर्वकर्म्मत्यागेन आमुष्मिक-भोगाशा चित्तविक्षेप-कारिणी परिहृता। अयमसौ परिग्रहे-दित्यन्वयः, अयमसौ अहमागममितिवत् ब्रह्माण्डञ्चेति ब्रह्माण्ड-त्यागेन तत्प्राप्तिहेतोर्विराडुपासनस्य त्यागः। चका-रेण सूत्राव्याकृतात्म-प्राप्तिहेतोर्हिरण्यगर्भोपासनस्य ; तत्त्व-ज्ञान-हेतूनां श्रवणादीनां समुच्चयस्य। पुत्रादि अव्याकृतोपा-सनान्तमैहिकमामुष्मिकञ्च सर्वं प्रैषमन्त्रोच्चारणेन परित्यज्य कौपीनादिकं परिगृह्णीयात्। आच्छादनञ्चेति चकारेण पादुकादि-परिग्रहः समुच्चितः। स्मृतिश्च,—

तच्च न मुख्योऽस्ति, को मुख्यः ? इति चेदयं मुख्यो न दण्डं न कमण्डलुं न शिखं न यज्ञोपवीतं न स्वाध्यायं नाच्छादनं चरति परमहंसः, न च शीतं न चोष्णम्।

"कौपीनं युगलं वासः कन्थां शीत-निवारिणीम्।
पादुके चापि गृह्णीयात् कुर्य्यान्नान्यस्य सङ्ग्रहम्" ॥ इति।

स्वशरीरोपभोगो नाम कौपीनेन लज्जाव्यावृत्तिः, दण्डेन गो-सर्पाद्युपद्रव-परिहारः, आच्छादनेन शीतादि-परिहारः। चकारेण पादुकाभ्यामुच्छिष्टदेश-स्पर्शादि-परिहार समुच्चिनोति। लोकस्योपकारो नाम दण्डादि-लिङ्गेनैतदीयमुत्तममाश्रमं परिज्ञाय तदुचिताभिवन्दन-भिक्षा-प्रदानादि-प्रवृत्त्या सुकृतसिद्धिः। चकारात् सन्यास-मर्य्यादायाः शिष्टाचार-प्राप्तायाः पालनं समुच्चीयते।

कौपीनादि-परिग्रहस्यानुकल्पत्वमभिप्रेत्य मुख्यत्वं प्रतिषेधति, तच्च न मुख्योऽस्तीति। यत् कौपीनादि-परिग्रहणमस्ति तदस्य योगिनः परमहंसस्य मुख्यः कल्पो न भवति ; किन्त्वनुकल्प एव, विविदिषा सन्यासिनस्तु दण्डग्रहणं मुख्यमिति, दण्डवियोगस्य निषेधः स्मर्य्यते,—

"दण्डात्मनोस्तु संयोगः सर्वदैव विधीयते।
न दण्डेन विना गच्छेदिषुक्षेपत्रयाद् बुधः" ॥ इति।

प्रायश्चित्तमपि दण्डत्यागे प्राणायामशतं स्मर्य्यते,

"दण्डत्यागे शतं चरेत्" इति। योगिनः परमहंसस्य मुख्यं कल्पं पृच्छति, कोऽयं मुख्य इति चेदिति। उत्तरमाह, अयं मुख्य इति। अयं कः ? इत्यत आह, न दण्डमित्या-

न सुखं न दुःखं न मानापमानश्च षडूर्म्मि-रहितं न शब्दं न स्पर्शं न रूपं न रसं न गन्धं न च मनोऽप्येवं निन्दा-गर्व-मत्सर-दम्भ-दर्पेच्छा-द्वेष-सुख--दुःख-काम-क्रोध-रोष-लोभ--मोह-मद-हर्षासूयाहङ्कारादींश्च हित्वा स्वं वपुः कुणप-मिव दृश्यते।

दिना। शिखम् इति छान्दसो ह्रस्वः। न स्वाध्यायमिति पाठः। 'चरति' गच्छति निरुद्धाशेष-चित्तवृत्तेर्योगिनः शीतादि नास्ति तत्प्रत्ययाभावात्। यथा बालस्य लीलासक्तस्य शीताद्य-भावः तथा परमात्मन्यासक्तस्य योगिनः। न चोष्णमिति वर्षा-भावसमुच्चयार्थश्चकारः, शीतादि-निषेधे तज्जन्यसुखादेरप्यभा-वात्।

न सुखमित्यादि। 'मानः' पुरुषान्तरेण सम्पादितः सत्कारः, 'अपमानः' तिरस्कारः, यदा योगिनः स्वात्म-व्यतिरिक्तं पुरुषा-न्तरमेव न प्रतीयते, तदा मानापमानौ दूरापास्तौ। चकारः शत्रु-मित्र-राग-द्वेषादि-द्वन्द्वाभावं समुच्चिनोति। 'षडूर्म्मयः'—

"क्षुत्-पिपासे शोक-मोहौ जरा-मरणमेव च"।

तेषां त्रयाणां द्वन्द्वानां प्राण-मनो-देह-धर्मत्वादात्मतत्त्वाभि-मुखस्य योगिनः तद्वर्जनं युज्यते। न शब्दं न स्पर्शं न रूपं न रसं न गन्धं न च मनोऽप्येवमित्यादिग्रन्थः शिष्टैर्व्याख्यातः। अस्त्वेवं समाधि-दशायां शीताद्यभावाव्युत्थानदशायां निन्दादि-क्लेशः संसारिणमिवैनं वाधेतैव इत्यत आह, निन्देति। रोष-मदावनाय्यौ, विरोधिभिः पुरुषैः स्वस्मिन्नापादित-दोषो-क्तिर्निन्दा, अन्येभ्योऽहमधिक इति चित्तवृत्तिर्गर्वः, विद्या-

यतस्तद्वपुरपध्वस्तं संशय-विपरीत-मिथ्या-ज्ञानानां यो हेतुस्तेन नित्यनिवृत्तः।

धनादिभिरस्य सदृशो भवामीति बुद्धिर्मत्सरः, परेषामग्रे जप-ध्यानादि-प्रकाशनं दम्भः, भर्त्सनादिषु बुद्धिर्दर्पः, धनाद्यभि-लाष इच्छा, शत्रुवधादि-बुद्धिर्द्वेषः, अनुकूल-लाभेन बुद्धि-स्वास्थ्यं सुखं, तद्विपर्ययो दुःखं, योषिदाद्यभिलाषः कामः, कामितार्थ-विघातजन्यो बुद्धिविक्षोभः क्रोधः, प्राप्तस्य धनस्य त्यागासहिष्णुत्वं लोभः, हितेष्वहितबुद्धिरहितेषु हितबुद्धि-र्मोहः, चित्तगत-तुष्ट्यभि-व्यक्ति-मुख-विकाशादि-हेतुर्धीवृत्ति-र्हर्षः, परगुणेन दोषारोपणमसूया, देहेन्द्रियादि-सङ्घातेष्वा-त्मत्वभ्रमोऽहङ्कारः। आदिशब्देन भोग्यवस्तुषु ममत्वाकार-समीचीनत्वादि बुद्धयो गृह्यन्ते। चकारो यथोक्त-निन्दादि-विपरीत-स्तुत्यादि-समुच्चयार्थः। एतान् निन्दादीन् 'हित्वा' पूर्वोक्तवासनाक्षयाभ्यासेन परित्यज्य अवस्थीयते इति पूर्वेणा-न्वयः।

ननु विद्यमाने देहे कथं निन्दादि-परित्यागः? अत आह, स्वं वपुः कुणपमिव दृश्यते इति। पूर्वं यत् स्वकीयं वपुः तदानीं योगिना चैतन्यभूतेन मृतकमिवालोक्यते इत्यर्थः। लोकः स्पर्शभीत्या कुणपं यथा दूरस्थोऽवलोकयति, तथा योगी तदात्मत्वाभ्युदय-भिया तटस्थो देहं नित्यमात्मनो विविनक्तीति भावः।

तत्र हेतुमाह, यतस्तद्वपुरपध्वस्तमिति। 'यतः' हेतोः, तद्वपुः आचार्योपदेशानुभवैः 'अपध्वस्तं' चिदात्मभावान्निरा-कृतम्, 'अतः' चैतन्य-वियुक्तस्य देहस्य शवतुल्यतया दृश्यमान-त्वात् सत्यपि देहे निन्दादित्यागो घटते इत्यर्थः।

तन्नित्यबोधः, तत् स्वयमेवावस्थिति-रिति।

ननु उत्पन्नो दिग्भ्रमो यथा सूर्य्योदय-दर्शनेन विनष्टोऽपि कदाचिदनुवर्त्तते, तथा चिदात्मनि संशयाद्यनुवृत्तौ निन्दादि-क्लेशः पुनः प्रसज्येत इत्याशङ्काह, संशयेति। आत्मा कर्त्तृत्वादि-धर्म्मोपेत-स्तद्रहितो वा इत्यादि संशयज्ञानं, देहादिरूप आत्मेति विपरीतज्ञानम्। तद्धेतुश्चतुर्विधः, अनित्याशुचि-दुःखा नात्मसु नित्य-शुचि-सुखात्म-ख्यातिरविद्येति पतञ्जलिसूत्रात्। 'अनित्ये' गिरि-नदी-समुद्रादौ नित्यत्व-मिथ्या-भ्रान्तिरेका अविद्या, 'अशुचौ' पुत्र-कलत्रादौ शुचित्वबुद्धिर्द्वितीया, 'दुःखे' कृषि-वाणिज्यादौ सुखत्व-भ्रान्तिस्तृतीया, 'गौणात्मनि' पुत्रादौ अन्नमयादिके तु मुख्यात्मत्व-भ्रान्तिश्चतुर्थी; एषां संशयादीनां 'हेतुः' अद्वितीय-ब्रह्मतत्त्वावरकमज्ञानं, तद्वासना च; तच्चाज्ञानं तत्त्व महावाक्यार्थ-बोधेन निवृत्तम्; वासना च योगाभ्यासेन निवृत्ता। दिग्भ्रान्तौ त्वज्ञाने निवृत्तेऽपि तद्वासनायाः सद्भावात् यथापूर्व्वं व्यवहारः; योगिनस्तु भ्रान्तिहेतु-राहित्यात् कुतः संशयादीन्यनुवर्त्तेरन्। तदयमर्थः, संशयादीनां यो हेतुरज्ञानं तद्वासना च, तेन हेतुद्वयेन योगी 'नित्यनिवृत्तः, अधिकरणे क्तः, अज्ञान-तद्वासनयोर्निवृत्तिस्तत्र नित्या, पुनस्तयोरनुद्भवादिति; तेन नित्यनिवृत्तः अज्ञान-रहित इति यावत्।

सवासनाऽज्ञान-निवृत्तेर्नित्यत्वे हेतुमाह, तन्नित्य--बोध इति। 'तस्मिन्' परमात्मनि नित्यो बोधो यस्य सः; नित्य-पूतस्य इत्यर्थः। योगी हि विज्ञाय प्रज्ञां कुर्वीतेति मतमनुसृत्य चित्तविक्षेपान् योगेन परिहृत्य नैरन्तर्य्येणामरणमात्म-

तं शान्त-मचल--मद्वयानन्द--विज्ञानघन एवास्मि ; तदेव म परमं धाम, तदेव शिखा च, तदेवोपवीतञ्च, यदा परे नित्यपूतस्थः तदेवावस्थानम् ।

विषयामेव प्रज्ञां करोति ; तेन बोधस्य नित्यत्वम्, तन्नित्यत्वात् ।

तद्विनाश्वरयोरज्ञान-तद्वासनयोरपि निवृत्तिर्नित्येत्यर्थः । "तन्नित्य-पूतस्थः" इति केषाञ्चित् पाठः । 'तत्र' तस्मिन् 'नित्यपूते' परमात्मनि स्थित इत्यर्थः ।

बुध्यमानस्य परमात्मनस्तार्किकेश्वरवत् तटस्थत्व-शङ्कां वारयति, तत् स्वयमिति । यत् वेदान्तवेद्यं परं ब्रह्मास्ति, तत् स्वरूपं, न तु स्वस्मादन्य इत्येवं निश्चित्य योगिनोऽवस्थितिर्भवति ।

अनुभव-प्रकारमाह, तं शान्तमिति । पदत्रये द्वितीया प्रथमार्थे द्रष्टव्या । यः परमात्मा 'शान्तः' क्रोधादि-विक्षेपरहितः, 'अचलः' गमनादि-क्रिया-रहितः, 'अद्वयः' स्वगत-सजातीय-विजातीयभेद-रहितः, सच्चिदानन्दैक-रसोऽस्ति, स एवाहमस्मि 'तदेव' ब्रह्मतत्त्वं 'मे' मम योगिनः 'परमं धाम' वास्तवं स्वरूपं, नत्वेतत् कर्तृत्व-भोक्तृत्वादि-युक्तं तस्य मायिकत्वात् ।

आचार-त्यागी दोषमाशङ्क्य निरस्यति, तदेव शिखा च तदेवोपवीतञ्चेति । 'तदेव' ज्ञानमेव शिखा चोपवीतञ्च । चकाराभ्यां मन्त्र-द्रव्यरूपे अपि कर्माङ्गे । ज्ञानमेव यदाम्नातमाथर्वणिकैर्ब्रह्मोपनिषदि, "सशिखं वपनं कृत्वा" इत्यादि । अत्र

परमात्मात्मनोरेकत्व-ज्ञानेन तयोर्भेद एव विभग्नः, या सा सन्ध्या। सर्वान् कामान् परित्यज्याद्वैते परमस्थितिः ॥ २ ॥
ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते।
काष्ठदण्डो धृतो येन सर्वाशी ज्ञान-वर्जितः।

"यदा परे नित्यपूतस्यस्तदेवावस्थानम्" इति ग्रन्थः शिष्टैर्नादृतः।

सन्ध्यालोपे दोषमाशङ्क्याह, परमात्मात्मनोरेकत्व-ज्ञानेन तयोर्भेद एव विभङ्गः, या सा सन्ध्येति। जीव-ब्रह्मणोरैक्य-ज्ञानेन महावाक्यत्वेन तयोर्यः प्रतीतो भेदः विशेषेण भग्नः पुनर्भ्रान्त्यनुदयात्, 'या' इयमेकत्व-बुद्धिः सैवोभयोरात्मनोः सन्धौ जातत्वात् सन्ध्या, अहोरात्रयोः सन्धावनुष्ठीयमाना क्रिया सन्ध्या यथा, तद्वत्, तथा च नास्य प्रत्यवायः।

कोऽयं मार्ग इत्यस्य असौ स्वपुत्रेत्यादिना उत्तरमुक्तम्। का स्थितिरित्येतस्य महापुरुष इत्यादिना सङ्क्षिप्योत्तरमुक्तम्। संशय-विपर्य्ययेत्यादिना तदेव प्रपञ्च्य इदानीमुपसंहरति, सर्वान् कामान् परित्यज्याद्वैते परमस्थितिरिति। क्रोध-लोभादीनां कामपूर्वकत्वात् काम-परित्यागेन चित्तदोषाः सर्वे त्यज्यन्ते। अतएव वाजसनेयिनाम् "अथो खल्वाहुः काममयः स एवायं पुरुषः" इति ॥ २ ॥

ननु माभूत् कर्म्ममार्ग-त्यागे दोषः, चतुर्थाश्रम-लिङ्गत्याग-निमित्तो दोषस्तस्य स्यादेव इत्यत आह, ज्ञानदण्ड इत्यादि। त्रिदण्डिनो यथा वाग्दण्डो मनोदण्डः कायदण्डश्चेति त्रिविधो

स याति नरकान् घोरान् महारौरव-सञ्ज्ञकान् ॥
इदमन्तरं ज्ञात्वा स परमहंसः ।
आशाम्बरो न नमस्कारो न स्वधाकारो न निन्दा-स्तुतिर्न वषट्कारो यादृच्छिको भवेद्भिक्षुः ।

दण्डः ; एवमेकदण्डिनो द्विविधः, ज्ञानदण्डः, काष्ठदण्डश्चेति । तेषां स्वरूपञ्च दक्षेणोक्तम्,

"वाग्दण्डे मौनमातिष्ठेत् कर्म्मदण्डे त्वनीहता ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते" ॥ इति ॥

एवं सति मौनादीनां वागादि-दमनहेतुत्वात् यथा दण्डत्वं, तथैव अज्ञान-तत्कार्य्ययोर्दमन-हेतोर्ज्ञानस्यापि दण्डत्वम् । अयं ज्ञानदण्डो 'येन' परमहंसेन धृतः, स एव मुख्य एकदण्डी-त्युच्यते । मानसस्य ज्ञानदण्डस्य चित्तविक्षेपेण विस्मृतिर्मा-भूदिति स्मारकः काष्ठदण्डो ध्रियते । एतदेव ज्ञात्वा वेष-मात्रेण पुरुषार्थ-सिद्धिमभिप्रेत्य येन परमहंसेन काष्ठदण्डो धृतः, स बहुविध-यातनोपेतत्वात् घोरान् महारौरव-सञ्ज्ञ-कान् नरकान् 'याति' प्राप्नोति । तत्र हेतुः, यतः 'सर्वाशी' वर्ज्यावर्ज्यमकृत्वा सर्वमश्नाति । 'इदं' ज्ञानदण्ड-काष्ठदण्ड-योर्यत् 'अन्तरम्' उत्तमत्वाधमत्व-लक्षणमुक्तं, तज्ज्ञात्वा उत्तमं ज्ञानदण्डं यो धारयति, स एव परमहंसो मुख्यो ज्ञेय इत्यर्थः ।

ननु माभूदस्य काष्ठदण्डः, अन्या तु चर्य्या कीदृशी ? इत्याशङ्क्याह, आशाम्बर इत्यादि । आशा एवाम्बरं यस्य सः दिग्वासाः, न नमस्कारः कर्त्तव्यो यस्य स ननमस्कारः । निषे-धार्थ-नकारस्य समासत्वान्नलोपाभावः । तदुक्तं, "निर्नमस्कार-मस्तुतिम्", इति । श्राद्धादावपि न स्वधाकारोऽस्य स तथा,

नावाहनं न विसर्जनं न मन्त्रो न ध्यानं नोपासनञ्च, न लक्ष्यं, नालक्ष्यं, न पृथक्, नापृथक्, नाहं, नत्वम् न सर्व्वञ्चानिकेत-स्थिति-रेव स भिक्षु-र्हाटकादीनां नैव परिग्रहेत्, न लोकं नावलोकनञ्च।

न निन्दास्तुतिः। निन्दागर्वेत्यादि-वाक्ये परैः कृतया निन्दया अस्य क्षोभो निवारितः; अत्र तु स्वकर्त्तृके निन्दा-स्तुती निषिध्येते। 'याद्दच्छिकः' निर्बन्ध-रहितः 'भवेत्' स्यात् 'भिक्षुः' परमहंसः।

नन्वस्ति निर्बन्धः,

"भिक्षाटनं जपः शौचं स्नानं ध्यानं सुरार्च्चनम्।
कर्त्तव्यानि षडेतानि सर्व्वदा नृपदण्डवत्" ॥

इति मुख्यस्य भेदादर्शित्वात्तन्न सम्भवति इत्यभिप्रायेणाह, नावाहनमित्यादि। 'ध्यानं' स्मरणम् 'उपासनं' परिचर्य्येति भेदः। यथा स्तुति-निन्दादि लौकिकं न, यथा देवपूजादि धर्म्मशास्त्रीयं न, तथैव तत्त्वमस्यादि ज्ञानशास्त्रीयमपि।

लक्ष्य—वाच्यादि व्यवहार्य्यं योगिनामित्याह, न लक्ष्य-मिति। साक्षिचैतन्यं त्वम्पदेन लक्ष्यं, देहादि-विशिष्टं चैतन्यं त्वंपदेन वाच्यं, न लक्ष्यं नालक्ष्यं तदपि तस्य न व्यवहार्य्य-मित्यर्थः। चित्पदार्थो जड़ात् पृथक्, तत् त्वम्पदयोर्वाच्यं पृथक्, लक्ष्यं पृथक् इत्यपि योगिनो नास्ति; स्वदेह-निष्ठो वाच्यो-ऽर्थोऽहं, परदेह—निष्ठस्त्वं, तदप्यस्य नास्ति; सर्व्वं खल्विदं ब्रह्मेत्यपि न, चकारादसर्व्वं न किञ्चिदस्तीत्यपि तस्य नास्ति, तच्चित्तस्य ब्रह्मणि विश्रान्तत्वात्; अतएव अनिकेत-स्थितिरेव

अथावलोकनमात्रेण अवाधक इति चेत्, तद्वाधकोऽस्त्येव। यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टञ्च स ब्रह्महा भवेत्। यस्माद्भिक्षुर्हिरण्यं रसेन स्पृष्टञ्च स पौल्कसो भवेत्। यस्माद्भिक्षुर्हिरण्यं रसेन ग्राह्यञ्च स आत्महा भवेत्। यस्माद्भिक्षुर्हिरण्यं यो न दृष्टञ्च न स्पृष्टञ्च न ग्राह्यञ्च सर्वे कामा मनोगता व्यावर्त्तन्ते।

स भिक्षुः यदि नियतवासार्थं कञ्चिन्मठं सम्पादयेत्, तदा तस्मिन् ममत्वे सति तदीयहानौ वृद्धौ वा चित्तं विक्षिपेत्। मठवत् 'हाटकादीनां' सुवर्ण-रजतादि-पात्राणां भिक्षाचमनाद्यर्थानामेकमपि 'नैव परिग्रहेत्' नापि गृह्णीयात् विकरणव्यत्ययः। यदाह यमः,—

"हिरण्मयानि पात्राणि कृष्णायस-मयानि च।
यतीनां तान्यपात्राणि वर्जयेत्तानि भिक्षुकः" ॥ इति।

तथा न 'लोकं' जनं शिष्यवर्गं परिग्रहेत्। न केवलं लोकं त्यजेत्, किन्तु नावलोकनञ्च सान्निध्याल्लोकस्यैवावलोकनञ्च न कुर्यात्।

योगिनो लौकिक-वैदिक-व्यवहार-गतानां वाधकानां वर्जनमभिहितम्। अथ प्रश्नोत्तराभ्यामत्यन्त-वाधकं प्रदर्श्य तद्वर्जनमाह, अवाधक इति चेत् तद्वाधकोऽस्त्येवेति। अथावलोकनमात्रेणेति प्रक्षिप्तम्, वाक्योपक्रम आकरः। तत्रापि हिरण्यस्यात्यन्त-वाधकत्वमाह, यस्माद्भिक्षुरित्यादिना। 'रसेन' प्रेम्णा। ब्रह्महा इति, ब्रह्मैव सत्यमन्यत् मिथ्या इत्यनङ्गी-

दुःखे-नोद्विग्नः, सुखे निस्पृहः, त्यागो रागे, सर्वत्र शुभाशुभयोरनभिस्नेहः, न द्वेष्टि, न प्रमोदश्च,

---

कारात् ब्रह्म तेन हतमिव भवति, तेन ब्रह्महा भवेत्। यत् स्मृतिः,

"ब्रह्म नास्तीति यो ब्रूयात् द्वेष्टि ब्रह्मविदश्च यः।
अभूतब्रह्मवादी च त्रयस्ते ब्रह्म-घातकाः॥ इति॥

यद्वा ब्रह्मघ्न इति तस्य नरको भवति। पौल्कस इति, निषादाच्छूद्रायां जातः पुक्कसः, प्रज्ञादित्वात् पौक्कसः, वर्ण-व्यत्ययेन पौल्कसः, तत्तुल्य इति यावत्। यत् स्मृतिः,

"पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्द्वयं भवेत्।
धीपूर्वं रेत उत्सर्गो द्रव्यसङ्ग्रह एव च"॥ इति॥

आत्महा इति, असङ्गस्याभोक्तुरात्मनो हिरण्यसङ्गित्व-भोक्तृत्वाङ्गीकारात्। यत् स्मृतिः,

"अन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चौरेणात्मापहारिणा"॥ इति।

श्रुतिरपि तस्यान्धतामिस्र-लोकानाह,—

"असूर्य्या नाम ते लोका अन्धेन तमसा वृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः"॥ इति॥

न दृष्टञ्च न स्पृष्टञ्च ग्राह्यञ्चेति इच्छेदिति शेषः। चकारैः श्रुतञ्च कथितञ्च व्यवहृतञ्च नेच्छेदिति समुच्चयः। दर्शन-स्पर्शन-ग्रहण-तदभिलाष-पूर्वक हिरण्य-वृत्तान्त-श्रवण-तद्गुण-कथन-तदीय-क्रियादि-व्यवहारा अपि प्रत्यवाय-हेतव इत्यर्थः। हिरण्य-वर्जनस्य फलमाह, सर्वे कामा मनोगता इति। पुत्र-भार्य्यादीनां हिरण्य-मूलकत्वादिति भावः।

कामनिवृत्तेः स्थितप्रज्ञत्वं फलमाह, दुःखेनोद्विग्न इति।

सर्वेषामिन्द्रियाणां गतिरुपरमते, ज्ञाने स्थिरस्थः, य आत्मन्येवावस्थीयते, स एव योगी च, स एव ज्ञानी च।

दुःखे सति उद्वेगं न गतः, सुखे अभिलाषरहितः स्थितप्रज्ञ इत्यर्थः। सुख-दुःखयोरविक्षेपकत्वेन तत्साधनयोरप्यविक्षेपकत्वमाह, त्यागो रागे इति। 'रागे' रञ्जनहेतौ, ऐहिकामुष्मिके तस्य त्यागो भवति फलानपेक्षत्वात्। रागत्यागं विवृणोति, सर्वत्र शुभाशुभयोरिति। अनभिस्नेहोऽनभिद्वेष इत्यपि ज्ञेयम्।

रागत्यागस्य फलमाह, न द्वेष्टि, न प्रमोदश्चेति। प्रतिकूलान् न द्वेष्टि, अनुकूलं दृष्ट्वा प्रमोदञ्च न याति। ततः किं स्यादत आह, सर्वेषामिन्द्रियाणां गतिरुपरमते इति। सुखप्राप्तये दुःखपरिहाराय च इन्द्रिय-प्रवृत्तिः, तद्द्वयस्य योगिनोऽनुद्देश्यत्वादिन्द्रियोपरम इति भावः।

ननु निर्वीजो योगो दुःसाध्य इत्याशङ्क्य परमप्रेमास्पदात्मावलम्बत्वात् सुसाध्य एवेत्याशयेन आत्मनिष्ठामुपसंहरति, य आत्मन्येवावस्थीयते इति। अवतिष्ठते इति वाच्ये व्यत्ययः। तदुक्तम्,—

"न सुखं देवराजस्य न सुखं चक्रवर्त्तिनः।
यत् सुखं वीतरागस्य ज्ञाननिष्ठस्य योगिनः" ॥ इति।

इन्द्रियोपरतौ च न कदाचिदात्मनि निर्विकल्पक-समाधेर्विघ्ना भवन्ति, तेषां का स्थितिरिति प्रश्नस्य सङ्क्षेप-विस्ताराभ्यामुत्तरं पूर्वसुक्तं, तदेवात्र पुनरपि द्विरस्य-निषेध-प्रसङ्गेन स्पष्टीकृतम्।

यत् पूर्णानन्दैकरस-बोधः तद् ब्रह्माहमस्मीति कृतकृत्यो भवति, तद् ब्रह्माहमस्मीति कृतकृत्यो भवति।

इत्यथर्ववेदे परमहंसोपनिषत् समाप्ता ॥ २७ ॥

अथ जावालोपनिषत्।

ओं बृहस्पतिरुवाच याज्ञवल्क्यं, यदनु कुरु-

अथ विद्वत्सन्न्यास-मुपसंहरति, यत् पूर्णानन्दैक-रसबोधः तद् ब्रह्माहमस्मीति कृतकृत्यो भवति, तद् ब्रह्माहमस्मीति कृतकृत्यो भवतीति। अधिक-प्रक्षिप्त-ग्रन्थ-निरासाय सम्पूर्ण-प्रतीकोपादानम्। 'यत्' ब्रह्म वेदान्तेषु 'पूर्णानन्दैकरसबोधः' परमात्मेति निरूपितं, तद् ब्रह्माहमस्मीति अनुभवन् योगी परमहंसः 'कृतकृत्यः' कृतार्थो भवतीत्यर्थः। यत् स्मृतिः।

"ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः।
नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित्" ॥ इति।

द्विरुक्तिः समाप्त्यर्था।

नारायणेन रचिता जीवन्मुक्ति-विवेकतः।
श्रुत्यर्थापार-परम-हंसोपनिषद्दीपिका ॥ १ ॥
सच्चिदानन्द-पूर्णोऽहं कूटस्थाद्वैत-रूपतः।
महावाक्य-प्रबोधेन कृतकृत्यो भवेन्मुनिः ॥ २ ॥

इति परमहंसोपनिषदो दीपिका सम्पूर्णा ॥ २७ ॥

ओं जावालोपनिषत् खण्ड-षट्क-युक्ता हि याजुषी।
एकचत्वारिंशत्तमो वर्ण्या मुनिजन-प्रिया ॥ १ ॥

चेत्रं देवानां देवजयनं सर्वेषां भूतानां ब्रह्म-सदनम्। अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्; तस्मात् यत्र क्वचन गच्छति तदेव मन्येत, तदविमुक्तमेव; इदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्।

अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं

परमहंसोपनिषदि योगिनां परमहंसानां मार्गस्थिती उक्तौ। इदानीं तादृशेन परमहंसेनात्मा कथं ज्ञेयः? तदुपासना च कस्मिन् देशे कस्मिंश्च देहभागे कर्त्तव्या? कीदृशे च वयसि पारमहंस्याधिकारः? तदङ्गीकारे कश्च विधिः? तेषां क आचारः? किञ्च फलं? कुतो वायं सम्प्रदायः प्रवृत्तः? के च सम्प्रदायिकाः? कथं वा देहं त्यजेत्? इति ज्ञातुं सत्यकाम-नामक-जावाल-पुत्रोपज्ञातोपनिषदारभ्यते, बृहस्पतिरित्यादि। आख्यायिका सम्प्रदायप्रदर्शनार्था, 'उवाच' पप्रच्छ। किं पप्रच्छेत्यत आह, यदन्विति। यतो ह्येनं कुरुक्षेत्रं यच्च देवानामपि देवपूजास्थानं सर्वमोक्षप्रदश्च, तत् पप्रच्छेत्यर्थः। याज्ञवल्क्य उत्तरयति, अविमुक्तं वै कुरुक्षेत्रमिति। अविमुक्तं नामतस्तत् क्षेत्रं मुक्तये कुर्विति देवैः प्रार्थितेन शिवेन स्वीकृतम्, अतोऽविमुक्तं कुरुक्षेत्रं देवानामिति देवैः पुण्यार्थमधिष्ठितं सर्वप्राणि-ब्रह्मप्राप्ति-स्थानञ्चाविमुक्तमेव विद्धि इत्युत्तरमत्र तस्मादित्यादि ग्रन्थः।

प्राशस्त्या अन्देश्योऽतिशयमाह, अत्र हीति। 'तारकं'

ब्रह्म व्याचष्टे, येनासावमृतीभूत्वा मोक्षीभवति ; तस्मादविमुक्तमेव निषेवेत ; अविमुक्तं न विमुञ्चेत् ; एवमेवैतद् याज्ञवल्क्य ! ॥ १ ॥

अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं, य एषोऽनन्तोऽव्यक्त आत्मा, तं कथ-महं विजानीयामिति । स होवाच याज्ञवल्क्यः सोऽविमुक्त उपास्यः, य एषोऽनन्तोऽव्यक्त आत्मा, सोऽविमुक्ते प्रतिष्ठित इति ।

षड़क्षरं राममिति वीजं 'व्याचष्टे' शब्दतोऽर्थतश्च उपदिशति । 'अमृती' अमृतवान् ज्ञानी 'मोक्षी' मोक्षवान् । फलितमाह, तस्मादिति । परमहंसः कर्त्ता । एवकारेण देशान्तर-सेवने निषिद्धेऽपि तत्सेवा न कर्त्तव्या इत्यत आह, अविमुक्तं न विमुञ्चेदिति । वाक्पतिरङ्गीं करोति, एवमेवैतद् याज्ञवल्क्येति ॥ १ ॥

नामतो देशे ज्ञातेऽपि लिङ्गतोऽपि ज्ञानार्थं पृच्छत्यत्रिरित्याह, अथ हैनमत्रिरिति । अत्र हि बृहदारण्यक इव ऋषिसङ्घः प्रष्टा, याज्ञवल्क्यः समाधाता, जनकः सभ्यः ; परन्तु नात्र जल्पः, किन्तु वाद इति ज्ञेयम् । अनन्ताव्यक्त-विशेषणे दुर्बोधत्व-ख्यापनाय ; कथमिति अधिकरणप्रश्नः । इतरो विदिताभिप्राय आह, सोऽविमुक्त इति । तत्र हेतुः सोऽविमुक्ते प्रतिष्ठित इति । 'सः' आत्मा परम-शिवाख्यः अविमुक्ते नित्यं सन्निहित इत्यर्थः ।

सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति । वर-णायां नाश्याञ्च मध्ये प्रतिष्ठित इति । का वै वरणा, का च नाशीति । सर्वानिन्द्रिय-कृतान् दोषान् वारयतीति ; तेन वरणा भवतीति । सर्वानिन्द्रिय-कृतान् पापान् नाशयतीति ; तेन नाशी भवतीति ।

कतमच्चास्य स्थानं भवतीति । भ्रुवोर्घ्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धि-र्भवतीति ।

इदानीं साक्षाल्लिङ्गं पृच्छति, स इति । उत्तरं वरणायां नाश्याञ्चेति । यत् स्कान्दे,

"असी-वरणयोर्मध्ये पञ्चक्रोशं महत्तरम् ।
अमरा मरणमिच्छन्ति का कथा इतरे जनाः" ॥ इति ।

वरणा-नाशी-शब्दयोः प्रवृत्ति-निमित्तं पृच्छति, का वै इति । अन्वर्थ-निर्वचनेनोत्तरयति, सर्वानिति ।

लोक-पुराण-प्रसिद्धाधिभूतमविमुक्तं ज्ञातम् ; सम्प्रत्यध्या-त्माभिप्रायेणाविमुक्त-स्थानं पृच्छति, कतमच्चास्येति । 'च' पुनः, उक्तादन्यदप्यविमुक्तस्य किं स्थानमिति प्रश्नः, इतरो विदि-ताभिप्राय आह, भ्रुवोर्घ्राणस्य चेति । भ्रुवोर्घ्राणस्य च यः 'सन्धिः' कूर्चाख्यः, तदविमुक्तस्य स्थानमित्यर्थः । तदुक्तम्,

"इड़ा भगवती गङ्गा पिङ्गला यमुना नदी ।
तयोर्मध्ये प्रयागस्तु यस्तं वेद स वेदवित्" ॥ इति ।

नासाग्रञ्च प्रयागः, तेन ततः पूर्वभागे भ्रूमध्ये अविमुक्त-

मिति ज्ञेयम्। भू-घ्राण-सन्धेः सन्धित्वे निमित्तान्तरमाह, स एष इति। 'द्यौर्लोकस्य' द्युलोकस्य स्वर्गस्य परस्य च यत् परो दिवो ज्योतिर्दीप्यते, तस्य च एष एव सन्धिः। घ्राणमूलादर्वाक् द्युलोकः, ललाटादारभ्य परः सत्यलोकः। अनेन शरीरेऽपि ब्रह्माण्ड-सन्निवेशोऽस्तीति सूचितम्। तदुक्तं गरुड़-पुराणे,—

"ब्रह्माण्डे ये गुणाः सन्ति शरीरे तेऽप्यवस्थिताः।
पातालं भूधरा लोकास्ततोऽन्ये द्वीप-सागराः॥ १॥
आदित्याद्या ग्रहाः सर्वे पिण्डमध्ये व्यवस्थिताः।
पदोऽधस्तु तलं प्रोक्तं पादोर्द्ध्वं वितलं स्मृतम्॥ २॥
जानुभ्यां सुतलं विद्धि नितलं सर्व-बन्धने।
तथा तलातलञ्चोर्द्ध्वं गुह्यदेशे रसातलम्॥ ३॥
पातालं कटिसंस्थन्तु पादाद्यं लक्षयेद् बुधः।
भूर्लोकं नाभिमध्ये तु भुवर्लोकं तदूर्द्ध्वकम्॥ ४॥
स्वर्लोकं हृदये विद्यात् कण्ठदेशे महस्तथा।
जनलोकं वक्त्रदेशे तपोलोकं ललाटतः॥ ५॥
सत्यलोकं महारन्ध्रे भुवनानि चतुर्दश।
त्रिकोणे संस्थितो मेरुरधः कोणे च मन्दरः॥ ६॥
दक्षिणे चैव कैलासो वामे कोणे हिमाचलः।
निषधश्चोर्द्ध्वभागे तु दक्षिणे गन्धमादनः॥ ७॥
रमणो वामरेखायां सप्तैते कुलपर्वताः।
कुशद्वीपं स्थितं मांसे क्रौञ्चद्वीपं शिरास्थितम्॥ ८॥
अस्थि-स्थान-स्थितं जम्बु शाकं मज्जासु संस्थितम्।
त्वचायां शाल्मलिद्वीपं प्लक्षं केशे प्रतिष्ठितम्॥ ९॥
नखस्थं पुष्करद्वीपं गोमेदं रोमसञ्चये।
क्षीरोदञ्च तथा मूत्रे क्षीरे क्षीरोद-सागरः॥ १०॥

एतद्वै सन्धिं सन्ध्यां ब्रह्मविद उपासते इति, सोऽविमुक्त उपास्य इति। सोऽविमुक्तं ज्ञानमाचष्टे यो वैतदेवं वेद ॥ २ ॥

सुरोदधिः श्लेष्मसंस्थो मज्जायां घृतसागरः।
रसोदधिं रसे विद्याच्छोणिते दधिसागरम् ॥ ११ ॥
स्वादूदं लम्बिकास्थाने गर्भोदं शुक्र-संस्थितम्।
नादचक्रे स्थितः सूर्य्यो विन्दुचक्रे च चन्द्रमाः ॥ १२ ॥
लोचनाभ्यां कुजो ज्ञेयो हृदये च बुधः स्मृतः।
कण्ठदेशे गुरुं विद्यात् शुक्रः शुक्रे व्यवस्थितः ॥ १३ ॥
नाभिस्थाने स्थितो मन्दो मुखे राहुः स्थितः स्मृतः।
वायुस्थाने स्थितः केतुः शरीरे ग्रह-मण्डलम् ॥ १४ ॥
विभक्तञ्च समाख्यातमापाद-तल-मस्तकम्" ॥ इति।

तेन द्युलोक-परलोकयोः सन्धिः।

ननु सन्ध्यादि-कर्म्महीनस्य योगिनः कथं ब्राह्मण्यम्? अत आह, एतद्वै सन्धिं सन्ध्यामिति। एतदिति क्रियाविशेषणम्, सन्धिं सन्धेयमित्येतदुपासनं कुर्वन्ति। तत्रत्य-परम-ज्योतिर्ध्यानमेव ब्रह्मविदां सन्ध्यादि-फलदमित्यर्थः। सर्वस्य कर्म्मफल-सुखस्य ब्रह्मसुखेऽन्तर्भावात्। तदुक्तं गीतायाम्,—

"यावानर्थ उदपाने सर्वतः सम्प्लुतोदके।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः" ॥ इति ॥

उपसंहरति, स इति। 'सः' आत्मा 'अविमुक्ते' वाराणस्यां स्थितः 'अविमुक्ते' भ्रूमध्ये 'उपास्यः' ध्येय इत्याहृत्या योज्यः। 'इति' उपादेश-समाप्तौ।

उपासनाज्ञाने फलमाह, सोऽविमुक्तमिति। 'यो वा' यश-

अथ हैनं ब्रह्मचारिण ऊचुः, किं जप्येनामृतत्वं ब्रूहीति। स होवाच याज्ञवल्क्यः। शतरुद्रियेणेत्येतान्येव ह वा अमृतस्य नामानि, एतैर्ह वा अमृतो भवतीति, एव-मेवैतद् याज्ञवल्क्यः॥३॥

'एतत्' आत्मोपासनम् 'एवम्' अविमुक्ताधिकरणकं 'वेद' जानाति, सः 'अविमुक्तं' नित्यसम्बद्धं ज्ञानम् 'आचष्टे' शिष्येभ्यः उपदेष्टुं क्षमो भवति॥ २॥

अव्यक्तानन्तमात्मानं ज्ञातुं चिन्तयितुञ्चाशक्ताः प्रथमाधिकारिणः सरलोपायं पृच्छन्तित्सेत्याह, अथ हैनं ब्रह्मचारिण इति। 'ऊचुः' पप्रच्छुः 'किं जप्येन' केन जपनीयेन 'अमृतत्वं' मोक्षं सत्त्व-शुद्धिद्वारा गच्छतीति तत् जाप्यं वदेति शेषः। ब्रूहीति पाठे स्पष्टम्। यथाधिकारमुत्तरयति, शतरुद्रियेणेतीति।

"षट्षष्टिर्नील-सूक्तञ्च षोड़शर्चस्तथैव च।
एष ते द्वे नमस्ते द्वे नतं विद् इयमेव च॥
मीढुष्टम-चतुष्कञ्च एतद्धि शतरुद्रियम्"॥

नमस्ते इत्यादिः षट् षष्टिः, नीलसूक्तञ्च यः सोमेत्यष्टौ, षोड़शर्चो नमस्ते इत्यादिरेवावृत्त्या, ततो द्विकत्रयं, ततश्चतुष्कमिति शतमृचो रुद्रजाप्यं यजुर्विदाम्, "रुद्रजापी दहेत् पापम्" इति स्मृतेः। ज्ञानं सत्त्वशुद्ध्या प्राप्य अमृता भवन्तीत्यर्थः। द्रोणपर्व-पठितं वा स्तोत्रं परम-हंसानान्तु कैवल्योपनिषदाम्नातमेव शतरुद्रियमुचितम्। तत्र हेतुमाह, एतान्येव ह वा इति।

'अमृतस्य' ब्रह्मणः 'एतैः' जपैः, 'इति' वाक्यसमाप्तौ। एव-

अथ हैनं जनको वैदेहो याज्ञवल्क्यमुपसमेत्योवाच, भगवन्! सन्न्यासं ब्रूहीति स होवाच याज्ञवल्क्यः, ब्रह्मचर्य्यं परिसमाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्।

मेवैतद्-याज्ञवल्क्येति ब्रह्मचारिणामङ्गीकार-वाक्यम्। याज्ञवल्क्यः इति पाठे याज्ञवल्क्यो यदाह, एवमेवैदिति श्रुतेर्वचः॥ ३॥

ननु सन्न्यासिनामेव अविमुक्तोपासन-द्वारा मुक्तिः, तर्ह्याश्रमान्तर-परिग्रहं न कोऽपि कुर्य्यादित्याशङ्क्य जनकः पृच्छति, अथेति। पितृव्यावृत्त्यर्थं वैदेह इति विशेषणम्। 'उपसमेत्य' समीपमागम्येति विनय-प्रदर्शनार्थम्। असत्यपि सन्न्यासे भवतः सिद्धिं पश्यामीति प्रदर्शनार्थं भगवन्निति सम्बोधनम्। 'सन्न्यासं' सन्न्यासाधिकारं, तद्विधिञ्च। इतरो विदिताभिप्रायः क्रमेणोत्तरयन्नादौ क्रमसन्न्यासमाह, स होवाचेति। ब्रह्मचर्य्यं परिसमाप्येति, अन्यथा अनधीत-वेदस्य कर्म्मण्यनधिकारात्। गृहीभूत्वेति, अन्यथा सन्तत्यभावे पितृऋणानपाकरणात्। वनीभूत्वेति, "तपसा हन्ति किल्बिषम्" इति सकिल्बिषस्यानधिकारात्। अतएव स्मृतिः,

"ऋणत्रयमपाकृत्य मनो मोक्षे निवेशयेत्"॥ इति।

तथा। "अधीतवेदो जपकृत् पुत्रवानन्नदोऽग्निमान्।
शक्त्या तु यज्ञकृन्मोक्षे मनः कुर्य्यात्तु नान्यथा"॥ इति च।
"न्यायागत-धनस्तत्त्व-ज्ञान-निष्ठोऽतिथि-प्रियः।
श्राद्धकृत् सत्यवादी च गृहस्थोऽपि विमुच्यते"॥

यदि वेतरथा, ब्रह्मचर्य्यादेव प्रव्रजेत्, गृहाद्-वनाद्वा। अथ पुनरव्रती वा व्रती वास्नातको वा उत्सन्नाग्निरनग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्।

तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति। तदुतथा

इति स्मृतेराश्रमान्तरस्यापि ज्ञानसाधनत्वात् ज्ञानिनोऽपि याज्ञवल्क्यादेः क्रमसन्न्यासो न विरुद्ध इति भावः।

ननु तृतीयखण्डे ब्रह्मचारिभिरात्म-ज्ञानोपायः पृष्टः; ब्रह्मचारिणाञ्च विवाहादि-कर्म्म-व्यग्राणां कथमात्मज्ञानावसरः? इत्याशङ्क्य वैराग्यपाटवे क्रमातिक्रमेणापि सन्न्यास-सम्भवात् ज्ञान-प्रश्नोपपत्ति-रित्याशयेनाह, यदि वेति। 'यदि वा' इत्यनियमे; 'इतरथा' गार्हस्थ्याद्यनङ्गीकृत्य व्युत्क्रम-प्रकारेणापि परम-विरक्तस्य कर्म्मणि प्रवृत्त्यनुपपत्तेरर्थात् सन्न्यास-सिद्धिरिति भावः। गृहाद्वनाद्वेति वा शब्दः प्रत्येक-मभिसम्बध्यते। 'वनात्' तृतीयाश्रमात्। एतज्जन्मावच्छिन्न-मेव व्रतादि न सन्न्यासाङ्गमित्याह, अथ पुनरिति। 'अव्रती' अचीर्णाध्ययनाङ्गव्रतः 'स्नातकः' कृतविद्यो व्रतान्त-स्नातः, 'उत्सन्नाग्निः' मृतदारः, 'अनग्निकः' अगृहीताग्निकः। यदहरेवेत्येवकारोऽविलम्बार्थः "हेतु-हेतुमतोर्लिङ्" इति लिङ्।

सन्न्यासविधिमाह, तद्धैक इति॥ तदुक्तं याज्ञवल्क्येन,

"वनाद् गृहाद्वा कृत्वेष्टिं सर्ववेद सदक्षिणाम्।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि"॥ इति।

मोक्षे मनः कुर्य्यादिति दूषयति, तदुतथा न कुर्य्यादिति।

न कुर्य्यादाग्नेयीमेव कुर्य्यात्; अग्निर्हि वै प्राणः प्राणमेव तथा करोति। त्रैधातवीयामेव कुर्य्यात्; एतयैव त्रयो धातवो यदुत सत्त्वं रजस्तम इति।

अथ ते योनि र्ऋत्विजो यतो जातः प्राणा-

तर्हि किं कुर्य्यादत आह, आग्नेयीमेव कुर्य्यादिति। प्रजापतये इत्यपहाय अग्नये त्वा जुष्टं निर्वपामीति प्रयोगः। अग्नेयेष्टि-करणे हेतुः अग्निर्हि वै प्राण इति। प्रजापतीष्टिस्तु मनः प्राण-मनसोश्च प्राण एव बलीयान् सुहृय-दृष्टान्तेन छान्दोग्ये तथोपपादानात्। आग्नेयेष्टेः सामर्थ्यमाह, प्राणमेव तथा करोतीति। यत्र प्राणस्तत्र मनः, यत्र मनस्तत्र सर्वेन्द्रियाणि, तत्र विषयाः इत्याग्नेय्यां सर्वं सिध्यति।

ततोऽधिक-वीर्य्यमाह, त्रैधातवीयामेव कुर्य्यादिति। त्रयाणां वेदानां धातवः रसगर्भाश्च इव शेरतेऽस्यां त्रैधातवीया इष्टिः, तस्यां ह्यैन्द्रो वैष्णवो द्वादशकपालः पुरोडाशो हविः, तच्च तण्डुल-पिष्ट-वेष्टित-यवपिष्टरूपं, सर्वस्वदानात् इष्टः सन्न्यासाधिकारः। तदुक्तं शतपथब्राह्मणे,

"द्वे सहस्रे भूयो वा दद्यात्, स एतया यजेत्" इति।

तस्याः सामर्थ्यमाह, एतयैव त्रयो धावत इति, वर्द्धन्ते इति शेषः। के ते इत्यपेक्षायां तान् धातून् निष्कृष्य दर्शयति, यदुत सत्त्वं रजस्तम इति। त्रिविधा अपि त्रैविधा रसा अनया वर्द्धन्ते इत्यर्थः। तिसृणामिष्टीनां यथोत्तरमधिक-वीर्य्यत्वं द्रष्टव्यम्।

आघ्राणेनाग्नेरात्मनि समारोप-लक्षण-मन्त्रमाह, अयं ते योनिरिति। 'अयं' प्राणः 'ते' तव अग्नेः 'योनिः' उत्पत्ति-

द्रोचथाः। तं प्राणं जानन्नग्ने! आरोह, अथा नो वर्द्धय रयिम् इत्यनेन मन्त्रेणाग्निमाजिघ्रेत्। एष ह वा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वाहेत्येवमेवैतदाह। ग्रामादग्निमाहृत्य पूर्ववदग्निमाघ्रापयेत्।

यद्यग्निं न विन्देदप्सु जुहुयात्; आपो वै

स्थानम्, "वायोरग्निः" इति श्रुतेरनुभवाच्च। 'ऋत्विजः' ऋतुर्गर्भाधान-समयः प्राप्तोऽस्य इति वसन्तः समयः "तदस्य प्राप्तम्" इत्यधिकृत्य ऋतोरणच्छन्दसि घस्। अग्नेः प्राणयोनित्वे प्रमाणमाह, यत इति। जातः सन् 'यतः' प्राणात् 'अरोचथाः' रुचिदीप्तौ, दीप्तिमापद्यसे, पितुः संयोगेनेव पुत्रः; तेन ते प्राणयोनित्वमिति गम्यते। तं 'प्राणं' स्वयोनिं जानन् अग्ने! 'आरोह' मत्प्राणारूढो भव मत्प्राणमाविशेत्यर्थः। अथ प्राणमाविष्टः सन् 'नः' अस्माकं कुले 'रयिं' धनम् ऐश्वर्य्यं 'वर्द्धय' पोषयेति। पुत्रादि-श्रेयसे प्रार्थनामन्त्रं व्याचष्टे, एष ह वा इति। तृतीयं पादं व्याचष्टे, प्राणं गच्छेति। एतन्मन्त्ररूपमग्निं प्रति गच्छ स्वाहेत्येवमेव 'आह' प्रतिपादयति।

यद्यनग्निकः स्यात्, तदा इष्ट्यनधिकारात् किं कार्य्यम्? अत आह, ग्रामादिति। 'पूर्ववत्' अयं ते इति मन्त्रेण; अत्रापि सन्न्यासोपनिषदुक्तो होमविधिर्द्रष्टव्यः, प्राणापानेत्यादिनापि होमश्च।

ननु महावनादौ यदि सन्न्यासेच्छा स्यात्, तदा तदहरेवेति नियम-विधानात् तत्कालञ्च अग्न्यलाभात् किं

सर्वा देवताः; सर्वाभ्यो देवताभ्यो जुहोमि स्वाहेति हुत्वा, उद्धृत्य प्राश्नीयात् साज्यं हविरनामयं मोक्षमन्त्रः त्रय्येवं वदेत्, एतद् ब्रह्मैतदुपासितव्यम्, एवमेवैतद् भगवन्निति वै याज्ञवल्क्यः ॥ ४ ॥

अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यम्, पृच्छामि त्वा याज्ञवल्क्य! अयज्ञोपवीती कथं ब्राह्मण

कार्य्यम्? अत आह, यद्यग्निं न विन्देदिति। आपो वा इति। "आपो वा इदमग्र आसन्" इति श्रुतेरपां सर्वदेवताकारणत्वात् कार्य्यस्य च कारणानतिरेकादाप एव सर्वा देवताः। तत्र मन्त्रः सर्वाभ्य इति।

हविःशेषस्य प्रतिपत्तिमाह, हुत्वेति। 'उद्धृत्य' पात्राद् गृहीत्वा 'प्राश्नीयात्' भुञ्जीत, 'साज्यम्' आज्यसहितं 'हविः' चरुम्। सन्न्यासस्य फलमाह, अनामयं मोक्षमन्त्र इति। सन्न्यासो निष्प्रत्यूह-मोक्षोपाय इत्यर्थः। तत्र प्रमाणमाह, त्रय्येवं वदेदिति। वेदत्रयी एव सन्न्यासिनामनामयं मोक्षमन्त्र इत्येवं 'वदेत्' वदतीत्यर्थः। वेदेति क्वचित् पाठः। एतद्ब्रह्मेति। 'एतत्' सन्न्यासलक्षणवस्तु ब्रह्म ज्ञातव्यं ब्रह्मप्राप्तिहेतुत्वात्; अत एव सन्न्यासानन्तरं ब्रह्मेति सन्न्यासिनं व्यवहरन्ति। एतदुपासितव्यमिति। मोक्षार्थिभिः 'एतत्' सन्न्यासरूपम् उपास्यम् अङ्गीकृत्य "त्यागेनैके अमृतत्वमानशुः" इति श्रुतेः। एवमेवैतदित्यादि पूर्ववत् ॥ ४ ॥

उपवीतत्यागे ब्राह्मण-सन्देहं प्रश्नपूर्वकं निराकरोति, अथ

इति। स होवाच याज्ञवल्क्यः, इदमेवास्य तद् यज्ञोपवीतं य आत्मा प्राश्याचम्यायं विधिः परिव्राजकानाम्।

वीराध्वाने वा अनाशके वा अपां प्रवेशे वा अग्निप्रवेशे वा महाप्रस्थाने वा।

हैनमत्रिरिति। उक्तं यज्ञोपवीतं किमित्यत आह, य आत्मेति। आत्मध्याने सर्वं कर्म्मफलमन्तर्भूतमित्यर्थः। तदुक्तं याज्ञवल्क्येन,—

"ध्यानमेव हि जन्तूनां कारणं बन्धमोचणे"। इति।

शङ्कां निवर्त्त्य प्राश्नीयादिति पूर्वोक्तमनुसरति, प्राश्याचम्येति। प्राशनमनुद्यात्मने विधिः, आचम्य अग्निमाघ्रापयेदिति पूर्वेणान्वयः। अग्न्यभावे जलमेवोपसंहरति, अयं विधिः परिव्राजकानामिति। एवं परिव्रज्या कर्त्तव्येत्यर्थः।

इमं विधिं पञ्चस्वतिदिशति, वीराध्वाने वेत्यादिना। वाशब्द-पञ्चकं समुच्चये। एतेष्वपि पञ्चसु यथाधिकारम् अयम् इष्ट्यादिविधिः। ते चोक्ता आदित्यपुराणे;—

"समायुक्तो भवेद्यस्तु पातकैर्महदादिभिः।
दुश्चिकित्स्यैर्महारोगैः पीड़ितो वा भवेत्तु यः॥ १॥
स्वयं देहविनाशस्य काले प्राप्ते महामतिः।
अब्राह्मणो वा स्वर्गादि-महाफल-जिगीषया॥२॥
प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा।
अगाध-तोयराशिं वा भृगोः पतनमेव वा॥ ३॥
गच्छेन्महापथं वापि तुषारगिरि-मादरात्।
प्रयाग-वट-शाखायात् देहत्यागं करोतु वा॥ ४॥

अथ परिव्राड्विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्षणो ब्रह्मभूयाय भवतीति। यद्यातुरः स्यान्मनसा वाचा सन्न्यसेत्।

उत्तमान् प्राप्नुयाल्लोकान् नात्मघाती भवेत् क्वचित्।
महापाप-क्षयात् सद्यो दिव्यान् भोगान् समश्नुते ॥५॥
एतेषामधिकारस्तु तपसां सर्वजन्तुषु।
नराणामथ नारीणां सर्ववर्णेषु सर्वदा" ॥ ६ ॥ इति।

वीराध्वाने अग्निपुराणे फलमुक्तम्,—

"यस्तु शास्त्रमनुस्मृत्य वीर्य्यवान् वाहिनी-मुखे।
सम्मुखे वर्त्तते शूरः स स्वर्गान्न निवर्त्तते।
वीरशय्या च वीराध्वा वीरस्थान-स्थितिः स्थिरा" ॥ इति।

अध्वान-शब्दोऽध्वपर्य्यायः।

अनाशके फलमुक्तं भविष्योत्तरे,—

"समाः सहस्राणि तु सप्त वै जले दशैकमग्नौ पतने च षोड़श।
महाहवे षष्टि-रशीति गोग्रहे अनाशके भारत! चाक्षया गतिः"। इति।

अनेनापां प्रवेशे अग्निप्रवेशे वा फलमुक्तम्।

महाप्रस्थाने ब्रह्मपुराणोक्तं फलमाह,—

"महाप्रस्थान-यात्रा तु कर्त्तव्या निश्चितोपरि।
आश्रित्य सत्यं धैर्य्यञ्च सद्यः स्वर्गप्रदा च सा" ॥ इति।

आनुषङ्गिकमुक्त्वा प्रकृत-परिव्राजमाह, अथ परिव्राड़िति। 'विवर्ण' गैरिकादिना त्यक्त-स्वाभाविकवर्णं वासो यस्य स विवर्णवासाः 'मुण्डः' मुण्डितशिराः। अत्रामतोऽपि क्वचित् पाठः। अपरिग्रह इति, स्त्रिया सन्न्यासिना सह न गन्तव्यमित्यर्थः। 'शुचिः' वाह्याभ्यन्तर-शौचवान् 'भैक्षणः' नित्यमागमशासन-

एष पन्था ब्रह्मणा हानुवित्तः तेनैवैति सन्न्यासी ब्रह्म विदित्येवमेवैष भगवन् याज्ञवल्क्य ! ॥ ५ ॥

तत्र परमहंसा नाम संवर्त्तकारुणि-श्वेतकेतु-दुर्वासा-ऋभु-निदाघ-जड़भरत-दत्तात्रेय-रैवतक-प्रभृतयोऽव्यक्तलिङ्गा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरन्तः।

मिति कामनशब्दवत् युङ्भावः सार्थिकोऽण्। 'ब्रह्मभूयाय' ब्रह्मभावाय 'भवति' सम्पद्यते। नानेनानशनादिना पूर्ववद्देहस्त्याज्यः। आतुरसन्न्यास-विधिमाह, यदीति। वाङ्मनसयोरेव सामर्थ्याद्दैहिक-सामर्थ्याभावात्।

सन्न्यासमार्गस्य कल्पितत्व-शङ्कां निराकरोति, एष पन्था इति। 'ब्रह्मणा' विरिञ्चिना 'ह' प्रसिद्धौ 'अनुवित्तः' बोधितः 'तेन' मार्गेण 'एति' प्राप्नोति, सन्न्यासी 'ब्रह्म' सच्चिदानन्दाख्यं; कथं भूतः ? 'वित्' तत्त्ववेत्ता 'इति' उपदेशसमाप्तौ, एवमेव 'एषः' अर्थः। याज्ञवल्क्येति अत्रेरङ्गीकारवाक्यम्। सविसर्गपाठे एवमेवैषोऽर्थ इति याज्ञवल्क्योक्तमिति श्रुतेर्वचः ॥ ५ ॥

परमहंस-सन्न्यास एव नास्तीति विप्रतिपन्नं प्रति सत्सम्प्रदायं दर्शयति, अत्रेति। संवर्त्तकादयोऽष्टौ पुराणप्रसिद्धाः। अरुणस्यापत्यं श्वेतकेतुः। प्रभृति-ग्रहणात् इतरे पञ्चऋषभदेवादयः। अव्यक्तानि 'लिङ्गानि' उपवीतादीनि येषां ते अव्यक्तलिङ्गाः 'अव्यक्तः' आश्रमाविरुद्धः आचारो येषां ते

त्रिदण्डं कमण्डलुं शिक्यं जलपवित्रं पात्रं शिखां यज्ञोपवीतञ्च, इत्येतत् सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत् ।

यथा-जातरूपधरो निर्ग्रन्थो निष्परिग्रहः तत्तद् ब्रह्ममार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्षमा-चरन् उदर-पात्रेण लाभालाभयोः समो भूत्वा शून्यागार-देवगृह--तृण--कूट-वल्मीक-वृक्षमूल-कु-लालशाला-ग्निहोत्रगृह- नदी-पुलिन-गिरिकुहर-कन्दर-कोटर-निर्झर-स्थण्डिलेषु-तेष्वनिकेतवास्य प्रयत्नो निर्म्ममः शुक्लध्यान-परायणोऽध्यात्मनिष्ठो-

अव्यक्ताचाराः । तदेवाह, उन्मत्तवदिति । यथा दत्तात्रेयस्य मदिरा-स्त्री निषेवणादि ।

त्रिदण्डी यदा परमहंस-पदवीमधितिष्ठति, तदा दण्डा-दीनां का प्रतिपत्तिः ? अत आह, त्रिदण्डमिति । त्रयाणां दण्डानां समाहारः पात्रादि 'जलपवित्रं' जलशोधितं वस्त्रम् । चकारात् कुण्डिका-चमस-त्रिविष्टाध्वकोपानत्-कन्था-कौपीन-स्नानवस्त्राद्युत्तरासङ्गानां ग्रहणम् ।

'यथाजातरूपधरः' यथाजातो निर्वस्त्रः तथारूपस्य धरो धर्त्ता 'सम्पन्नः' कुशलः 'यथोक्तकाले' "निवृत्ते धूमसञ्चारे मन्दीभूते दिवाकरे" इत्यादि स्मृत्युक्ते काले 'विमुक्तः' अप्रति-बन्धः, अथवा जीवन्मुक्तः । तस्य स्थानान्याह, शून्येति । 'शुक्ल'

ऽशुभकर्म्म-निर्मूलनपरः सन्न्यासेन देहत्यागं करोति, स परमहंसो नाम, परमहंसो नामेति ॥ ६ ॥

इत्यथर्व्ववेदे जाबालोपनिषत् समाप्ता ॥ २८ ॥

कैवल्योपनिषत्।

ओँ अथाश्वलायनो भगवन्तं
परमेष्ठिनमुपसमेत्योवाच।

ब्रह्म, तच्चिन्तन-परः। अशुभेति, शुभस्याप्युपलक्षणम्। सन्न्यासेन देहत्यागं करोति न वीराध्वानादिना। स परमहंसो नाम प्रसिद्धः सेति शब्दात्, द्विरुक्तिः समाप्त्यर्था।

नारायणेन रचिता श्रुति-मात्रोपजीविना।
अस्पष्ट-पद-वाक्यानां जाबालस्य प्रदीपिका॥

इत्यथर्व्ववेदे जाबालोपनिषदो दीपिका सम्पूर्णा ॥ २८ ॥

ओँ कैवल्योपनिषद् ब्रह्म शतरुद्रिय-सञ्ज्ञिका।
एकचत्वारिंशत्तमो मध्ये खण्डद्वयान्विता ॥ १ ॥

साधनोपदेश-प्रकरणत्वात् जाबाले शतरुद्रियं ब्रह्म ज्ञान-साधनत्वेन विनियुक्तम्; तत् किं स्वरूपम्? इत्यपेक्षायां सेतिहासं तत् कैवल्योपनिषदि प्रदर्श्यते, अथाश्वलायन इति। अश्वलस्यापत्यम् अश्वलायनः नड़ादिफगन्तः। परमे तिष्ठतीति 'परमेष्ठी' ब्रह्मा तम्।

अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां
सदा सद्भिः सेव्यमानां निगूढ़ाम् ।
यथा चिरात् सर्वपापं व्यपोह्य
परात्परं पुरुषं याति विद्वान् ॥ १ ॥
तस्मै स होवाच पितामहश्च
श्रद्धा-भक्ति-ध्यान-योगाद्वैहि ।
न कर्म्मणा न प्रजया धनेन
त्यागेनैके अमृतत्वमानशुः ॥ २ ॥
परेण नाकं निहितं गुहायां
विभ्राजते यद्यतयो विशन्ति ।
वेदान्त-विज्ञान-सुनिश्चितार्थाः
सन्न्यासयोगाद्-यतयः शुद्धसत्त्वाः ॥ ३ ॥

अधीहि इत्यादिः विद्वानित्यन्त एको मन्त्रः। एतदादयः सप्त वृत्तमन्त्राः; ततश्चतस्रोऽनुष्टुभः; पुनस्त्रीणि सार्धानि वृत्तानि; एतावच्छतरुद्रियमिति। अस्य फलाववोधको द्वितीयः खण्डः। तत्र अस्पष्टपदानि स्पष्टीक्रियन्ते। सदा 'सद्भिः' साधुभिः। यतिभिरिति क्वचित् पाठः। 'अचिरात्' अविलम्बेन 'सर्वपापं' सर्वबन्धनं 'व्यपोह्य' निराकृत्य 'याति' प्राप्नोति। क्वचिदुपैतीति पाठः। 'अवेहि' जानीहि। अवेहीति युक्तः पाठः। 'एके' मुख्याः।

परेण नाकमित्यनया द्वितीया इति परेण योगे द्वितीया। 'गुहायाम्' अज्ञानगह्वरे।

ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे ।
विविक्त-देशे च सुखासनस्थः
शुचिः समग्रीव-शिरः-शरीरः ॥ ४ ॥
अन्त्याश्रमस्थः सकलेन्द्रियाणि
निरुध्य भक्त्या स्वगुरुं प्रणम्य ।
हृत्पुण्डरीकं विरजं विशुद्धं
विचिन्त्य मध्ये विशदं विशोकम् ॥ ५ ॥
अचिन्त्य-मव्यक्त-मनन्तरूपं
शिवं प्रशान्तममृतं ब्रह्मयोनिम् ।
तमादि-मध्यान्त-विहीनमेकं
विभुं चिदानन्द-मरूप-मद्भुतम् ॥ ६ ॥
उमा-सहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।

'परान्तकाले' कल्पान्तसमये ।

"ब्रह्मणा सह मुच्यन्ते सम्प्राप्ते युगपर्य्यये" इति स्मृतेः ।

सन्न्यासयोगादित्युक्तम्, तत्र गुहानिहित-प्रकाशनाय योगस्वरूपमाह, विविक्तेति । समानि ग्रीवा-शिरः-शरीराणि यस्य स समग्रीव-शिरः-शरीरः । आप इति ग्रीवाशब्दस्य ह्रस्वः । समा ग्रीवा यस्य तत् समग्रीवं, तादृशं शिरो यस्मिन् तत् समग्रीव-शिरः, तादृशं शरीरं यस्य स तथेति वा ।

'अन्त्याश्रमः' चतुर्थाश्रमः, 'ब्रह्मयोनिं' वेदकारणं,

ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्त-साक्षिं तमसः परस्तात् ॥ ७ ॥

स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट्।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः॥८॥
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥९॥
सर्वभूतस्थ-मात्मानं सर्वभूतानि चात्मनि ।
सम्पश्यन् ब्रह्म परमं याति नान्येन हेतुना ॥१०॥
आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरारणिम् ।
ज्ञान-निर्मथनाभ्यासात् पापं दहति पण्डितः ॥११॥

स एव माया-परिमोहितात्मा
शरीरमास्थाय करोति सर्वम् ।
स्त्रियन्न-पानादि-विचित्रभोगैः
स एव जाग्रत् परितृप्तिमेति ॥ १२ ॥
स्वप्ने स जीवः सुख-दुःख-भोक्ता
स्वमायया कल्पित-जीव-लोके ।

'समस्तसाक्षिं' सर्वसाक्षिणम्। इकारान्तः साक्षिशब्दश्छान्दसः।

'सेन्द्रः' स इन्द्रः, छान्दसः सन्धिः।

स्त्रियन्नेति छान्दस इयङ्।

'स्वमायया' स्वाज्ञानेन कल्पिते जीवलोके सुख-दुःख-भोक्ता

सुषुप्तिकाले सकले विलीने
तमोऽभिभूतः सुखरूपमेति ॥ १३ ॥
पुनश्च जन्मान्तर-कर्म्म-योगात्
स एव जीवः स्वपिति प्रबुद्धः।
पुरत्रये क्रीड़ति यश्च जीवः
ततः सुजातं सकलं विचित्रम् ॥ १४ ॥
आधार-मानन्द-मखण्ड-बोधं
यस्मिन् लयं याति पुरत्रयञ्च।
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ १५ ॥
यत् परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत्।
सूक्ष्मात् सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ॥ १६
जाग्रत्-स्वप्न-सुषुप्त्यादि प्रपञ्चं यत् प्रकाशते।
तद् ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥

इत्यन्वयः। 'सकले' जगति 'विलीने' कारणभावमापन्ने 'तमोऽभिभूतः' अज्ञानावृतः स्वपिति, 'प्रबुद्धः' स्वप्नादुत्थितः 'पुरत्रये' विश्व-तैजस-प्राज्ञैरभिमते अवस्थात्रये सकलं 'ततः सुजातं' तस्मात् जीवात् सम्यगुत्पन्नम्। ततस्तु जातमिति युक्तः पाठः। तुरीयमाधारमिति, पुरत्रयञ्च यस्मिन् लयं याति।

'एतस्मात्' तुरीयावस्थात् ब्रह्मणः।

तत्त्वमेवेति। ब्रह्मणस्त्वदनन्यत्वं बोध्यते ; त्वमेव तदिति, तव ब्रह्मानन्यत्वम्। प्रपञ्चमिति छान्दसं नपुंसकत्वम्।

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदा शिवः १८
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद् ब्रह्माद्वयमस्म्यहम् ॥ १९ ॥

प्रथमः खण्डः ॥ १ ॥

अणोरणीयानहमेव तद्वत्
महानहं विश्वमहं विचित्रम् ।
पुरातनोऽहं पुरुषोऽहमीशो
हिरण्मयोऽहं शिवरूपमस्मि ॥ २०
अपाणि-पादोऽहमचिन्त्य-शक्तिः
पश्याम्यचक्षुः स शृणोम्यकर्णः ।
अहं विजानामि विविक्तरूपो
न चास्ति वेत्ता मम चित् सदाहम् ॥ २१ ॥
वेदैरनेकैरहमेव वेद्यो
वेदान्तकृत् वेदविदेव चाहम् ।
न पुण्य-पापे मम नास्ति नाशो
न जन्म देहेन्द्रिय-बुद्धिरस्ति ॥ २२ ॥

न चास्ति वेत्ता ममेति, नान्योऽतोऽस्ति द्रष्टा, नान्योऽतोऽस्ति श्रोतेति श्रुत्यन्तरात् ।

न पुण्य-पापे मम स्तः ; नास्ति नाशो ममेत्येव ; न जन्म

न भूमिरापो न च वह्निरस्ति
न चानिलो मेऽस्ति न चाम्बरञ्च।
एवं विदित्वा परमात्मरूपं
गुहाशयं निष्कलमद्वितीयम्॥ २३॥
समस्त-साक्षिं सदसद्विहीनं
प्रयाति शुद्धं परमात्मरूपम्।

यः शतरुद्रियमधीते सोऽग्निपूतो भवति, स वायु-पूतो भवति, आत्मपूतो भवति, स सुरापानात् पूतो भवति, स ब्रह्महत्यायाः पूतो भवति, स सुवर्णस्तेयात् पूतो भवति, स कृत्या-कृत्यात् पूतो भवति; तस्मादविमुक्तमाश्रितो भवत्वित्याश्रमी, सर्वदा सकृद्वा जपेत्।
अनेन ज्ञानमाप्नोति संसारार्णव-नाशनम्।
तस्मादेवं विदित्वैनं कैवल्यं पद-मश्नुते॥
कैवल्यं पदमश्नुते॥ २४॥

द्वितीयः खण्डः॥ २॥

इत्यथर्ववेदे कैवल्योपनिषत् समाप्ता॥ २८॥

ममेत्येव; देहेन्द्रिययुक्ता बुद्धिर्मम नेत्येव। आपो न चेति वाक्यम्; वह्निरस्ति न चेति वाक्यम्; अनिलो नास्तीति वाक्यम्; अम्बरञ्च नास्तीति वाक्यम्। एकं फलमाह, एव-मिति। एवं विदित्वा शुद्धं परमात्मरूपं प्रयातीत्यन्वयः।

वेदने फलमुक्त्वा पाठफलमाह, य इति। सकृद्वा इति प्रत्यहमिति शेषः। 'कैवल्यं' केवलभावं मोक्षं पदम्, 'अश्नुते' प्राप्नोति। द्विरुक्तिः समाप्त्यर्था। 'इति' स्वरूप-कथने।

नारायणेन रचिता श्रुतिमात्रोपजीविना।
अस्पष्ट-पद-वाक्यानां कैवल्यस्य प्रदीपिका॥

इत्यथर्ववेदे कैवल्योपनिषदो दीपिका सम्पूर्णा॥ २८॥

कैवल्याख्योपनिषदं कैवल्यार्थावबोधिनीम्।
व्याख्यास्ये केवलस्तेन कैवल्यात्मा प्रसीदतु॥ १॥

भगवती श्रुतिर्मातेव सुखप्रतिपत्त्यर्थं कञ्चनाश्वलायनमुररीकृत्य आख्यायिकामवतारयति ब्रह्मविद्यायामास्तिक्यं जनयितुम्। 'अथ' साधन-चतुष्टय-सम्पत्त्यनन्तरम्, 'आश्वलायनः' ऋग्वेदाचार्य्यः 'भगवन्तं' पूजावन्तं 'परमेष्ठिनं' सर्वोत्कृष्टस्थान-निवासं 'परिसमेत्य' शास्त्रीयेण विधिना समीपमागत्य 'उवाच' उक्तवान्।

'अधीहि' मदनुग्रहार्थं स्मर, भगवन्! समग्र-धर्मज्ञान-वैराग्यैश्वर्य्य-यशः-श्रीमन्! 'ब्रह्मविद्यां' ब्रह्मणः देश-काल-वस्तु-परिच्छेद-शून्यस्य विद्या बुद्धिः साक्षात्कार-कारणं तां, 'वरिष्ठाम्' अतिशयेन श्रेष्ठां, 'सदा' नित्यं 'सद्भिः' देहादिष्वात्म-बुद्धिशून्यैः, 'सेव्यमानां' हृदये भ्रियमाणां 'निगूढां' सर्वभूतेष्वात्मनो विद्यमानत्वेन विद्यमानामप्यविद्यया नितरां संवृताम्, 'यया' ब्रह्मविद्यया 'अचिरात्' अदीर्घेण कालेन 'सर्वपापं' निखिलं दुःखकारणम् अज्ञानं ससंस्कारं 'व्यपोह्य' विविधं परित्यज्य विनाश्येत्यर्थः। 'परात्' सर्वजगत्-कारणादव्याकृतात् 'परम्' उत्कृष्टम् अज्ञानाश्रय-विषयत्वाभ्यां,

'पुरुषं' परिपूर्णं 'याति' प्राप्नोति, 'विद्वान्' अहमेव सोऽस्मीति साक्षात्कारवान् ॥ १ ॥

एवं पृष्टः 'तस्मै' स्वशिष्याय ब्रह्मविद्यार्थिने 'सः' गुरुः सर्वज्ञः 'ह' किल 'उवाच' उक्तवान्, 'पितामहश्च' जगत्-पितॄणां दक्षादीनां पिता पितामहः कमलासनः, 'चकारः' अपि-कारार्थः; स पितामहोऽप्युवाच, न तूपेक्षां कृतवानित्यर्थः। ब्रह्मविद्यायाः साक्षादक्तुमशक्यत्वात्, तदर्थस्य च ब्रह्मणो वाङ्मनसातीतत्वात्, अतः सोपायां तामाह, 'श्रद्धा-भक्ति-ध्यान-योगात्' श्रद्धा आस्तिक्यबुद्धिः, भक्तिः भजनं तदेक-तात्पर्य्य-बुद्धिः, ध्यानं विजातीय-प्रत्यय-शून्य-सजातीय-प्रत्यय-प्रवाहः, एतेषां 'योगः' सम्बन्धः एतत्-कारणमिति यावत्, तस्मात्, 'अवैहि' जानीहि।

इदानीं यथा श्रद्धा-भक्ति-ध्यान-योगो ब्रह्मविद्यायां कारणं, तद्वत् सन्न्यासोऽपीत्याह, न 'कर्मणा' श्रौतेन स्मार्त्तेन वा, न 'प्रजया' पुत्रादिना, 'धनेन' दैवेन मानुषेण वा वित्तेन, नेति पूर्वमनुषज्यते; अमृतत्वमिति वक्ष्यमाणानुषङ्गः कर्म-प्रजा-धन-पदेष्ववगन्तव्यः; 'त्यागेन' निखिल-श्रौत-स्मार्त्त-कर्म-परित्यागेन पारम-हंस्याश्रम-रूपेण, 'एके' महात्मानः सम्प्र-दायविदः 'अमृतत्वम्' अविद्या-मरणभाव-राहित्यं 'आनशुः' आनशिरे प्राप्ताः ॥ २ ॥

एवं कृते सन्न्यासे 'परेण' परस्तात् 'नाकं' कं सुखं, तद्वि-रोधि दुःखम् अकम्, न अकं यस्मिन् स नाकः तं, स्वर्गस्यो-परीत्यर्थः। अथ वा, 'परेण' परं, 'नाकम्' आनन्दात्मानं 'निहितं' प्रक्षिप्तं धात्रा 'गुहायां' बुद्धौ 'विभ्राजते' विशेषेण स्वयं प्रकाशत्वेन दीप्यते, 'यत्' प्रसिद्धं विश्वव्यापिस्वरूपं 'यतयः' कृतसन्न्यासाः प्रयत्नवन्तो ब्रह्मसाक्षात्कार-सम्पन्नाः

'प्रविशन्ति' इदं वयं स्म इति साक्षात्कारेण तदेव भवन्तीत्यर्थः।

यतीनां विशेषणान्याह, 'वेदान्त-विज्ञान-सुनिश्चितार्थाः' वेदान्ताः प्रसिद्धाः, तेभ्यो जातं विशिष्टम् अहं ब्रह्मास्मीति ज्ञानं, तस्मिन्नेव सुनिश्चितः अर्थः प्रयोजनं येषां ते। अथवा सुनिश्चितः अयमित्थमेवेति सम्यगवधारितो ब्रह्मलक्षणः अर्थो विषयो यैस्ते वेदान्त-विज्ञान-सुनिश्चितार्थाः। 'सन्न्यासयोगात्' सम्यक् वान्तविष्ठादिवत् लोकद्वय-भोगस्य न्यासः त्यागः सन्न्यासः तस्य योगः अहं सन्न्यास्यस्मीति बोधः, तस्मात्, 'यतयः' व्याख्यातम्, पुनरादानं विशेषत्व-कथनार्थम्। 'शुद्ध-सत्त्वाः' शुद्धं रागादिकषाय-रहितं सत्त्वम् अन्तःकरणं येषां ते शुद्धसत्त्वाः॥ ३॥

एवम्भूता अपि कुतश्चित् प्रतिबन्धादस्मिन् शरीरे अनुत्पन्न-साक्षात्काराश्चेत्, तदा 'ते' उक्ता यतयः 'ब्रह्मलोकेषु' ब्रह्मणः कार्य्यस्यैक एव लोकोऽनेक-भूमिका-प्रासादवदध उपर्य्यादि-भागेनावस्थिता बहव एव तेनाभिधीयन्ते, तेषु ब्रह्मलोकेषु 'परान्तकाले' परस्य कार्य्यस्य ब्रह्मणः अन्तकालो विनाश-कालः द्विपरार्द्धावसानः परान्तकालः, तस्मिन्, 'परामृतात्' उत्कृष्टात् अमरण-धर्मिणोऽव्याकृतात् 'परिमुच्यन्ति' परि-मुच्यन्ते सर्वतो विमुक्ता भवति, 'सर्वे' निखिलाः।

इदानीं ब्रह्मज्ञानावाप्त्यर्थमुपासनं कर्त्तुम् उपवेशनार्थं देशविशेषादिकमाह, 'विविक्तदेशे' एकान्तदेशे, चशब्दादव्या-कुल-कालेऽपि, 'सुखासनस्थः' सुखम् अनुद्वेगकरं दर्भाद्यासनं सुखासनं, तस्मिन् तिष्ठतीति सुखासनस्थः, 'शुचिः' वहिरन्तः-शौचवान्, 'समग्रीव-शिरः-शरीरः' समं ग्रीवा च शिरश्च शरी-रञ्च यस्य स समग्रीव-शिरः-शरीरः, ऋजुकायः पद्म-स्वस्तिका-द्यासनस्थ इत्यर्थः॥ ४॥

'अत्याश्रमस्थः' अति अधिकः ब्रह्मचारि-गृहस्थ-वानप्रस्थ-कुटीचक बहूदक-हंसेभ्य आश्रमः पारमहंस्य-लक्षणः अत्याश्रमः, तस्मिन् तिष्ठतीति अत्याश्रमस्थः, 'सकलेन्द्रियाणि' निखिलानि समनस्कानि ज्ञान-कर्मेन्द्रियाणि 'निरुध्य' स्व-स्व-प्रकारेभ्योऽवरुध्य 'भक्त्या' देववत् देवादाधिक्याद्वा 'स्वगुरु' स्वस्य तत्त्वमसीत्यर्थस्यावबोधकं 'प्रणम्य' प्रकर्षेण नत्वा, अनन्तरं हृत्पुण्डरीकं हृदयकमलं पञ्च-छिद्रादि-विशेषणं 'विरजं' विरजस्कम् अपगत-रागद्वेषादिकं, 'विशुद्धं' विगत-समस्त-दुःखादिदोषं 'विचिन्त्य' विशेषेण ध्यात्वा, 'मध्ये' हृदयपुण्डरीकस्यान्तः, 'विशदं' निर्मलं शुद्धस्फटिक-सङ्काशमित्यर्थः, 'विशोकं' विगत-शोक--दुःखं विशोकम्-आनन्दपूर्ण-हृदयं स्मेराननञ्चेत्यर्थः ॥ ५ ॥

वस्तुतस्तु, 'अचिन्त्यं' वाङ्मनसातीतत्वेन प्रत्यय-सन्तत्य-विषयम्। वाङ्मनसातीतत्वे हेतुः 'अव्यक्तं' शब्दाद्यशेष-शून्यत्वादस्पष्टमव्यक्तम्। असत्वं परिच्छेदञ्च वारयति, 'अनन्तरूपं' न विद्यते अन्तः इयत्ता रूपाणां शरीराणां यस्य सोऽनन्तरूपः तं, देश-काल-वस्तु-परिच्छेद-शून्यं वा अनन्तरूपं, 'शिवं' मङ्गलरूपं 'प्रशान्तम्' अविद्यादिदोष-रहितम्, 'अमृतं' कालत्रयासंस्पृष्टम्, अमृतवद्वा निरतिशयानन्द-रूपत्वेन, 'ब्रह्म' बृहत् सर्वस्मादभ्यधिकं, 'योनिं' जगज्जन्मादि-कारणं, 'तथा' यथैतद्विशेषेण जातं, तद्वत् स्वरूपमपि, 'आदि-मध्यान्त-विहीनम्' उत्पत्ति-परिच्छेद-विनाश-वर्जितम्, तत्र हेतुः, 'एकं' द्वितीय-वस्तुमात्र-रहितं 'विभुं' समर्थं व्यापिनं वा, 'चिदानन्दं' स्वयं प्रकाशमानं निरतिशयानन्दम्, 'अरूपं' चिदानन्द-व्यतिरिक्त-रूप-रहितं, ततः 'अद्भुतम् आश्चर्यकरम् ॥ ६ ॥

'उमासहायं' ब्रह्मविद्या भवानी, सहायः

भचक: अर्द्धनारी-शरीरत्वेन वामाङ्ग-स्थितानुपम-युवतिरूपत्वेन वा यस्य स उमासहाय: तं, 'परमेश्वरम्' उत्कृष्टब्रह्मादिनियन्तारं 'प्रभुं' समर्थं 'त्रिलोचनं' त्रीणि सोम-सूर्य्याग्न्यात्मकानि लोचनानि यस्य स त्रिलोचन: तं, 'नीलकण्ठं' कृष्णकण्ठं 'प्रशान्तं' प्रसन्नवदनेन्द्रियं, 'ध्यात्वा' प्रत्यय-प्रवाहेण साक्षात् कृत्य 'मुनि:' मननशील: 'गच्छति' प्राप्नोति 'भूतयोनिम्' आकाशादि-महाभूत-कारणम् ।

तर्हि किं कारणत्वोपाधिकमित्याशङ्क्य नेत्याह, 'समस्तसाक्षिं' समस्त-साक्षिणं सर्वबुद्धि-प्रचार-द्रष्टारम् । साक्षित्वमपि न केवलस्य इत्यत आह, 'तमस:' आवरण-शक्ति-विक्षेपरूपाया अविद्याया:, 'परस्तात्' परत: अविद्या-सम्बन्ध-शून्यमित्यर्थ:, उमासहायोपासनात: प्राप्यो निरवद्यो विद्यादशायां सर्वात्मेत्यर्थ: ॥ ७ ॥

'स:' उक्त: 'ब्रह्मा' प्रथमशरीरी कार्य्य-कारणभूत:, 'स:' उक्त: 'शिव:' उमासहाय:, 'सेन्द्र:' 'स:' उक्त: 'इन्द्र:' त्रिलोकीपति:, 'स:' उक्त: 'अक्षर:' विनाश-रहित:, 'परम:' उत्कृष्ट: 'स्वराट्' अन्यानपेक्षत्वेन स्वेनैव राजते इति स्वराट्, 'स एव' उक्त एव 'विष्णु:' व्यापन-शील: शङ्ख-चक्र-गदा-धर:, 'स:' उक्त: 'प्राण:' प्राणादि-पञ्च-वृत्तिरूप:, 'स:' उक्त: 'कालाग्नि:' कालरूपी वैश्वानर:, 'स:' उक्त: 'चन्द्रमा:' शशाङ्क: ॥८॥

'स एव' उक्त एव 'सर्वं' निखिलं 'यत्' प्रसिद्धं 'भूतम्' अतीतं, 'यच्च' यदपि 'भव्यं' भावि, चकारात् वर्त्तमानमपि, 'सनातनं' चिरन्तनं 'ज्ञात्वा' अहं ब्रह्मास्मीति साक्षात्कृत्य, 'तम्' उक्तमानन्दात्मानं 'मृत्युम्' अविद्यां ससंस्काराम् 'अत्येति' अतीत्य गच्छति । 'नान्य:' उक्ताद् ब्रह्मज्ञानाद्-व्यतिरिक्त: 'विमुक्तये' विमुक्त्यर्थं नास्तीति शेष: ।

यदा त्रयाणां विश्व-तैजस-प्राज्ञानां, विराड् हिरण्यगर्भेश्वराणां वा स्वयं प्रकाशत्वेन लोचनं प्रकाश-स्वरूपं त्रिलोचनं नीलं तमोऽज्ञानं कण्ठे कण्ठवच्चिदेकदेशे अधिकव्याप्तत्वेन चैतन्यस्य वर्त्तते यस्य स नीलकण्ठः तमिति व्याख्यातं, तदा 'विषदम्' अविद्या-रहितं 'विशोकं' दुःखसंस्कार-रहितम्, 'उमासहायं' ब्रह्मविद्या-सहायं 'प्रशान्तं' पुनरुत्थान-संस्कार-वर्जितमिति निर्गुणपरत्वेन समग्रं वाक्यमवगन्तव्यम्, निर्गुणस्याप्युपलब्धत्वेन हृदयप्रदेश-मध्यस्थत्वमविरुद्धम्; तथा च ध्यात्वा मनन-निदिध्यासने कृत्वा इत्येतदप्युपपन्नमेव ॥ ९ ॥

'सर्वभूतस्थं' निखिलेषु स्थावर-जङ्गमेषु तिष्ठतीति सर्वभूतस्थं, तम्, 'आत्मानम्' अस्मत्-प्रत्यय-व्यवहार-योग्यं, 'सर्वभूतानि च' निखिलानि स्थावर-जङ्गमानि च, 'चकारः' आधाराधेय-भावव्युत्क्रमार्थः। 'आत्मनि' आनन्दात्मनि अहम्प्रत्यय-योग्ये, 'सम्पश्यन्' सम्यक् संशय-विपर्य्यय-मन्तरेणावलोकयन् 'ब्रह्म' बृहत् देश-काल-वस्तु-परिच्छेद-शून्यं 'परमम्' उत्कृष्टम् अनुपचरितमित्यर्थः; 'याति' प्राप्नोति, न यातीति देहलीप्रदीप-न्यायेन सम्बध्यते, 'न याति' न प्राप्नोति, 'अन्येन' उक्तबोध-व्यतिरिक्तेन 'हेतुना' कारणेन ॥ १० ॥

ध्यात्वा गच्छतीत्यस्य व्याख्यानं ज्ञात्वा तमित्यादि; नान्यः पन्था विमुक्तये इत्यस्य व्याख्यानन्तु इदं सर्वभूतस्थमित्यादि। यदा तु एवं ज्ञानं नोपपद्यते, तदा तदुत्पादनोपायमाह, 'आत्मानम्' अन्तःकरणम् 'अरणिं' वह्निजनकं मन्त्र-संस्कृतं काष्ठं 'कृत्वा' अधो निधाय अधरारणित्वेन चिन्तयित्वेत्यर्थः। 'प्रणवम्' ओङ्कारम् उत्तरारणिमपि, 'चकारः' कृत्वेत्येतदनुकृष्यर्थः। 'ज्ञान-निर्मथनाभ्यासात्' ज्ञानस्य सर्वात्मकोऽहमस्मीत्येवं रूपस्य 'निर्मथनं' युक्तिभिर्विलोडनं, तस्य 'अभ्यासः'

आवृत्तिरूपः, ज्ञान-निर्मथनाभ्यासः, तस्मात्, उत्पन्नेनाहं ब्रह्मास्मीति साक्षात्काराग्निना 'पाशम्' आत्मनो बन्धनरूपम् अज्ञानरज्जु-रचितम् अहमादिग्रन्थिं 'दहति' भस्मीकरोति, 'पण्डितः' पण्डा अहं ब्रह्मास्मीति बुद्धिः, ताम् 'इतः' प्राप्तः पण्डितः ॥ ११ ॥

नन्वस्यासङ्गोदासीनस्याद्वितीयस्य कुतः संसार-पाशरूपः ? इत्यत आह, 'स एव' उक्तोऽसङ्गोदासीन एव, न त्वन्यः, 'माया-परिमोहितात्मा' माया अविद्या आवरण-विक्षेपकरी शक्तिः, तया परिमोहितः स्वयमप्रकाशः आनन्दात्मा स्वस्वरूपः माया-परिमोहितात्मा, 'शरीरं' स्थूलादि-भेदभिन्नं मनुष्यादिकलेवरम् 'आस्थाय' अहं मनुष्य इत्याद्यभिमानम् आसमन्तात् स्वीकृत्य 'करोति सर्वं' निखिलं व्यापारजातं कुरुते। 'स्त्रियन्न-पानादि-विचित्रभोगैः' 'स्त्रियः' मनोऽनुकूला युवत्यः, 'अन्नपाने' मनोऽनुकूले, आदिशब्देन वासनाच्छादनादीनि मनोऽनुकूलानि, तैः स्त्रियन्न-पानादिभिः विचित्रैः भोगैः स्त्रियन्नेति छान्दसम्। 'स एव' माया-परिमूढ़ एव न त्वन्यः, 'जाग्रत्' जागरणम् इन्द्रियैर्बाह्य-विषयोपलब्धिरूपं कुर्वन्, 'परितृप्तिः' सर्वतो विषय-सुखजा तृप्तिः परितृप्तिः, ताम् 'एति' गच्छति, सुखं दुःखञ्च प्राप्नोतीत्यर्थः ॥ १२ ॥

इदानीं स्वप्न-सुषुप्त्योर्विक्षेप-तदभाव कथनेन संसार-मोक्षयोरर्थात् दृष्टान्तमाह, 'स्वप्ने' इन्द्रिय-ग्रामोपरम-रूपायां स्वप्नावस्थायां, सः 'जीवः' प्राणानां धारयिता विविध-वासना-वासितः 'सुख-दुःख-भोक्ता' सुख-दुःखयोः प्रसिद्धयोः 'भोक्ता' अहं सुखी, अहं दुःखीत्येवंरूप-प्रत्ययवान् सुख-दुःख भोक्ता।

तत्र संसारस्य दृष्टान्तेन वास्तवत्वं वारयति, 'स्वमायया' स्वस्य तत्तद्देहाभिमानिनः माया अज्ञानं, विपरीत-ज्ञानञ्च,

तथा 'कल्पितविश्वलोके' कल्पिते वासनारूपे विश्वस्मिन् रथ रथयोगे पथादिके निखिले लोके भुवने जने च कल्पितविश्वलोके। स्वप्ने यथा, तद्वज्जागरणेऽपीत्यर्थः। 'सुषुप्तिकाले' आनन्दभोगावसरे 'सकले' निखिले 'विलीने' विशेष-विज्ञाने स्वकारणे लयं गते; एतावत् सुषुप्तौ मोक्षे च समम्; इयांस्तु विशेषः, 'तमोऽभिभूतः' अज्ञानावृतः 'सुखरूपं' स्वस्वरूपं स्वयं प्रकाशमानम् आनन्दात्म-स्वरूपम् 'एति' गच्छति ॥१३॥

पुनश्च आनन्दात्म-स्वरूपं प्राप्य भूयोऽपि 'जन्मान्तर-कर्म्मयोगात्' प्राग्भवीय—कर्मानुसारात् 'स एव' आनन्दात्म-स्वरूपं प्राप्त एव सुषुप्तिं गतः, न त्वन्यः, 'जीवः' प्राणविधारकः 'स्वपिति' स्वप्नावस्थां गच्छति। अथवा, सुषुप्तात् 'प्रबुद्धः' प्रबोधं जागरणं प्राप्तः भवतीति शेषः॥

इदानीं जीव-ब्रह्मणो रैक्यमाह, 'पुरत्रये' स्थूल-सूक्ष्म-ज्ञानाख्ये शरीरत्रये 'क्रीड़ति' विहरति, यश्च जीवः 'चकारः' एवकारार्थः, प्रसिद्धः परमात्मैव प्राणधारकः, 'ततस्तु' तस्मादेव जीवाभिपन्नः, न त्वन्यः, तस्मात् 'जातम्' उत्पन्नम्, 'सकलं' निखिलं 'विचित्रं' विविधकर्म्म-नाम-रूपं विश्वम्॥ १४॥

'आधारं' रज्जुरिव सर्पधारा-बलीवर्द-मूत्रितत्वादेः, सकलस्य विश्वस्याधारभूतम् 'आनन्दं' निरतिशयानन्द-स्वरूपम्, 'अखण्डबोधम्' आनन्दरूपत्वेऽपि स्वयं प्रकाशैकस्वभावम्। 'यस्मिन् अखण्डबोधे 'लयं' विनाशं 'याति' गच्छति, पुरत्रयञ्च व्याख्यातम्, च शब्दादन्यपि।

'एतस्मात्' पुरत्रयाधिष्ठानात् बुद्धेर्द्रष्टुः, 'जायते' उत्पद्यते, 'प्राणः' क्रियाशक्तिः, 'मनः' अन्तःकरणं ज्ञानशक्तिः, 'सर्वेन्द्रियाणि च' सर्वज्ञान-कर्म्मेन्द्रियाण्यपि, च शब्दाद्देहादिकमपि, 'खं' नभः, 'वायुः' नभस्वान्, 'ज्योतिः' धातुः,

'आपः' नीराणि, 'पृथिवी' भूमिः, 'विश्वस्य' निखिलस्य स्थावर-जङ्गमात्मकस्य प्राणिजातस्य 'धारिणी' विधारिणी ॥१५॥

इदानीं महावाक्यार्थमाह, 'यत्' प्रसिद्धं 'परम्' उत्कृष्टं 'ब्रह्म' बृहत् देश-काल-वस्तु-परिच्छेद-शून्यं 'सर्वात्मा' सर्व-प्राणिहृदिस्थितः, सर्वानन्यश्च, 'विश्वस्य' सर्वस्य कार्य्य-कारण-जातस्य 'आयतनम्' आधारभूतम्, 'महत्' प्रौढं सर्वाधार-त्वेन ; एवं 'सूक्ष्मात्' अणुपरिमाणात् 'सूक्ष्मतरं' महदप्यति-शयेन अणु, 'नित्यं' विनाशशून्यं 'तत्' उक्तं परं ब्रह्म 'त्वमेव' त्वदनुगतमेव न त्वन्यत्।

ननु तत् मत्तोऽन्यत्, अहन्तु तस्मादन्यः, मयि कर्तृ-त्वादिविशेषोपलम्भादित्यत आह, 'त्वमेव तत्' त्वं कर्त्ता भोक्ता अविद्यया, वस्तुतः परं ब्रह्मैव, न त्वन्यः ॥ १६ ॥

इदानीमेवं ज्ञाने फलमाह, 'जाग्रत्-स्वप्न-सुषुप्त्यादि-प्रपञ्चं, जाग्रत्-स्वप्न-सुषुप्त्यादयः उक्ताः, तदादयः विश्व-विराड़ादयः, त एव प्रपञ्चो जाग्रत्-स्वप्न-सुषुप्त्यादि-प्रपञ्चः तं, 'यत्' प्रसिद्धं स्वयं प्रकाशमानं 'प्रकाशते' प्रकाशयति। 'तत्' उक्तं स्वयं प्रकाशं 'ब्रह्म' सत्य-ज्ञानादि-लक्षणम्। 'अहं' ब्रह्मावगन्ता चिदानन्दात्मा, 'इति' अनेन प्रकारेण 'ज्ञात्वा' साक्षात् कृत्य 'सर्वबन्धैः' निखिलबन्धैः अहं ममाद्यैश्च सकारणैः 'प्रमुच्यते' प्रकर्षेण मुक्तो भवतीति ॥ १७ ॥

इदानीं सर्वस्मात् प्रपञ्चाद्वैलक्षण्यमाह, 'त्रिषु' जागरण-स्वप्न-सुषुप्तेषु 'धामसु' स्थानेषु 'यत्' प्रसिद्धं 'भोग्यं' स्थूलं प्रवि-विक्तानन्दरूपं 'भोक्ता' विश्व-तैजस-प्राज्ञाख्यः, 'भोगश्च' स्थूल-प्रविविक्तानन्द-भोगोऽपि, चशब्दादधिदैवादि-विभागोऽपि 'यत्' उक्तं त्रिधामं भोग्यादि-प्रपञ्चजातं, 'भवेत्' स्पष्टम् ; 'तेभ्यः' त्रिधामादिभ्यः 'विलक्षणः' विपरीतलक्षणः, वैलक्षण्यमाह,

'साक्षी' स्वाध्यः तस्य विश्वस्य द्रष्टा 'चिन्मात्रः' चिदेकरसः 'अहं' अहं-प्रत्यय-व्यवहार-योगः 'सदाशिवः' कैवल्यात्मा नित्य-कल्याणरूपो महेश्वरः ॥ १८ ॥

प्रपञ्च-वैलक्षण्यं स्वस्योक्त्वा इदानीं जगज्जन्मादि-कारणत्व-मपि स्वस्याह, 'मय्येव' मत्त एव ब्रह्माभिन्नात्, न त्वन्यस्मात्, 'सकलं' निखिलं भूत-भौतिक-प्रपञ्चजातं 'जातम्' उत्पन्नम्; 'मयि' ब्रह्माभिन्ने 'सर्वं' निखिलं विश्वं 'प्रतिष्ठितं' प्रकर्षेण स्थितिमाप्तम्; 'मयि सर्वं' व्याख्यातम्; 'लयं याति' नाशं गच्छति; 'तत्' तस्मात् सर्वजगज्जन्म-स्थिति-ध्वंस-कारणात् 'ब्रह्म' बृहत् देश-काल-वस्तुपरिच्छेद-शून्यम् 'अद्वयं' ज्ञातृ-ज्ञेयादि-विभाग-शून्यम् 'अस्मि' भवामि। 'अहं' ब्रह्मणो-ऽवगन्ता ॥ १९ ॥

'अणोः' अणुपरिमाणात् 'अणीयान्' अतिशयेनाणुः 'अह-मेव' जगत्कारणम् अहंप्रत्यय-व्यवहारस्य योग्यः, न त्वन्यः, 'तद्वत्' यथा अणुः, तथा महान् सर्वस्मादभ्यधिकः, अहं व्याख्यातम्; अणीयसां महताञ्च कारणानां यथा भेदः, तथा तत्रापि स्यादित्यत आह, 'विश्वं' सविद्यं भूत-भौतिकं प्रपञ्च-जातम्, अहं व्याख्यातम्; अस्य तत्त्वाभेद-राहित्ये स्वस्मादप्य-भेदः स्यादित्यत आह, 'विचित्रं' विविधं स्वयमनन्तभेदव-दित्यर्थः।

तदभिन्नस्य तस्य तत्राप्याधुनिकत्वं स्यादित्यत आह, 'पुरातनः' चिरन्तनः आधुनिक-सर्पधारा-बलीवर्द-मूत्रितत्वाद्य-भिन्ना चिरन्तनी रज्जुरिव, अहं व्याख्यातम्; 'पुरुषः' परि-पूर्णो वस्तुतः, अहं व्याख्यातम्; अविद्यादशायाम् 'ईशः' नियन्ता, नियन्तृत्वे सामर्थ्यमाह, 'हिरण्मयः' ज्ञानप्रचुरः तत्प्रधानो वा

आदित्यस्थः सर्वकार्य्यकारणात्मा, अहं व्याख्यातम्, शिवरूपं, मङ्गल-स्वरूपं ब्रह्म 'अस्मि' भवामि ॥ २० ॥

इदानीं सर्वकारण-हीनस्य सर्वज्ञतां स्वस्याह, 'अपाणि-पादः' पाणि-पाद-हीनः, अहं व्याख्यातम्; 'अचिन्त्यशक्तिः' दुर्बोधशक्तिः, एवम्भूतोऽपि जवनो गृहीतवेग इत्यर्थः, 'पश्यामि' अवलोकयामि, सः 'अचक्षुः' चक्षुषा हीनः, सः अचक्षुः द्रष्टा, 'शृणोमि' श्रवणं करोमि 'अकर्णः' कर्णरहितः, अहं व्याख्यातम्; 'विजानामि' विविधं प्रपञ्चजातम् अवगच्छामि, 'विविक्तरूपः' बुद्ध्यादि-पृथग्-रूपः, 'न चास्ति' नास्त्येव, 'वेत्ता' कर्म्म-कर्त्तृ-भावनावगन्ता, 'मम' आनन्दात्मनो भेदरहितस्य 'चित्' स्वयं प्रकाश-बोध-स्वभावः 'सदा' सर्वदा, अहं व्याख्यातम् ॥ २१ ॥

इदानीं सर्वशास्त्र-प्रतिपाद्यस्यात्मनः सर्वविकारभावं दर्शयति, 'वेदैः' ऋगादिभिः 'अनेकैः' बहुभिः, अहमेव व्याख्यातम्; 'वेद्यः' प्रतिपाद्यः; 'वेदान्तकृत्' वेदान्त-सूत्रकृत् वेदव्यासरूपः, 'वेदविदेव च वेदान्तकृतो विशेषणम्; वेदानां साङ्गानां साङ्गविद्या-स्थानानां वेत्ता वेदवित् स एव, न त्वन्यः, चशब्दादनेकतपःसम्पन्नश्च, अहं व्याख्यातम्; अनेन विभूतिमत्सत्त्वेष्विदमिव प्रधानमित्युक्तम्। 'न पुण्य-पापे' मम स्पष्टम्; न स्त इति शेषः; 'नास्ति नाशः' विनाशो न विद्यते ममेत्यनुषङ्गः; 'न जन्म' जनिः न मम अस्तीत्यनुषङ्गः; 'देहेन्द्रिय-बुद्धिः' देहश्च इन्द्रियाणि च बुद्धयश्च देहेन्द्रिय-बुद्धिः 'नास्ति' न विद्यते, ममेत्यनुषङ्गः ॥ २२ ॥

'न भूमिरापो मम' पृथिवी सोदका मम नास्ति इत्यनुषङ्गः; 'वह्निः' प्रसिद्धः 'नास्ति' न विद्यते, ममेत्यनुषङ्गः; 'न चानिलो मेऽस्ति' वायुरपि मम न विद्यते; चकारात् वायवीयं कार्य्य-

मपि; 'न चाम्बरञ्च' आकाशमपि मम नास्तीत्यर्थः; 'चकारौ' आकाशकार्य्य-तद्व्यतिरिक्तोक्तानुक्त-भावार्थौ। 'एवम्' उक्तप्रकारेण 'विदित्वा' साक्षात्कृत्य 'परमात्मरूपम्' उत्कृष्टानन्दात्मरूपम्, 'गुहाशयं' बुद्धौ शयानं 'निष्कलं' निर्गत-प्राण-श्रद्धा-खं-वायु-ज्योति-रापः-पृथ्वीन्द्रिय-मनोऽन्नवीर्य्य-तपो-मन्त्र-कर्म-लोकनामाख्यकलः तम्, 'अद्वितीयं' सजातीय-विजातीय-वस्तु-शून्यं, 'समस्तसाक्षिं' समस्त-साक्षिणं सर्वद्रष्टारं, 'सदसद्विहीनं' भावाभाव-विवर्जितम्। तदेव निरवद्यं गच्छतीत्याह, 'प्रयाति शुद्धं परमात्म-रूपं' स्पष्टम्॥ २३॥

एवम्भूतं परमात्मानं प्रतिपत्तुमशक्तस्य अशुद्धान्तःकरणस्य अन्तःकरण-शुद्ध्यर्थमाह, 'यः' प्रसिद्धः मुमुक्षुः अनुत्पन्न-साक्षात्कारः, 'शतरुद्रियं' नमस्ते रुद्र इत्यादि रुद्राध्यायम् 'अधीते' पठति 'यथाशक्ति' नित्यं, 'सः' शतरुद्रियाध्यापकः 'अग्निभिः' श्रौतैः स्मार्त्तैः पवित्रीकृतः 'पूतो भवति' स्पष्टम्; 'सुरापानात्' मदिरापानात् महापातक-दोषात् 'पूतो भवति' स्पष्टम्; 'ब्रह्महत्यात्' ब्रह्महत्यायाः ब्रह्महत्यारूपात् महापातक-दोषात् 'पूतो भवति' स्पष्टम्; 'कृत्याकृत्यात्' कृत्यं करणीयं बुद्धिपूर्वकं पापम्, 'अकृत्यम्' अबुद्धिपूर्वकं पापं, कृत्यम् अकृत्यञ्च कृत्याकृत्यं, तस्मात्, पूतो भवतीति स्पष्टम्; 'तस्मात्' शतरुद्रियाध्यापनात् अविमुक्तविरुद्धत्वेन मुक्ताः विमुक्ताः पशवः, तेभ्यो व्यतिरिक्तः 'अविमुक्तः' पशुपतिः, तम् 'आश्रितो भवति' स्पष्टम्; 'अत्याश्रमी' अत्याश्रमः उक्त-परमहंस-लक्षणः स यस्यास्तीति, सोऽत्याश्रमी, 'सर्वदा' निरन्तरम्, 'सकृद्वा' कदाचिद्वा दिवसे दिवसे एकवारमित्यर्थः।

'अनेन' रुद्राध्यायजपेन 'ज्ञानम्' अहं ब्रह्मास्मीति

साक्षात्काररूपम् 'आप्नोति' प्राप्नोति 'संसारार्णव-नाशनं' संसार-सागर-शोषणम् ।

यस्मात् रुद्राध्यायजप: अशेष-पाप निर्हरणद्वारा ब्रह्मज्ञान-हेतु:, 'तस्मात्' तत: 'एवम्' उक्तेन प्रकारेण विनेतध्यान-रुद्राध्यायाध्ययनेन 'विदित्वा' साक्षात्कृत्य 'एनं' परमात्मानं 'कैवल्यं' केवलस्य आत्मनो भाव: कैवल्यं, तत् 'फलं' पुरुषाभि-लाष-विषयं सर्वपुरुषार्थ-समाप्तिभूतम् 'अश्नुते' प्राप्नोति, 'कैवल्य' फल-मश्नुते' व्याख्यातम् । पदाभ्यास: उपनिषत्-समाप्त्यर्थ: ।

इति श्रीपरमहंस-परिव्राजकाचार्य्यानन्दात्म-पूज्यपाद-शिष्यस्य श्रीशङ्करानन्द-भगवत: कृति: कैवल्योपनिषद्दीपिका समाप्ता ।